गीतानन्तरसम्



अनन्तरसः श्रीकृष्णचैतन्यः
श्रीमतीविष्णुप्रिया च

गीतानन्तरसम्

(शान्तिपुर-शचीखण्डम्)

(चतुर्थम्)

प्रमाता

बटोही झा

(प्रवाचकः)

राष्ट्रिय-संस्कृत-संस्थान-

(मानित-विश्वविद्यालयः)

लखनऊ-परिसरः

गोमती-नगरम्

लखनऊ

© सुरक्षितम्

सुमेधा-प्रकाशनम्
३/२१४, विकासनगरम्
लखनऊ
दूरभाषः - २७६६३१६

प्रकाशन-तिथिः
महाशिवरात्रिः
२००४ ई.

मूल्यम्-

मुद्रक : शिवम् आर्ट्स, २११, पाँचवी गली, निशातगंज, लखनऊ-२२६ ००६
फोन : (०५२२) २७८२३४८, २७८२१७२, फैक्स-(०५२२) २७८१५७६

अनुक्रमणिका

१.	मङ्गलानुस्मृतिः	१
२.	प्राक्कथनम्	३
३.	प्रभोर्वृन्दावनगमनाद् भक्तानां विरहः	५
४.	जनन्या दर्शनम्	१४
५.	श्रीविष्णुप्रियायाः संन्यासिस्वामिदर्शनम्	२५
६.	वृन्दावन-पथे	३६
७.	श्रीरूपसनातनौ	४३
८.	रघुनाथदासस्य प्रभुदर्शनम्	५१
९.	पुर्यां प्रत्यागमनं तथा वृन्दावनस्य पुनर्यात्रा	६२
१०.	श्रीवृन्दावनादितीर्थानां दर्शनम्	७२
११.	पठानेभ्यः प्रेमदानं तथा प्रयागे प्रत्यागमनम्	८२
१२.	श्रीरूपस्य प्रयागे महाप्रभुदर्शनम्	९१
१३.	महाप्रभु-वल्लभाचार्यः	१०१
१४.	महाप्रभुवल्लभाचार्यस्तथा महाप्रभुगौराङ्गदेवः	११६
१५.	रूपस्य प्रस्थापनं तथा प्रभोः काश्यामागमनम्	१२५
१६.	श्रीसनातनस्य कारागृहान्मुक्तिस्तथा काश्यां प्रभुदर्शनम्	१४१
१७.	श्रीसनातनस्याऽद्भुतं वैराग्यम्	१५१
१८.	श्रीसनातनाय शास्त्रीयंशिक्षा	१५९
१९.	स्वामी प्रकाशानन्दो मनसा भक्तोऽभवत्	१७५
२०.	श्रीप्रकाशानन्दस्यात्मसमर्पणम्	१९९
२१.	श्रीसनातनो वृन्दावनकृते तथा महाप्रभुः पुरीकृते	२१०
२२.	प्रभोः पुर्यां भक्तैः पुनर्मिलनम्	२१६
२३.	नीलाचले श्रीसनातनः	२३१
२४.	श्रीरघुनाथस्य गृहत्यागः	२४४
२५.	श्रीरघुनाथदासस्योत्कटवैराग्यम्	२६१

परिचयः

गीतानन्तरस-तृतीयखण्डसमर्पणेन कतिपयगुरुजनसहृदय-
सुधीवराणामौदार्यसौहार्दशुभाशंसनपत्रमधिगतम् । तथाहि—

नवदिल्लीस्थ-राष्ट्रियसंस्कृतसंस्थान-मानितविश्वविद्यालयस्य
प्रथमकुलपतिमहानुभावानां विलक्षणविचक्षणमतिमतां
श्रीमद्वेम्पटिकुटुम्बशास्त्रिपादानाम्

तार : संस्थान
प्रो० वेम्पटि कुटुम्ब शास्त्री
निदेशक
राष्ट्रिय संस्कृत संस्थान
(मानव संसाधन विकास मंत्रालय, शिक्षा विभाग
भारत सरकार के तत्त्वावधान में संचालित)
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी,
नई दिल्ली-110058

Gram : SAMSTHAN
Prof. V. Kutumba Sastry
DIRECTOR
RASHTRIYA SANSKRIT SANSTHAN
(under M/o Human Resource Development
Deptt. of Education, Govt. of India)
56-57, Institutional Area, Janakpuri
New Delhi-110058

D. O. No.....
अ.सं. क्रमांक RSKS/VC-3/2002-2003/146

Date.....
दिनांक 15.5.2003

Dear Pt.Jha,

I am glad to receive the book entitled "Occtanantrasam" sent by you. It is a great pleasure to note your academic pursuits. I wish that you will bring out many more such books to enrich human knowledge and wisdom.

With regards,

Sincerely yours,
(V.KUTUMBA SASTRY)
15.5.03

Shri Ratnhi Jha
Lectrer
Rashtriya Sanskrit Sansthan
Lucknow Campus
Gomti Nagar
Lucknow

❋

Dr. GVR Krishna Murty,
M.A., Ph.D.,
Reader, Dept of Sahitya.

Rashtriya Sanskrit Vidyapeeth
(Deemed University)
Tirupati – 517507

Dt. 31-1-2003

स्वस्ति श्रीमतां सकलभवतां सहृदयशिरोमणीनां कविसत्तमानां
वैदुष्यावतां साहित्यवल्लभानां जयेहीत्याह्वोदयानां करुणाकमलयोः
सादरं सश्रद्धं विनतसजनानेकजनिः कार्तिरूपमावहन् विनिवेदयति –

चारुविहार आसुर महीसुरभूसुर मैथिलाबनौ
पण्डितभाषिणी - मधुबनी नगरीस्थ स्वशुभनामके।
लब्धजन्मनेः हि पाण्ड्यभवदीय सुगीतरसं सदापिबन्
माधवपादपङ्कजरजः परिपूरित मन्यमस्तकः ॥१॥ आर्यम्

आगतोऽस्म संकलितसप्तशती हरिनाम पुस्तकः
लक्ष्मणभूपतीन्द्रपुरि लब्धयशा हरिभक्तिचिन्तकः।
श्रीयुत हर्षनाथ सत्यवीरसुचन्द्रक शान्तिशिक्षकः
गीतचयं सदखिल माप्यलभ्यान् इत्यचन सुराजताम् ॥२॥

पुण्यश्री शुकदेव गीतलहरी ज्ञानामृतं ज्ञानमयम्
धन्यश्री जयदेव गीतलहरी गोविन्द नामामृतम्।
मान्यश्री पतिकार्य मांचलहरी सत्काव्यचिन्तामणिः
गीतानन्तरसप्रबन्धनिचयो जीयात्सदा: शाश्वतीः ॥३॥

गीतानन्तरसं निपीय भवतः मर्त्योऽप्यमर्त्यो भवेत्
नूनं यत्परमात्मनः प्रभुहरेश्चैतन्यधारामयीम्।
योगिश्री प्रभुदेन वाङ्मयलहरीं जीवणिभाषामयीम्
श्रव्यां गीतमयीं सुधामृतमयीं पीत्वापि मर्त्योनु किम् ॥४॥

गीतानन्तरसामृताखिललहरी धारान्वयीप्लावितः
पारे भक्ति च नन्दनन्दनवचो गीतासु पारं गतः।
शेषानन्तपदं गतः प्रभुपदं ज्ञानैकसारं रसं
पाथं पाथसहो भवेत्यहृदयः सायुज्यमुक्तिं गतः ॥५॥

भवतां विनीतः
GVR कृष्णमूर्तिः

तिरुपतिस्थ-राष्ट्रियसंस्कृतसंस्थानमानितविश्वविद्यालय-साहित्यविभागवरिष्ठप्रवाचक-अपरहृदयसहृदयकविवर-श्रीयुत-जी.एस.आर. कृष्णमूर्तिमहोदयानाम्-

स्वस्ति श्रीमतां तत्रभवतां सहृदयशिरोमणीनां कवितल्लजानां संख्यावतां साहितीवल्लभानां बटोहीझामहोदयानां करणकमलयोः सादरं सश्रद्धं विततसततानेकनतिः कार्तज्ञ्यमावहन् विनिवेदयति -

चारुबिहारभासुरमहीसुरभूसुरमैथिलावनौ
पण्डितधारिणी-मधुवनीनगरीस्थखराजनामके।
लब्धजने ! हि पान्थ ! भवदीयसुगीतरसं सदा पिबन्
माधवपादपङ्कजरजःपरिपूरितधन्यमस्तकः ।। १।। आसम् ।।

भागवतोऽद्य संकलितसप्तशतीहरिनामपुस्तकः
लक्ष्मणभूपतीन्द्रपुरि लब्धयशा हरिभक्तिचिन्तकः।
श्रीयुतहर्षनाथसदमीरसुचन्द्रकशास्त्रिशिष्यकः
गीतचयं सदखिलकाव्यचयान् रचयन् सुराजताम् ।। २ ।।

पुण्यश्रीशुकदेवगीतलहरीज्ञानामृतं द्रावयन्
धन्यश्रीजयदेवगीतलहरीगोविन्दनामामृतम्।
मान्यश्रीपथिकार्य ! भावलहरीसत्काव्यचिन्तामणिः
गीतानन्तरसप्रबन्धनिचयो जीयात्समाः शाश्वतीः ।। ३ ।।

गीतानन्तरसं निपीय भवतः मर्त्योऽप्यमर्त्यो भवेत्
नूनं यत्परमात्मनः प्रभुहरेश्चैतन्यधारामयीम्।
योगिश्रीप्रभुदत्तवाक्यलहरीं गीर्वाणभाषामयीम्
श्रव्यां गीतमयीं सदामृतमयीं पीत्वापि मर्त्यो नु किम्?।। ४ ।।

गीतानन्तरसामृताब्धिलहरीधारात्रयीप्लावितः
पारेभक्ति च नन्दनन्दनवचोगीतासु पारं गतः।
शेषानन्तपदं गतः प्रभुपदं ज्ञानैकसारं रसं
पायं पायमहो भवेत्सहृदयः सायुज्यमुक्तिं गतः ।। ५ ।।

भवतां विनीतः
जी.एस.आर. कृष्णमूर्तिः

आदरणीयसुधीवरसमुदारहृदय–श्रीयुतसोमदत्तशुक्लमहाशयानाम्–

S. D. Shukla
PRINCIPAL (Retd.)
Kendriya Vidyalaya A. M. C.
Lucknow-226002
Tel. : 51523

Residence :
B-3/437, Vishal Khand
Gomti Nagar, Lucknow-226010
Tel. : 391247
Postal Address :
P. O. No. 2, Gomti Nagar
Lucknow-226010

Date 07.7.2003

गीतानन्तरसम्

प्रशस्तिः

रससिद्धकवीश्वरेण डॉ० वटेश्वरीभामहोदयेन विरचितं सकलपापहरं पवित्रतमं गीतानन्तरसम् (तुरीयं चैतन्यखण्डम्) पुण्यतमं तृतीयं पुष्पमिदं कस्य मनो न हरति। मय्यपि भक्तिरसप्लावितं गीतानन्तरसमास्वादितम्।

संस्कृतगीतपद्यैरुपवर्णितं ग्रन्थरत्नमिदं सहृदयानां पाठकानां मनांसि आचन्द्रार्कं रसप्लावितानि करिष्यतीति मे दृढो विश्वासः। पठन्त्वेकेदं कवयः पाठकाश्च गीतकाव्यजगति गीतगोविन्दानन्तरं काव्यत्वमिदं सर्वश्रेष्ठं गीतकाव्यं सर्वश्रेष्ठं प्रबन्धं च कथयिष्यन्ति नात्रास्मिन् कथने कोऽप्यपवादः। काव्येऽस्मिन् सकले कवेर्मौलिकचिन्तनं परिलक्षितं भवति।

संस्कृतगीतकाव्यजगति कविपुङ्गवाः डॉ० वटेश्वरीभामहोदयाः मार्गदर्शकाः प्रेरणादायकाः प्रशंसनीयाः अभिनन्दनीयाश्च वर्तन्ते। महाकवेरस्य रचनाकौशलं दिनं दिनं ख्यातिं लभेत इति कामये।

सोमदत्त शुक्लः
(लक्ष्मणपुरवास्तव्यः)

❄

अर्वाचीनसंस्कृतपत्रिका-प्रधानसम्पादक-प्रख्यातलब्धप्रतिष्ठकविवर-सहृदयधुरीण-समादरणीयश्रीयुतरमाकान्तशुक्लमहानुभावानां निजपत्रिकाप्रकाशित-गीतानन्तरस-परिचयः -

श्रीप्रभुदत्तब्रह्मचारिणा **'चैतन्य-चरितावली'**ति नामको ग्रन्थो हिन्दीभाषायां विरचितोऽस्ति यत्र गौराङ्गमहाप्रभोः श्रीचैतन्यस्य चरितं निबद्धम्। अस्य ग्रन्थस्य प्रकाशनं गीताप्रेसगोरखपुरतो जातम्। लखनऊनगरस्थ-राष्ट्रियसंस्कृतसंस्थानपरिसरे अध्यापनं कुर्वाणेन श्रीमता पं० बटोहीझा-महाभागेन विद्वद्वरश्रीअनन्तलालठाकुर-महाभागस्य प्रेरणया गीतैः पद्यैश्च तस्य **'गीतानन्तरसम्'**इतिशीर्षकेण संस्कृत-रूपान्तरं कृतम्। ग्रन्थस्य तृतीयं खण्डं 2002 तमे ईशवीये वर्षे प्रकाशितम्। ग्रन्थकर्त्ता स्वयं निवेदयति-

श्रीमन्महाप्रभुपवित्रचरित्रधारा भागीरथीह विततता प्रभुदत्तसद्भिः ।
संसारसागरतरंगविमूर्च्छितान्तश्चैतन्यदा सहृदयस्य न कस्य साधोः ॥

(श्लोकसंख्या 3082)

ग्रन्थेऽस्मिन् कविना गीतीनां किञ्च शार्दूलविक्रीडित-वसन्ततिलकादि-वर्णवृत्तानां प्रयोगः कृतः। प्रबन्धरचनेयं गीतिमुक्तकैर्विलसितास्ति। माधुर्यभक्तिमयी गीतिः सर्वप्रसङ्गानामादौ दत्ता या संगीतलयानुसारं गातुं शक्यते। गीतिषु अन्त्यानुप्रासस्य शतप्रतिशतपालने ग्रन्थकर्ता नास्ति अभिनिवेशी। दिङ्मात्र-मुदाहरणम्-

शरणं यातु मनश्चैतन्यम् ।
संसृतिसागरतरणं वाञ्छसि यदि नैष्कर्मस्थित्या
श्रीसंकीर्तनरसपीयूषं ज्ञातुं यदि चेतयसे ।
सत्प्रेमाम्बुधिवितरणलीलामिह कामयसे लब्धुम्
तत्कृष्णचैतन्यशशिशीतलचरणशरणमाश्रयताम् ॥ (पृ० 306)

प्रसादगुणोपेता भाषा प्रायः सर्वत्र पदं दधाति।

ये संस्कृतपद्यैर्गीतिभिश्च रचितं श्रीचैतन्यमहाप्रभोश्चरितमास्वादयितुमिच्छन्ति तैरवश्यं **'गीतानन्तरसम्'** पठनीयं श्रोतव्यं च। गीतोऽनन्तरसः श्रीगौराङ्गमहाप्रभु-र्यस्मिंस्तत् काव्यमस्ति-गीतानन्तरसम्। आचार्यबटोहीझामहाभागोऽस्य ग्रन्थस्य रचनार्थमभिनन्द्योऽस्ति।

विदुषामाश्रवः

'रमालयः' आर-६, वाणी-विहारः,
नयी दिल्ली-११००५९

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

परमपूज्य-गुरुवर-वयोवृद्ध-पण्डितवर-आचार्यप्रवर-सर्वशास्त्रपारङ्गत-लखनऊ-विश्वविद्यालय-प्राच्यविभागाध्यक्षचर-श्रीयुतरामनारायणत्रिपाठिवर्याणाम्-

बी - १२३२, इन्दिरानगर-लखनऊ

६-२-२००४

बी- १२३२, इन्दिरानगर
लखनऊ
६-२-२००४

दुःखाशंसनम्

श्रीमाहिनीधरोदयं द्विजकुलप्रकुंठ धीरराघवनामः
अद्यापि स्मृतिपथे वट एव समये मीतलस्यैवाशीलः।
संस्कारमन्वयेयन् स्वो सति पाथि मनसाहू भाषाऽनर्घणाम
लोपादूः श्रीवटोरी मधुमितवचनो रक्षते ब्राह्मसभ्ये ॥ १

नत्वेदं कविकर्म भूतविधेः स्थूलं गुणालङ्कृतं
श्रीगौराङ्गमहाप्रभोः सुचरितैः पूतं विरम्भीश्वरम्।
गीर्वाणस्य दलामिवेयमुदितं दत्तं च भाषान्वितं
लोकोद्धारिति मनो मम मूरविहूनो दीक्षाधुना मामकः ॥ २

मेदभेदोऽयमेको प्रतिगतिकलनोऽस्मिन्यशार्थं प्रयोज्या
पत्नवा वादांस्त्र प्रथमं कलुहविरहितो दर्शितोऽस्तुक्रियत्वम्।
वेदे दास्ते पुरस्के पुरपरमहितुं चिन्तिता ये च मार्गाः
लोकूपास्तिर्हरीणा प्रतिजनसुलभाजुनादेवेन साधी ॥ ३

नजोपास्तावुपास्यं शुभमतिसरलं कीर्तनं कृष्णनाम्नां
यस्याचारः प्रचारे निरविलजनकुले स्वीयदेशे विदेशे।
राधश्चास्मिन् मयो नो समपविषमभूसूलसंभारबाधा,
निर्विघ्नः साधुपन्था साधिधरणितलं कृष्णभक्तेन भव्या ॥ ४

दृष्टं दृष्टं मुखाब्जं प्रभुचरितमयं लोकलालानुकूलं
नत्वं भव्योपयुक्तं विरलिविलसितं ध्यानयुक्तं विचित्रम्।
दत्ता काव्यस्य कर्त्रे प्रमुदितमनसा साधुवादान् सभक्तान्
आशासे भाविकाले भवतु कविकुली रामनारायणोऽहम्।

विदुषो वशंवदः
रामनारायणत्रिपाठी

शुभाशंसनम्

श्रौत्रार्हन्तीचणोऽयं द्विजकुलमुकुरः शारदाराधनाक्तः
ऊही सार्धं विमुग्धो वट इव समये शीतलश्चोष्णशीलः।
संज्ञामन्वर्थयन् स्वां सति पथि गमनाद् भाषयाऽन्वर्थनामा
झोपाख्वः श्रीबटोही मधुमितवचनो राजते प्राज्ञमध्ये ।। १

तस्येदं कविकर्म वृत्तविविधैः स्यूतं गुणालङ्कृतं
श्रीगौराङ्गमहाप्रभोः सुचरितैः पूतं विरक्तिप्रदम्।
गीतानन्तरसाभिधेयलसितं रस्यं च भावान्वितं
मोमोदीति मनोमयूरविहगो वीक्ष्याधुना मामकः ।। २

भेदाभेदोभयेभ्यो मतिगतिवरतोऽचिन्त्यशब्दं प्रयोज्य
त्यक्त्वा वादांश्च पूर्वान् कलहविरहितो दर्शितोऽचिन्त्यवादः।
वेदे शास्त्रे पुराणे परपदमटितुं चिन्तिता ये च मार्गाः
तेषूपास्तिर्गृहीता प्रतिजनसुलभाऽनन्तदेवेन साध्वी।। ३

तत्रोपास्तावुपात्तं शुभमतिसरलं कीर्तनं कृष्णनाम्नां
यस्याचारः प्रचारो निखिलजनकृते स्वीयदेशे विदेशे।
रायश्चास्मिन् व्ययो नो समयविषयभूपूतसंभारबाधा,
निर्दिष्टः साधु पन्था अधिधरणितलं कृष्णभक्तेन भक्त्या ।। ४

दर्शं दर्शं सुकाव्यं प्रभुचरितमयं लोककालानुकूलं
नव्यं भव्योपयुक्तं विरतिविलसितं ज्ञानयुक्तं विचित्रम्।
दत्त्वा काव्यस्य कर्त्रे प्रमुदितमनसा साधुवादान् प्रभूतान्
आशासे, भाविकाले भवतु कविकृती, रामनारायणोऽहम्।

विदुषां वशंवदः
रामनारायणत्रिपाठी

❄

ओ३म्

卐 वाग्देवता दीव्यतु 卐

ओ३म्

अम्बिका प्रसाद त्रिपाठी
एम० ए०, व्याकरणाचार्य्य
सेवा निवृत्त प्रवक्ता
देव विद्यालय इण्टर कालेज
तरौली, फैजाबाद (उ. प्र.)

आवास-
ग्राम- मनऊ का पुरवा
पत्रालय- अगई
जनपद-प्रतापगढ़
पिन- 230303
दिनांक-

प्रियाः सरवाराः !

अहो ! अद्यापि न विस्मृतिमुपयाति दिवसोऽसौ यदा भवन्नोदीयानां द्विवेदि महाभागानां कन्यकोद्वाहे सान्ध्ये वेलायां द्वारपूजनानन्तरं प्रथमाकारं भवद्भिर्मिलितवानस्मि । ततः सामुदायिक-केन्द्रं यावद् भवद्भिः साकं पदातिरेवागच्छन् सरव्यभावमुपागतोऽस्मि । अपेरद्युच्च सामुदायिककेन्द्रे स्वयमागतैर्भवद्भिरर्पितं "गीतानन्द रसाम्" मे हस्तयोः पुरीचैतन्यस्वरूपम् तत्कलेऽधश्छायायाम् । तत्रैव भवन्मुखा-रविन्दप्रस्फुटितानि कानिचिन्मकरन्दपद्यानि स्वास्वदता मया कोऽपि-लब्धो महदानन्दोऽन्तर्भूयत ।

गीतानन्दरसस्य पानमेव सार्थक्यं मन्यमानेन मयाऽकण्ठमार्तवद्-बहुशः कातरेण पार्थनया नानुश्रुता वृत्तिः । तद्विषये किञ्चिद्वक्तु-मधारयन्त्यपि मे वाग्यद्धार्ष्ट्यं कृतवती तदेव लेखन्या —— लिखयत इदानीमिति.

काव्यमिदं भक्तिरसप्रधानं नानाछन्दोभिरलङ्कारैर्गेयपद्यैर्न-केवलं रसिकानां बुधानामपि तु शास्त्रीयसङ्गीतप्रियाणाञ्च हृदया-वर्जकम् । बहुशः कोऽस्मै सुभाषितपद्यानीदं काव्यं "सुभाषितरत्नमहोदधेरिव वर्तते तरामे मतौ ।

तदित्थं संस्कृतवाङ्मयस्य श्रियमभिवर्धयन्तः श्रीमन्तोऽपि भो महाभागाः कविवराः काव्यसर्जनपथेऽग्रे सरन्तः चिरं स्वास्थ्यं दीर्घमायुर्लभन्तामिति कामयेऽहम् ।

अपरञ्चान्ययोरपि रचयितयो: प्राप्तिं समीहे। पत्रस्य प्राप्तिस्वीकृती सूचनीये।

अभिनन्दनात्मिका पद्यचतुष्पदिकापि प्रस्तूयते —

[चतुष्पदिका]-श्लोका: —

हे हे कवीही (कवीन्द्रान्) तव काव्यमेतद्
भूयादलं भूषयितुं कविं त्वाम्।
वाणी यथा भारविमर्थगुर्वी°
सुश्लेषमा श्रे कविकालिदासम् ॥१॥

श्रीकृष्णपादेऽर्पितमानसानाम्
भक्तिप्रदं भागवतं पुराणम्।
श्रीरामपादाम्बुजषट्पदानां
रामायणं ह्लादकरं बिभर्ति ॥२॥

श्रीमद्कवीही कविना तमामं
सृष्टं हि काव्यं जयदेवपौल्याम्।
श्रीगीतगोविन्दतयानुसारी
राराज्यतांमानसि भावुकानाम् ॥३॥

गीतानन्दरसं सुधासुमधुरं चैतन्यदेवप्रभो: —
चारित्र्यं विमलम्भरद्धृदि कवौ जाले भ्रमच्चेतसाम्।
तीर्थीनां बहुधा: कथानकयुतम्माहात्म्यमुद्घाटयद्
यायावारिव कौ प्रचारमनिशं वर्षेत्प्रभामेन्दवी म् ॥४॥

12-12-03

(अभिनन्दनप्रसाद उपाध्याय)

सम्माननीय-आचार्यवर-कविसहृदयवर-श्रीयुक्तअम्बिकाप्रसादत्रिपाठिपादानाम्-

प्रियाः सखायः !

अहो ! अद्यापि न विस्मृतिमुपयाति दिवसोऽसौ यदा भवन्नेदीयानां द्विवेदिमहाभागानां कन्यकोद्वाहे सान्ध्यवेलायां द्वारपूजनानन्तरं प्रथमवारं भवद्भिर्मिलितवानस्मि। ततः सामुदायिककेन्द्रं यावद् भवद्भिः साकं पदातिरेवागच्छन् सख्यभावमुपागतोऽस्मि। अपरेद्युश्च सामुदायिककेन्द्रे स्वयमागतैर्भवद्भिरर्पितं "गीतानन्तरसम्" मे हस्तयोः पुरीचैतन्यखण्डम् तरुतलेऽधश्छायायाम्। तत्रैव भवन्मुखारविन्दप्रस्फुटितानि कानिचिन्मकरन्दपद्यानि स्वास्वदता मया कोऽप्यलभ्यो लब्धानन्दोऽन्वभूयत।

गीतानन्तरसस्य पानमेव सार्थक्यं मन्यमानेन मयाऽकण्ठमापीतम्-बहुशः कालेन पायं पायं नानुभूता तृप्तिः। तद्विषये किञ्चिद् वक्तुमपारयन्त्यपि मे वाग्यद्धाष्ट्यं कृतवती तदेव लेखन्या लिख्यत इदानीमिति

काव्यमिदं भक्तिरसप्रधानन्नानाछन्दोभिरलङ्कारैर्गेयपद्यैर्न केवलं रसिकानां बुधाना,मपि तु शास्त्रीयसङ्गीतप्रियाणाञ्च हृदयावर्जकम्। बहुशः कोष्ठस्थैः सुभाषितपद्यांशैरिदं काव्यं "सुभाषितरत्नमहोदधिरिव वर्ततेतराम् मे मतौ। तदित्थं संस्कृतवाङ्मयस्य श्रियमभिवर्धयन्तः श्री "बटोही झा" महाभागाः कविवराः काव्यसर्जनपथेऽग्रेसरन्तः चिरं स्वास्थ्यं दीर्घमायुर्लभन्तामिति कामयेऽहम्।

अपरञ्चान्ययोरपि खण्डयोः प्राप्तिं समीहे। पत्रस्य प्राप्तिस्वीकृती सूचनीये।

अभिशंसनात्मिका पद्यचतुष्पदिकापि प्रस्तूयते—

(चतुष्पदिका)-श्लोकाः-

हे हे बटोही (बटोहिन्) तव काव्यमेतद्
भूयादलं भूषयितुं कविं त्वाम्।
वाणी यथा भारविमर्थगुर्वी
सुष्ठूपमा वै कविकालिदासम् ।। १ ।।

श्रीकृष्णपादेऽर्पितमानसानाम्
भक्तिप्रदं भागवतम्पुराणम्।
श्रीरामपादाम्बुजषट्पदानां
रामायणं ह्लादकरं विभाति ।। २ ।।

श्रीमद्बटोहीकविना ललामं
सृष्टं हि काव्यं जयदेवशैल्याम्।
श्रीगीतगोविन्दलयानुसारि
रराज्यतामात्मनि भावुकानाम् ।। ३ ।।

गीतानन्तरसं सुधासुमधुरञ्चैतन्यदेवप्रभोश्-
चारित्र्यं विमलम्भरद् हृदि कलौ जाले भ्रमच्चेतसाम्।
तीर्थानां बहुशः कथानकयुतम्माहात्म्यमुद्घाटयद्,
यायादारवि कौ प्रचारमनिशं वर्षत्प्रभामैन्दवीम् ।। ४ ।।

अम्बिकाप्रसादत्रिपाठी
१२.१२.०३

एतत्समस्तशुभाशंसनविधायिनामुदारमनसां सुमनसां कार्तज्ञ्यमावहति

तत्सौजन्याग्रही
बटोही

❄

संस्मृतिः

तिरुपतिस्थ-राष्ट्रियसंस्कृतसंस्थाने साहित्यविभाग-प्रवाचकप्रवरस्य सुहृद्वरस्य डॉ. कृष्णमूर्तिमहाशयस्य सौजन्यात् २००१ ईशवीये दिसम्बरमासे प्रथमतो मम तिरुपतियात्राऽभूत्। तत्र गीताजयन्तीतिथौ भगवच्छ्रीपतिबालाजीदर्शनक्षणे भगवन्तं प्रार्थितवान् - आगामिनि गीताजयन्तीदिवसे गीतानन्तरसस्य विमोचनं भूयादिति (तदानीं तृतीयखण्डस्यानुवादकार्यं प्रचलदासीत्)। श्रीपतिकृपया समये तदनुवादकार्यं तन्मुद्रणादिकं सम्पन्नम्। तृतीयखण्डस्यान्तिमेऽध्याये श्रीचैतन्यमहाप्रभुः पुरीतो वृन्दावनयात्रानिश्चयं करोति, तदाधारेण वृन्दावनमध्ये गीताजयन्तीतिथौ तृतीयखण्डस्य विमोचनकार्यसम्पादनस्य निश्चयं मनसि कृतवानासम्। तन्मध्य एवाऽखिलभारतीयप्राच्यविद्यापरिषदः स्वनामाङ्कितपत्रमधिगतम् - अखिलभारतीयप्राच्यविद्यापरिषदः एकचत्वारिंशत्तमस्य अधिवेशनस्याङ्गभूता पण्डितपरिषद् डिसेंबरमासस्य चतुर्दशदिनाङ्कमारभ्य षोडशदिनाङ्कं यावत् जगन्नाथपुरीनगरे सम्पत्स्यत इति। तत्राऽधिवेशने जनस्यास्यापि चोपस्थितिर्निर्देशिताऽऽसीदिति। समसमये भिन्नदेशयोः कार्यापतनाद् व्याकुलं ममान्तःकरणम्। परं, पूर्वं द्वितीयखण्डस्य विमोचनं श्रीजगन्नाथपुरीमध्ये श्रीशङ्कराचार्याश्रमे भगवत्पादश्रीनिश्चलानन्दसरस्वतीमहाराजकरकमलाभ्यां सम्पन्नमेवाभूत्, तत्तृतीयखण्डस्य विमोचनं पूर्वनिश्चयानुसारं वृन्दावन एव भवत्विति श्रीजगन्नाथक्षमायाचनां विधाय २००२ दिसम्बरमास-चतुर्दशदिनाङ्के वृन्दावनं प्राप्तवानहम्।

द्वितीयखण्डस्य संस्मृतिभागे पद्यमुपन्यस्तमस्ति -

गौरानुवादप्रियकार्यभारात्
कृतज्ञताभारभरान्न दूये।
गार्हस्थ्यधर्मी तु यथाऽसहायः
प्रकाशनद्रव्यनियोगतोऽत्र।।

प्रायोऽदःपद्यविलोकनेनैव-द्वितीयखण्डप्राप्त्यनन्तरं यदा पूज्यपादवृद्धगुरुवर-श्रीमदनन्तलालठाकुरमहानुभावेन दूरभाषवार्ता जाता तदा स निर्दिशति-अतः परं प्रकाशनकार्ये निजद्रव्यनिवेशो न कार्य इति। (अत्रेदमवधार्यम्-तन्महापुरुषसंस्पर्शप्रेरणयैव कार्येऽस्मिन्नेष जनो व्यापृतः) अहो ! निश्छलसरलमहापुरुषवाक्प्रभावः। अत्र भवभूतिसूक्तिः सुतरामनुभूता-

'गुरूणां समुदाराणां वाचमर्थोऽनुधावति'

तृतीयखण्डस्यानुवादकार्ये सम्पन्ने तन्मुद्रणप्रकाशनचिन्तां ज्ञात्वैको युवा ब्रह्मचारी महाराजस्तत्समस्तव्ययभारं गृहीतवान्, यत्संक्षिप्तपरिचयस्तच्चित्रेण सह तृतीयखण्डस्यान्तिमे पृष्ठे संलग्नोऽस्ति। स महात्मा गोस्वामिचन्द्रप्रकाशमहाराज-श्चित्रपरिचयप्रकाशनविषये प्रभूताग्रहेण मया सहमतो विहितः, परं द्रव्यव्यय-स्योल्लेखेऽसहमत एवाऽतिष्ठत्। मया चिन्तितमायास्यति क्षणः, स क्षणः साम्प्रतमागतः। अधुनाऽहं तद्वचनबन्धनान्मुक्तोऽस्मि।

एवं तत्तृतीयखण्डविमोचनावसरे तदुपस्थितिरपरिहार्याऽऽसीदिति कृत्वा मया निवेदितः स महात्मा नियतदिवसे सपरिकरो दिल्लीतो वृन्दावनं प्राप्तवान्, तेन सह ममाग्रहेण प्रियबन्धुद्वयं शुभोदयराजकान्तप्रमोदावपि समागतौ। अहन्तु पूर्वमेव लखनऊनगराद् गतवानासम्। विमोचनकार्यं वृन्दावने कुत्र कथं वा सम्पादनीयमिति विषये गुरुवर्यश्रीमदमीरचन्द्रशास्त्रिपादमाध्यमपरिचितादादरणीयश्रीविष्णुमोहन-नागार्चमहोदयात्परमसौजन्यमुपलब्धम्। स महाशयस्तत्स्थानीयदैनिकसमाचार-पत्रानुसारमायोज्यमानगीताजयन्तीकार्यक्रमस्थलेषु कतिपयेषु मां सङ्गे विधाय भ्रमन्नेकत्र विमोचननिश्चयं सुस्थिरं चक्रे। तत्रायोजने यस्याध्यक्षताऽऽसी-न्निर्धारिता, तेन संन्यासिप्रवरेण सौम्यसहृदयवरेण श्रीमद्गोविन्दानन्दजीमहाराजेन तद्वासस्थानं च मां नीत्वा नागार्चमहाशयः साक्षात्कारमपि कारितवान्। एवं वृन्दावन-सेवाकुञ्ज-भागवतनिलयस्य गीताजयन्तीकार्यक्रमे विमोचनकार्यं निश्चितं जातम्। चतुर्दशदिसम्बरसन्ध्यायां गोस्वामिप्रभृतयः समागताः। परस्मिन् दिवसे तृतीयप्रहरे विमोचनकार्योपयोगिवस्तुजातं धृत्वा वयं सर्वे मध्येपथं पूज्यपादश्रीवैद्यनाथझामहोदयं सङ्गे विधाय भागवतनिलयं प्राप्ताः। भागवतनिलयसंस्थापकस्य गोलोकवासिनो भागवतकिङ्करश्रीश्यामसुन्दरशास्त्रिपाद-स्यात्मजस्तत्स्थानीयगीताजयन्तीकार्यक्रमायोजकः ओमजीनामा प्रियबन्धुरस्मांस्तथा गृहीतवान् यथा पूर्वतो गाढपरिचयो भवेदस्माकं तेन सह। अहो ! वृन्दावनवासिनां सहजानुरागमाधुर्यम्। वैदिकमङ्गलाचरणपुरस्सरं कार्यक्रमः प्रारब्धः। गीताजयन्तीमुपलक्ष्य श्रीमद्भगवद्गीताविषयकं प्रवचनं नानाविद्वद्गोस्वामिसा-धुमहात्मभिः प्रदत्तम्। तन्मध्येऽस्माकं गीतानन्तरसस्य तृतीयखण्डस्य विमोचनं संन्यासिप्रवरश्रीमद्गोविन्दानन्दमहाराजकरकमलद्वारा सञ्जातम्। विमोचितपुस्तके तेन स्वामिपादेन स्वहस्ताक्षराङ्कितानि कतिपयानि शुभाशंसावाक्यानि विलिख्य तत्पुस्तकं मे प्रदत्तम्। अहं तदुपस्थितसमाजसम्बोधने विमोचनकार्तज्ञ्यज्ञापनेन समं गोस्वामिचन्द्रप्रकाशमहाराजस्य प्रकाशनगतौदार्यं प्रकटितवान्। तज्ज्ञात्वा

साधुसमाजो बहु साधुवादं गोस्वामिने ददौ, तथायोजकः ओमजीबन्धुः सभाध्यक्षश्रीगोविन्दानन्दकरकमलाभ्यां रुचिरोत्तरीयवस्त्रपुष्पमाल्यमिष्टान्नादिकैर्गोस्वामिनोऽभिनन्दनं कारितवान्। कतिपयसुधीजने गीतानन्तरसस्य लोकार्पणं जातम्। एतत्सर्ववृत्तं छायाचित्रेषु शुभोदयराजकान्तः संगृहीतवान्, यत्संग्रहः कालान्तरे दिल्लीतो मया श्रीराजकान्ततः स्वीकृतः। एवं विमोचनकर्मणि वृन्दावनवासिनां प्रियबन्धोः ओमजीसहृदयस्य सोल्लाससम्पादनं, श्रीविष्णुमोहननागार्चमहाशयस्य सहयोगः, श्रीमद्गोविन्दानन्दमहाराजस्य सस्नेहानुरागप्रकाशनं, वृद्धमैथिलपण्डित-श्रीवैद्यनाथझागुरुपादस्य तथोदारशुभाशीःप्रदानं निश्छलसौहार्दस्यापूर्वानुभवः। तेभ्योऽकृत्रिमानुरागिभ्यो हार्दं कार्तज्ञ्यं प्रकाशयामि तत्सौजन्यधन्यतां यातः।

गोस्वामिचन्द्रप्रकाशमहाराजेन सार्धं शुभोदयराजकान्तस्य विमोचनप्रकरणे तथोत्साहः शंसनीय एव। गीताजयन्तीतिथौ विमोचनकार्यात्पूर्वमस्माभिः श्रीवङ्कविहारिदर्शनं विहितमासीत्। सन्ध्यायां स्वपरिकरसहितो गोस्वामिचन्द्रप्रकाशमहाराजः सराजकान्तो दिल्लीं प्रति निःसृतः। शुभोदयप्रमोदो मया सममतिष्ठत्। आसीदेककार्यमवशिष्टम्। वृन्दावने रात्रिं व्यतीत्य प्रातः स्नानादिकं विधाय श्रीगोवर्धनमावां यातौ। तत्र सुहृद्वरहेतीलालत्रिपाठिगृहं प्राप्तौ। श्रीगोवर्धनगिरिसमीप एव त्रिपाठिमहोदयेन नूतनं सुन्दरं भवनं निर्मितमस्ति। तदीयमातिथ्यं लब्ध्वा तन्मार्गदर्शने मध्याह्ने श्रीवृषभानुनन्दिनीदर्शनं तद्ग्रामं गत्वा चक्रे सप्रमोदं, यदनुग्रहाद् विमोचनकार्यं सानन्दं सम्पन्नम्। ततस्त्रिपाठिमहोदयो गोवर्धनं प्रतिनिवृत्तः, शुभोदयप्रमोदो दिल्लीं यातो, ऽहन्तु मथुराद्वारा लखनऊनगरमागतः। एवं तृतीयखण्डस्य विमोचनं यथाभिलषितस्थाने सम्पन्ने १६।१२।२००२ दिनाङ्के संस्थानमध्ये प्राचार्याध्यक्षतायां तत्तृतीयखण्डस्य विद्वद्वर्गे वितरणं जातम्।

सम्प्रति पूज्यपादश्रीमदनन्तलालठाकुरसत्प्रेरणया प्रवृत्तेन विहिते गीतानन्तरसे गुरुश्रीशास्त्रिशुभाशंसोपोद्बलितेन जाते तद्द्वितीयखण्डे द्वितीयगुरुश्रीहर्षनाथमिश्र-घटितामुखोत्साहितेन जाते तत्तृतीयखण्डे महाभागवतगुरुश्रीहरिहरझामहानुभावविहितशुभाशीःप्रभावेण मया सम्पन्नस्यास्य तत्तुरीयखण्डस्याऽधुना प्रकाशनावसरे दिवङ्गतस्य स्वकृतिधन्यस्य श्रीहर्षनाथमिश्रगुरुपादस्य श्रद्धाञ्जलिं प्रस्तौमि, यो दिवि स्थितोऽपि मामनुगृह्णातु स्वशुभाशिषा।

पूर्ववदस्मिंश्चतुर्थखण्डेऽपि सन्दिग्धस्थलसंशोधने दत्तसहयोगाय स्वसहधर्मिणे प्रवाचकाय डॉ. श्रीविजयपालशास्त्रिमहाशयाय हार्दिककार्तज्ञ्यं प्रकाशयामि। तदवशिष्टेषु दुष्टस्थलेषु दोषज्ञैः संशोधनक्षमैः सहृदयैः स्वोदारभावैर्भाव्यमिति मेऽभ्यर्थना।

उत्तरप्रदेशसंस्कृतसंस्थानेन द्वितीयखण्डं पुरस्कृतम्। एतदर्थं तत्संस्थानकार्तज्ञ्यं प्रकाशयामि।

शान्तिपुरं नवद्वीपाद् गत्वा माता शची स्वात्मजमुखं विलोकितवती। श्रीगौराङ्गदेवस्य लीलासंवरणात्पूर्वमेव पुरीगततत्स्वात्मजविरहोन्मादावस्थावैकल्यमुपश्रुत्य माता स्थायिशान्तिपुर-महायात्रां कृतवतीति चतुर्थखण्डस्याऽस्य 'शान्तिपुर-शचीखण्ड'मिति नाम विधीयते।

पौषशुक्ल-त्रयोदशीबुधवासररात्रौ १५।१।२००३ दिनाङ्के मकरमितेऽर्के माता गुञ्जेश्वरी प्राणान् विजहौ। मिहिरप्रतिभासुमनःसंततिभिः सहिता तत्स्नुषा सुमेधा तदीयसेवायामासीदेव निरता। मया तु किमपि न कृतम्, गीतानन्तरसस्य चतुर्थखण्डमिदं तत्प्रीतये समर्प्यते -

कुर्वन्ति सूनवो मातुः पितुस्तोषाय किं न किम्।
पितरौ तृप्तिमायातः केवलसद्रसार्पणात्।।

पौषशुक्ल-त्रयोदशी
५।१।२००४ ई.।

गुरुनतः
बटोही

❄

रसार्पणम्

(दिवङ्गता गुञ्जेश्वरी देवी)

शुभङ्करपुरश्रीमद्रामनारायणात्मजा ।
देवी गुञ्जेश्वरी स्वर्ग्यसूर्यकान्तसधर्मिणी।।
दिवं याताऽधुना माता प्रीयतां सा मयार्पितम्।
लब्ध्वा पुत्रेण पान्थेन 'गीतानन्तरसं' रसम्।।

दीपिकाव्याख्या

दर्शन

मङ्गलम्: मार्गं दुर्गम्य; तोमव बोध्यर्थितुं श्रीकृष्ण-
गौरङ्गौ: सन् विमार्गीरवेण विश्वम्भरनामा उपनयन-दीक्षितः
गौरहरिः जगन्नाथमिश्रस्य इन्द्रपत्नीसंज्ञायां देवक्यां:
शचीदेव्यां: पुत्रे जन्मनं लेभे। संन्यासं स्वीकृत्यतो
विश्वम्भरनाद्य स्वामि कैशवभारतीद्वारा श्रीकृष्ण चैतन्यभारती
इति नाम दत्तम् वरं विश्वेश्वरः अयं महात्मा
चैतन्य महाप्रभुः इति नाम्ना प्रसिद्धः अभवत्।

"कृष्ण एव उगद्गुरुः" इत्यनया श्रीमद्भाग्य
औमद्भाग्यः जगद्गुरुपदवीमारूढः विश्वम्भरः सर्वेश्वरेण
जगद्गुरुणा सम्मत्या नवं विशेषतः न्यायशास्त्रे प्रभूतां चैतां
प्रदर्शयत्। यद्यपि अयं तेन विरचितानां ग्रंथानां
समुपलब्धिः न इदानीं तथापि दूरदर्शनदारा-
कृष्णानन्दकोदेरराज - काशीपुर - प्रभृतिभ्यः ग्रन्थागारेभ्यः
कतिपयेभ्यः नव्य जीवन-जीवनानां वैरिनव्यः लभ्यन्ते।
"अन्यद्वं दुःखं वा यत्र इत्यस्मिन् आत्मनः हीनः ओर
दुरवस्थां लक्ष्यीकृत्य। "इत्थं सार्वः वैरीतः रघुनाथः-
शिरोमणिः दीधितिः इति नामक-नव्यन्याय-
शास्त्रस्य ग्रंथ-ख्यातिं दातुं स्वग्रंथेषु ग्रंथं नव्यां प्रवीहित-
वंतः श्रीचैतन्यमहाप्रभुणा। सन्यासानंतरं विशेषं
कुर्वतां कोऽपि जगन्नाथ - सनातनौ - तपनौ संदेशः

जनानां सन्मार्गे चलितु-प्रेरणाय प्रेम्णः एक व्यवहर्तव्यम् इति स्वजीवन-चरितेन शिक्षितं महाप्रभुणा। कृष्णस्य नाम-गुणादि-विविधैः कार्यैः श्रीहितानां जनानां सेवया प्रेमप्रदर्शनेन च तेषां रागः दूरी-भवति स्वाहृदयं च वर्धते इत्यादि महाभागैः अनैः शिक्षणीयं महाप्रभुचरितम्।

नाहं वसामि वैकुण्ठे भक्तानां हृदये नरद।
तद्भक्ताः यत्र गायन्ति तत्र तिष्ठामि नारद॥

इतीदं भगवद्वचनं सदनानीयतु भगवतः चैतन्यमहाप्रभुणा कीर्तनेन भगवद्भक्तौ च दृष्टान्तेन परमार्थः प्रकाशितः। अनेनैव समेषां भगवतः उपासनाप्रकारस्य निर्णयो आत्मनः नैतिकशक्तेश्च वितरणेन लक्षितं श्रीउपासनाप्रकारस्य स्वरूपोत्कर्षत्वम्।

भगवतः प्रेरणया सम्पूर्णे भारते भ्रमित्वा समग्रे विश्वे जनान् भगवद्भक्तौ लीनान् कीर्तनं कुर्वन्तः दृष्टान्तः च राजमार्गेषु रथ्यासु च दृष्टिपथम् उपागच्छन्ति। इत्थम् अद्भुतान् सर्वान् भगवदाराधनायाः। एतां सर्वां समग्रतेयां स्वर्गीयकर्मणः कौशलेन सिद्धिकर्तुं कविः ओड्डः वेदाहृत्य भगवतः गीतानिनादस्य महाकाव्यस्य चतुर्थे सर्गेषु प्रकाशान् नोदयति।

अलङ्कारशास्त्रानुसारी: शृंगारस्य वीरस्य करुणादे:
वा रसस्य प्राधान्यं प्रतिपादयन्ति परं नवीनेन
अनेन पद्येन बहीहिना तु मधुररसस्यैव
प्राधान्यं साध्यते। अन्येषां रसानां यत्र क्वचित्
अन्त: दृश्यते परं न सर्वत्र तुल्यमि
तिरामं मधुररसस्य। भक्तिरसस्य, शान्तरसस्य
अद्भुतरसस्य च मधुररसस्य पोषकभाव
अङ्गीकर्तुं शक्यते। मधुररस एव अनन्तरस:।
भगवान् चैतन्यमहाप्रभु: एव अनन्तरस:।
तस्य अनन्तरसस्य एव वर्णितं गायनेन
प्रौढोक्ति: बहीहिना सुरचितेन सूदमा अपि
प्रभुचरितस्य चरणा: वर्णयित्वा। कविगुरुणा
तस्य प्रतिभा मुखरीभूता चैतन्यमहाप्रभो:
कृपालाभात्।

वर्णितं जनानां गौडीयवैष्णवपदवीं
भक्तिमार्गं, वर्णितं भगवत: चैतन्यमहाप्रभो:
जगज्जनेषु कृपाप्रसाद:, वर्णितं केवल: बहीहिना
महोदयस्य यश: काव्यकौशलं च।

श्रीमद्गुरुगीताशीः

वृद्धिवचनम्

स्वस्ति

भक्तेः मार्गः दुर्गम्यः, तमेव बोधयितुं श्रीकृष्णः गौराङ्गः सन् निमायीरूपेण विश्वम्भरनाम्ना उपनयनदीक्षितः गौरहरिः जगन्नाथमिश्रस्य इन्द्रपत्नीसनामधेयायाः शचीदेव्याः गृहे जनिं लेभे। संन्यासं स्वीकृतवते विश्वम्भराय स्वामिकेशवभारतीद्वारा श्रीकृष्णचैतन्यभारती इति नाम दत्तम्, परं विष्णेरंशः अयं महात्मा चैतन्यमहाप्रभुः इति नाम्ना प्रसिद्धः जनेषु।

"कृष्णं वन्दे जगद्गुरुम्" इत्यनया प्रसिद्धया अभिख्यया जगद्गुरुपदवीमारूढः विश्वम्भरः सर्वशास्त्रेषु नवद्वीपे सम्भवात् च विशेषतः न्यायशास्त्रे प्रवृद्धां प्रौढिं प्रादर्शयत्। यद्यपि अद्य तेन लिखितानां ग्रंथानां समुपलब्धिः न दृश्यते तथापि वृन्दावनदास-कृष्णानन्दकविराज-कर्णपूर-प्रभुदत्तब्रह्मचारिणां कृतिभिः तस्य जीवनचरितानां परिचयः लभ्यते। "अन्यस्य दुःखं मा भूत् इत्यर्थम् आत्मनः हानिः अपि सुखाय कल्पनीया" इत्ययं मार्गः दर्शितः रघुनाथशिरोमणेः दीधितिः इति नामक-नव्यन्याय-शास्त्रग्रंथ-ख्यातिं दातुं स्वप्रौढग्रंथं नद्यां प्रवाहितवता श्रीचैतन्यमहाप्रभुणा। सन्मार्गस्य विरोधं कुर्वतां काजी-जगायी-मधायी-नौराजीसदृशां जनानां सन्मार्गे चलित-प्रेरणायै प्रेम्णा एव व्यवहर्तव्यम् इति स्वजीवनचरितेन शिक्षितं महाप्रभुणा। कुष्ठरोग-चर्मरोगादिविविधैः कष्टैः पीडितानां जनानां सेवया प्रेमप्रदर्शनेन च तेषां रोगः दूरीभवति स्वास्थ्यं च वर्धते इत्यपि महाभागैः जनैः शिक्षणीयं महाप्रभुचरितेभ्यः-

नाहं वसामि वैकुण्ठे भक्तानां हृदये न च।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद।।

इतीदं भगवद्वचनं सत्यापयितुं भगवता चैतन्यमहाप्रभुणा कीर्तनस्य भगवद्भक्तौ च नृत्यस्य परम्परा प्रवर्धिता। अन्तिमे समये भगवतः जगन्नाथस्य विग्रहे आत्मनः भौतिकशरीरस्य विलीनीकरणेन साधितं श्रीजगन्नाथस्य स्वरूपात्मकत्वम्।

भगवतः प्रेरणया सम्पूर्णे भारते अपितु समग्रे विश्वे जना भगवद्भक्तौ लीनाः कीर्तनं कुर्वन्तः नृत्यन्तः च राजमार्गेषु रथ्यासु च दृष्टिपथम् आयान्ति।

इयम् अद्भुता सरणी भगवदाराधनायाः। एतां सरणीं समग्रतया स्वकविकर्मणः कौशलेन लिपिबद्धां कर्तुं कविश्रेष्ठः वटोहीझावर्यः गीतानन्तरसस्य महाकाव्यस्य चतुर्षु खण्डेषु प्रकाशनं करोति।

अलङ्कारशास्त्राचार्याः शृंगारस्य, वीरस्य, करुणस्य वा रसस्य प्राधान्यं प्रतिपादयन्ति परं झोपोह्वेन अनेन पथिकेन वटोहिना तु मधुररसस्य एव प्राधान्यं साध्यते। अन्येषां रसानां यत्र कुत्रचित् अन्तः दृश्यते परं न भवति कुत्रापि विरामः मधुररसस्य। भक्तिरसस्य, शान्तरसस्य, अद्भुतरसस्य च मधुररसस्य पोषकभावः अङ्गीकर्तुं शक्यते। मधुररस एव अनन्तरसः। भगवान् चैतन्यमहाप्रभुः एव अनन्तरसः। तस्य अनन्तरसस्य एव चरितं गायति प्रौढकविः बटोहीझा सूक्ष्मातिसूक्ष्मा अपि प्रभुचरितस्य घटनाः वर्णयित्वा। काव्यगुम्फने तस्य प्रतिभा मुखरीभूता चैतन्यमहाप्रभोः कृपाकटाक्षैः ।

वर्धतां जनानां गौडीयवैष्णवपद्धतौ भक्तिश्रद्धा, वर्धतां भगवतः चैतन्यमहाप्रभोः जगज्जनेषु कृपाप्रसादः, वर्धतां कवेः वटोहीझामहोदयस्य यशः काव्यकौशलं च।

श्रीधरवासिष्ठः

(दिल्लीसंस्कृतविद्यापीठसंस्थापनोत्तरतद्विकासप्रकाशप्रधानस्तम्भेष्वेकतमः पूज्यपादश्रीधरवाशिष्ठमहाशयः। प्रशिक्षणविभागव्याख्यातृपदादारभ्य कुलपतिपदपर्यन्तकार्यभारस्तेन सुष्ठु निर्व्यूढः। सम्पूर्णभारते सम्प्रति प्रख्यातशिक्षाशास्त्रितया प्रथितिं गतोऽयं विलसति। छात्रावासाधिष्ठातृत्वेऽमुष्य स्नेहवात्सल्यौदार्यमाधुर्यसारल्यसौजन्यमस्माभिस्तात्कालिकैश्छात्रवृन्दैः प्रभूतमास्वादितम्। शिक्षाशास्त्रिगुरोरस्य सम्प्रति गीतानन्तरसचतुर्थखण्डे शुभाशीःप्राप्त्या धन्यमात्मानं मन्यमानस्तत्स्वगुरुपादश्री-श्रीधरवाशिष्ठमहानुभावदीर्घायुष्यस्वास्थ्यं याचे महाप्रभुप्रभुं वृन्दाविहारिणम्-)

जानकी जयन्ती
१३।२।२००३ ई.

तदनुगृहीतः पथिकः
बटोही

❄

।। अनन्तरसः श्रीचैतन्यो विजयेतराम् ।।

मङ्गलानुस्मृतिः

भानुजाजीवनाधारश्यामभवनौनाविकः ।
यथाकल्परसस्रोतोभारतगोधरावनः ।। १ ।।

महाभागवतश्रीमद्गुरुहरिहराशिषा ।
तृतीये धन्यतां यातस्तुरीयं दोग्धुमुद्यतः ।। २ ।।

हरिः सामान्येनाऽवति निखिलजीवान् प्रतिपलं,
हरः सर्वाकाङ्क्षां नियतमिह राध्नोति सुहृदाम् ।
तृतीये या लब्धा हरिहरगुरोरक्षरकृपा
प्रभावेणैवास्यारिह मम तुरीया रसगतिः ।। ३ ।।

(२००३ ई.) त्रयोदश्यां तिथ्यां गुरुदिनगतायाममृताऽ-
सिते पक्षे माघे शिशिरसमये माकररवौ ।
अनन्तश्रीगौरप्रभुचरितगानाय पथिकोऽ-
धुना सन्नद्धोऽभू,दलममृतयोगोऽमृतरसः ।। ४ ।।

१. नमामि यतिवेषं चैतन्यम् ।
अतिशयगौरमतो गौराङ्गापरनामानं मधुरम्
लोकस्वीकृतगौरमहाप्रभु – गौरहरि – प्रियसंज्ञम् ।
कृष्ण ! कृष्ण ! दयितेति मधुस्वरमथ जल्पन्तं रुचिरम्
सौम्यमनोहरचेतनहृदयाह्लादकचरितमुदारम् ।।

२. तत्त्वं जाने नान्यत्किञ्चिद् वंशीभूषितकरतः ।
अव्यक्तप्रकृतेः सत्तायामैश्वर्यं ह्यव्यक्तम्
चिद्व्यक्तेरैश्वर्यं व्यक्तं, सिध्यति तेनेश्वरता ।
ईश्वरताऽऽकर्षति तनुसक्तं, चित्प्रेमी मधुलुब्धिः
मधुरकेवलानन्दव्यक्तिः केवलमुरलीमूर्तिः ।।

कामं, न प्रभवेयमस्ति भुवने वेत्तुं, तदन्यद्वचो,
वेणोः किन्तु सरन्ध्रपोलमुरली, व्योमाभनीलाकृतिः ।
भास्वत्प्रान्तसुपीतमम्बर,महो ! क्षामारुणौ कोमला-
वोष्ठौ वल्लभकौ, मनोहरमुखं तन्मन्दमन्दस्मितम् ।।५।।

नेत्रेऽब्जोपमसुन्दरे च कुटिलैर्दीर्घैः कटाक्षैर्युते,
नैतेभ्यस्त्वतिरिक्तमस्ति किमपि ज्ञेयं परं वस्तुकम्।
एतान्येव नमामि संततमतो भूयश्च भूयोऽथवाऽ-
ज्ञाने (संस्मृतिरस्तु सर्वकरणद्वारा प्रियस्यात्मनः) ।। ६।।

समर्पणम्

३. अच्युत! पुरुषोत्तम ! गोविन्दाऽव्यय ! नारायण ! मङ्गल !
किं वाञ्छसि कर्तुं त्वं प्रियतम !, विद्धि त्वन्मायां त्वम्।
जगन्नाथ ! जगदेतत्कृपया ते संसरति प्रथितम्
हृषीकेश ! पुण्यश्लोकाऽक्षर ! निखिलमिदं त्वं केवल ! ।।

यस्मिन्नस्मि लषामि कार्यजगतः कर्तुं समाप्तिं परं,
त्वं तस्मिन्नसमाप्तिमत्र कुरुषे, वाञ्छामि यस्मिंस्तथा ।
कार्याणामसमाप्ति,मत्र भवति स्थाने समाप्तिस्तु ते,
भूयो मूढमतेस्तथाऽभिलषणं तु व्यर्थमेवास्ति मे ।। ७।।

एतन्मे चपलं तथा प्रिय ! मनः कुर्या, नहीच्छेयमाः ।
किञ्चित्त्वेव, सदैव तेऽभिलषणे मत्तः स्थितः स्यामहम् ।
इच्छायां तु तवैव संततमहं स्यामाश्रितो, नाथ ! किं
युक्तं नास्ति?, कथं करिष्यसि मनो मे तादृशं वास्तवम्?।।८।।

किं स्वेच्छां मम लोपयिष्यसि ? तव त्विच्छाऽस्त्यमोघा परं,
ह्रस्यात्तत्र न रक्तसर्षपमितं, वर्धेत च क्वापि नो।
लोके पिप्लुमितं, गृहाण, लषितं पूर्णं तवेदं प्रभो !
स्वं संधारय वस्तु (वस्तु निखिलं विश्वावनेनाऽव्यते)।। ९ ।।

(तावकीन एव प्रभुदत्तः)

●●

प्राक्कथनम्

४. नमनं कुर्मोऽनन्तमहिम्नः।
उत्पद्यन्ते लीयन्ते त्वयि सर्वे भावा ब्रह्मन् !
यावत्तिष्ठन्तीह स्वस्थं तत् त्वत्केवलदृष्टेः।
सर्वभावमय ! वासुदेव ! तद् व्यक्ताव्यक्तचराचर !
योगेश्वर! यदुनन्दन! कृष्ण! प्रियतम! मधुर! मनोहर!।।

लीला वेत्तुमथ क्षमोऽस्ति भुवि कस्तत्कृष्णकृष्णस्य ना,
ज्ञानं भावि हि यावदेव भुवने यस्मिन्मनुष्येऽधिकम्।
निर्माता बहु तावदेव विपुलं कार्यक्रमं सोऽग्रिमं
(ज्ञाने कर्म समाप्यतेऽखिलमहो! ज्ञानोद्गतं केवले)।। १०।।

नो जानेऽत्र निरन्तरं कियदहो ! कौ चिन्तयन्मानवो
वार्तां तिष्ठति सर्वदा कियदलं, किन्त्वत्र तद् भावि, यत् ।
श्रीरामेण विसृज्य पूर्वनिहितं, रामस्य कश्चित्क्षमः
कर्तुं नो परिवर्तनं तु रचने, श्रीराम एव प्रभुः -।। ११ ।।

यत्सत्यसंकल्पमयः सदात्मा
(द्वारा चिदानन्दयुतिः सतोऽद्धा) ।
अल्पज्ञजन्तोः क्षणिका तु कामं
संकल्पनाऽस्थायिभवा भवन्ती ।। १२ ।।

अदश्चरित्रं (प्रथमं विचारः)
कर्तुं समाप्तं प्रियदं द्विभागे ।
विचिन्तितं भावि पुनश्च युक्तं
चतुर्षु खण्डेषु समापनीयम् ।। १३ ।।

उत्पत्तेः प्रथमे निमायिचरितं संकीर्तनारम्भणं
यावत्कृष्णहृदः परत्र च गृहत्यागं च संन्यासतः ।
श्रीवृन्दावनयानमस्य सुहृदः खण्डे तृतीये, पुरी-
गम्भीरा-स्फुटवृत्तजातमधुमल्लीलास्तुरीये तथा ।। १४ ।।

कर्ताऽनन्तरसं विलिख्य तदिदं काव्यं समाप्तं, परं
त्वासीच्चेतसि मे च किञ्चिदथ च श्रीमद्विधातुः परम् ।
खण्डेषु त्रिषु गुम्फितेषु कतिचिज्जातं तुरीयं बृहत्
(सिध्येत्पञ्चमसंख्यया विरहितः प्रेम्णः प्रपञ्चः कथम्?)।। १५ ।।

भूयोऽप्यस्थुरदोमहाप्रभुकगम्भीराकलीलास्तथा
षड्गोस्वामिकवृत्तकप्रभृतयो ह्यत्यन्तकावश्यकाः ।
वृत्तान्तास्त्ववशेषिताश्च, तदयं खण्डैश्चतुर्भिर्नहि
ग्रन्थः प्रत्युत पञ्चभिस्त्ववसितः (प्रेमाऽर्थकः पञ्चमः)।। १६ ।।

खण्डे चावसिते तुरीयमधुनैवोभे तथा पञ्चमं,
काले भाविनि कारयिष्यति स किं ? बोधोऽस्ति किञ्चिन्नहि ।
अस्तु, श्रीसुहृदामनेन ननु किं ? सत्पाठकानामहो !,
वाञ्छेत्कारयितुं स कारयतु यत्किञ्चित्तु तन्वाऽमुया।। १७ ।।

श्रीचैतन्यचरित्रमेव सुहृदः प्रेम्णाऽधियन्तु प्रियं
किन्तु प्रस्तुतपाठकाश्च, तदहो ! वार्तामथाग्रेऽधिकाम् ।
नो विस्तार्य च साम्प्रतं, सविनयं सत्पाठकाभ्यर्थना—
शान्तैकान्तसुदत्तचित्तसुहृदाऽत्यन्तं मनोयोगतः –।। १८ ।।

अध्यायेषु तथाग्रिमेषु ते श्रीचैतन्यमहाप्रभोः प्रियम् ।
श्रीवृन्दावनयानवृत्तकं सन्त्वद्धा पठितुं तु सज्जिताः।। १९ ।।

(भक्तचरणदासानुदासः – प्रभुदत्तब्रह्मचारी)

●●

प्रभोर्वृन्दावनगमनाद् भक्तानां विरहः

५. प्रेमी प्रियतमविरहस्थाने मरणञ्छेयो मनुते ।
संयोगाद् विप्रयोगमधुताऽधिकमाचार्यैः कथिता
यत्सखिसज्जनतः प्रियरसनं विविधं क्रियतेऽजस्रम् ।
सज्जनसङ्गमहत्तात्यन्ता तत्सुस्निह्यति हृदयम्
दयितस्नेहाऽऽदर्शकविरही जीवितुमपि नाशास्ते ।।

यातं वर्षचतुष्टयं सुमनसो नीलाचले तिष्ठतो
गौराङ्गस्य तथाहि दक्षिणदिशो यात्रासमाप्तौ प्रभोः ।
आसीदेष च चिन्तयन् प्रतिसमं यातुं तु वृन्दावनं
(वृन्दाकाननमस्ति भक्तिविपिनं, सा यत्र रागात्मिका)।।२०।।

यात्रोर्ध्वं तु रथस्य भक्तसुहृदः प्रोचु'र्निषिद्धं चतु-
र्मास्यां सर्वनृणां प्रयाणमवनौ, कृत्वाऽत्र दीपावलीम् ।
आयाते ननु कार्तिके च जगदुर्यातुं, च शैत्यं पुनः
स्माऽऽयाति, स्म गदन्ति सौहृदभराच्छैत्ये समाप्ते तथा ।।२१।।

संतापोऽधिकमस्ति, चाधिकमपि क्षेत्रे पुनः पश्चिमे,
याता क्वाद्य' तथैवमेव विगतं प्रेमात्मनः कुर्वतः ।
अद्य श्वोऽब्दचतुष्टयं, दृढमहो ! बद्धस्तथाऽऽसीत्प्रभू
रामानन्दकसार्वभौमसुहृदां सत्प्रेमपाशे, यतः - ।। २२ ।।

स्वेच्छातो गमने क्षमोऽपि सुमना ह्येषां विना सम्मतिं
गन्तुं नैच्छदयं, यदा सहृदयैर्भक्तैश्च दृष्टं - प्रभुः ।
वर्षेऽस्मिन् कृतनिश्चयस्तु गमने वृन्दावनस्याऽस्ति, तद् -
दत्ता तैर्निजसम्मतिर्विवशतापूर्वं (सुखं तत्सुखे) ।। २३ ।।

कृत्वैव स्वभुवं ययुः सुमनसो गौडीयभक्ता रथ-
श्रीयात्रां, प्रतिवर्षतुल्यमधुना पुर्यां न चक्रुस्तथा।
चातुर्मास्यममी, प्रभुः कथितवान्-'सर्वे चलन्त्वग्रत-
श्चागन्ताऽस्म्यपि पृष्ठतो' मुदितयाऽऽनन्देऽत्र चैवाऽगमन्।।२४।।

वर्षाणां समयः समाप्तिमगमन्मासस्तथाह्याश्विन-
श्चायातः, प्रभुकश्चकार विजयाश्रीमद्दशम्यां तिथौ ।
श्रीवृन्दावनयाननिश्चयमसौ गौरस्तु गौडाध्वना,
प्रातर्जागरितस्तथा स मुदितो नित्यान्निवृत्तो विधेः।। २५।।

नायातोऽप्यभवत्प्रभुस्तु जलधिस्नानं विधाय क्षणे
तावत्येव निमायिभक्तसुहृदामोघो लगँल्लक्षितः ।
सर्वो मुख्यसुहृच्छनैः प्रभुसुहृत्स्थाने शनैः पुञ्जितो,
धृत्वा सर्वजनं चचाल स जगन्नाथस्य संदर्शने ।। २६।।

आदेशं भगवन्तमेष सुमना गत्वा प्रभुर्मन्दिरं
गौरो याचितवान्, प्रसादमददान्मालां तथा तत्क्षणे ।
आनीय प्रभवेऽर्चको, भगवतो मालां प्रसादान्नकं
सन्तुष्टोऽधिकमेव च प्रभुरभूल्लब्ध्वा निमायिप्रभुः ।। २७ ।।

बुद्ध्वाऽऽदेशमथैव तं भगवतः श्रीमज्जगन्नाथक -
श्रीमन्मन्दिरकप्रदक्षिणमसौ कुर्वञ्चचाल प्रभुः ।
चैतन्यः कटकोन्मुखश्च शतशो गौडीयभक्तास्तथा
मुञ्चन्तोऽश्रु तथोत्कलस्य सुहृदः पृष्ठेऽस्य चेलुः प्रभोः।। २८।।

प्रत्यायातुममून् प्रभुः कथयते भूयः, करोत्याग्रहं
तेषामेष चलंश्चलन् सहृदयस्तस्थौ, तथाऽऽलिङ्गनम् ।
कुर्वन् प्रेमपुरस्सरं कथयते सर्वा'नलं साम्प्रतं
जातं, यान्तु गृहं निजं (ननु भवेत्प्रस्थापनस्यावधिः) ।। २९।।

श्रीक्षेत्राधिपतेर्भविष्यति कृपा, कर्ता निवृत्य द्रुतं
सर्वेषां भवतां तु दर्शन'ममूनेवं निमायी प्रभुः ।
नाना बोधयति स्म, कोऽपि न परं पृष्ठे निवृत्तोऽभवद्,
भिन्नं त्वस्तु निवर्तनं-(मधुलिहः पुष्पान्निवृत्तिर्भवेत् ?)।।३०।।

आः ! पृष्ठोन्मुखदर्शनेऽपि हृदयं त्वासीद् विदीर्णं भवद्
भक्तानां, स्मृत एव ते विरहजे दुःखे रुदन्तोऽभवन् ।
चैतन्यस्य महाप्रभोरतिशयं, कुर्वन्नसावाग्रहं
भक्तानां विधिनाऽमुनैव सुमनाः प्रापद् भवानीपुरम्।। ३१ ।।

अग्रे सम्प्रति नाधिकं स चलनं गौरो बुबोधोचितं,
तस्माद्रात्रिनिवासनिश्चयमसावत्रैव चक्रे प्रभुः ।
अस्मिन्नेव तथा क्षणेऽस्य शिविकामारुह्य रायः प्रभोः
सेवायां च समागतः प्रियरमानन्दोऽपि तत्रैव सः।। ३२ ।।

भ्राता तस्य लघुः प्रसादमधिकं वाणीकनाथोऽप्यतः
संग्राह्य प्रचुरैर्जनैरुपगतः सार्धं भवानीपुरे ।
सर्वानेव बहु प्रभुः प्रभुजगन्नाथप्रसादं प्रियान्
भक्तानाग्रहतः स्म भोजयति तत् तानात्मनः पाणिना।।३३ ।।

भक्तप्रमोदाय भवानपि स्वयं
महाप्रसादं सममेव चाग्रहीत् ।
तत्रैव विश्राममकुर्वताऽखिला
यावन्निशां गौरनिमायिसङ्गतः ।। ३४ ।।

याताः पुरीं कतिपये तु महाप्रभोर-
त्यन्ताऽऽग्रहात्तु बहवः सममेव यातुम् ।
आसन्ननेन सुहृदा कृतनिश्चयास्ते
(क्वाऽऽप्तः प्रियः सहृदयो भुवि लभ्यतेऽत्र?)।।३५।।

रामानन्दकसार्वभौमयुतगोस्वामिस्वरूपस्तथा
गोविन्दश्च गदाधरः सहृदया गोविन्ददत्तः पुनः ।
श्रीवक्रेश्वरचन्दनेश्वरयुतो दामोदरः पण्डित-
स्ते तेषु प्रमुखा बभूवुरखिला भक्ता मुकुन्दादयः।। ३६।।

संप्राप्तो भुवनेश्वरं प्रभुरयं सर्वैरमीभिः समं
कृत्वा श्रीशिवदर्शनं च कटकं प्रापन्निमायी ततः ।
गोपालस्य सुदर्शनं भगवतस्तत्राखिलाश्चक्रिरे
कुर्वन्तो मिलिता बभूवुरथ ते संकीर्तनं प्रेमिणः ।। ३७ ।।

एको ब्राह्मणको निमन्त्रितममुं स्वप्नेश्वरो नामक-
श्चक्रेऽत्रैव तथा क्षणे,ऽस्य वसतिं भिक्षां ग्रहीतुं ततः ।
स्वीकृत्यैष निमन्त्रणं प्रभुरगाद्रायो रमानन्दजी
शेषं भोजितवांश्च भक्तमखिलं (कोऽप्यत्र संभोजकः)।।३८ ।।

एकसुन्दरबकूलनगाऽधः
स्वासनं स्म कुरुतेऽत्र निमायी ।
(काङ्क्षति स्वदयितस्य वियोगी
तादृशो विजनताक्षणमेकम्) ।। ३९ ।।

संयातः कटकाधिपप्रियमहाराजप्रतापान्तिके
तस्मिन्नेव तथा क्षणे सहृदयो रायो रमानन्दजी ।
गत्वा श्रावितवाञ्छुभागतिसमाचारं प्रभोस्तत्र स
(ह्यात्मीये सुजनो जने प्रियसमाचारं तनोति द्रुतम्)।। ४०।।

एतस्मिञ्छुत एव सौख्यदसमाचारे प्रमोदावधि-
स्तस्थौ नो कटकाधिपस्य, चलितः स प्रेम्णि मत्तः प्रभोः ।
अस्तव्यस्तदशस्तु दर्शनकृते, मुख्योऽपि मुख्योऽचलत्-
तत्पृष्ठे प्रभुपादवन्दनकृते तत्कर्मचारी जनः ।। ४१ ।।

नग्नाङ्घ्रिस्त्वतिदीनवेषविनयादासीत्स गच्छन्महा-
राजः श्रीप्रभुसन्निधौ सहृदयो दृक्संभृताश्रुस्तथा ।
तत्याजैष तु दूरमेव शिविकां प्रापत्समीपे प्रभोः
पद्भ्यामेव च (सौम्यभावसविधे गन्तव्यमच्छात्मना)।। ४२ ।।

सोऽधीरो गत एव पद्मपदयोः स्थाने पपात प्रभो,-
र्दृष्ट्वा तं पतितं नृपं स्वपदयोरुत्थाय तस्थौ द्रुतम् ।
तस्योच्चैः परिरम्भणं सुमनसः कुर्वन्निमायी बभौ
(प्रेमालिङ्गनमात्रदानधनिकः कश्चिन्निमायी कृती)।। ४३।।

प्रेमालिङ्गनकं प्रभोः सुमनसो लब्ध्वा विसंज्ञो महा-
राजोऽभू,त्प्रभुनेत्रयोरविरलं प्रेमाश्रु चासीत्सरत्।
तान्यश्रूणि च तन्महांशकमहाराजस्य सर्वाम्बरं
क्लिन्नं सम्प्रति कुर्वते स्म (दयते साध्वश्रुधारा क्वचित्)।।४४।।

वस्त्राणामपि साम्प्रतं वरवरं सौभाग्यमासीत्पुन-
स्तेषां, दृश्यमिदं तथाहि करुणं तस्थौ क्षणं चाधिकम् ।
यावत्तत्र यथावदेव, निकटे स्वे प्रेमपूर्वं महा-
राजं स्माऽऽसयति प्रभुर्ननु पुनः (प्रीतिः समीपस्थितिः)।।४५।।

तद्देहराज्यपरिवारकुटुम्बलोक-
क्षेमञ्च पृच्छति निमायिमना निमायी ।
पार्श्वे प्रभोरधिककालमथ स्थितोऽभू-
द्रुद्रो महानृपतिरत्र निमायिसङ्गे ।। ४६ ।।

चैतन्यप्रभुपादपद्मयुगले राजप्रणामक्रिया -
पश्चाच्च क्रमशोऽखिलः प्रभुपदेऽदःकर्मचारिव्रजः ।
चक्रे सन्नमनं तथा प्रभुकृपायाच्चां चकार, प्रभु -
श्चक्रे तेष्वखिलेषु साम्प्रतकृपां (साधुः कृपालुः स्वतः)।।४७ ।।

सर्वैः सम्प्रति किञ्चित्स प्रेम्णा नहि किञ्चित् ।
कुर्वन्नस्ति च वार्तां (सत्सङ्गः प्रियवार्ता) ।। ४८।।

सर्वत्रैव महाप्रभोर्ननु महाराजोऽस्य यात्रापथे
विश्रामस्य यतक्षणे प्रभुजगन्नाथप्रसादस्य च।
संप्राप्तेः स्वजनैः प्रबन्धमकरो,त्सन्नद्धतायै तथाऽ-
संख्याः पूर्वत एव तत्र बहवो लोका यतः प्रेषिताः-।। ४९ ।।

विश्रामोऽस्तु च यत्र-यत्र सुहृदो गौरस्य तत्र प्रभो -
र्वासस्थानकभोजनादिसुविधावृन्दप्रबन्धोऽखिलः।
अव्यस्तो भवतु, प्रभोः सुमनसः संप्रापणार्थं महा-
राजो द्वौ हरिचन्दनेश्वरमसौ स्वौ मङ्गराजं तथा-।। ५० ।।

सौख्येन पारकरणाय तु राज्यसीम्नः
सङ्गेऽस्य राजसचिवौ प्रभुकस्य चक्रे ।
आज्ञां विलभ्य सुहृदो निजराजधानी-
माप्तः प्रभोः सहृदयोऽवनिपः प्रतापः।। ५१ ।।

ज्यौत्स्नी रात्रिरभूदृतुस्त्वतिशयं चासीत्पुनः शोभनो,
नोष्माऽऽसीन्नहि शैत्य,मेष कृतवान्निश्येव तन्निश्चयम्।
आ! यात्राकरणस्य, चोत्कलमहाराजस्य सर्वास्तथा
राज्ञ्योऽपि प्रभुदर्शनाभिलषणं तु व्यञ्जयन्त्योऽभवन्।। ५२।।

सौवर्णीमपटीं गजेष्वथ ततः प्रक्षेप्य मार्गे महा-
राजः स्थापितवांस्तथाह्युभयतस्ता, यत्प्रभोर्दर्शनम् ।
कुर्युः सम्यगमू,र्महाप्रभुरथ स्वप्रेम्णि मत्तोऽभवद्
गच्छंस्तत्र तु मन्दमन्दगतितः (प्रेमी स्वरत्यारतः)।। ५३।।

तत्पृष्ठे चलितो गजाश्वजनतामर्द,स्तथैवं समं
सर्वैर्भक्तजनैः प्रभुश्च सरितश्चित्रोत्पलायास्तटे ।
आप्तः पूर्वत एव तत्र च महाराजाऽऽशया सज्जिताऽऽ-
सीन्नौका (प्रभुरागिणां व्यवसितं सर्वं स्वतो जायते)।। ५४ ।।

भक्तैः सार्धमथ प्रभुश्च सरितं चित्रोत्पलां लङ्घते,
सर्वो यापितवान्निशां ननु चतुर्द्वरि तथागत्य तत् ।
यस्माल्लङ्घितवान् प्रभुश्च सरितं चित्रोत्पलां, तत्स्मृति-
स्तूपं तत्र विशालमेकमधिकं भूपो व्यधात्तत्स्मृतौ।। ५५ ।।

तं घाटञ्च सुतीर्थं मत्वा स्नातुमथाऽऽयन् ।
जातो रुद्रमहीपः (तीर्थं सत्स्मृतियोगः) ।। ५६ ।।

जानन्त्येव गदाधरस्य सुहृदो नामाखिलाः पाठका,
धृत्वा श्रीलमहाप्रभोरनुमतेः स क्षेत्रसंन्यासकम् ।
गोपीनाथकमन्दिरे प्रभुपुरीपार्श्वे न्यवात्सीत्तथा
श्रीगोपीप्रभुसेवनञ्च विदधत् (सेव्यः स्वगोपीप्रभुः)।। ५७ ।।

तीर्थे क्वापि विहाय साम्प्रतगृहद्वारं प्रतिज्ञायुतं
(भाषन्ते जनताः) सतां निवसनं तु क्षेत्रसंन्यासकम् ।
स्थित्वा तत्र सदैव कर्म भगवत्प्रीत्यर्थमेवाऽखिलं
कर्तव्यं (भगवत्कृपाधिगतये भक्तस्य कर्माऽखिलम्)।। ५८।।

संकल्पेन गदाधरो निवसनं कुर्वन्ननेनैव स
श्रीपुर्यां पुरुषोत्तमप्रभुसुहृत्क्षेत्रेऽभवत्प्रीतितः ।
श्रीचैतन्यमहाप्रभुर्ननु यदाऽभूद् गौडदेशं चलन्
क्षेत्रेऽदःपुरुषोत्तमस्य वसनं तस्य त्वसह्यं तदा ।। ५९ ।।

स त्यक्वा निखिलं प्रभोः सुमनसः सङ्गेऽभव,त्पादयो-
रासीच्छीलनिमायिनोऽस्य सुहृदस्तस्यानुरागो दृढ़ः ।
स स्थातुं न परस्थले क्षणमपि त्यक्त्वा ललाष प्रभुं
(सौभाग्येन निमायिसौहृदवतः सङ्गो नरस्याऽऽप्यते)।।६० ।।

गौराङ्गोऽतिशयं स्म बोधयति तं, कस्मात्प्रकारादपि
प्रत्यायातुमयं गदाधरसुहृन्न प्रस्तुतोऽभूत्परम् ।

चैतन्योऽथ यदा चकार सुमनास्त्वत्यन्तमेवाग्रहं,
प्रोचे तर्हि गदाधरः सहृदयस्तत्प्रेमरोषस्वरे- ।। ६१ ।।

'कस्मान्मां विवशं भवांस्तु कुरुते, यातु प्रभो,ऽहं भव-
त्सङ्गे यामि न, दर्शनाय जननीशच्या नवद्वीपके ।
गच्छाम्यस्मि तु, नो निरोत्स्यति भवान्मार्गं निमायिंस्तु मे,
सङ्गे नो भवतस्तथाहि चलिता, ह्येतावदेवास्त्यलम्'।।६२ ।।

उक्त्वेयत्पृथगेव चैष तु पृथग् गौराच्चलित्वा प्रभो -
रायातः कटकाध्वनाऽत्र मिलितः, प्रेम्णा प्रभुर्बोधयन् ।
ऊचेऽमुं 'कुरुषेऽत्र (पश्य) तु हठं, बन्धो ! स्ववार्तापुरो
वार्तां नो मनुषे तु कस्यचन, नास्तीदं वचस्तूचितम्।।६३ ।।

सत्यं, चिन्तय ते तु गौडचलनाद् भाव्यत्र पापद्वयं
ह्यत्यन्तं, भविता च्युतं तु भगवद्गोपीप्रियस्यार्चनम् ।
एकं, ते त्रुटिता भविष्यति तथान्यासप्रतिज्ञाऽपरं,
तन्नीलाचलमेव याहि, तरसा प्रत्यागमिष्याम्यहम्'।। ६४ ।।

ऊचे साधु गदाधरः सहृदयः प्रेमाश्रु मुञ्चन् 'प्रभो !
सर्वस्वं भवतः कृतेऽहमवनौ शक्नोमि हातुं, तथा ।
आगस्ते पुरतोऽत्र का ?, तव कृते त्वेव प्रतिज्ञा कृता,
यस्मिन्नस्ति भवान्निमायिसुमनास्तत्रैव नीलाचलः।। ६५ ।।

नीलाचलतो नो शक्तोऽस्मि कदाचित् ।
भिन्नो भवितुं तद्' (गौरः प्रियनीलः)।। ६६ ।।

उक्तं तत्प्रभुणा 'तु ते किमपि न क्षेतैव बाबा ! ममै -
व त्वारोक्ष्यति मूर्ध्नि पापमखिलं, चेत्त्वं विधातुं यदि ।
मामाकाङ्क्षसि पापिनं, चल मया तत्काममेवा,न्यथा
पुर्यां याहि' (निमायिसौहृदधनप्रेमी हठी क्वापि नो)।। ६७ ।।

'मूर्ध्न्यस्ति पापमखिलं प्रभुगौर ! मे,ऽहं
सर्वात्मकाघसहने सुमनः ! समर्थः ।
शक्तस्तु सोढुमिह नो भवतो वियोगं'
चावादि विह्वलतयाऽथ गदाधरेण ।। ६८ ।।

उक्तं तत्प्रभुणा च कर्कशतया 'कर्तुं प्रसन्नं तथा
मां त्वं वाञ्छसि चेद् गदाधर ! पुरीक्षेत्रं निवर्तस्व तत् ।
बन्धो ! साम्प्रतमेव, सङ्गचलनात्ते भावि कष्टं मह-
न्मे (स्थाने सुमनोविरुद्धघटनं कष्टं यथार्थात्मनः)।। ६९ ।।

सम्मानं कुरुषेऽत्र किञ्चिदपि मे चेद्, दापयित्वा तदा
त्वां भाषे शपथं निजं, प्रियपुरीक्षेत्रं निवर्तस्व तत्' ।
गाढालिङ्गनकं प्रभुर्विहितवांस्तस्येदमुक्त्वा सुहृत्
(सौहार्दाऽमृतमात्रदानहृदयः प्रेमावतारप्रभुः) ।। ७० ।।

पृथ्व्यामापतितो गदाधरसुहृद् गौरस्य चालिङ्गन-
प्राप्तावेव तु मूर्च्छितो, नहि तथा तस्थौ तदग्रेऽधुना ।
वार्तैवोक्तिकृते, तदैव सुमना दृष्ट्वा सुयोगं प्रभु -
र्भट्टाचार्यकसार्वभौममवदल्लब्ध्वा स्वपार्श्वस्थितम् -।। ७१ ।।'

'भट्टाचार्य ! तथेमं सङ्गेनैव निजेन ।
आदायैतु पुरी-'(माः ! क्षेमः सज्जनयोगः)।। ७२ ।।

भट्टाचार्यमहोदयस्तु चकितोऽतिष्ठ,न्न तस्याऽमिल-
त्किञ्चिद् वक्तुमथैव कोऽप्यवसरो,ऽसौ दुःखितेनात्मना ।
चक्रे च प्रणतिं प्रभोश्चरणयो,स्तं लागयित्वा प्रभुः
कण्ठे प्रेमपुरस्सरं स चलितोऽग्रे यानहेतोरथ ।। ७३ ।।

तिष्ठन् प्रभुमुखः पश्यन्ननु रुदन् ।
तस्थावय-(महो ! सत्साधुविरतिः)।। ७४ ।।

सङ्गेऽस्याथ निमायिनश्च जगदानन्दः स्वरूपस्तथा
गोस्वामी हरिदासकश्च परमानन्दो मुकुन्दः पुरी ।
गोविन्दप्रभृतिश्च भक्तसुहृदः काशीश्वरः साम्प्रतं
चेलुर्गौडधराप्रयातुमनसो (गौडो निमायिक्षमा) ।। ७५।।

आप्त्वा याजपुरं तु राजसचिवौ चापि प्रभुस्तावुभौ
श्रुत्वोक्त्वाऽथ निमायिसौहृदहृदा प्रत्यर्पयामास सः ।
रात्रिं व्याप्य दिने स तत्र सुमनाः श्रीमत्कथाकीर्तनं
रामानन्दमहाशयेन सहितः कृष्णस्य कुर्वन्नभूत् ।। ७६।।

आदेशं च निवर्तनस्य स ददौ प्राप्य प्रभू रेमुणां
रामानन्दसतोऽपि, दुःखितमनाः शीर्षेऽङ्घ्रिधूलिं प्रभोः ।
धृत्वा पृष्ठमुखो बभूव च रमानन्दो रुदन्, रेमुणा-
पारं स त्वधिगम्य गौरसुमनाश्चाग्रे विरक्तोऽचलत्।। ७७ ।।

चैतन्यः सुमनास्तथाऽऽपयति च ग्रामेऽपि यस्मिन् प्रभु -
स्तत्रैव प्रभुसत्कृतौ ननु महाराजप्रतापाऽऽशया ।
प्राप्यन्ते बहवो जनाः, सुमनसः कुर्वन्ति ते सत्कृतिं
चात्यन्तं (सुहृदो मिलन्ति जनताः साधौ हि सौहार्दतः)।।७८।।

स्थाने पूर्वत एव च प्रभुजगन्नाथप्रसादस्य चाऽऽ-
सीत्स्थाने ननु संविधा, पथि तथा श्रीकृष्णसंकीर्तनम् ।
कुर्वन्नात्मसुदर्शनेन जनतां ग्रामस्य धन्यौ प्रभुः
प्राप्तश्चोत्कलराज्यसीम्नि सुमना राज्याधिकारिव्रजम्।। ७९ ।।

●●

जनन्या दर्शनम्

६. सुलभाः प्रायो नहि मर्त्यानां भुवने पञ्च जकाराः ।
जन्मनिमित्तं जननी ममता दीर्घं तिष्ठति कृतिनाम्
जन्मभूमिसंस्कृत्यनुरागः क्षमावतां (धीराणां) केषाञ्चित् ।
जह्नुसुतापावनतारतिरिह सद्विमलान्तःकरणे
जनार्दनैकप्रियसर्वस्वं विरलपुरुषनिश्चयनम् ।
जकारपञ्चमजनकसुलभता पुरुषवपुषि वत्सलता ।।

श्रीभौमप्रभृतीन् प्रभुः कथयते भक्तान् स्म नीलाचल-
प्रस्थानावसरे निमायिसुमना 'मे गौडदेशाध्वना ।
श्रीवृन्दावनयानतस्तु भविताऽद्धैकेन कार्यद्वयं
मार्गेण (प्रियदर्शनैकमनसः संसारयात्रा स्वतः) ।। ८० ।।

मातुर्दर्शनमात्मनश्च भविता मे प्रेममय्यास्तथा
कुर्वन् सम्मिलनं तु भक्तसुहृदां भागीरथीस्नानकम् ।
मार्गे जन्मभुवोऽपि दर्शनमहं यास्यामि वृन्दावनं'
(वृन्दा-भक्ति-वनाध्वनैव निखिला सांसारिकी व्यापृतिः) ।।८१।।

विस्मर्तुं न शशाक सोऽत्र जननीजन्मावनीजाह्नवी -
प्रेम श्रीलजनार्दनार्पितमना गौरप्रभुः सन्नपि ।
आसीत्स्थानमदोविशालहृदये स्थाने त्रयाणां कृतेऽ-
मीषामेव विशेष-(मत्र ममताऽऽस्वादो हि मातुः पथः)।। ८२।।

गौरोऽदस्त्रितयस्य दर्शनकृते त्वासीद् भवन्नातुरः,
प्राप्तस्योत्कलराज्यपश्चिमगतप्रान्तं तथैवाभवत् ।
चेतोऽत्यन्तसुखप्रदायकशुभोपेतं निमाय्यात्मनः
संतापत्रयहारिणीभगवतीभागीरथीदर्शनम् ।। ८३ ।।

लोकस्तुत्यसुरापगाभगवतीभागीरथीदर्शना-
देवाऽद्यैष परं सुदीर्घसमयाद् भूत्वा प्रभुर्मूर्च्छितः ।
मेदिन्यां पतितः, प्रगाय सुमना 'गङ्गे !' तथाऽ-
रोदीद् दीर्घ-(महो ! निमायिहृदयो वात्सल्यभावक्षुधः)।। ८४ ।।

गङ्गाजीस्तुतिमस्ति गद्गदगलात्कुर्वन्, क्षणानन्तरं
चोत्तस्थौ, प्रभुरेष भक्तसहितश्चक्रे निमायिप्रियः ।
गङ्गानिर्मलशीतलाम्बुनि तथा स्नानं च पानं प्रियं
(शान्तायां क्षुधि तृप्तिमेति हृदयं पानक्रियानन्तरम्)।। ८५ ।।

आसीदुत्कलराज्यसीम्नि सुहृदो राज्याधिकारिव्रजैः
स्थाने पूर्वत एव सम्प्रति कृतोऽमुष्य प्रबन्धः प्रभोः ।
सत्कारस्य विशेषक,श्च निखिले तत्राधिकारिव्रजे
सञ्जाताः प्रतिकर्मचारिणि मुदोऽत्यन्ताः प्रभोर्दर्शनात्।। ८६।।

कुर्वन्तो निखिलास्तु रोदनमभुः पादे पतित्वा प्रभो –
स्तान् संयोज्य निजोरसा सहृदयो गौरः कृपां दर्शयन् ।
तद्देहेषु सुकोमलं निजकरं संघूर्णयामास स
(स्पष्टं सौभगमाप्यते सुमनसः पुण्यैर्महद्भिर्नृणाम्)।। ८७ ।।

नृत्यन्ति स्म च लब्ध एव सुहृदः स्पर्शे प्रभोः, प्रेम्णि ते
तन्मत्ता 'हरि–बोल–बोल–हरि–हे !' चोक्त्वा निमायिप्रियाः ।
श्रुत्वा श्रीप्रभुगौरकागतिसमाचारं समीपाखिल–
ग्रामस्त्रीपुरुषार्भकाः सुमनसः संदर्शनस्य प्रभोः–।। ८८ ।।

घाटे लालसया बभूवुरमिताश्चैकत्रितास्ते तथाऽऽ–
गत्याऽऽगत्य, करौ पुनश्च ननृतुः कृत्वोपरीहाखिलाः ।
व्योमान्दोलनकैर्दिशश्च विदिशः संपूरयन्ते हरि–
ध्वानै–(र्व्योमविशुद्धितो हि निखिलाः शुध्यन्ति वाग्वादयः)।।८९।।

पारे तत्र बभूव गौडधरणीसीमाऽशृणोद् भारिकं
ह्युत्क्रोशं यवनश्च गौडधरणीसीमाधिकारी त्विमम् ।
एतद्वास्तवहेतुबोधनकृतेऽस्तस्तेन संप्रेषित–
श्चैको गुप्तचरो–(ऽनिमायिभुवने सर्वं हि शङ्कास्थलम्)।।९०।।

संघर्षो दिवसेषु तेषु विपुलो राज्यद्वयेऽभू,दितो
गौडेडागमनस्य यात्रिकनृणामासीच्च मार्गत्रयम् ।
आसंस्ते त्रय एव तत्र पिहिता युद्धस्य हेतोः, सदा
ह्येकस्मादपरस्य मानसतलेऽस्थाद् भीतिरेव द्वयोः।। ९१ ।।

आप्तो गुप्तचरः प्रभोः स निकटेऽद्धा हिन्दुवेषान्वितः,
प्राप्ते तु प्रभुदर्शनेऽत्र निजकाऽऽत्मत्वं हि विस्मृत्य सः ।
मत्तः प्रेम्णि ननर्त चातिशयितं, स्वस्वामिपार्श्वे स्थितौ
तस्यामेव तथाऽऽपयत्स (भवति श्रीप्रेमसङ्गोऽद्भुतः)।।६२ ।।

तं तन्मोदनिदानकं निजचरं पप्रच्छ सीमाधिपो,
ब्रूते 'हे सरकार !' गद्गदगलादारम्य चारम्य सः ।
'किं ? ब्रूयामधुनास्मि यं सुपुरुषं दृष्ट्वाऽहमत्रागतः,
साक्षात्सुन्दरतावतारपुरुषस्त्वेवास्ति मन्येऽत्र सः ।। ६३ ।।

रूपे तस्य तु दृष्ट एव वपुषः संज्ञानकं व्यस्मरं,
तद्दृष्टौ कुहकोऽस्ति, मादकरसश्चास्यस्मिते वर्तते ।
वाण्यामुन्मदकद्रवः, सहृदयं तं त्वेकवारं भवान्
गौरं पश्यतु केवलं, ननु वचः स्थानेऽत्र हाताऽखिलम्-।।६४।।

मूल्येन विना तद्दासो ननु भूत्वा ।
भावी विलुठंस्तत्पादाम्बुजपार्श्वे' ।। ६५ ।।

एतद्गुप्तचराननादथ तथा श्रुत्वाऽधिकारी वचो,ऽ-
मात्यं प्रेषितवांस्तथाहि परमं विश्वस्तमेकं निजम् ।
स्थाने तूत्कलकाधिकारिनिकटे च श्रीप्रभोर्दर्शन-
स्वाकाङ्क्षां प्रकटां चकार (विधिना सौभाग्यमाप्यं नृणा)।।६६।।

एषोऽमात्यमहोदयोऽपि मधुरप्रेमप्रभावान्प्रभो-
र्नो तस्थौ रहितस्तथाह्यनुपमं पीत्वा तदीयं रसम् ।
दृग्भ्यां सोऽपि बभूव मत्तसदृश,श्च प्रेमपूर्णोक्तिभिः
संवादं ह्युडियाधिकारिनिकटे स्वस्वामिनोऽभाषत।। ६७ ।।

आश्चर्यां यवनाधिकारिहृदयाकाङ्क्षां निशम्येदृशीं
कुर्वन्नुत्कलकाधिकारिपुरुषः प्रेम्णः प्रशंसां प्रभोः ।
संसारत्रयपावनस्य कथयन्नासीत्पुनर्वै पुनः
'कस्याप्येष महाप्रभुः सहृदयस्त्वेकस्य नास्त्येव कौ-।। ६८ ।।

एतस्योपरि सर्वजीवजगतस्तुल्योऽधिकारोऽस्ति वै,
चेत्स्वामी प्रभुदर्शनस्य भवतो वाञ्छां हि धत्ते, तदा।
नः सौभाग्यमिदं, निमायिनिकटे ह्यायातु, चायातु सोऽ-
वश्यं (भद्रनिमायिलोकमिलनं सौभाग्यमच्छात्मनाम्)।। ६९ ।।

सत्कारञ्च तथाऽऽदरं ननु यथा शक्यं भवेत्तस्य नः
कर्तार,स्तु तथाहि सैन्यसहितो नायातु स स्वैः समम् ।
विश्वस्तैर्दश पञ्च सेवकजनैरेव प्रभोर्दर्शने
त्वायातु (प्रियदर्शने परिमिताऽऽत्मीयस्थितिः शस्यते)।।१०० ।।

सन्देशेऽधिगतेऽत्र चैव यवनस्वामी प्रभोः सन्निधौ
विश्वस्तैर्दश-विंशसेवकजनैः सार्धं निजैरागतम् ।
धृत्वा हिन्दुसमानवेश,मकरोदेष प्रभोर्वन्दनं
पादे, प्रेमपुरस्सरं प्रभुरदादालिङ्गनं तस्य तत् ।। १०२ ।।

कुर्वन्नेष बभौ स्तुतिं च विनयं कालं बहु श्रीप्रभो,-
श्चक्रे तस्य यथोचितं सहृदयः सम्मानसत्कारकम् ।
वस्तूनि प्रददौ बहूनि सुमनास्तस्योपहारे, प्रियं
सन्मैत्रीव्यवहारमुत्कलनृपाऽऽयुक्तश्चकाराऽमुना ।। १०२ ।।

मत्वा श्रीप्रभुदर्शनान्निजममी लोकाः कृतार्थं, प्रभो-
रादेशं गमनस्य चेषुरधुना, गौरप्रभोः सङ्गिषु ।
ऊचे तं यवनाधिकारिसुजनं संबोधय'न्नः प्रभुः
सम्प्रत्यत्र महाशयेच्छति यति'र्दत्तो मुकुन्दस्तदा ।। १०३ ।।

'श्रीगङ्गोत्तरणं तु, पारगमनार्थेष्टप्रबन्धं भवान्
कर्ता किं ?, यवनाधिकारिसुजनः- प्रातःक्षणेऽदात्प्रभोः ।
पारप्रापणवाक्यमेष नमनं कृत्वाऽखिलस्य प्रभो -
स्तद्भक्तस्य निजं च वासमगमत् (संयोगतः स्वस्थितिः)।।१०४।।

नावोऽन्यत्र दिनेऽधिकारियवनद्वाराऽधिकाश्चागताः,
पादाब्जे त्वधिकारिमुख्यसचिवः कृत्वा प्रणामं प्रभोः ।
प्रस्थानाय निवेदनं विहितवान्,कृत्वोत्कलावासिनां
प्रेमाश्वासनदानकं प्रभुरथाऽऽरूढोऽभवन्नावि सः।। १०५ ।।

काचिद् भीर्जलदस्युतोऽस्तु न, ततो हेतोः प्रभो रक्षणे
तन्नावं परितः सशस्त्रभटकैर्युक्ताश्च नावोऽचलन् ।
पृष्ठेऽग्रे बहु, सन्ति चात्र पुलिने मुञ्चन्त एवाश्रु ते
तिष्ठन्तो ह्युडियाधिकारिपुरुषाश्च ग्रामवासिव्रजः-।। १०६ ।।

कुर्वन्तो हरिसुध्वनिं प्रभुरभून्नाव्येव संकीर्तनं
कुर्वंस्तत्र समं स्वभक्तनिकरैः, प्रेम्णा तथैवं प्रभुः ।
कुर्वन् कीर्तनमेष भक्तसहितश्चोत्तीर्य मन्त्रेश्वरा-
ख्यं नालं समवाप पिच्छलदहं (कौ पिच्छलोऽध्वा क्व नो?)।।१०७।।

एतस्माद्यवनाधिकारिसुहृदं प्रस्थापयामास स
श्रीगौरः स्वकरेण तस्य च जगन्नाथप्रसादं ददौ।
तन्वानः प्रभुदत्तमेष मुदितां प्रेमप्रसादं तथा
लब्ध्वा गौरमहाप्रभोर्विरहतोऽधीरो निवृत्तस्ततः ।। १०८ ।।

गौरो ननु पानीहाटीं प्रभुरापत् ।
नावैव तया (नौः पानीयधरित्री) ।। १०९ ।।

घाटे तत्प्रससार शीघ्रमपरः पानीकहाटीगते
गौराङ्गप्रभुकागतेः प्रियसमाचारोऽभितः स्त्रीनराः ।
आप्ता 'गौरहरि'स्तथा जयतु कावेवं 'शचीनन्दन'-
श्चोक्त्वोक्त्वा ननु गुञ्जयन्ति गगनं (साधुस्वरः सञ्जयः)।।११०।।

घाटे सम्प्रति पुञ्जितः सुमनसामोघो नराणां तथाऽ-
पारो, राघवपण्डितस्तु विधिना केनापि निन्ये प्रभुम् ।
स्वे गेहे,ऽत्र कुमारहाटिमगमत्स्थित्वा तथैकं दिनं
गौराङ्गो दिवसे परत्र सुमनाश्च प्रातरेव प्रभुः ।। १११ ।।

आसीद् द्वीपनिवासिनो गृहमथाप्येकं कुमारस्थले
श्रीवासस्य च पण्डितस्य, समये तस्मिन् कुटुम्बेन सः ।
तत्रैवास्ति समं स्म, तस्य निखिले मोदः कुटुम्बे प्रभु-
प्राप्तेः संप्रसृतो (निमायिसुमनोगन्धोऽलिचेतोहरः)।। ११२ ।।

सर्वे स्त्रीपुरुषार्भकाः प्रभुपदे ह्यागत्य चागत्य ते
जाताः संलुठिताः, प्रभुं निजगृहं सेनः शिवानन्दजी ।
निन्ये काञ्चनपाडवासिसुजन,स्तत्रैव चक्रे प्रभु-
श्चैतन्योऽपि मुकुन्ददत्तसहजश्रीवासुदेवालयम् - ।। ११३ ।।

स्वपादरेणोश्च पवित्रमेष
स्थित्वा दिनं तत्र, दिने परस्मिन् ।
अद्वैतगेहं चलति स्म गौरः
(प्रियं सतः शान्तिपुरं सदैव) ।। ११४ ।।

सम्पूर्णे नगरेऽस्य शान्तिपुरकप्राप्तेः पुरैव प्रभो –
रुत्क्रोशः प्रभुकागतेः स्म भवति, स्थाने प्रभोर्दर्शने ।
धावं धावमयुर्जनाः, प्रभुरगादद्वैतगेहं समं
तेनापारजनौघकेन (जनतास्नेही चलत्येकलः ?) ।। ११५ ।।

आचार्यः स्वसुताऽऽच्युतं प्रभुपदे सङ्गे विगृह्याऽपतत्,
तावुत्थाप्य महाप्रभुः सहृदयोऽद्वैतं स्वकीयोरसा ।
गौरो लागयति स्म, चाच्युतशिरःस्थाने पुनर्वै पुन–
र्हस्तं घूर्णयति स्म (कः सहृदयो?, यो लोकमात्रप्रियः)।। ११६ ।।

गत्वा श्रावितमत्र मातरमपि स्थाने शचीं केनचिद्
वृत्तं–शान्तिपुरं महाप्रभुरथ प्राप्तोऽस्ति, माताऽऽत्मनः ।
सा षड्वर्षवियुक्तसौहृदवतः संन्यासिपुत्रस्य चाऽ–
भूद्व्यग्रा मुखमीक्षितुं (सुतमुखं मातुश्चकोर्याः शशी)।।११७ ।।

आचार्यान्वितचन्द्रशेखरमसावाह्वत्तदैव क्षणे,
सर्वे भक्तजनाः क्षणेन च शचीमात्रङ्गणे पुञ्जिताः ।
जाताः, श्रीप्रभुदर्शने प्रकटयन् सर्वोऽभवद् व्यग्रतां
(व्यग्रत्वं प्रियलब्धये हि हृदयप्रेमानुभावः सताम्)।। ११८ ।।

आनीता शिविका तदैव च शचीमातुः कृते, शीघ्रतां
यातुं शान्तिपुरं निमायिकजगन्मान्यस्य पुत्रस्य सा।
माताऽपि स्पृहया मुखस्य सुहृदश्चालोकनस्यात्मनः
कुर्वाणा त्वभवन्–(निमायिममता माता निमायिप्रिया)।। ११९।।

संसारे मनुजोऽखिलस्य वचसः कर्तुं क्षमोऽल्पं बहु
स्थानेऽत्रानुभवं, तथाऽऽर्यललनासाध्वीसतीनां परम् ।
सामर्थ्यं विरहार्तिबोधनगतेर्बुद्ध्वाऽनुभूतिक्रिया–
याः कस्मिंश्चिदपीह चास्ति भुवि नो (यः पीड्यते, वेत्ति सः)।। १२०।।

भक्ताः शान्तिपुरं तु दर्शनकृते स्वस्य प्रियस्य प्रभो –
र्यास्यन्ति, प्रियलाडलात्मजशिरो माताऽपि वृद्धाऽऽत्मना ।
घ्रात्वाऽऽयास्यति नूनमेव शिविकामारुह्य भक्तैः समं
गत्वा शान्तिपुरं स्वदीर्घदिवसाऽऽकाङ्क्षां च कृत्वाऽऽभृताम्।।१२१।।

काऽवस्था भविता पतिव्रतहृदो विष्णुप्रियायाः परं,
सा क्रोशद्वयमात्रसंस्थितनिजप्राणेश्वरालोकनात् ।
नूनं स्थास्यति वञ्चितैव, भुवने तस्याः कृते तत्पतिः
स्यान्नीलाचलकेऽथ शान्तिपुरके, स्थाने समे तूभये।। १२२ ।।

आः! कष्टं भुवि, रे! समाज! विहिता स्वामिव्रतानां कृते
नारीणां तु कठोरता कथमहो ! स्थाने त्वयैतावती ।
मूर्तिर्यस्य निमायिनो नयनयोर्नक्तं दिवं राजते
नृत्यन्ती, हृदयं प्रतिक्षणमहो ! कुर्वच्च यच्चिन्तनम्।। १२३ ।।

एतावच्च स एव तु प्रियतमः प्राणेश्वरोऽपि स्थित –
स्त्वासन्नं, बहु दूरमेव हि भवन्नास्ते, ऽत्र विष्णुप्रिया ।
कुर्यात्सा स्वमनोव्यथाप्रकटनं स्थाने पुरः कस्य कौ
(वेत्ति स्त्रीमनसो व्यथां यदि पतिः, किं कोऽपि विद्यात्परः)।। १२४।।

सामान्यप्रकटप्रकाशनवचोऽप्यासीन्न, चैषाऽऽन्तरी
गम्भीरव्रणकव्यथा ननु हृदस्त्वासीन्निमाय्यात्मनः ।
आसीद् बोद्धुमिमां तु कश्चिदपरोऽद्धा भुक्तभोगी क्षमः,
सामर्थ्यं किमहो! वराकवचसः, कुर्यात्स्फुटां तां व्यथाम्।।१२५।।

सा गत्वा शयनालये निजपतेरासिष्ट विष्णुप्रिया
मौनं, तत्समयेऽश्रु नैकमपि तन्नेत्रद्वयेऽदृश्यत।
तस्या न ज्वलति स्म किन्तु हृदयं मन्दं च मन्दं तथा
संतप्तं भवति स्म (वस्तु सरसं द्रागग्निना ज्वल्यते?) ।।१२६।।

पद्माभं कुरुते स्म तद् विकसितं विष्णुप्रियाया मुखं
म्लानं तद्धृदयोद्गतः कटुकटुर्धूमस्तु, विष्णुप्रिया ।
पश्यन्ती त्वधुनाऽनिमेषनयनाऽऽसीत्सम्मुखे कीलके
(काले कावपि पूर्वदृष्टविषयो द्रष्टुर्हि नूत्नायते) ।। १२७ ।।

एकैकं पुरतस्तु तन्नयनयोस्तद्रात्रिवार्ताऽखिलाऽऽ–
गत्यागत्य ननर्त भावुकहृदः स्पष्टं 'तथा कीलके।
अस्मिन्नेव तदुत्तरच्छदपटोऽभूल्लम्बमानो लघुः
पीताभो (भगवद्गृहीतमननं तद्ध्यानयोगाङ्गकम्)।। १२८ ।।

खट्वायां प्रियसौहृदस्य चरणौ तस्यारुणौ कोमला-
वत्रैवास्मि शनैर्बभूव सुहृदः संवाहयन्ती शनैः ।
कुर्वाणः स पुनः पुनः सहृदयस्त्वासीन्ममालिङ्गनं
(संस्पर्शानुभवस्मृतिर्विरहिणां पीयूषतुल्याऽऽत्मनाम्)।। १२६।।

च ब्रूते स्म "तु वातुली त्वमधुना जाता, कथं रोदिषि ?,
स्वच्छं केवलमेकवारमपरं कामं हस, त्वं हस" ।
एवं कोमलकोमलैर्मम तथा तुण्डं निजैरङ्गुलै -
रुक्त्वोक्त्वोपरि सोऽकरोत्सहृदयस्वामी पुनर्वै पुनः।। १३० ।।

आप्ता तदैवाक्षिणि मे तु निद्रा'
समं विचारैः सममेव चैतैः ।
निद्रा तथाऽऽप्ताऽवितथं तु विष्णु-
प्रियाक्षियुग्मे (हरते हि निद्रा) ।। १३१ ।।

आसीच्छान्तिपुरं निमायिजननी यातुं भवन्त्याकुली
माता पुत्रमनाः शची, तु हृदयं तस्याः समं वेणुभिः।
ऊर्ध्वं चोच्छलदस्ति, चिन्तयति सा 'काये सतोः पक्षयोः
सम्प्रत्येव तदाऽस्मि शान्तिपुरकं चोड्डीय याता द्रुतम्।। १३२।।

हृद्यं चात्मनिमायिपुत्रवदनं चन्द्राभशीतं तथाऽ-
चुम्बिष्यं, कनकोपमे निजकरं वै घूर्णयित्वा तथा।
तद्देहेऽहमपूरयिष्यमपरं स्वं दीर्घकालेप्सितं'
(माता तिष्ठति केवलं ह्यविरतं संचिन्तयन्ती सुतम्)।। १३३।।

माता सा समयेऽन्तिमे सहृदया विष्णुप्रियां मेलितुं
तस्मिन्नेव गृहे जगाम सदया तद्ढुण्ढनं कुर्वती ।
गत्वा तत्र च यद् ददर्श, सहसा दृष्ट्वाऽथ तत्तत्र सा
भीताऽभूत्तु भयेन (दृष्टिपुरतोऽभद्रानुमानाद्भयम्)।। १३४ ।।

आस्तां सम्प्रति पूर्णतस्त्वपिहिते विष्णुप्रियालोचने,
नाभूत्तत्र तयोर्निमेषपतनं, विष्णुप्रियायाः स्फुटम् ।
आकृत्यां विरहार्तिचिह्नमधुनाऽसह्यं तदीयान्तरं
दुःखं सूचयति स्म चामलतया (भावं व्यनक्त्याकृतिः)।।१३५।।

तद्गात्रं जडवस्तुसन्निभमहो ! त्वासीद्यथावद्धृतं,
तस्मिञ्जीवनलक्षणं किमपि नो, भीता च माताऽऽह्वयत् ।
'दुःखिन्या मम पुत्रि ! पुत्रि ! भुवने हा ! पुत्रि ! विष्णुप्रिये !
दत्वाऽगा ननु वञ्चनं त्वमपि किं?' (लोकेऽकृती वञ्च्यते)।।१३६।।

उक्त्वेदञ्च तदीयगात्रमबला माता करेणात्मनः
शीघ्रं हल्लयति स्म, तेन तरसा वोत्थाय सा स्तम्भिता ।
पश्यन्ती परितो जगाद बलतो 'यातः स किं वस्तुतः
सुप्तामेव तु मां विहाय (सुमनाः स्वामी भवेद् वञ्चकः?)।।१३७।।

हन्ताऽहं लुटिता, मम त्वपहृतं सर्वस्व,मेतत्पुरः
पश्यत्वत्र तु कीलमस्ति रहितं, पीतोऽपि नो तत्पटः' ।
उक्त्वेदं भुवि मूर्च्छया निपतिता भूयश्च विष्णुप्रिया
(मूर्च्छा यद्यपि चामयो, विकलतापीडापहा त्वात्मनः)।। १३८ ।।

माता तत्स्वकराश्रयञ्च ददती प्रोवाच 'हे पुत्रि ! किं
त्वं ब्रूषे ?, ननु वातुलेऽयि ! सरले ! जातं तवेदं तु किम् ?।
यास्याम्यस्मि निमायिशान्तिपुरकं, किं जल्पसि त्वं मम ?'
(श्रोत्रे क्वापि सती स्पृहा, दृशि परं नित्यं दिदृक्षाऽऽत्मनः)।।१३९।।

माता मानसवेदनां सहृदया वध्वा बुबोधात्मनो,
नार्येव प्रभवेत्तु यत्किमपि कौ नारीहृदो वेदनाम् ।
बोद्धुं, चेतनता निमायिवनितविष्णुप्रियायास्तथा
प्राप्ता सम्प्रति, सा च भावममला स्वं गूहमाना जगौ-।।१४०।।

'अम्माजी ! शयनं ममागतमतो जाने न दृष्टं मया
तस्मिन्नेव तु कीदृशं स्वपनकं, तत्रैव किञ्चित्तथा ।
जल्पन्ती भविता, तथाहि भवती यात्यद्य शान्तिस्थलं,
नूनं यातु विलोक्य चाऽऽव्रजतु तं (स्वात्मा तथैवात्मजः)।।१४१।।

मद्भाग्येऽस्ति न तस्य दर्शनमहो ! प्राप्यं, भवेन्नो तथा,
सौभाग्यं त्वियदेव मेऽस्ति किमहो ! न्यूनं ?, तु तद्दर्शने ।
लक्षं यान्ति जनाः, प्रयातु भवती, कुर्यान्न चिन्तां तु मे'
(ग्राह्यं संग्रहणीयमेव निखिलं लोके हि मर्यादया)।। १४२ ।।

श्रुत्वैतादृशमात्मनन्दनवधूवाक्यं दृढं सर्वथाऽ-
स्या मातुर्हृदयं तथा दलदभूद्, वक्षः कठोरं निजम् ।
कृत्वा सा प्रकटं चकार नहि तद् दुःखं तथाऽऽभ्यन्तरं,
पश्यन्ती स्ववधूं प्रति स्वशिविकां गत्वाऽऽस्त तस्यां च सा ।।१४३ ।।

आचार्यरत्नशशिशेखर-वासुदेव-
श्रीनित्यकप्रभृतयः शतशोऽथ भक्ताः ।
संकीर्तनेन पथि मातृशचीशिरस्का-
पृष्ठेऽचलन् (मधुरतिर्हि निमायियात्री)।। १४४ ।।

मातुश्चागमनस्य वृत्तमपरं शुश्राव गौरो यदो-
त्थाय द्वारि तदाऽऽगतः, स जननीं भूमाववतारयत् ।
पल्यङ्कात्स्वकरद्वयेन, सुमनाश्चाबोधबालोपम-
स्तत्पादे लुठति स्म, तच्चरणयोरासील्लुठन्नित्यजी।। १४५ ।।

अन्येऽन्ये च परस्परं धृतपदा भक्तास्तथा रोदनं
कुर्वन्तस्त्वभवं,स्तथाहि करुणापूर्णं सुदृश्यं बहु ।
प्रेम्णोऽभूच्च यथावदेव समयं, सिंहाभमात्मात्मजं
चोत्थाप्य स्वसकम्पपाणियुगलात्तेजस्विसंन्यासिनम्-।। १४६ ।।

माता लागयति स्म वक्षसि तदा, मातुः स्तनाभ्यां पयः
स्निग्धायाः स्वत एव निःसरदभू,दार्द्रा धरा तेन च।
जाताऽहो ! पयसा, तथाऽऽत्मजतनौ लग्नं रजोऽमार्जयन्-
माता स्वाञ्चलकेन, चुम्बति मुखं तस्यात्मजस्य प्रियम्।।१४७।।

जघ्रौ तस्य शिरः स्म घूर्णयति तत्सम्पूर्णकाये करं,
शक्ता प्रेमवशान्न सा कथयितुं किञ्चि,च्च पश्चाद् बहोः ।
कालस्य प्रविवेश मातरमयं धृत्वा गृहान्तः प्रभुः
सङ्गे(सङ्गतिसौख्यमेव सुहृदो लब्धुं हि सर्वाऽर्चना)।। १४८।।

मातुः स स्तवनं बभूव विदधन्नानाविधं, याचति
श्रीगौराङ्गमहाप्रभुर्निजगृहत्यागापराधक्षमाम् ।
प्रेमाऽसीममायि दर्शयति च प्रत्यक्षमातुः कृते
(रागं लक्षयते समर्थपुरुषो बन्धौ समक्षेऽखिलम्)।। १४९ ।।

एतावद्दिवसात्परं प्रियसुतं लब्ध्वाऽत्र माता निजं
प्रीताऽत्यन्तमभून्निजाश्रुसरिता सा क्लेदयन्ती तथा
तद्वस्त्रं, विविधं जगाद सुमनाश्च प्रेमवाक्यं, तदा
चादोऽपूर्वकमेव मातृसुतयोरासीत्तु सम्मेलनम् ।। १५० ।।

भक्तैस्तैरखिलैः कृतञ्च मिलितै रात्रौ हि संकीर्तनं,
पाणिभ्यामथ चात्मनः सहृदया संन्यासिपुत्रं निजम् ।
माता भोजयति स्म, मातृमुदिताहेतोस्तु तस्मिन् दिने
चक्रे भोजनमेष चातिशयितं प्रेमी निमायिप्रभुः ।। १५१ ।।

भक्तैः सार्धमथ द्वितीयदिवसे प्रस्थापयामास स
श्रीगौरो निजमातरं, कृतवती गेहागमस्याऽऽग्रहम् ।
माता 'सम्प्रति पञ्च सप्त दिवसानत्रैव वर्ते त्वहं,
ह्यागन्ता यदि शक्य'माप्तसुमना वाक्यं प्रभुर्दत्तवान्।। १५२ ।।

भूयश्च मिलनाऽऽशां साऽथ दधती ।
माता निजनवद्वीपं प्रतिगता ।। १५३ ।।

●●

श्रीविष्णुप्रियायाः संन्यासिस्वामिदर्शनम्

७. पाणिग्रहणं रूढं नारीविधिसम्मतनरयोगे।
पाणिस्पर्शोऽन्योन्यं सम्प्रति साधाणतः प्रभवति
नरनारीमध्ये, पश्चिमभूसामान्यव्यवहारः ।
पुरुषद्वारा स्त्रीकरधरणं ह्यार्यविशिष्टाचारः
आजीवनमेकः संरक्षति तमनुचरति निजमपरा ।
रक्षणमनुकूलः सन् संततमिह पौरुषसुखदानम्
मृदुताप्रभृतिप्राकृतसमुचितगुणरञ्जनमनुचरणम् ।
विधिना घटितं प्रकृतिपुरुषयोर्दाम्पत्यं नरनार्योः
व्यवहारः केवलपरमार्थस्थितिलब्ध्यै सद्व्रतिनोः ।।

विश्वासोऽस्ति ममेदृशो ननु निजोऽसावेव कौ विधते
सिद्धान्तोऽपि तथाहि शास्त्रनिवहे, यत्संस्थितो वर्तते ।
संसारोऽथ तपस्विनां सुमनसां पुण्याद्रहोवासिनां,
पातिव्रत्यमहत्तयैव च तथा स्त्रीणां सतीनामयम् ।। १५४ ।।

शास्त्राणामिदमेव चाप्यभिमतं - सद्धर्म एव स्थितः
संसारोऽस्ति, तथा विहाय निखिलं संसारिभोगाग्रहम् ।
दाम्पत्यव्रतपालनं प्रभुरतिप्रीतिक्रियासाधनं
चेतोवाक्करणैर्मनुष्यवपुषां नारीनराणां कृते - ।। १५५ ।।

निर्दिष्टः परमोऽयमेव परमो धर्मो,ऽत्र पश्चात्स्पृहा
सम्मानस्य तपस्विनस्तु भवितुं शक्नोति, कर्तुं तथा।
प्रख्यात्यै भुवि शक्यतेऽपि भगवद्भक्तिः, परं संसृतेः
किञ्चिन्नैव तथा प्रयोजनमहो ! स्त्रीणां सतीनां कृते।। १५६।।

जातीपुष्पसमा तु सा विकसति स्थाने पुनर्निर्जने,
कृत्वा स्वं दयितं प्रसन्नमथ च म्लानिं तथान्ते गता ।
तत्रैवाऽध्वनि जायते सहृदया जीर्णा च शीर्णा पुनः
(सर्वो दृष्टिपथेऽधिकाधिकनृणां किं जायते संसृतौ?)।। १५७।।

संसारेऽत्र तदीयगुप्तसुरभिर्व्याप्तस्तु भूत्वा तथा
कल्याणं कुरुते ध्रुवं सुमनसो लोकस्य, चैतत्परम् ।
संबोद्धुं परमस्तथैव पुरुषः कश्चिद् विवेकी क्षमो,ऽ-
स्तित्वस्यापि न सर्वलोकजगति ज्ञानं तदीयस्य तु।। १५८ ।।

पातिव्रत्य-(मतो ब्रुवे-) ऽत्र परमश्रेष्ठोऽस्ति धर्मः स्त्रियः,
पूजापाठतपःक्रतुप्रभृतिकानुष्ठानकेभ्यस्तथा ।
सर्वेभ्यः, प्रभवेत्तु कम्पयितुमाः ! शुद्धा तथैका सती
संसारं निखिलं, परं भवति चात्यल्पा तथैवं सती।। १५९ ।।

श्रीमन् ! भावकवृन्द ! बोधतु सती विष्णुप्रियाहृद्व्यथा,-
मल्पेऽस्मिन् वयसि क्षितौ प्रियतमप्राणेश्वरस्यात्मनः ।
सोढव्या विरहार्तिरस्ति सुहृदोऽसह्या तु तस्याः स्त्रियो
(यत्सोढुं क्षमतेऽत्र भूधरजगत्, तावद् भवेद् भूः क्षमा?)।।१६०।।

भक्तानां तु कृते तथाहि भगवान् प्राणेश्वरो विद्यते
तस्याः, संकुरुते स जीवजगतामुद्धारमप्यत्र कौ ।
जीवास्तत्कृपया तथाह्यगणिताः संसारसिन्धोर्गताः
पारं (पारगतिः समुद्रभवतः सन्नाविकानुग्रहात्) ।। १६१ ।।

साक्षादस्ति कृते स भक्तजगतो नारायणः, स्यात्तथा,ऽ-
स्यां तस्या भुवि तत्पतिस्तु ननु स स्वाम्येव हृद्वल्लभः ।
नास्ति स्थूलशरीरतः स निकटे तस्या,स्तु नो विद्यतां,
मूर्तिस्तद्धृदये विराजति सदा पत्युर्निमाय्यात्मनः।। १६२ ।।

करोति सा चिन्तनमेव चित्ते
कस्यापि नान्यस्य पतिं विहाय ।
अहोऽस्ति धन्या स्फुटमेव भूमा-
वत्रैकनिष्ठा पतिभक्तिरस्याः ।। १६३ ।।

आसीदान्तरिकी स्पृहा सुमनसो विष्णुप्रियाया - भवेत्
प्रत्यक्षं पुनरेकवारमवनौ स्वाराध्यदेवेक्षणम् ।
अस्मिन्मानवजीवने, परमियं केन प्रकारेण तु
स्वेच्छामत्र पतिव्रता प्रकटयेत्साध्वी पुरः कस्य च।। १६४ ।।

चेत्कञ्चित्कथयेदपीह, सुमनाः सोऽस्ति स्वतन्त्रेश्वरः,
संमन्तैव कथं निमायिहृदयः कस्यापि वार्तां यतिः ।
भावं तत्स्वमनोगतं तु हृदये संकोच्य विष्णुप्रिया
सा चित्तेन निजेष्टदेवपदयोरेवाऽकरोत्प्रार्थनाम् ।। १६५।।

विश्वासं दधती तु सा कथयति प्रेम्णस्तथाऽऽकर्षणे
'स ज्ञाताऽस्ति घटस्य मे तु वचसः सर्वस्य, मत्प्रेम च ।
स्यात्सत्यं, तदिहैव दर्शनमथाऽऽगन्ता स दातुं तु मे'
तस्थौ मौनमदो विचिन्त्य ननु सा (मौनस्थितिः साधना)।।१६६।।

प्रेम्ण्याकर्षणमस्ति सत्यमपरं, पूर्णो निजेऽस्तु प्रिये
विश्वासो, भवितव्य एव हृदये स्थानेऽनुरागस्तथा ।
अत्यन्तं भवदाकुलं तु हृदयं हेतोः प्रियस्याऽस्तु, च
स्नेहो वास्तविकः पुनस्तु मिलने सन्देह एवास्ति किम्?।। १६७।।

८. स्नेहो मेलयति स्वाभीष्टम् ।
जीवः प्रभवति कर्मवशादिह भूमौ कालक्रमतः
कार्यवशादन्योन्यं मिलति स्थाने साधारणतः ।
यद्वस्तु प्रति किन्तु स्नेहः सत्यो भवति यदात्मनि
कालस्थानाव्यवधानादिह तन्मिलतेऽस्याऽशङ्कम् ।।

किञ्चिन्नो दश विंशतिर्ननु मन,स्तत्त्वेकमेवाग्निवत्
सर्वत्राऽस्ति परं, मनश्च मलिनं तन्निर्मलं जायते।
भेदात्तादृशमेव पात्रजगतः, पूतं तथा निर्मलं
जायेताऽत्र मनोद्वयं यदि, तदा स्यातां तनू क्वापि वा-।।१६८।।

बोद्धुं भावमहो ! मनोगतमुभावेव द्वयोर्देहिनो-
र्लक्षक्रोशगतावपीह भुवने स्यातां समर्थौ तथा।
चैतन्येऽपि विसूत्रसूत्रममिलद् विष्णुप्रियायाः प्रभौ
गौरे शान्तिपुरस्थिते (सहृदयः साधुप्रभावाऽऽग्रही)।। १६९ ।।

प्राप्याऽद्वैतगुरोर्गतेरनुमतिं, कर्तुं कृतार्थां प्रभु-
स्तामेवैष (तु मन्यतां) सहृदयः स्वद्वीपयानेच्छया।
तद्विद्यानगरोन्मुखः प्रचलितो,ऽस्थात्तत्र गत्वा प्रभु-
र्गेहे पण्डितसार्वभौमसृहृदो भ्रातुश्च वाचस्पतेः ।। १७० ।।

आयान्ती प्रभुदर्शनाय जनताऽपाराऽभवद्, योऽपि वै
शुश्रावाऽत्र स एव दर्शनकृते नावा घटाभ्यां प्रभोः।
हस्ताभ्यां तरणं विधाय चलितो वोत्तीर्य गङ्गानदीं
तद्विद्यानगरं (सताञ्छवणतो जागर्ति दृष्टिस्पृहा)।। १७१ ।।

काले तत्र नृमुण्डमेव ददृशेऽनन्तं नृमुण्डं द्वयो-
रेवाऽकल्मषघाटयोः, सुमनसः प्राप्तेस्तु तत्र प्रभोः ।
मेलो वैकविधोऽलग,न्नरपदाघाताद् बभूवाऽधुना
गङ्गाझाबुवनं तु सुन्दरपथः (सौम्ये हि सौम्योऽखिलः)।। १७२।।

लोका जयकारमथ प्रभोः, कोलाहलमत्र च कुर्वते ।
गौरप्रभुदर्शनकस्पृहां चक्रुः प्रकटं च तथात्मनः ।। १७३ ।।

सम्मर्देन तथाऽमुना सहृदयः कोलाहलेन प्रभु-
र्निर्विद्य द्विचतुर्भिरेष शनकैः सार्धं स्वभक्तैरथ ।
तद्विद्यानगराच्चचाल कुलियां रक्षन्नृदृष्टेर्निजं
(संन्यासी सुमनास्तथा सहृदयो लोकादवेत्स्वं सदा)।। १७४ ।।

लोकाः स्वप्रभुदर्शनाऽग्रहणतो वाचस्पतिं पण्डितं
स्माऽऽक्रोशन्ति, वचस्तथाहि विविधं तं श्रावयन्ति स्म ते ।

व्यत्यस्तं, विदितं यदा सहृदयैरन्ते यदेतै,रितो
निर्यातो निभृतं प्रभुस्तु, सुहृदां नो दुःखसीमा तदा।। १७५ ।।

ते सर्वे विरहे प्रभोश्च रुरुदुस्तूच्चै,स्तदैव क्षणा-
'त्तु प्राप्तः कुलियां महाप्रभु'रदाद् वृत्तं तथैको द्विजः ।
अत्राप्त,स्तदपारलोकनिवहाग्रस्थश्च वाचस्पति -
र्भूत्वा तत्कुलियोन्मुखस्तु चलितो (नेताऽस्तु वाचस्पतिः)।।१७६।।

चैतन्यप्रभुदर्शनस्य कुलियामाप्ता निजव्यग्रतां
लोकास्ते ह्यनुरागिणः प्रकटयामासुस्ततः श्रीप्रभुः ।
आरुह्यात्मसुदर्शनेन कृतवाँल्लोकान् कृतार्थाञ्छदिं
(प्रेम्णा सर्वसमर्थकोऽपि भगवान् बद्धो भवत्यात्मनाम्)।।१७७।।

धन्यान् स्वान् प्रभुदर्शनेन बहवस्ते मन्यमाना जनाः
स्वस्थानं प्रतिजग्मु,रत्र तु परं जग्मुर्जना दर्शकाः ।

यावन्तो, ऽपि च वृद्धिमीयुरधुना तावन्त एव द्रुतं,
यावत्सायमिदं तु दृश्यमवसद् (दृश्यं सतो दर्शनम्)।। १७८ ।।

एवं गौरनिमायिनो बहु जनव्यापिप्रभावं प्रभो-
र्दृष्ट्वाऽद्वेट् प्रभवे निमायिसुहृदे यो यः पुरा, तेऽखिलाः ।
पश्चात्तापमथात्मपूर्वविहिते कृत्ये प्रकाशं तथा
कुर्वन्तो निखिले प्रभोश्च शरणे प्राप्ता निमाय्यात्मनः।। १७९।।

चाऽयाचन् सुहृदं तथा तममलं स्वस्वापराधक्षमां,
संन्यासं सुहृदो विरोधिहृदयं दृष्ट्वैव गौरप्रभोः ।
संजातं नवनीतसन्निभमृदु, प्रेम्णस्तथालङ्कृति-
स्त्यागोऽस्त्येव(निमायिनः सुमनसस्त्यागप्रकाशोद्भवाः)।।१८०।।

प्रेम प्रस्फुटितं विना व्यवहृतौ त्यागं भवत्येव नो,
लोके संग्रहिणां परिग्रहवतां प्रेमोद्गतिर्जीवने।
स्यादेवात्र तथाहि केन विधिना?, प्रेमप्रभावात्प्रभोः
प्रेमोर्मिर्हृदयेऽपि पापकृतिनां तन्निन्दकानामिह- ।। १८१ ।।

आश्चर्येण तरङ्गिता, प्रथमतो जातः शरण्यप्रभो-
स्तद्विद्यानगरस्य चास्य शरणापन्नो द्विजः पण्डितः।

देवानन्दबुधाख्य-भागवत-ना, स्वस्यापराधस्य नो
चक्रे केवलमेष भञ्जनकृते याच्ञां, महात्मा परम्-।। १८२ ।।

जग्राह प्रभुतो वचो हि यदिदं - यः कोऽपि याचिष्यति
त्वत्रागत्य भवन्तमग्रविहितस्वात्मापराधक्षमाम्।
तस्मै दास्यति सौहृदेन कृपया गौरो भवांस्तु क्षमा-
दानं (संभवति क्षमाकरणताशक्तिर्निमाय्यात्मनि)।। १८३ ।।

नासीत्पूर्वकृतापराधजगतः स्थाने हृदि प्रस्तृते
कस्यापि स्मृतिरेव गौरसुहृदः, सोऽभून्महामानवः।
उक्तानां वचसां स्वभावविवशैर्भूमौ तु संसारिभि-
र्लोकैर्दूषितमेव किं स मनुतां? (दोषज्ञता प्राज्ञता)।। १८४ ।।

९. जानन्नासीद् गौरनिमायी।
स्वप्रकृतेः सदृशं चेष्टावान् ज्ञानवानपि मनुष्यः।

प्रकृतिक्रीडाजगतीचित्रे पुरुषस्थितिचेतनता
निष्क्रियपुरुषस्थित्यां प्रकृतिः क्रीडति विविधविचित्रम्।
तज्जानन् मेधावी पुरुषः प्रकृत्यसक्तः सततम्
लोकमाचरति जडव,त्प्रेमी प्रियतमरत्यनुकूलम्।।

तत्कस्यापि च कीदृशोऽपि वचसो नो दूषितं कर्हिचिन्-
मन्तव्यं, ह्यपराधभञ्जनगतस्वस्वीकृतिस्त्यागिना।
देवानन्दबुधप्रमोदनकृते भूयोऽपि दत्ताऽमुना
चैतन्येन (निमायिना सुमनसा संन्यासिना भूयते)।।१८५ ।।

सर्वैरात्मसमर्पणं कृतं चैतन्यप्रभुपादपद्मयोः।
कण्ठे लागयति स्म तान् प्रभुः (श्रीकण्ठो हि सहिष्णुताप्रभुः)।।१८६।।

आगत्य प्रभुगौरकस्य कुलियां सर्वे कनिष्ठास्तथा
ज्येष्ठा भक्तजनाः स्त्रियश्च शिशवः कृत्वा तु त़द्दर्शनम्।
भक्तानां प्रगता,स्तु शान्तिपुरके माता मिलित्वाऽऽगता,
भक्तो दर्शनतस्तु कश्चिदपि नो तस्थौ प्रभोर्वञ्चितः।।१८७ ।।

तस्थौ पञ्च दिनानि सप्त कुलियामध्ये निमायिप्रभु-
र्ह्येतावन्ति दिनानि यावदभवन्मेलो यथैव ध्रुवम्।
स्थानेऽस्मिन् कुलियान्तरे तु लगितो, जातेऽपि चैतादृशे
कुर्वाणा रहसि प्रभोः सहृदया विष्णुप्रिया चिन्तनम्-।। १८८।।

तस्थावेव गृहान्तरेऽथ निजके, गौरप्रिया सा सती
साध्येका च कुलाङ्गनेव न निजाद् गेहाद् बहिर्निस्सृता।
मन्येऽसौ निजदर्शनेन सुमनाः कर्तुं कृतार्थां प्रभु-
स्तामेव प्रकटं चकार तु नवद्वीपप्रयाणस्पृहाम् ।। १८९ ।।

भक्तानन्दमुदोरुवास न तथा सीमा, तदैव क्षणे
नौकाऽऽप्ता, दश पञ्च भक्तनिवहैः स्वैरन्तरङ्गैः प्रभुः।
गङ्गापारविधानतः सह नवद्वीपस्य घाटेऽभवन्-
(मुक्तो बन्धनतोऽपि जन्मथरणीमेति प्रकारान्तरात्)।।१९०।।

घाटश्रेणिमथाधिरुह्य सुमनाः शुक्लाम्बरस्य प्रभुः
प्राप ब्रह्मचरस्य सम्प्रति कुटीं, श्रीब्रह्मचारी स्तुवन्।

स्वं भाग्यं ननु भूरि भूरि पदयोरासील्लुठञ्छ्रीप्रभोः,
सम्पूर्णे नगरे ससार च समाचारः क्षणादेष हि ।। १९१ ।।

आगत्य प्रभुदर्शनेन परितो लोकः कृतार्थं तथाऽऽ-
गत्य स्वं मनुते स्म, साम्प्रतसमाचारे तु लब्धे सति।.
आसीनाऽपि यथा बभूव च शची माता तथैवाऽऽगता
धावन्ती (जननी स्थिरा नु भविता?, वृत्ते सुतस्य श्रुते)।।१९२ ।।

चक्रे मातृपदोः प्रभुः प्रणमनं, माता स्ववाष्पैः प्रभो-
र्वस्त्रं क्लेदयति स्म, मौनमधुना किञ्चित्प्रभुश्चिन्तयन्।
तिष्ठन्नस्ति ततः, बभूव गदितुं कस्यापि नो साहसं
किञ्चिद् (धीरगभीरमानवपुरः साधारणोऽपि स्थिरः)।।१९३ ।।

तद्गौरो धृतपादुकश्चरणयोः शच्या च मात्रा समं
स्वं गेहं प्रति मन्दमेष चलितो मन्दं, समस्तं वचः।
आप्तं तत्स्मरणे क्रमा,त्सहृदयः प्राक् पञ्चषाद्वर्षतो
यद्घाटे ह्यवगाहनं स्म कुरुते, शून्यः प्रतीतो यथा-।। १९४ ।।

एतावत्यपि साम्प्रतं जनभरे घाटस्तथा स स्थिते,
मन्ये सर्वतरुः पुरा परिचितः कुर्वन् भवेत्स्वागतम्।
हल्लित्वाऽद्य पुनः प्रभोर्ननु पुन,स्ताश्चैव चाट्टालिकाः
पन्थानश्च पुरातनाश्च ननु ते, तान्येव गेहानि च-।। १९५ ।।

देवस्थानभरः स एव सुहृदो गौरप्रभोश्च स्मृतिं
कुर्वन्ति स्म तु नूतनां पुनरपि, स्थाने निमायी प्रभुः।
अग्रेऽग्रे कृतनिम्नदृष्टिरधुनाऽऽसीद्यंस्तथा पृष्ठत-
श्चायाति स्म हरिध्वनिं सुमधुरं कुर्वञ्जनौघो बहु ।। १९६ ।।

तस्थौ गेहपुरः प्रभुः सहृदयश्चागत्य, विष्णुप्रिया-
हृत्सस्पन्दनमस्ति, सा सहृदया सोढुं क्षमा नात्मनः।
प्रेम्णो वेगमभूदियन्तमधिकं, वातायनात्साऽधुना
सर्वस्वेक्षणमात्मजीवनभुवश्चक्रे निमायिप्रिया ।। १९७ ।।

एषा मुण्डितशीर्षमद्य सुहृदं काषायवस्त्रान्वितं
तं सर्वप्रथमं विलोकितवती विष्णुप्रिया च प्रभुम्।

लोकित्वाऽमलकाशमानवदनं सा तस्य विष्णुप्रिया
चैतन्यस्य निमायिचित्रलिखिता वा मूर्तिरेवाऽभवत्।। १९८ ।।

दृग्भ्यामश्रुकणो निरन्तरं तस्या जीवनतासमर्थनम्।
एवाऽद्धा कुरुते स्म निस्सरन् (वैवश्यं महतो विलक्षणम्)।।१९९।।

स्वप्राणेशपदाब्जयोः सहृदयाविष्णुप्रियाकामनाऽऽ-
सीत्किञ्चित्प्रणता सती कथयितुं, गच्छेज्जनौघे कथम्?।
किन्त्वेतावति सा बहिः कुलवधू,रेतद् विचिन्त्यैव सा
द्वैविध्ये पतिता निमायिवनिता (स्वेच्छावती किं सती?)।।२००।।

भूयश्चिन्तितमेतया 'ननु यदाऽऽयातः स चैतद्गृहं,
संन्यासी त्वियतीं चकार स यतिर्भूत्वाऽनुकम्पामपि।
लज्जा सम्प्रति मे बहिस्तु गमने तत्किं ?, च लोकस्य सा
लज्जाऽस्यैव पदाप्तिहेतुरवनावेवाखिला त्वस्ति मे।। २०१ ।।

साक्षात्सम्मुखमेव सम्प्रति पदे चैते यदोपस्थिते
स्तोऽ,दःस्पर्शसुखेन वञ्चितमहो ! कुर्यामहं स्वं कथम्?'।
एतत्साऽथ विचिन्त्य सम्प्रति यथाऽऽसीना बभूव, प्रभोः
कर्तुं स्पर्शमसौ चचाल पदयोर्विष्णोस्तथैव प्रिया ।। २०२।।

वेणीबन्धनकर्म चारुणदहो !, देहस्य सर्वाङ्गत-
स्त्यक्ताभूषणका निमायिवनिताऽऽसीत्साऽथ विष्णुप्रिया।
आहारोऽपि तथैव चाल्पमधिकं चक्रे, च नित्याल्पकाऽऽ-
हारात्तद्वपुरस्ति दुर्बलमतो (दौर्बल्यमप्यर्ज्यते) ।। २०३ ।।

आसीत्साऽथ निरन्तरं सुमनसो ध्यानं सदैव प्रभोः
कुर्वाणा, मलिनाम्बरा सहृदया च क्षीणकाया तथा।
गौराङ्गप्रभुदर्शनोत्सुकमना विष्णुप्रिया स्वां तनुं
सम्पूर्णां प्रभुसम्मुखं प्रचलिता संकोचयन्ती द्रुतम्।। २०४ ।।

गौरो नो कमपि प्रतीह सुमनाः स्वां दृष्टिमुत्थाप्य स
क्षोणीमेव महाप्रभुः प्रति तथा पश्यन् स्थितो विद्यते।
दृष्टं तेन तदैव–तच्चरणयोरागत्य चैकाऽऽपतत्-
स्त्री छन्ना मलिनाम्बरेण (मलिने ज्योतिः शरीरे परम्)।।२०५ ।।

पृष्ठे भूच्चरणद्वयं प्रभुयतिर्भीतः स्त्रियः स्पर्शतो,
धृत्वोच्छ्वासमसौ रुरोद लघुकं मन्दञ्च विष्णुप्रिया।
'काऽसि त्वं?' सुमना महाप्रभुरतः स्तब्धस्वरे पृच्छति
(स्थाने स्तब्धरवो महात्मसुहृदस्तत्सात्त्विकत्वोद्गतः)।।२०६ ।।

हा वैराग्य ! कठोरतां भुवि तव त्वेवं पुनर्धिक् पुन,-
र्याऽर्धाङ्गं ननु कथ्यते स्ववपुषो, यस्याः कृते स्वामिनम्।
त्यक्त्वा विद्यत एव कोऽपि न परः, स्वामी तथा निर्दय-
स्तस्या एव, तदीयजीवनगतं सर्वस्वमात्मप्रियम्-।। २०७ ।।

तस्याः पृच्छति ना यथाऽपरिचितस्तामिष्टदेवस्तथा
"काऽसि त्वं?" पतसि त्वमद्य न कथं हाऽऽकाश! पृथ्वि! स्फुटम्।
किं न त्वं दलसीह, मौनमवसद् विष्णुप्रिया,ऽचिन्तयत्-
'कोऽप्यन्यस्तु विधापयेत्परिचयं मेऽदोनिमायिस्त्रियः।। २०८ ।।

आसीत्कस्य परस्य साहसमहो !, वाणी निरुद्धाऽभवत्
सर्वस्यैव समस्थितस्य, च महानेवं जनौघस्तथा।
शान्तः सम्प्रति पूर्णतोऽस्ति, परितो व्याप्ताऽस्ति निःशब्दता
(मध्ये किं ननु पञ्चता सुमनसोः संन्यासिसाध्वीस्त्रियोः)।।२०९।।

विष्णुप्रिया ननु ददर्श यदा - न कश्चित्
किञ्चिद् गृणाति, तदियं स्वयमेव मन्दम्।
मन्दं जगाद करुणस्वरतो'ऽस्मि दासी
क्षुद्रा भवच्चरणयोरमितं तु वर्ते' ।। २१० ।।

जातं सम्प्रति चेतश्चैतन्यस्य, स किञ्चित्।
स्थित्वोवाच निमायी 'किं? त्वं वाञ्छसि देवि !'।। २११ ।।

ऊचे कातरवाण्यामत्यन्तं तु सती सा।
'ईहे ते त्वनुकम्पा'-(मीहा स्वामिकृपाप्तिः) ।। २१२ ।।

गौरोऽधःकृतदृष्टिरेष गदति स्थानेऽत्र 'विष्णुप्रिये !
नाम स्वं कुरु सार्थकं त्व,मवनौ सारस्तथा विद्यते।
श्रीविष्णुप्रियभक्तिरेव, सफलं कुर्यास्त्वदो जीवनं
तामेवाप्य' (निमायिजीवनकृतिः कृष्णप्रियात्माऽऽरतिः)।। २१३।।

स्म ब्रूते रुदती तथाहि रुदती विष्णुप्रिया 'त्वामृते
कोऽप्यन्यस्त्विह विष्णुरस्ति भुवने, जानेऽस्मि नेदं वचः।
नापीच्छा त्ववगन्तुमस्ति, ननु मे विष्णुस्तु कृष्णः शिवो
वा किञ्चिद्यदपीह गौरसुमनोऽद्धाऽऽस्ते भवानेव कौ।।२१४ ।।

परो ममाश्रयो भवत्पदे विनाऽस्ति कोऽपि नो'।
(निमायिगौरविष्णुकप्रिया निमायिहृद्रतिः) ।। २१५ ।।

श्रुत्वाऽदोऽच्छलहृद्विदारकवचस्तत्र स्थितस्त्रीनृणां
सर्वेषां हृदयं तथा दलदभून्नेत्राम्बुधाराऽसरत्।
साध्वी जल्पति सा पुनः सहृदया विष्णुप्रिया च 'प्रभो !
गौराङ्ग! (श्रुतमस्ति) सर्वजगदुद्धारं विधत्ते भवान्-।। २१६।।

विष्णुप्रियाऽभाग्यवती पुनः किं?
निःसारितैषा जगतो बहिस्तु।
उद्धारवारः सुमनः किमस्या
नायाति?' (वारेण रविर्हि याति)।। २१७ ।।

ऊचे प्रभुगौरः 'किं तेऽस्त्यभिलाषः?'।
(द्वैते ह्यभिलाषो भक्तैरभिकाम्यः)।। २१८ ।।

उच्छ्वासं दधती शनैर्ननु शनैरूचेऽत्र विष्णुप्रिया'ऽऽ-
धारो जीवनयापनाय भुवने किञ्चित्प्रदेयोऽस्ति मे।
भिक्षां याचति भिक्षुकीयमधुना तस्यैव दीना भव-
त्पादे' (स्वामिनि याचनं नहि सतीसाधुव्रतोल्लङ्घनम्)।।२१९ ।।

अल्पं कालमसौ विचिन्त्य पदयोर्निस्सारयन् पादुके
प्रोचे 'देवि ! किमन्यदत्र निकटे नोऽस्त्येव संन्यासिनाम्।
तुभ्यं दातु,मिदं गृहाण, निजकं साध्वीसतीजीवनं
(बाढं) पादुकयोरथ त्वमनयोरेवाश्रयाद्यापय' ।। २२० ।।

श्रुत्वैवेयदहो ! स्वमस्तकमसावूर्ध्वं तथोत्थापयद्
भूमेर्धूसरितं, निजाङ्गुलभरैः संकम्पमानैः पुनः।
कृत्वा मूर्ध्नि च पादुके तदुभयेऽरोदीच्च विष्णुप्रिया
(संप्राप्तेऽपि तदीयवस्तुनि कथं तत्पूरणं वस्तुना?)।। २२१ ।।

लोकानां निवहे तदा सुमनसां हाहारवः सर्वतः
प्रावर्तिष्ट, निमायिनश्च रुरुदुः सर्वेऽथ कारुण्यतः।
चीत्कारेण समं, तदैव सुमना नत्वा प्रभुर्मातरं
प्रत्यागच्छदयं (परेषु सरलः स्वस्मिन् प्रचेता घनः)।। २२२ ।।

यान्तं स्वप्रियमात्मजं च जननी दृष्ट्वाऽपतन्मूर्च्छिता
पृथ्व्यां, पृष्ठविलोकनेन च विनैवाऽयं जनौघं द्रुतम्।
भिन्दन्नग्रमुखः प्रभुः प्रचलितः, शीघ्रं चलित्वाऽग्रतो
भक्तः सारयति स्म लोकनिवहं मार्गाद् बहु श्रीप्रभोः।।२२३ ।।

स्थित्वैवं क्षणमल्पमेव च नवद्वीपेऽद्य नावा प्रभुः
पारे तत्र गतोऽथ कृष्णदयितो गङ्गातटेनैव सः।
श्रीवृन्दागमनेच्छया प्रचलितोऽग्रेऽग्रे, मनुष्याः शतं
सामस्त्येन विधाय किञ्चिदपि नो चिन्तां गृहद्वारयोः-।।२२४।।

वृन्दावनप्रगमनस्पृहया तदैव
श्रीगौरसङ्गचलिता ननु पृष्ठपृष्ठे।
कुर्वंस्तथा हरिरवं तुमुलं जनौघोऽ-
पारोऽन्वगात्प्रभुपथं स समुद्रतुल्यः।। २२५ ।।

●●

वृन्दावन-पथे

१०. सुजनं ह्युत्तमवंशोत्पन्नं भुवने मन्ये व्यजनम्।
आत्मानं भ्रामयति व्यजनं परितः परसुखहेतोः
तापनिवारणकृतितस्तनुते निजवंशस्योत्तमताम्।
उत्पद्यन्ते लीयन्ते भुवि कर्महेतुतो मनुजाः
सत्कुलजः कश्चित्सुजनो जनदुःखवारणभ्रमणः।।

श्रीवृन्दागमनेच्छयाऽत्र बहवो भक्ताः पुरीतः सहाऽऽ-
याताः श्रीप्रभुणा, तथा बहु नवद्वीपाच्च सङ्गेऽभवन्।
भक्तास्तस्य, ततो बभूव सुहृदामेको विशिष्टस्तथौ-
घो वृन्दावनयायिनां सुमनसा सार्धं निमाय्यात्मना।।२२६ ।।

सामन्ता जयलाभहेतुमवनौ राजा यथाऽस्यां महा-
राजोऽन्यस्य च कुर्वते जनपदेऽवस्कन्दनं, विह्वलः।
कृष्णप्रेम्णि तथैव भक्तनिवहो वृन्दावनाशां प्रति
ह्युत्साहेन समं निमायिसुहृदाऽऽनन्देन गच्छन्नभूत्।। २२७ ।।

गङ्गायाः पुलिनेऽखिलश्च पुलिने कुर्वंस्तु संकीर्तनं
धावन्नस्ति हि कार्तिकस्य सुखदे देहस्य सूर्यातपे।
सङ्गे यस्य चलंस्तथाऽस्तु सुमनाः साकाररूपं पुन-
र्धृत्वा (तस्य मुदोऽनुमानकरणे कः) प्रेमदेवः (क्षमः?)।। २२८।।

मध्याह्नो भवति स्म यत्र सुहृदां ग्रामे, निवेशोऽभवत्
तत्रैव, प्रभुसर्वसङ्गिसुहृदां तद्ग्रामवासी जनः।
भुक्त्यादेस्तरसा प्रबन्धमकरोद्, भिक्षां विधाय प्रभुः
कृष्णप्रेम ततः प्रदाय चलितोऽग्रे ग्रामसंवासिनाम्।। २२९ ।।

ग्रामानेवमसौ स्वपादरजसाऽनेकांस्तथा पावनान्
कुर्वन् ग्रामनिवासिनाञ्च भगवन्नामामृतं पाययन्।
स्वप्रेयःप्रियदर्शनस्य सुमना मग्नः पुनर्लिप्सया
कृष्णप्रेम्णि तथाऽग्रमस्ति चलितः (सन्मत्तता ह्यद्भुता)।।२३०।।

चैतन्यो मुखशुद्धिकारणमसौ भिक्षाक्रियानन्तरं
चक्रे हस्तमथैकदा सहृदयो गोविन्दघोषं प्रति।
आसीद् घोषमहाशयो ननु विदन्-भिक्षाक्रियानन्तरं
भुङ्क्तेऽयं मुखशुद्धिकारणमहोऽवश्यन्तु किञ्चित्प्रभुः।।२३१ ।।

ग्रामान्प्रयाच्य स ततोहि शिवामथैका-
मानीय सम्प्रति तु पूर्वत एव चास्ते।
न्यास्यत्तथा प्रभुकरे स शिवैकखण्डं,
गौरस्तदाद (सुमनाः सुमनःस्वभावः)।। २३२ ।।

भिक्षानन्तरमेष हस्तमकरोद् भूयः परस्मिन् दिने
घोषस्यामुख,मात्मवस्त्रतटके बद्ध्वाऽभवत्पूर्वतः।
अर्धां पूर्वदिनावशिष्टशिविकां, चैवाऽग्रतः सारिते
सोऽयं घोषमहोदयः सुमनसा हस्ते, स्ववस्त्रान्तरात्-।।२३३ ।।

उन्मोच्य द्रुतमेव तस्य निदधौ हस्ते च तां, तच्छिवा-
खण्डं पूर्ववदेव साम्प्रतमपि श्रीमान् विलोक्य प्रभुः।
ब्रूते सोऽथ तथाप्रसारितकरो, नो सोऽक्षिपत्तन्मुखे
'गोविन्द! क्व शिवा त्वयेयमधुना लब्धा?' विचिन्त्य क्षणम्।।२३४।।

अत्यन्तमेव विनयेन जगाद घोषो
'बद्ध्वा ररक्ष गतवारशिवां तु शेषाम्।
सैव प्रभोऽस्ति तदियं सुमनो ! निमायिन् !'
(भूयात्पुमानपि हि शेषपदार्थरक्षः)।। २३५ ।।

सार्धं प्रभुरूचे गम्भीरतयाऽल्पम्।
'किं कल्यगतामद्यार्थं त्वमबध्नाः?'।। २३६ ।।

गोविन्दस्त्वबिभेद् विलोक्य सुहृदो गम्भीरचेष्टां प्रभो,-
रुक्तं तेन पुनस्तु किञ्चिदपि नो, पश्यन् धरां स प्रति।
सम्प्रत्यस्ति तथाह्युदासवदन,स्तर्हि स्वरे श्रीप्रभु-
स्तस्मिन्नेव शनैः शनैः कथयते (बोध्यः सुबन्धुः सता)।।२३६।।

येषां संग्रहणप्रवृत्तिरभव,न्नो मुञ्चति स्वां स तां
साधुः सन्नपि, नाऽद्य संग्रहकृतेर्वाञ्छा गताऽल्पं तव।

साधोः संग्रहणं च दूषणमहो !, न्यूनाधिकं संग्रह-
व्यापारो गृहमेधिनां सुमनसां लोके कृते भूषणम्।। २३८ ।।

शक्नोसि सम्प्रति ततो मम नैव सङ्गे
स्थातुं, त्विहैव विरचय्य कुटीं क्वचिच्च।
स्थेयं त्वया, परिणयञ्च विधाय कर्माऽ-
नासक्तितो भगवतोऽत्र मुदे विधेहि'।। २३९ ।।

गोविन्दः श्रुत एव चात्र वचसि ह्युच्चै रुरोद, प्रभुः
पृष्ठे तस्य तु घूर्णयन्निजकरं ब्रूते 'मया तु प्रिय !।
उक्तं तादृशमेव, भागवत-ना श्रेष्ठः स्वयं विद्यसे-
(श्रेष्ठो भागवतः करोत्यनुचितं स्वार्थाय नो कर्हिचित्)।।२४०।।

मत्स्नेहस्य वशङ्गतस्त्वमकरोरेवं तथा केवलं
भूत्वैवाचरणं, वचः किमपि नो,ऽद्धा सेवनं पूजनम्।
गोपीनाथनिमायिनो भगवतोऽत्रैव स्थितस्त्वं कुरु-
(श्रीमत्सेवनशिक्षणाय जगतीशिक्षालयायोजनम्) ।। २४१ ।।

सेवार्थं क्रियते भवे भगवतो बन्धो ! विवाह,स्तदा
तस्मिन्नस्ति तु हानिरेव ननु का?' गोविन्दघोषः प्रभोः।
धृत्वाऽऽज्ञां शिरसा, कुटीं सहृदयो निर्माय गङ्गातटे
सोऽवात्सीच्च (निमायिसाधुवचसः पात्रं महान् पुण्यवान्)।।२४२।।

तेनाकारि निमायिनः परिणयोऽप्याज्ञानुसारं प्रभोः,
पत्नी तस्य पवित्रता दिवमिता त्यक्त्वा तथैकं सुतम्।
जातो मातृपथानुगोऽपि कतिचित्कालस्य पश्चात्सुतः
(संयोगोऽखिल एव संसृतितलेऽद्धा विप्रयोगान्तगः)।। २४३ ।।

स त्यक्त्वाऽऽत्मजशोकतस्तु भगवत्सेवार्चनं दुःखितः
प्राणांस्त्यक्तुमथोद्यतो, भगवतश्चक्रे न भोगार्पणम्।
किञ्चिन्न स्वयमेव चाऽऽद, भगवानूचे तदा ह्येकदा
स्वप्ने 'मेऽर्चनकं मुधैव भुवने स्थाने त्वया स्वीकृतम्-।।२४४।।

अस्यां स्निह्यति कौ सुतेषु बहुषु त्वेको (विधत्ते) पिता
चैषां लालनमत्र पालनमपि स्थाने समानात्मना।

पुत्रोऽहन्तु तथैकलो, नहि परं स्वं भ्रातरं तु क्षमो
यो द्रष्टुं (सहते न मायिमनसं प्रीतौ निमायिप्रियः)।। २४५ ।।

शक्नोम्येकसुतस्य चाहमवनौ स्थातुं तु भूत्वा सुतो
ह्यानन्दी पितुरेव, कञ्चिदपरं मद्भ्रातरं मत्पिता।
इच्छे,न्न प्रियमेतदस्ति ननु मे, तत्किं परस्ते सुत-
स्त्वासीत्स्थातुमथ क्षमः सह मया? (चित्राऽनुकम्पा प्रभोः) ।।२४६।।

त्वेकस्तेऽप्रियतैव सम्प्रति सुतो, मां मूर्तिमन्तं त्वपि
स्थाने मारयितुं यदीच्छसि, तवेच्छा तत्तथा, कर्म तु।
ते श्राद्धादि च पिण्डदानसहितं कर्तुं तथोपस्थितो
वर्तेऽहं स्वयमेव, किं ननु पुनः कर्ता द्वितीयात्मजैः?'।।२४७।।

गोविन्दस्य बभूव तेन वचसा तोषस्तथा पूर्ववद्
भूयः सेवनपूजने भगवतः कुर्वन् बभूवैष च।
तज्जाते निधने स्वयं सुतसमो गोविन्दघोषस्य च
श्राद्धादि त्वखिलं हि कर्म भगवान् कौ कारयित्वाऽऽत्मनः- ।।२४८।।

चक्रे वत्सलतां निमायिमनसां भक्तात्मनां सार्थकां,
गोपीवल्लभको निमायिभगवानेवं तु धन्य,श्च सः।
धन्योऽस्यां भुवि (यस्य भक्तिवशगो) गोविन्दघोषो महा-
भाग,स्तस्य जगत्पिता सुतसमः श्राद्धादिकर्माऽकरोत्।।२४९ ।।

स्थानं सम्प्रति रामकेलिनगरासन्नं चलन्नापयच्-
चैतन्यस्तु चलं,स्तथाहि नगरे प्राविष्ट एवाऽखिलः।
भक्तः पावनगुञ्जनैर्हरिरवैश्चक्रे नभोमण्डलं
पूर्णं गुञ्जित-(मत्र पावनरवः, सच्चित्प्रियानन्ददः)।। २५० ।।

नाम्नां दिक्षु विदिक्षु तु प्रतिरवः शुद्धात्मनां शुश्रुवे
श्रोतृणां मधुरात्मनां भगवतो, निस्सृत्य निस्सृत्य च।
भक्तानां हृदयात्स्ववेगबलतश्चानन्दधारा तथा
चक्रे प्लावितमच्छला जनभरं (हन्ति च्छलं हन्मुदम्)।।२५१ ।।

आगच्छत्प्रभुदर्शनार्थमभवद् वृन्दं सहस्रं नृणां
नारीणा,ञ्च तथा ननर्त निखिलं धृत्वा तु धृत्वा करम्।

भूताऽऽबाधितलोकसङ्गलगनस्यैकः परस्येव (हि
श्रीसंकीर्तनकप्रभावमहिमा ज्ञेयो निमाय्यध्वना) ।। २५२ ।।

आसीत्तन्ननु रामकेलिनगरं गौडावनीशासकाऽऽ-
वासस्यैव समीप,मात्मवसनस्थानं च तन्निर्मितम् ।
गौडेडासचिवेन सुन्दरतया भ्रातृद्वयेन, श्रुतो
भक्तानां तुमुलध्वनिर्ननु नभोव्यापी नृपेणापि सः ।। २५३ ।।

आरुह्य स्वगृहस्य च्छत्रं तु श्रुत एव
तस्मिंस्तन्मुखमास्ते संपश्यन् स्वयमेषः ।। २५४।।

भीतिस्तिष्ठति पापिनस्तु सततं चित्ते स्वपापस्य, तच्-
छान्तिर्नो वसतीह तस्य हृदये, तत्कालगौडाऽवनेः ।
राजाऽभूच्च हुसेनशाहपदकः कृत्वा तु राज्यच्युतं
हिन्दूराज-सुबुद्धिरायपदकं कूटप्रबन्धात्स्वयम् ।। २५५ ।।

हिन्दूभ्यो बहु शङ्कितोऽवसदयं तस्मा,न्नभोव्यापिनं
भक्तानाञ्च निशम्य तं हरिरवं सोऽभूत्परं विस्मितः ।
'केनप्याक्रमणं कृतं तु सहसा नो गौडदेशे'ऽमुना
चिन्ताऽकारि (धराधिपस्य सततं चिन्ता धराबन्धना)।।२५६।।

तत्स्वं केशवसिंह-हिन्दुसचिवं त्वाहूय तत्कारणं
सोऽपृच्छद् द्रुतमेव, गौरसुहृदो ज्ञातस्तवः केशवः ।
आसीत्पूर्वत एव, स स्वयमभूत्सिंहः पुनः केशवः
सन्तुष्टो न हुसेनशाहनृपते-(स्तुष्टिः समानात्मनः)।।२५७।।

कुर्वन्नेव बभूव मन्त्रिभवनात्कार्यं परं सर्वथा,
तेनोक्तं 'सरकार ! गौडनृपते ! नो कापि वार्ता भियः ।
सन्त्येते दश विंशतिः सहृदयाः सन्तः पुरीवैष्णवाः,
श्रीवृन्दाविपिनं च यान्ति सुहृदोऽमी तीर्थयात्राकृते ।। २५८ ।।

यास्यन्त्येव तथा परत्र दिवसे, ते सन्ति सर्वे पुन-
र्निःशस्त्रा, किमपि प्रयोजनमहो ! नो राजनीतेस्तथा ।
तेषां, सन्ति तु सर्व एव वसतित्यागी विरागी जनो'
(वैराग्यं भवति प्रतीतिविषयं हार्दं बहिस्त्यागतः) ।। २५९ ।।

'आमाम्' तत्समये विधाय नृपतिर्यातस्तु गेहं, परं
सन्तोषोऽभवदस्य हिन्दुसचिवप्रोक्त्या विशेषो न, तत्।
विश्वस्तौ सचिवौ स 'खासदबिरं' भूयस्तथाऽऽहूय तौ
चक्रे 'शाकिरमल्लिकं' च विषयेऽस्मिन् प्रच्छनां स्वावुभौ।।२६०।।

भूपादत्र च भूत एव तु पृथङ् मन्त्री पुनः केशवो
विश्वस्तद्विजसेवकेन ननु समाचारं त्विमं केनचित्।
तूष्णीं प्रेषितवान् प्रभोर्हि निकटे'ऽतः शीघ्रमेव स्थलाद्
गन्तव्यं भवता- (निमायिसुहृदा स्थेयं निमायिस्थले)।।२६१ ।।

विश्वासो नहि बुद्धेः स्थायी मुस्लिमराज्ञः।
नो जाने क्व तथा किं नु स्याच्चिन्तयमानः' ।। २६२ ।।

आस्तां शाकिरमल्लिकश्च दबिरः खासस्तथा जन्मतो
हिन्दू, किन्तु विशेषपात्रभवनाद्राज्ञः कृपायाश्च तौ।
जातौ विस्मृतकस्वकाविव, तयो राजाऽपि चक्रे न सोऽ -
विश्वासं निजहिन्दुसेवकसमं (जातौ विकारः स्थितेः)।।२६३ ।।

पृष्टो भूपतिनाऽऽह खासदबिरः कुर्वन् प्रशंसां प्रभोः।
'श्रीगौराङ्गमहाप्रभुस्त्वयमथास्त्यद्धा नवद्वीपभूः।
संन्यासस्त्वमुनाऽधुना ननु धृतो, नो राजनीत्या सतः
संबन्धोऽस्ति तथाऽस्य कोऽपि (सुमनोनीतिः स्वतो राजते) ।।२६४।।

धर्मस्थापनहेतवे प्रकटितोऽयं त्वस्ति, साक्षादमुं
श्रीनारायणमेव बोधतु भवान्, कल्याणमस्याशिषा।
भाव्यद्धा भवतः, कृपाप्रकटनेऽयं भेदभावं न वै
धत्ते कञ्चन (भेदभावधरणं संसारिरागात्मनाम्)।। २६५ ।।

सन्तोषो वचनैस्तथाऽस्य नृपतेर्जातः, प्रशंसां प्रभोः
कुर्वन्नस्ति स भूरि भूरि सुहृदः, संबोध्य तौ भूपतिम्।
एवं स्वं गृहमागतौ, स्ववसतिं चागत्य शङ्का तयो-
र्जाता-'किञ्चन चिन्तयन्नरपति-(र्जाने न) भूयो भवेत्-।।२६६।।

(अतश्चलित्वा प्रभुरेव बोध्यः)
सहैवमोघेन तथा जनानाम्।

वृन्दावनं यानमथोचितं न
त्वेवंविधेऽस्मिन् समरस्य काले' ।। २६७ ।।

अद्धाऽऽस्तां ननु मोहितौ प्रभुगुणैस्तौ पूर्वमेवो,त्कटा
वाञ्छाऽऽसीत्प्रभुदर्शनस्य च तयोः कालाच्चिरा,त्साम्प्रतम् ।
तौ स्वाभाविकमेव सुन्दरममुं लब्ध्वा सुयोगं, परं
सञ्जातौ मुदितौ तदीक्षणहृदौ रात्रिप्रतीक्षारतौ ।। २६८ ।।

जानन्त्येव हि भावका यदवनावत्यन्तमेवात्मनोः
सङ्गत्यै रह एव रात्रिसमये त्वेकान्तसत्प्रेमिणा
संवादः क्रियते, प्रभोः सुमनसो ह्यास्तां रहःप्रेमिणा-
वत्यन्तं सुहृदौ च भक्तभृतकौ शिष्याविमौ भ्रातरौ।। २६९ ।।

एतावेव सहोदरौ सहृदयौ सद्वैष्णवानां दले
श्रीमद्रूप-सनातन-स्वभिधया स्तोऽद्धा प्रसिद्धौ परम् ।
तत्पूर्वं प्रभुदर्शनस्य सुहृदो- (र्भाति) प्रदेयोऽनयोः
संक्षिप्त-(स्त्वनिवार्यता) परिचयः, (कार्यं तथाऽऽवश्यकम्) ।।२७०।।

भ्रात्रोर्वैष्णवयोस्ततोऽग्रिमेऽध्याये भागवतात्मनोस्तयोः ।
प्राप्स्यन्ति प्रियपाठकाः परिज्ञानं (संग्रहणीयमुज्ज्वलम्) ।।२७१।।

●●

श्रीरूपसनातनौ

११. वन्दे रूपसनातनह्रदयम्।
द्विजकुलजातौ संस्कृतशिक्षासहितौ सत्संस्कारौ
जीवनसाधनहेतुस्वीकृतपरधर्मस्थितिसंज्ञौ।
तादृशमक्षतममलं यद्धृत्कुमुदमभूत्परमुत्कम्।
यस्मिन् पतिते गौरमयूखे स्फुटितं तदसामान्यम्।
यस्माद्रूपसनातनसंज्ञौ सद्वैष्णवकुलतिलकौ
महाभागवतमार्गादर्शा,वात्मसनातनरूपम्।।

यच्चित्तेऽनुशयोऽस्ति, सोऽत्र मनुजो यातोऽस्तु कस्यामपि
क्षुद्रायां न कथं स्थितौ, तु परमां कर्तुं क्षमो ह्युन्नतिम्।
संसारे तत एव, कर्मणि निजे दुष्टे तु नो जायते
दुःखं यस्य, निजस्थितेरनुभवं कुर्याच्च्युताया न यः,-।।२७२ ।।

पश्चात्तापदशा न यस्य समयव्यर्थक्षयस्यात्मनि,
स्यात्कामं स सुधीः कियानपि महान्, ज्ञानी विवेकी तथा-।
कीदृक्षोऽपि पुनः कियानपि भवे,त्प्राप्तुं क्षमस्तून्नतेः
स्याच्छ्रेष्ठं शिखरं कदाचिदपि नो (ह्यात्मज्ञ एवोन्नतः)।।२७३।।

यस्मिन् पूर्वकृतेषु कर्मसु सता जातोऽनुतापो हृदा,
सर्वस्वं प्रियपादयोर्जिगमिषा यस्मिन् विहायाऽभवत्।
तस्मिन्नेव तदुन्नतेरवसरेऽभूच्छ्रीगणेशो,- (ऽयतां),
पादाब्जं द्रुतमेव शैलशिखरस्थस्वप्रियस्य क्षमः -।। २७४ ।।

भावी स त्विह चुम्बितुं, सुमनसोर्भ्रात्रोर्द्वयोरेतयोः
श्रीरूपस्य सनातनस्य च सतोः प्रारम्भिके जीवने।
संसारे पुरुषस्य वा विषयिणो भूते,ऽप्युभौ ह्यन्ततः
पश्चात्तापबलेन पादजलजं यावत्प्रभोरापतुः ।। २७५ ।।

तस्यैव च भक्तेः सामर्थ्यदिशा तौ।
मान्यौ भुवि जातौ सन्तौ तु महान्तौ।। २७६ ।।

श्रीमद्रूपसनातनाऽग्रपुरुषाः कर्णाटकाऽऽवासिन -
स्त्वासं,स्तत्प्रपितामहः स्म वसति श्रीपद्मनाभस्तथा ।

हित्वा हेतुविशेषतः सहृदयश्चागत्य कर्णाटकं
वङ्गस्थे नवहट्टके (नवरुचिर्हट्टे नवे जायते) ।। २७७ ।।

जातास्तस्य सुताश्च पञ्च सुहृदः कन्यास्तथाऽष्टादश,
ह्यासीत्तत्र मुकुन्ददेवपदकः पुत्रः कनिष्ठोऽखिले।
तस्माच्छ्रीलमुकुन्ददेवसुजनाद् देवः कुमारः सुतो
जातो भागवतस्तथाहि परमः (सद्भक्तिमान् भाववान्)।। २७८।।

कौसीद्यस्य कुमारदेवसुजनो व्यापारवाणिज्ययो-
श्च प्रायः कुरुते स्म कर्म, सुहृदो हेतोरमुष्याभवत्।
यानायानमतो यशोहरगते स्थाने विशिष्टे फते-
हाबादे (समयेन नाम च तथा स्थानं विशिष्टायते)।। २७९ ।।

अन्योन्यं किमपि स्थले नवहटे जाते विरोधे तथा
जातीये नवहट्टमेष सुमनास्त्यक्त्वा कुमारः सुरः।

आगात्याऽवसदेव तत्परिचिते व्यापारकार्यात्फते-
हाबादे (वसतिः सता परिचितस्थाने विधेयाऽवनौ)।। २८० ।।

अत्रागत्य दधौ मथायिपुरजां नारायणश्रीहरे-
रुद्वाहेन विशारदस्य तनयां देवीमसौ रेवतीम्।
पत्नी,मस्य सुतास्त्रयः समभवञ्छ्रीरेवतीगर्भतो,
(रेवत्यां, तत एव, पितृपदयोर्वर्णाः, कुमारे, त्रयः)।। २८१।।

एते च त्रय एव वैष्णसतां मध्ये महार्घं शिरो-
रत्नं भागवतास्तथेव परमा जाताः, पितृभ्यां कृतम्।
एतेषाममरश्च नाम ननु सन्तोषो ह्यनूप,स्त्वमी
पश्चाद्रूपसनातनौ सुयशसोऽदोनामभिर्बल्लभः ।। २८२ ।।

तांस्त्रीनेव पिता ललाष च निजान् पुत्रान् सुयोग्यान् बुधान्
कर्तुं, तन्नवहट्टविश्रुतबुधात्सिद्धान्तवाचस्पतेः।
सर्वानन्दमहाशयादथ पिताऽद्धा संस्कृताध्यापनं
तेषां कारयति स्म (संस्कृतजनः सन्मानवः सिध्यति)।। २८३।।

तत्काले त्विह पारसी प्रचलिताऽऽसीद्राजभाषा,ऽभितः
पारस्या ननु राजकर्मणि तथाऽऽसीन्मुख्यतावस्थितिः।

विद्वानत्र च पारसीसुपठितस्त्वेव स्म संबुध्यते
सभ्यो,ऽलभ्यत जीविका च महती तस्यैव राज्येऽधुना।।२८४।।

शक्तः कर्म न पारसीसुपठितः कर्तुं तु साधारणं,
संजातोऽधिकसंख्यको बहु यदा लोक-(स्तथा ज्ञायते)।
देशेऽस्मिन्ननु पारसीसुपठित,स्तेषां तथाऽनादरः
सर्वत्र क्रियते स्म, तर्हि रचिता लोकोक्तिरेषा भवेत्-।। २८५।।

विद्वान् पारसभाषी विक्रीणाति तु तैलम्।
भ्रातः ! पश्य विधातुः खेलां (क्रीडति भाग्यम्) ।। २८६ ।।

अस्तु, श्रीयुतरूपपूज्यजनकः पुत्रान्निजान् पण्डितान्
पारस्यास्त्वपि संस्कृतेन सहितं कर्तुं ललाषैव सः।
सप्तग्रामधराधिकारि-फकरोद्दीनात्ततः सैयदा-
च्छिक्षामारबपारसीविषययोस्तेषामथाऽदापयत् ।। २८७ ।।

बाल्यादेव तथा तु तीक्ष्णमतयो मेधाविनोऽमी, ततो
जातास्त्वल्पदिनैः सुशीलमनसोऽद्धा पण्डिताः संस्कृते।
पारस्यामरबीयवाचि च, वसुस्त्वासीच्च मालाधर-
स्तत्काले (गुणराज-खाँ) सहृदयो वै राजमन्त्री सुधीः-।।२८८।।

गौडस्वामि-हुसेनशाह-समिता,वासीद् गुणग्राहकः
सच्चेताः स तथा कवित्वहृदयः, सत्काव्यमेकं त्वपि।
वाङ्गं सोऽकृत नाम "कृष्णविजयं" (तु प्राणनाथो मम
श्रीकृष्णो ननु नन्दनन्दनहरि-) र्यत्काव्यगीतं त्विदम्-।।२८९।।

बस्वासीत्तु महाप्रभोः प्रियमहो,ऽमीषां बुधानामभू-
त्सार्थं तेन निमायिना परिचयो,ऽमीषामभूच्चाधिकम्।
प्रत्युत्पन्नकुशाग्रतीक्ष्णबुधया प्रीतः स मालाधर-
श्चैषां कारयति स्म राजसमितावाजीविकासत्पदम्।। २९० ।।

स्वप्रज्ञाशितता-क्रियानिपुणता-हेतोरमी भूपते-
र्जातास्तु द्रुतमेव चातिशयितं स्थाने कृपाभाजनम्।
चक्रेऽमून् सुहृदः स्वराजसचिवान् भूत्वा प्रसन्नो नृपः
(सत्सङ्गेन च कौशलेन मनुजो भाग्येन वा वर्धते)।। २९१ ।।

एतेषां पदवर्धनेन सहिता संजायमानाऽभव-
ल्लोके वैभववृद्धिरप्यथ, ततो नो मुस्लिमेभ्यस्तथा।
आसीत्कश्चन संयमः सुमनसामेषां, द्विजत्वेऽपि वै
सर्वं खादनपानवेषभरणं मुस्ला-रयीशोपमम्- ।। २९२ ।।

अत्रान्तं, नृपतिस्तु मुस्लिमसमं नामाऽपि चक्रे तथाऽ-
मीषां, शाकिरमल्लिकं नरपती रूपं, च खासान्वितम्।
स त्वास्वद् दबिरं सनातन,मिमौ राज्ये प्रसिद्धावदो-
नामभ्यां तु बभूवतु- (ह्यभिहितिर्वक्तुर्यट्टच्छात्मिकी)।। २९३ ।।

नावेदीदपि कोऽपि विप्रवपुषोः प्राचीननामाऽनयो,-
र्नव्यं गौडसमीपमेव नगरं त्वेकं स्ववासार्थकम्।
सन्निर्माय च रामकेलिपदकं, तत्रैव भव्यं निजं
प्रासादं विरचय्य सार्धमधिकैश्वर्येण तावूषतुः ।। २९४ ।।

एषामाचरणं तु कीदृशमपि स्यात्किन्त्वमी संस्कृत-
प्राज्ञानां विदुषां च साधुजनताश्रीवैष्णवानां सदा।
सम्मानं ननु कुर्वते स्म, रचितं कन्हायि-नाट्यालय-
ख्यात्यैकं प्रतिमाकसंग्रहगृहं तै रामकेल्यन्तरे ।। २९५ ।।

श्रीकृष्णलीलाविषयास्तु मूर्तयोऽ-
नेकास्तथाऽऽसन् विविधास्तदालये।
अद्यापि काश्चित्तु लसन्ति तासु वै
(भुवीह रेखा कृतिनश्चिरस्थिरा)।। २९६ ।।

एषां सज्जनसङ्गतेश्च सततं सच्छास्त्रसंचिन्तनाद्
वैराग्यं तदपारवैभवभरादद्धाऽऽत्मनोऽजायत।
एषां स्वात्मसमर्पणाय च मनस्त्वत्यन्तमेवाकुलं
कस्मैचिन्ननु जायमानमभव-(च्छान्तिः स्वसाध्यर्पणात्)।। २९७।।

एषां सम्प्रति कौ शनैरिह शनैः सत्साधुकर्मोन्मुखी
प्राज्ञानां सुहृदां प्रवृत्तिरभव,त्तत्रैव काले श्रुता।
ख्यातिः श्रीलमहाप्रभो,र्नवनवं वस्त्वेव गौरप्रभो-
रेकं तत्समये बभूव भगवच्छ्रीनामसंकीर्तनम् ।। २९८ ।।

यावत्सम्प्रति धारणाऽखिलनृणामेवं - क्षितावेकदा
भ्रष्टो यस्तु समाजबन्धनपरित्यागात्समाजादभूत्।
स भ्रष्टोऽखिलजीवनाय तु गतो, नो कोऽप्युपायस्तदु-
द्धारस्यास्ति हि पृष्ठत-(स्तु नियमः कालानुसारी भवेत्)।।२९९।।

किन्तु शक्तितो निमायिनाऽदोमान्यताविखण्डनं कृतं कौ।
तद्बलं बभूव वाचि चास्यां-(श्रीलगीतमुत्तमप्रमाणम्)।।३००।।

१२. भुवनं हि व्यवसायनिधानम्।
संस्कारक्षमताप्रकाशतो व्यक्तीनां व्यवसायाः
नाना काशन्ते भुवि लोके कालक्रमतो भिन्नाः।
असती दैहिकचेष्टा प्रचलतु सति हृदयव्यवसाये
साधुरेव सोऽलं मन्तव्यो, हृत्स्थितिरेव स्थानम्।।

कामं वाऽस्तु न किं कियानपि महान् पापी त्वतीतक्षणे,
धत्ते यः शरणं हृदा भगवतो भावादनन्यात्तु, सः।
मन्तव्यो भुवि साधुरेव परमः, सर्वोत्तमो निश्चयो
यस्मात्तेन कृतोऽधुना (भगवति स्थाने स्थितिः साधुता)।।३०१।।

यस्याद्धा लगितं मनो भगवति स्थाने, स पापी पुन-
(श्छाया तद्दृषि, योऽस्ति सूर्यविमुखः) किं स्थातुमेव क्षमः?।
पापं नश्यति चैकदा गमनतस्त्वेव प्रसन्नात्मना
सम्पूर्णं शरणे प्रभोः (किमनलेऽस्वर्णेन्धनं तिष्ठति?)।।३०२ ।।

घोरात्पापकृतोऽपि पापकृदहो ! नामप्रभावात्प्रभो-
र्यावत्तच्चरणाब्जमापयितुमाः ! शक्नोति, गौरप्रभोः।
एवं भावमुदारमुत्तमहितोपेतं च सर्वात्मनां
श्रुत्वैषामपि साम्प्रतस्त्वनुशयः स्वे जायमानोऽभवत्।। ३०३ ।।

एकं प्रेषितवान्महाप्रभुकृते पत्रं स्वगौडेश्वराद्
गौरद्वीपनवं निगूह्य च तथा,ऽमी वर्णयित्वाऽऽत्मनः।
एतस्मिन् पतितस्थितिं, सुमनसो ज्ञातुं तथेषुर्निजो-
द्धारोपाय- (ममायिसंस्कृतजनोऽमाय्याश्रयायोत्सुकः)।। ३०४ ।।

तत्पत्रस्य तथोत्तरे प्रभुर्गौरः श्लोकमिमं विलिख्य सः।
पार्श्वे प्रेषितवांश्च धीमतामेषां-(कापि निमायिसान्त्वना)।।३०५।।

"परव्यसनिनी नारी व्यग्रापि गृहकर्मसु।
तमेवास्वादयत्यन्तर्नवसङ्गरसायनम्"।।

१३. व्यसनं यद्यपि सततं निन्द्यं, किञ्चित्परं प्रशस्यम्।
केवलभौतिकविषयव्यसनं ह्यखिलदेहिसामान्यम्
भौतिकसहिताऽभौतिकचिन्तनमुद्बुद्धान्तःप्रकृतेः।
सततासक्तिः केवलसच्चिति लोकेतरविरलानाम्।
"मूर्खः क्षाययति व्यसनेन स्वं कालं" हरिणोक्तम्
जारव्यसना काचिद् वृत्तिर्भागवते तु नुता पथि।
नानादैहिकगैहिककर्मणि सक्ता प्रतिपलमेषा
अन्तःस्वादयति प्रियजारं नवलसङ्गरसमात्रम्।।

'सम्बद्धा व्यभिचारिणी परनृणा व्यस्तापि नारी गृहे
कार्ये यद्यपि बाह्यतः, परमसावास्वादयन्ती रसम्।
अन्तोऽन्तो ननु जारसङ्गविषयं स्थाने तमेवाऽनिशं
तिष्ठत्यत्र (निजाभिरामविषये हृदवृत्तिरत्युत्सुका)।। ३०६ ।।

एवं कुरु त्वं निजराजकार्यं
बहिश्च सर्वं भुवि काममेव।
परं हृदा हृद्रमणेन तेन
क्रीडाविहारं विदधत्सदैधि' ।। ३०७ ।।

एवं गौरमहाप्रभोरनुपमं लब्ध्वोपदेशं तथा -
ह्येतेषां प्रभुदर्शनस्य ववृधे भूयोऽधिकं लालसा।
संन्यासं चलितो विगृह्य सुमना गौरः पुरीं तु प्रभु,-
र्ज्ञातं यर्हि, तदा बभूवुरधिकं भूयोऽप्यमी व्याकुलाः।। ३०८ ।।

अत्यन्तं तु हुसेनशाहनृपतिर्मेनेऽधिकं ज्ञानिमान्
विश्वासं दधते स्म पूर्णमुपरि ह्येषाञ्च, काले तदा।
प्रक्रान्तं त्वभवन्मृधं कतिपयै राज्यै,स्ततोऽस्यां स्थिता-
वेते यातुमहो ! क्षमा न तु पुरीं (त्याज्यो नृपो नाऽऽपदि)।।३०९।।

श्रीवृन्दाविपिनेच्छया ननु यदाऽसौ रामकेलौ प्रभुः
संप्राप्तः स्वयमेव, तर्हि तु तथाऽऽनन्दस्य सीमाऽवसत्।
नैषां, वत्सलताप्रशंसनममी भक्तेषु गौरप्रभोः
कुर्वन्ति स्म हृदैव सम्प्रति हृदा (हार्दं परं शंसनम्)।। ३१० ।।

एतौ स्फुटन्तु प्रभुणा समक्षं
सर्वस्य नो मेलितुमेव शक्तौ।
ततो रहः श्रीप्रभुदर्शनार्थं
सञ्चिन्तयन्तौ सुहृदौ ह्यभूताम् ।। ३११ ।।

सुप्तः सर्वजनो यदा, च नगरे निःशब्दता संस्तृता
सम्पूर्णेऽत्र, तदाऽर्धरात्रिसमयेऽमू चेलतामात्मनः।
प्रेयःसङ्गसुखेच्छया सहृदयौ सामान्यवेषेऽमलौ
(किं नेपथ्यविशेषकं सुमनसः प्रेयःपुरोऽपेक्षितम्?)।। ३१२ ।।

त्वत्यन्तं रदनेष्वहो ! तृणममू संपीड्य दीनौ तथा
भूत्वा तत्समये प्रभोर्हि वसतिस्थानान्तिकं चागतौ।
भक्ता मार्गपरिश्रमात्सुमनसः श्रान्ताः शयानास्तदाऽऽ-
सन् घोरस्वपनेऽखिला (हि शयनं श्रान्तैः सुखं लभ्यते)।।३१३ ।।

श्रीनित्यं हरिदासकं प्रथमतश्चैतौ विबोध्यात्मनः
सङ्केतं ददतु,स्तयोः परिचयं भ्रात्रोर्विलभ्य द्वयोः।
नित्यानन्दसुहृद् बभूव मुदितोऽत्यन्तं, स गत्वा शनै-
गौरं बोधयति प्रभुं, कथयते वार्तां तयोरागतेः ।। ३१४ ।।

आनेतुं तदुभौ तदैव स ददावाज्ञां स्वपार्श्वे प्रभु-,
र्लब्ध्वाऽऽज्ञां सुहृदः प्रभोः पुलकिताङ्गौ पार्श्वमाप्तावुभौ।
सार्धं दीनतया तथाऽतिशयया, पादे पतित्वा प्रभो-
र्यातावेव तथा सहाऽऽकुलतया ह्युच्चैश्च चक्रन्दतुः।। ३१५ ।।

तावुत्थापयति स्वकेन मृदुना पाणिद्वयेन प्रभु-
र्वारम्वार,मथेषतुः प्रभुपदाब्जे प्रेमहेतोर्न तौ।
त्यक्तुं त्वेव, तथा स्वरेऽतिकरुणे स्वोद्धारयाच्ञां प्रभौ
कुर्वन्तौ च बभूवतु-(र्भुवि तथोद्धारस्पृही कोऽपि ना)।। ३१६।।

ऊचे गौरमहाप्रभुस्तु वितरन्नाश्वासनं चानयो-
'हें बन्धू ! दलदस्ति मे तु हृदयं वां रोदना,त्स्थो युवाम्।
लोके भागवतावुभौ हि परमौ, मज्जन्मजन्मान्तर-
स्निग्धान्तःसुहृदौ (निमायिहृदयः सौहार्दबन्धाग्रही)।। ३१७ ।।

आसं दर्शनहेतवेऽस्मि युवयोस्तु व्याकुलो, नापरः
कोऽप्यत्राऽऽगमनाशयो मम तथाऽऽसीद्रामकेलौ यतेः।
भ्रात्रोः केवलयोस्तथाहि युवयोरेवाऽऽगतोऽत्र त्वहं
स्थाने दर्शनहेतवे (हि सुजनो दृश्यः प्रयासादलम्)।। ३१८ ।।

इतो दिनाद् वां नवजन्म जातं,
त्यजाऽधुना मुस्लिमनामनीमे।
इतो दिनाद्रूपसनातनौ कौ
युवामभूतं' (प्रथते प्रियाऽऽख्या) ।। ३१९ ।।

सन्तोषः परमः, प्रभोश्च वचनैर्भ्रात्रोर्बभूव द्वयोः
एतैः प्रेमयुतैः प्रभोश्च विविधं तौ चक्रतुस्तत्स्तुतिम्।
ऊचेऽन्ते च सनातनः प्रभुममुं 'युद्धक्षणेऽस्मिन् प्रभो !
सम्मर्देन तथेयता सममहो ! वृन्दागतिर्नोचिता- ।। ३२० ।।

गच्छेदेकल एव कृष्णरमणस्थानं तु वृन्दावनं,
सर्वेषामियतां प्रबन्धकरणं मार्गे तथाऽवेक्षणम्।
चिन्ताभारसमूहकप्रवहणं नो जायते तूचितं-
(संन्यासी भ्रमति, प्रियेऽभिसरति प्रेमी, समूहेन नो)।। ३२१ ।।

तस्माद्यातु निवृत्य सम्प्रति भवान्, भूयस्तथाह्येकलो
यात्रां क्वापि करोतु गौरसुमनो ! वृन्दावनस्य प्रभो !'।
स्वीचक्रेऽथ सनातनस्य सुमना गौरप्रभुः सत्परा-
मर्शं, साधु सहोदरौ सहृदयौ प्रातर्ह्युभौ भ्रातरौ-।। ३२२ ।।

प्रेम्णा विसर्जयति तौ परिरभ्य, भक्तैः
कन्हायि-नाट्यभवनेन सरन् स्वयं तैः।
आगत्य शान्तिनगरे पुनरेष तस्था-
वद्वैतपण्डितगृहे (गुरुरेव सेव्यः) ।। ३२३ ।।

●●

रघुनाथदासस्य प्रभुदर्शनम्

१४. धीरः कामप्रभृतिभिरजितः।
चित्तं चञ्चलमन्तःकरणं, यस्मिन् स्वस्य निवासः
अन्तर्मुखगमने बहु बाधा, खानां विषयोन्मुखता।
कामो नह्यति, दहति क्रोधो, लोभः कर्षत्यनिशम्
करणद्वारा जीवात्मानं, कथमात्मान्तःसरणम्।
स्थूलसूक्ष्मकारणदेहत्रय- मलविक्षेपावरणम्
जयति प्रकृतिगुणत्रयकार्यं, धियमीरयते योऽन्तः ।।

अद्धा सुन्दरकल्पनास्ति कियती, स्वच्छं पवित्रं कियत्-
तेषां भावि महात्मनाञ्च हृदयं, कामश्च कोपस्तथा।
लोभो यद्धृदयात्त्रयः परममी स्युर्निस्सृता राक्षसा
(रक्षा, यत्क्रियते हितं स्वपरयो, रक्षो यतः स्वाऽहितम्)।।३२४ ।।

अस्मिन्निस्सृत एव दैत्यनिकरे, स्थानान्मनोमन्दिराद्
दोषस्रष्टरि शुद्धकाचघटितो देवालयोऽयं स्फुटम्-।
स्वच्छो जायत एव, मन्दिरमिदं (यद्गीतमत्युत्तमं)
सञ्जातं विषयस्वरूपविकृतिक्षोदैस्तथा दूषितम्- ।। ३२५ ।।

एतेष्वौदरिकेषु सत्सु नितरां यातेषु विभ्राजते
संसारे स्वत एव संस्थितमपि प्रेमाऽमृते क्षालितम्।
तत्रागत्य विराजते प्रियतमः प्राणप्रियस्तर्हि वै,
जातायां स्फुटमेव तत्प्रियतमप्राणप्रतिष्ठास्थितौ- ।। ३२६ ।।

तद्दिव्यच्छटया विभाति सुतरां बाह्यप्रघाणोऽप्ययं
देहात्मा, ऽहह ! यस्य चेतसि महाभागस्य शुद्धात्मनि।
स्वप्रेयोऽखिलपावनप्रतिकृतिप्राणप्रतिष्ठाऽभवत्-
स्पर्शेनैव पलायतेऽस्य पदयोः स्थाने विकारोऽखिलः।। ३२७।।

अहह ! धन्यमस्ति जीवनं नरभुवीह तन्महात्मनाम्।
पतितपावन-क्षितिश्रियां (पतितपावनं हि पावनम्)।। ३२८ ।।

संसारे कमनीयदर्शनमतिश्रीयुक्तमत्राऽखिलं
वस्तु स्वच्छसमप्रतीति- (मिह वादो दृष्टिसृष्टिः क्षितौ)।

कामोद्दीपनकारकं, सरभसं ह्याकर्षितान् स्वं प्रति
त्वद्धा तत्कुरुते तथाहि पुरुषान् (मायाप्रभावोऽस्त्रियाम्) ।।३२९।।

निर्गच्छंश्च ततोहि मादककरो मोहे मनुष्यान् बलाद्
बध्नात्यत्र, तु कोऽपि धीरपुरुषो निर्मोक्तुमेव क्षमः।
तस्याकर्षणत,स्तथाहि पुरुषो भूमौ मनुष्योऽस्ति नो
साक्षादीश्वरको, नरात्मनि तथा नारायणो वस्तुतः।। ३३० ।।

सोऽयं तथास्ति भगवांस्तु शरीरधारी,
धूलिस्तदीयपदयोः सुलभा क्षितौ स्यात्।
अस्यां तथापरमभाग्यवतामथैव,
(प्रेमा यतः, परमभाग्यमहो ! तदेव)।। ३३१ ।।

आस्ते रघुनाथश्रीदासमहात्मा।
तेष्वेव तु धीरेष्वेकः पुरुषेषु ।। ३३२ ।।

आस्तां द्वौ रघुनाथदाससुहृदः पूज्यः पिता भ्रातरौ,
हीरण्यश्च मजूमदारपदवीयुक्तश्च गोवर्धनः।
प्राज्ञौ चातिशयन्तु कार्यकुशलौ द्वावेव तु भ्रातरा-
वेतौ च व्यवहारलोकनिपुणावत्यन्तमास्तां तथा ।। ३३३ ।।

अस्माकं ननु पूर्वतोऽस्ति विदितं-राज्ञस्तदानीं दिशा
ग्रामाणां नियमस्त्वदीयत, तथा तद्ग्राहकः प्रायशः।
वङ्गे क्षेत्रपतिस्तु भूम्यधिपतिः कायस्थको मुस्लिमो
वैवाऽस्मिन् भवति स्म (जातिमुखता व्यक्तिर्हि सङ्केतिता)।। ३३४ ।।

एतौ द्वावपि सोदरावभवतामेवार्यकायस्थकौ,
प्राप्ताऽऽसीच्च मजूमदारपदवी राज्ञो दिशाऽदोद्वयोः।
एतौ सम्प्रति वर्तमाननगरश्रीतीसबीघाऽन्तिके
सप्तग्रामपदे सुशीलचरितौ ग्रामे तथास्यूषतुः ।। ३३५ ।।

सप्तग्रामपुरं तु तत्र समये गङ्गातटावस्थिते-
र्भव्यैका ननु बुध्यते स्म विपणी व्यापारवाणिज्ययोः।
व्यापारो भवति स्म (कारणमिदं) नावैव काले तदा
प्रायो (नौर्धरणी, तथाहि निखिला व्यापारमात्रं कृतिः)।। ३३६।।

प्रायो विंशतिलक्षरूप्यमभवत्सांवत्सराऽऽयस्तदा
भूभागस्य तथानयो,र्नृपतये तस्याददत्तामिमौ।
रूप्यं द्वादश लक्षकं, त्वधरतां शेषं तथाऽऽत्मान्तिके
लक्षं रूप्यकमष्ट (भूम्यधिपतिर्लोके प्रभावी सदा)।। ३३७ ।।

तत्काले बहु बुध्यते स्म च तथाह्यायोऽष्ट लक्षं, क्षिता-
वष्टौ साम्प्रतिकैककोट्यतिशयं लक्षं तदानीन्तनम्।
आसीत्सोदरयोस्तु भूपसमितावच्छा प्रतिष्ठा,ऽनयो-
र्विश्वासं कुरुते स्म पूर्णमुभयोः सर्वोऽपि कश्चिद् गिराम्।।३३८।।

एतावद्धनिकावुभौ सहृदयौ सन्तावपीहाऽऽस्तिका-
वास्तां पूर्णतया, तदीयसमितौ विद्वज्जनानां सताम्।
सम्मानः क्रियते स्म चातिशयितं, विप्रास्तदीयाश्रया-
च्च प्राज्ञा निजजीविकां तु बहवोऽद्धा चालयामासुराः!।। ३३९।।

मिश्रस्यापि पुनश्च पण्डितजगन्नाथस्य सेवामिमा-
वाऽऽस्तां संदधतौ महाप्रभुपितुः किञ्चिन्न किञ्चि,त्तथा।
आयान्तो बहु पण्डिता ननु नवद्वीपस्य यान्तोऽभव-
न्नेतत्स्थान-(मसात्त्विके न धनिके साधुभ्रमिर्जायते)।। ३४० ।।

आसीत्पूर्वत एव भक्तिरनयोर्भ्रात्रोर्द्वयोः पादयो-
रद्वैतस्य गुरोस्तु, (कारणमिदं) मैत्री प्रगाढाऽनयोः।
आसीद् वंशपुरोहितेन परमा ह्यद्वैतविद्वद्गुरोः
सार्धं श्रीबलराम-नाम-सुधिया (मैत्री समानात्मनोः)।। ३४१ ।।

सप्तग्राममतः प्रगम्य सरलो दासो महात्मा हरि-
स्तस्थौ तद्बलरामपण्डितगृहेऽद्धा क्वापि तु क्वापि सः।
आचार्यो बलरामजीसहृदयस्तन्नामनिष्ठोपरि
ह्यासीन्मुग्ध इवाऽथ तत्र सुतवत्सिष्णेह दासे सदा।। ३४२ ।।

तस्मात्क्षेत्रपती सहोदरावप्येतौ हरिदासकोपरि।
श्रद्धाया दधतुस्तु भावकं (सत्पात्रे प्रियभावनोदयः)।। ३४३ ।।

आसीत्तत्र हिरण्यदाससुजनो निःसन्ततिः, केवलं
श्रीगोवर्धनदासकस्य तु तथैकाऽऽसीत्परं सन्ततिः।

सन्तत्या च तयैव स त्वथ जगद्वन्द्योऽभवच्चामरः
(सन्तानेन तथैकलेन सुहृदा याति प्रसूर्वन्द्यताम्)।। ३४४।।

दासश्रीरघुनाथपितृभवनप्रख्यातभाग्यं तथा
श्रीगोवर्धनदासनामसुहृदस्त्वस्यैव जातं सतः।
बालश्रीरघुनाथदाससुमनास्तेजस्विसल्लक्षणः
सिद्धः पूर्वत एव (कोऽपि शिशुकः सल्लक्षणो बाल्यतः)।। ३४५।।

स्नेहोऽस्योपरि केवलस्थितिवशादत्यन्तमासीत्पितुः
पितृव्यस्य च, बाल्यतोऽस्य च गुणे ह्यासीच्च गम्भीरता।
बह्वल्पं तु चकार भाषितमसौ, नैषोऽपशब्दं तथा
कञ्चित्कर्ह्यपि जल्पति स्म (गुणतापात्रत्वयोः सङ्गतिः)।। ३४६।।

नम्रो ज्येष्ठपुरो बभूव सततं, चैव स्वतः सुन्दरोऽ-
त्यन्तं कारणराजपुत्रभवनाद्वै कोमलाङ्गस्तथा।
भूयोऽमुष्य तथेयती विनयता स्वर्णे सुगन्धस्य तु
स्थाने कर्म चकार (ना तनुमनोभ्यां सुन्दरः सुन्दरः)।। ३४७।।

मूर्तिं योऽपि तथेयतीं सहृदयोऽपश्यत्पुनर्मोहिनीं
मुग्धोऽभूत्तु स एव, तं निजसुतं ख्यातं पिता पण्डितम्।
निर्मातुं, पठितुं निजान्वयगुरोः पार्श्वे तथा संस्कृतं
व्यस्राक्षीद् बलरामनामसुधियः (पुत्रं पिता पाठयेत्)।। ३४८ ।।

स्वग्रन्थान् रघुनाथकः स विनयी धृत्वा स्वयं यन्नभू-
दाचार्यस्य गृहं तथाहि पठितुं, काले तदाऽहर्निशम्।
स्थित्वाऽऽचार्यनिकेत एव भगवन्नाम्नां तथोच्चारणं
संकुर्वन् हरिदासजीसहृदयस्तूच्चैर्महात्माऽभवत् ।। ३४९ ।।

संजातोऽत्यधिको मृदुप्रकृतिके साधुस्वभावे रघौ
बालेऽस्मिन् हरिदाससाधुभगवन्निष्ठाप्रभावो महान्।
संपश्यन् हरिदाससाधुवदनं प्रत्युन्मुखोऽभूदसौ
होरा यावदहो ! तथाह्यनिमिषं (बालाश्रयो विस्मयः)।। ३५०।।

कुर्वन् कीर्तनमप्यनेन च समं भूत्वा ह्यसंज्ञो बभौ
क्वापि क्वापि, वटो रघोः सरलता भावोन्मुखत्वं तथा।

स्वं गेहं हरिदासहृद्यपि पुनश्चक्रे,ऽभवल्लाडयन्
तं स क्षेत्रपतेः कुमारमपरं साधुर्हृदा वै हृदा ।। ३५१ ।।

संजातो रघुकः शनैर्ननु शनैर्बालो वयस्कः, परं
चित्तं नाऽतुलमस्य वैभवमियत्कर्तुं निजाऽऽकर्षितम्।
शक्तं, तं ननु धावति स्म विषयाऽऽभोगस्तथा कर्तितुं
(मिथ्यात्वं विषयेषु कस्यचन कौ त्वाभासते बाल्यतः)।। ३५२।।

त्यक्त्वा कृत्रिमसज्जितं ह्युपवनं रम्यं परं तन्मनो-
भृङ्गो मुक्तवनेषु वै विचरितुं स्वच्छन्दभावादभूत्।
व्यग्रं, निन्दितनिन्दितां कृतिमहो ! यत्स्वर्णरूप्यात्मकं
सर्वस्वं शकलं प्रबुध्य जनता तां कर्तुमप्यत्र कौ-।। ३५३ ।।

पृष्ठेऽग्रे कुरुते मनो न, च तथा तत्प्राप्तिहेतोर्निज-
प्राणानां पणयोजनेऽपि कुरुते नो कर्हिचित्सर्वथा।
सङ्कोचं, रघुनाथजीसहृदयः स्वर्णस्य मुद्राः परं
ता एव स्वपथस्य कण्टकमहोऽबोधत्परात्मप्रियः ।। ३५४ ।।

किञ्चिन्नो लगति स्म तस्य तु मनोऽद्धा राजकार्ये,ऽभव-
त्सत्सङ्गे परमार्थमार्गकपरिष्कारे स तु व्याकुलः।
अस्याऽयं व्यवहारकोऽरुचिकरः स्थाने प्रतीतोऽभव-
त्संसारिस्वकुटुम्बिनां (ममतया किं स्याद् विरक्ते रतिः?)।।३५५।।

नानाऽमुष्य तु ते प्रलोभनमदुः सांसारिकं, साधनै-
र्भोग्यैरस्य मनस्तथाहि विविधैरीषुर्निबन्द्धुं पुनः।
भोग्येष्वेव च तेषु, किन्तु निखिलस्तेषां प्रयन्नोऽफलो
यातो (निष्फलता ध्रुवं सति जनेऽसाधुप्रयत्नात्मनाम्)।। ३५६।।

कुर्वन्नस्ति तु मोदकस्य सततं मिष्टातिमिष्टस्य यः
साध्वास्वादन,मस्य खण्डजमहो ! दत्वाऽस्ति वै मूर्खता-।
स्वायत्तीकरणं, तथाऽस्य सुहृदामेवंदशायामभू-
च्चिन्ता सर्वनृणां (निमायिजनताचिन्ता निमाय्यात्मनः)।। ३५७।।

संन्यासं समये महाप्रभुरयं धृत्वा स्थितोऽभूत्तदाऽ-
द्वैताचार्यगृहे च शान्तिपुरके, काले तदानीमसौ।

आदेशं स्वपितुर्विगृह्य रघुको यातः प्रभोर्दर्शने,
तस्थौ चापि चतुर्दिनानि निकटे गौरप्रभोः पादयोः।। ३५८ ।।

स त्वासीद् गुणदोषवित्सहृदयो गौरप्रभुः पूर्णतो,
रूपेणैव विवेद सोऽस्य - पुरुषोऽयं जन्मसिद्धोऽस्ति यत्।
संसारे चिरकालमेष सुमनाः स्थातुं न भूत्वा क्षमः
संसारी (परमार्थमार्गपुरुषज्ञाता प्रमाताऽपरः) ।। ३५९ ।।

भूयोऽपि संबोध्य तथेममाप्तो
विसर्जयामास गृहं निमायी।
'संसारिकार्यं विदधद् गृहस्थ-
स्त्वसक्तभावादिहि' चोपदिश्य ।। ३६० ।।

चित्तं (लक्षितवान् पिता ननु यदा) पुत्रस्य सांसारिके
कार्ये नो लगतीह, तत्परिणयं सोऽस्यैकया कन्यया।
सुन्दर्या कृतवांस्तथातिशयया, चासीत्स सम्पत्तिमान्
श्रीगोवर्धनदासजी (धनिकता गोवर्धनद्वारतः) ।। ३६१ ।।

भूपालप्रजयोरसौ सहृदयः प्रीतेर्द्वयोर्भाजनं,
पश्यन्ति स्म जनाश्च तं परमया सर्वे प्रतिष्ठादृशा।
आसीद्वैभवमस्य राजसदृशं, तत्सुन्दरीसुन्दरी-
पत्न्यन्वेषणकष्टताऽभवदहोऽस्य स्वात्मजार्थं नहि।। ३६२ ।।

आसीत्तस्य विचारणा-ऽस्ति रघुकाऽवस्थाऽधुना यौवनं,
पत्नीमाप्य स सुन्दरीं च परमां सर्वामुदासीनताम्।
विस्मर्ता निजकां, च लोकसदृशस्तत्प्रेमपाशारतः
संसारी भविता (रतिः प्रकृतितो हि स्थायिभावाऽऽदिमा)।।३६३।।

सर्वस्वं विषयस्य किन्तु भुवनेऽस्मिन् भोग एवेति नु-,
र्बोद्धुस्तस्य पितुर्ममत्वमनसः किं ज्ञातमासीत्तु यत्-।
उद्वाहोऽस्य तु पूर्वमेव घटितो ह्यन्येन केनापि, तत्-
सौन्दर्यस्य पुरोऽस्ति निश्चितमहो! तुच्छातितुच्छं परम्-।। ३६४ ।।

एतल्लौकिकसुन्दरीकजगतः सौन्दर्य,मेषोऽप्यभू-
दायासो विफलः पितुस्तु, परमा पत्नी तथा सुन्दरी।

नो बन्द्धुं रघुनाथदासमभवत्स्वप्रेमपाशे क्षमो,-
दासीनस्तु रघुस्तथैव घटितोऽभूदत्र संसारतः ।। ३६५ ।।

सम्प्रत्येष यदाऽशृणोद्रघुरहो ! वृन्दावनं न प्रभु -
र्यातः, सम्प्रति रामकेलिनगराद् गेहे निवृत्तो गुरोः।
अद्वैतस्य विराजते, ननु तदासावात्मतातश्रियः
सार्धं नम्रतया तथातिशयया चक्रेऽर्थनां पादयोः-।। ३६६ ।।

'आदेशः प्रभुदर्शनस्य मे लब्धव्यः, प्रभुगौरदर्शनम्।
कृत्वाऽहं द्रुतमेव गेहमायास्यामि' (प्रभुता हि कर्षिणी)।। ३६७।।

एतस्मिञ्छुत एव सोऽथ वचने दासस्तु गोवर्धनः
किङ्कर्तव्यविमूढतां स हि गतः, पुत्रं युवानं समम्।
ऐच्छत्किन्तु बलान्निषेद्धुमपि नो, भूत्वाऽश्रु तन्नेत्रयो-
रूचे 'पुत्र! तथा त्वमेव ननु नो वंशेऽपरो दीपकः।। ३६८ ।।

सर्वेषां ननु नोऽस्ति केवलमहो ! लोके तवैवाश्रयो,
ह्याधारोऽसि तथा त्वमेव भुवि नोऽद्धा जीवनस्य, क्षमाः।
न स्थातुं भुवि जीवितुं ननु वयं त्वद्दर्शनाभावतो,
न त्वां वारयितुं लषामि सुहृदो गौरप्रभोर्दर्शनात्।। ३६९ ।।

वृद्धस्य चास्य परमेव तथाऽर्थनेयं,
केशानमून्मम सितांस्तु विलोक्य, शीघ्रम् ।
आयाहि, कुत्रचन यत्र विहाय गेहं
यातुं बहिर्जगति निश्चयनं न कुर्याः'।। ३७० ।।

मोहस्निग्धमिदं वचो ननु पितुः श्रुत्वा बभाषे रघु-
श्चक्षुःसंभृतवाष्पको 'मम पितः ! कुर्यामहं किं ? पुनः- ।
जाने नो, मन एव किं लगति नो संसारिकार्येषु मे
कात्स्न्येना,ऽस्मि लषामि चाधिकमहो! मत्कारणान्नो भवेत्-।।३७१।।

कष्टं किञ्चन सर्वथाऽत्र भवतः, किन्त्वस्मि न स्वे वशे,
कश्चित्स्वाभिमुखं मनो मम बलादाकर्षयन् वर्तते।
आदेशं भवतः करोमि तु शिरोधार्यं, स्वगेहं तथाऽऽ-
यास्यामि द्रुतमेव' (देहभगवानेवाऽन्तिमो ह्याश्रयः)।। ३७२ ।।

श्रीगोवर्धनजी सुतेन सुहृदा दत्ते तथाऽऽश्वासने
स्वस्यैकं डयनं सुतस्य तु कृते ह्यानानयत्सुन्दरम् ।
तत्सङ्गे दश विंशतिश्च विहिता विश्वासिनः सेवका
(गच्छत्येकल एव, किन्तु पुरुषोऽसाधारणः प्रावृतः)।। ३७३ ।।

सार्धं राजकुमारतुल्यमधिकैश्वर्येण नाना तथा
व्यस्राक्षीत्तमुपायनेन सहितं गौरप्रभोर्दर्शने।
यस्माच्छान्तिपुरं स्थलात्तु ददृशे, पल्यङ्कतोऽवातरत्
तस्मादेव तथैष (नम्रहृदयो नम्रः क्रियायामपि) ।। ३७४ ।।

पद्भ्यामेव महाप्रभोश्च निकटं प्रापच्चलित्वाऽऽतपे
नग्नाभ्यामथ दूरतस्तु पदयोर्भूमौ लुठित्वा प्रभोः।
साष्टाङ्गं नमति स्म, चोरसि तथोत्थाय द्रुतं तं प्रभुः
स्थाने लागयति स्म (भावपुरुषो मातृस्वभावाकृतिः)।। ३७५ ।।

मन्दं मन्दममुष्य केशनिवहं कृष्णं तथाऽऽकुञ्चितं
गौरः स्वाङ्गुलिभिश्चकार सरलं, जघ्रौ प्रभुस्तच्छिरः।
स्वोत्सङ्गे च विधाय बालसदृशं पृच्छन्नभू'दातपे
ह्येकाकी त्वमथागतः किमियति?, प्राप्तः पदातिस्तु किम्?।।३७६।।

सङ्गे नानयति स्म सेवकजनं ?, शुष्कं मुखं पूर्णत –
स्ते, किं कारणमस्ति चास्य ?' रघुकः प्रश्नेष्वमीषु प्रभोः।
कस्याप्युत्तरमेष किञ्चिदपि नोऽदा,त्स्वाश्रुनीरैः प्रभोः
काषायाम्बरमार्द्रकं स्म कुरुते (ह्यार्द्रो भवेदाश्रयः)।। ३७७ ।।

तत्कालं रघुनाथसङ्गिभृतकैरागत्य पादे प्रभोः
साष्टाङ्गप्रणतिः कृता, च निहिता सर्वोपहारस्य च।
सामग्री प्रभुसम्मुखे, प्रभुरथ स्वर्णाभकान्त्यन्विते
देहे प्रेममयं तथा सुखमयं मन्दञ्च मन्दं रघोः– ।। ३७८ ।।

हस्तं चालयति स्म कोमलमयं स्वं सन्ममत्वान्वितं,
लब्ध्वाऽसीमकृपां प्रभोः सुमनसश्चैवं रुदन् वै रुदन्।
ब्रूतेऽयं तु रघुः 'प्रभो! मम कृते गेहं पितुर्वस्तुतः
कारात्वं गतमस्ति (बन्धनमहो ! बद्धात्मनः सर्वतः)।। ३७९।।

चावेक्षा सततं ममोपरि कृताऽऽदेशं विना कुत्रचिद्
यानायानमहं विधातुमथ नो शक्तः, क्षमो घूर्णने।
स्वातन्त्र्येण तथाऽस्मि नो, ननु जगत्त्रातः ! करोतु प्रभो !
भिन्नं मे गृहबन्धनं त्विदमथ च्छिन्नं निमायिप्रिय !।। ३८०।।

उन्मोच्य मां स्वपदयोरथ यातनातः
स्थाने ददातु शरणं, पदचिन्तनं ते।
कुर्वन् स्वजीवनमथैव च यापयेय
त्वाशीर्वचो ननु ददातु तथैवमात्मन् !'।। ३८१ ।।

'तून्मत्तो रघुनाथ ! किं त्वमभवः ?, शक्नोत्यहो ! बन्धनं
लोकेऽस्मिन् भवितुं कथं गृहमपि ?, स्वत्वं ततः सारय।
तिष्ठत्येव पुनश्च किं ?, नृवपुषां यावन्ममत्वं भवे
दुःखं चेतसि तावदेव (ममता सर्वप्रतीतेर्धरा) ।। ३८२ ।।

यत्र क्षणे ह्यपसृतं मनसो ममत्वं,
सर्वं निजन्तु निजमेव, कुरु स्ववृत्तम्।
आसक्तिमत्र हि विहाय, निजत्वभावं
वित्ते स्त्रियां भुवि कुटुम्बिषु चात्र हित्वा'।। ३८३ ।।

ऊचे किन्तु रघू रुदन्ननु रुदन् बालोपमं 'हे प्रभो !
मां नो वञ्चयता,मिदं त्वतिशयं जानाम्यहं, यद् भवान् ।
सर्वेषां मनसः स्थितिं सहृदयो बुद्ध्वा यथा बोधते
लोके तं त्वधिकारिणं, तु कुरुते तस्योपदेशं तथा।। ३८४ ।।

तैः सार्धं भजनक्रिया हि वसतोऽहो ! बालवत्सेष्वना-
सक्तत्वेन पुनः स्थितस्य च, तथा नद्यां प्रविष्टेऽपि नुः ।
क्लिद्येन्नात्र तनुर्यथा, व्यवहृतिं त्वैतादृशीं हे प्रभो !
सामान्यः प्रभवेत्कदापि न नरः कर्तुं विना त्वीश्वरम्।। ३८५।।

यन्मह्यं ह्युपदिश्यतेऽत्र भवता तद् विद्यते तत्कृते
बह्वल्पा ननु वासनाऽस्ति विषये येषां तु सांसारिके।
स्पृष्ट्वा पद्मपदे गृणामि भवतो, नो वर्तते सर्वथै-
वासक्तिर्मम गौरकृष्ण ! विषये संसारिणि श्रद्धया।। ३८६ ।।

धावत्यपारं गृहवैभवं मे
विकर्तनार्थं प्रभुगौरधामन् ! ।
स्थातुं न शक्नोमि ततोऽतिकालं
सम्प्रत्यहं कौ गृहबन्धनेषु'।। ३८७ ।।

'यत्किञ्चित्कथितं त्वयो,चितमिदं सर्वं, परं मार्कटं
वैराग्यं सुहृदत्र नोचितमिदं, क्वापि क्षितौ क्वापि तु।
वैराग्यं क्षणिकं नृणां प्रभवति, स्थाने विपत्तौ तथाऽऽ-
यातायां यदहोऽत्र नश्यति (मनोद्वारैव भावोदयः)।। ३८८ ।।

तस्मात्कतिपयं गेहे वस दिनम्।
सम्प्रत्यपि, तदा द्रष्टव्यमुचितम्' ।। ३८९ ।।

त्वत्यन्तं करुणस्वरे कथयति स्थाने रघु'र्हे प्रभो !
ह्यायातस्य भवत्पदाब्जशरणे शक्नोति कस्मात्पुनः।

वैराग्यं ननु नष्टमेव भवितुं ?, मृत्योर्जराया भयं
किं पीतेऽप्यमृते तथाहि भवितुं शक्नोति जीवात्मनः?।। ३९०।।

मह्यं तु ददातु स्थानं स्वपदाब्जे'।
(भाग्यं परमं स्वाभीष्टोचितलब्धिः)।। ३९१ ।।

ऊचे गौरमहाप्रभुर्ननु शनैः प्रेमस्वरे'ऽदो वचः
सम्यक् त्वस्ति, तथाहि भाविनि परं द्रष्टव्य,मस्माद्रघो ! ।
गेहं याहि तु साम्प्रतं, पथहृदो मे विद्यते सम्प्रति
श्रीवृन्दावनयाननिश्चयनमाः! (साधु क्रिया स्थानतः)।। ३९२।।

यातेतस्तु निवृत्य सम्प्रति पुरीमीहे च वृन्दावनं
यातुं तद् बहु शीघ्रमेव, च यदा वृन्दावनादागतः ।
भावी, तर्हि मयाऽऽत्मना मिल पुरीमागत्य' तत्सान्त्वना-
त्सन्तोषोऽल्पमभूद्रघोः प्रभुयतेः(सन्तोष एवाऽऽप्ततः)।। ३९३।।

तस्थौ सप्त दिनानि शान्तिपुर एवाऽसौ पदे तु प्रभो-
र्नैतेष्वेष दिनेषु तु क्षणमपि श्रीगौरतोऽभूत्पृथक् ।
तस्योच्छिष्टमनःप्रसादमविदद् भिक्षाक्रियानन्तरं
शिश्येऽथस्तु पदोः प्रभो-(र्हि शयनं विश्वासपूताश्रये)।।३९४।।

सप्तदिनान्येवं रघुनाथो गौरगिरा स्थित्वाऽथ स भूयः ।
सम्प्रति सप्तग्राममवाप्तो (जन्मधराभो नो परदेशः)।। ३९५ ।।

आसीच्छीयुतमाधवेन्द्रकपुरीसाधोश्च पुण्या तिथि -
स्त्वारादेव, ततोहि शान्तिपुरके तस्थौ निमायिप्रभुः।।
अद्वैतार्थनया दिनानि दश, चाऽऽयान्ति स्म भक्ता नव-
द्वीपादिस्थलतस्तथाहि बहवः संदर्शनार्थं प्रभोः ।। ३९६।।

आयाता पुनरेव सम्प्रति शची माताऽपि पुत्रं निजं
द्रष्टुं, सप्त दिनानि चात्मजमभून्माता कराभ्यां स्वयम् ।
भिक्षां कारयती, तथैकदिवसे तन्मध्यमेष प्रभु-
र्गौरीदाससमागमाय गतवानुत्तीर्य गङ्गानदीम् ।। ३९७ ।।

गौराङ्गस्य पदाब्जयोः स महतीं श्रद्धां दधानोऽभवत्,
सोऽयाचद् वरमात्मनः प्रभुयतिं 'स्थाने ममैव स्थले।

उष्यास्तं ह्युभयौ निताियसहितो बन्धू निमायी युवां'
स्वीचक्रे प्रतिमानिमायिवसनं गौरस्तदा तत्स्थले-।। ३९८ ।।

न्यस्तेऽनेन तथा निताियसहितश्रीमन्निमायिद्वय-
श्रेष्ठश्रीप्रतिमे, ययोः सहृदयावद्यापि तस्यात्मनः।
विश्वासानुसृतेरुभावपि विराजेते निताियप्रभू
(भावक्षेत्रमहोऽद्भुतं, हि भगवान् भावप्रधानात्मनाम्)।। ३९९।।

गौराङ्गदेवस्य महाप्रभोश्च
श्रीनित्यनन्दस्य तथादिमूर्ती ।
इमे तु लोकाः कथयन्ति, चास्ते
मूर्तिद्वयं तन्महदेव दिव्यम्।। ४०० ।।

भूयः शान्तिपुरे निवृत्य सुमनाः प्राप्तः प्रभुः कालना-
तो, भक्तान्निखिलांस्ततो ननु भवान् स्थाने विसर्ज्य प्रभुः।
सङ्गे भक्तजनान् स्वयं द्विचतुरश्च स्वान्तरङ्गान्निजान्
धृत्वाऽयं चलितो निजप्रियजगन्नाथस्य गौरः पुरीम्।। ४०१ ।।

●●

पुर्यां प्रत्यागमनं तथा वृन्दावनस्य पुनर्यात्रा

१५. गौरः श्रीकृष्णप्रियजल्पी।

वाणीलब्धिर्मनुजानामिह नियतिमहावरदानम्
एतद्व्यञ्जितहृद्भावश्रुतिमार्गस्वान्तोरसनम्।
बहुवादी प्रियसंवादी भुवि मन्त्रजपोऽन्यो मौनी
सच्चिद्रूपाधायकनामोच्चारणनिरतः कश्चित्।
विरहदशायां प्रियतमचिन्तननियतिर्निखिलवियोगी।
प्रेमोन्मत्तान् कृष्णजल्पिनोऽकृत स स्वयमुन्नृत्यान्
आपामरपशुखगमपि सहृदयकृष्णोच्चारी गौरः।।

निःसृत्य प्रभुरेष शान्तिपुरतः श्रीहट्टपानीहटाऽऽ-
दिस्थानेषु भवन् पुनः सहृदयः पुर्यां निवृत्याऽऽगतः।
सर्वादौ स गतो निजप्रियजगन्नाथप्रभोर्दर्शने
(द्रष्टव्योऽत्र मनस्विना सुमनसा वाऽऽत्माऽर्चनीयः प्रभुः)।। ४०२ ।।

कृत्वा श्रीभगवत्प्रणाममभवत्साष्टाङ्गमेष स्तुतिं
कुर्वन् गद्गदकण्ठतः सहृदयस्तस्य प्रभुः, पूजकः।
आनीय प्रभवे प्रसादमददान्मालां प्रसादं प्रभु-
र्लब्ध्वा मन्दिरकप्रदक्षिणमसौ कुर्वन् स्वमाप्तः स्थलम्।। ४०३।।

पुर्यामागमनस्य सम्प्रति पुनर्वृत्तं प्रभोस्तु क्षणा-
त्सम्पूर्णे नगरे ससार, सुहृदः शुश्राव योऽपि प्रभोः।
आयाति स्म स एव दर्शनकृते धावन्निवासे प्रभो-
राप्तो भक्तजनोऽखिलः (सुमनसः सौहार्दलोकप्रियाः)।। ४०४।।

भट्टाचार्यकसार्वभौमसहितो रामाकनन्दस्तथा
काशीमिश्रगदाधरप्रभृतयः, स्वां दर्शयन्तो मुदम्।
ऊचुः सर्वजना 'निमायिसुमनः ! सौभाग्यमस्ति प्रभो !,
यज्जातं भवतस्तु दर्शनमियच्छीघ्रं (मणिर्दुर्लभः) ।। ४०५।।

तीर्थयात्राक्षणः । नास्त्यसौ वस्तुतः'।। ४०६।।

'किञ्चिन्नास्ति तथा, गदाधरसुहृच्छापो मयि प्रालगत्,
सङ्गे नैतमनेषि, चेह बलतस्त्यक्त्वा गतोऽहं, ततः।

श्रीवृन्दाविपिनं न गन्तुमभवं शक्तो' बभाषे प्रभु,-
र्गोस्वामी तु गदाधरः कथयते दैन्येन बद्धाञ्जलिः-।। ४०७ ।।

वृन्दावनं ननु कृते भवतः प्रभो! किं ?,
यत्र स्थितिस्तु भवतो, भविताऽत्र वृन्दा।
ते लोकशिक्षणकृते भुवि तीर्थयात्रा,
लीलाऽस्ति केवलमियं भवतो निमायिन् !'।। ४०८ ।।

'दत्ता मेऽत्र सनातनेन सुहृदा सर्वोत्तमा सम्मति,-
र्बन्धू भागवतौ तथातिशयितौ तौ वैष्णवौ स्तः पुनः।
भ्रात्रोरस्ति भृतं तयोर्हृदययोः सम्पूर्णतस्तु प्रभु-
प्रेम (प्रेमविभावना प्रभुगता लोकोत्तरस्यात्मनि) ।। ४०९ ।।

कुर्वन्तावपि राजकार्यमियदाः ! स्थाने गुरू,भावुदा-
सीनावेव ततः सदा सहृदयौ भूत्वा तु तौ तिष्ठतः।
विद्येते भगवन्तमत्र सततं तौ चिन्तयन्तौ तथा
(चिन्तायां वपुषोऽखिलो, भगवतः कश्चित्परं चिन्तने)।।४१०।।

मेऽदातां निजसम्मतिं हि तौ यद् (वृन्दाविपिनं तथैकलः।
गच्छे-) देकल एव तत्त्वहं याता श्रीविपिनं परक्रमे'।। ४११ ।।

रामानन्दनिवेदनं- 'प्रभुयते ! वृष्टिक्षणः सन्निधा,-
वागच्छत्यपि माधवप्रभुरथश्रीयुक्तयात्रोत्सवः।
तत्कृत्वा च रथोत्सवं ननु चतुर्मासावधिं तत्पुनः
संवाह्य स्वमतं करोत्वपि यथा' (स्वीकार्यमात्मप्रियम्)।।४१२ ।।

सर्वे रायमहाशयस्य वचसोऽमुष्य स्वरूपस्तथा
गोस्वामी च गदाधरप्रभृतयः श्रीसार्वभौमप्रधीः।
चक्रुस्ते ह्यनुमोदनं सुमनसो भक्ता, ननाम प्रभुः
स्थाने सम्मतिसम्मुखेऽखिलहृदः सर्वस्य भक्तात्मनः।। ४१३ ।।

संवाह्यैव महाप्रभुः सहमतो जातश्च वृष्टिक्षणं
वृन्दारण्यगमाय, शान्तिपुरतः प्रस्थानकाले प्रभुः।
उक्त्वा साम्प्रतमागतो'ऽस्मि चलिता वर्षेऽत्र वृन्दावनं
नाऽऽगन्तव्यमतोऽधुना रथमहे पुर्यां भवद्भिस्तथा'।। ४१४ ।।

मत्वाऽऽज्ञाञ्च महाप्रभोः सहृदया गौडीयभक्ता रथ-
श्रीयात्रावसराय पूर्वसदृशं वृन्दं विधायाऽधुना।
नाऽऽप्ता, मानयति स्म पूर्ववदयं गौरो रथस्योत्सवं,
पुर्यामेव तथाह्युवाह च चतुर्मासान् प्रभुः प्रावृषः।। ४१५।।

यातायां प्रभुरुद्यतश्च शरदारम्भे घनायां तथा
वृन्दारण्यगमाय भक्तनिवहाद् धृत्वा ह्यनुज्ञामयम्।
(एकाकी प्रभुरेव याति, कमपि त्वन्यं न वाञ्छत्यसौ
सङ्गे सम्प्रति धर्तुमेव गमने) स्तब्धेन कण्ठेन तत्-।। ४१६।।

गोस्वामी वदति स्वरूपसुमना 'मत्प्रार्थनैका प्रभो!
स्वीकार्या नियतन्तु साऽत्र भवता, वृन्दावनं यात्यहो ! ।
एकाकी नु भवान्, हि नोऽस्ति परमाऽसह्यं त्विदं प्रेमिणां
(स्वप्रेयोविरहं तथाहि सहते प्रेमी, न तस्याऽसुखम्)।।४१७ ।।

सङ्गेऽन्यं कमपीह नेच्छति ततो धृत्वा प्रयातुं, तदाऽ-
मुं भट्टं बलभद्रमेव नियतं सङ्गे तु गच्छेद् भवान्।
धृत्वा, सत्कुलजो द्विजोऽस्त्ययमहो ! जानाति सेवाक्रियां
सम्यक्, च प्रभुपादपद्मयुगलेऽस्त्यस्यानुरागो दृढः।। ४१८ ।।

सर्वेषु व्रजमण्डलस्य हृदयेऽमुष्यास्ति वाञ्छा तथा
तीर्थेषु भ्रमणस्य च स्वयमपि, स्थाने च भिक्षादिकम्।
स्थानेऽयं तव साधयिष्यति, तथा नो भाव्यतस्तेऽप्यसौ-
विध्यं, स्थास्यति हे निमायिसुमनः! सन्तुष्टिरत्रापि नः'।।४१९।।

आकर्ण्याऽथ तथास्वरूपवचनं बुद्ध्वेत्थमेव स्पृहां
सर्वेषां सुहृदाञ्च भक्तमनसामूचे प्रभुर्वत्सलः।
भक्तानां 'बलमस्ति मे न भवतामिच्छाविरुद्धं तथा
कर्तुं किञ्चन कर्म (तूचितबलं, यन्नो विरुद्धं स्वतः)।।४२० ।।

यस्मिन् वो मुदिता भविष्यति, तथा सर्वे भवन्तो यथा
वक्तारश्च, मया तथैव सुहृदः ! कर्ता,ऽस्तु वश्चाग्रहात् ।
स्वे सङ्गे बलभद्रमस्मि नियतं नेता' प्रभोर्निश्चया-
दस्मात्ते मुदिता (मुदो निजमनोभावप्रसिद्धेर्नृणाम्)।। ४२१ ।।

निश्चिन्तास्त्वभवंस्तथाऽखिला देहादल्पमिवाल्पकं प्रभोः।
वृन्दां यास्यति तु प्रभुः कदा, नो बोधो वचसोऽस्य कस्यचित्।।४२२।।

एकाकी त्वथ दर्शने भगवतः सायञ्च यातः प्रभू,
रात्रावेव ततो निदेशममना लब्ध्वा परस्मिन् दिने।
स्वे सङ्गे बलभद्रभट्टमपरो धृत्वा तमस्येव च
श्रीवृन्दाविपिनोन्मुखस्तु चलितो (वृन्दोन्मुखः सत्प्रियः)।।४२३।।

प्रातर्यदा लोकितमत्र भक्तै,-
र्नास्ति प्रभुर्बुद्धमतश्च सर्वैः।
चचाल वृन्दाविपिनं निमायी
(प्रेमी प्रियं याति तथाहि गूढम्) ।। ४२४ ।।

त्यक्त्वा राजपथं तथाऽत्र कटकोद्देशं त्यजंश्च प्रभुः
झाटेष्वेष भवंस्तथाप्युपपथद्वारा चचालाञ्जसम्।
श्रीवृन्दाविपिनोन्मुखं, पथि तथा दूरञ्च यावद् बहु
ग्रामा दृश्यपि नागता (न निखिला पृथ्वी निवासाकुला)।। ४२५।।

भिक्षां कारयति स्म तेषु च बलो भद्रो दिनेषु प्रभो -
र्वन्यान्येव फलानि मूलसहितं निर्माय शाकं तथा।
ग्रामेभ्यस्त्रिचतुर्दिनावधिकृते संयाच्य जग्राह च
क्वापि क्वापि पदार्थमेष बलको भद्रो गणीभूतकम्।। ४२६ ।।

खाद्यं वस्तु मिमेल यत्र न तथा, निर्माय भिक्षां प्रभो-
स्तस्मादेव च तत्र कारयति तु, प्रीतो बभूव प्रभुः।
सेवातोऽस्य सदा, पुनर्ननु पुनः कार्तज्ञ्यमेतं प्रति
व्याञ्जीत् (साधु कृतज्ञताप्रकटनं वाचा प्रकाशो हृदः)।।४२७।।

विद्याद् गौरमहाप्रभोः सुमनसो मायां तु कः ?, कुत्र तु
ह्यप्रीतस्त्वभयैकखण्डधरणाज्जातः पराह्णः कृते।
अत्राऽन्नस्य च संग्रहेऽपि सुमना भद्रस्य, तस्मादभू-
त्प्रीतः प्रत्युत, तूक्तमेव च तदा- साधुर्हि लोकोत्तरः-।।४२८।।

१६. चेतो लोकोत्तरपुरुषाणां ज्ञातुं कोऽत्र समर्थः ?
इन्द्रियगम्यः स्थूलपदार्थः साधारणतो लोके

अन्यान्तःकरणस्थितिबोधः संभवति प्रत्ययतः।
पुरुषविशेषः कारकपुरुषः साधारणदुर्बोधः
जानीयादवतारिविशालव्योमोपमचेतः कः

एतन्महापुरुषचित्तमहोऽत्र लोकात्
संसारिणो भुवि विलक्षणमेव चास्ते ।
भावं मनोगतमलं प्रभवेत्तु वेत्तुं
तस्याऽत्र कः (सहृदयः पुरुषो विशेषः)।। ४२९ ।।

मार्गे स्वानुपमप्रभावबलतः प्रेमप्रदानं प्रभुः
कुर्वाणः पशुपक्षिणामपि तथा हिंस्रस्वभावात्मनाम्।
जन्तूनां सरति स्म सोऽथ पुरतः, क्रूरस्वभावं निजं
त्यक्त्वा हिंसकजन्तुरस्य पदयोः स्थाने लुलोट प्रभोः।।४३० ।।

मार्गं लङ्घयते निमायिसुमना यद्ग्राममध्यात्प्रभु,-
श्चैतन्यं परिवेष्टयन्ति परितो ग्रामस्य सर्वे नराः।
तस्यैव, प्रियविग्रहं ''हरि-हरिं'' संभाषमाणाः प्रभुं
(स्यात्कश्चिद् भुवि तादृशः सहृदयो, नोऽस्यानुगा दुर्लभाः) ।। ४३१ ।।

एवं मार्गसमस्तजीवनिवहं कुर्वन् कृतार्थं प्रभु-
श्च क्षेत्रं ह्यविमुक्तमल्पदिवसैर्वाराणसीश्रीपुरीम्।
आप्तः, शङ्करविश्वनाथशिवजीकाशीपुरीमाप्य स
स्नानार्थं मणिकर्णिकातरमगादादौ च काशीश्रुतम्।। ४३२ ।।

स्नात्वाऽस्मिन् स्थित एव तत्र तपनो मिश्रस्तथैको द्विजो
वङ्गीयोऽथ समागतः, स्मृतिमतां सत्पाठकानामहो !
अत्रेदं स्मरणीयमस्ति - सुमना गौरः स्वशिष्यैः समं
यात्रायां गतवान् यदा सहृदयोऽयं पूर्ववङ्गावनेः-।। ४३३ ।।

विप्रस्तर्ह्ययमेव तत्र तपनो मिश्रो मिमेल प्रभोः,
कृत्वा प्रेषितवानमुष्य भगवन्नामोपदेशं प्रभुः।
काशी,मद्य विलोक्य सोऽथ सहसा संन्यासिवेषे प्रभुं
तत्पादे पतितो रुरोद तपनो मिश्रस्तथोच्चैर्द्विजः।। ४३४ ।।

उत्थाप्य स्वगले तु लागयति तन्मिश्रं निमायिप्रभुः
पृच्छंस्तत्कुशलं च चालयति तच्छीर्षे स्वहस्तं तथा।

मिश्रो गद्गदकण्ठतः कथयते'द्धाऽद्य प्रभो ! सार्थकं
सञ्चक्रे निजभक्तवत्सलपदं स्थाने निमायिन्! भवान्।। ४३५।।

आगत्य स्वकदेवदुर्लभमहासंदर्शनैरत्र मां
सद्विप्रेष्वधमं कृतार्थमकरो,त्कृत्वा कृपां साम्प्रतम् ।
कञ्चित्कालमदोदरिद्रककुटौ कृत्वा निवासं तथा
दीनं हीनममुं करोतु कृतिनं' (सत्सेवया ना कृती)।। ४३६।।

स्वीचक्रेऽथ महाप्रभुः सहृदयो मिश्रार्थनां, चैष तं
सङ्गे तु प्रथमं विगृह्य भगवच्छीविश्वनाथस्य वै।
यातो दर्शनेहेतवे, च तपनश्रीमिश्रगेहं पुनः
प्राप्तः सम्प्रति बिन्दुमाधवहरेः कुर्वंस्तु संदर्शनम्।। ४३७ ।।

पाद्यार्घाचमनैर्यथोचितमथाऽद्धा धूपदीपान्वितै-
र्नैवेद्यैः फलपुष्पमाल्यसहितैश्चक्रे प्रभोरर्चनम्।
श्रीमिश्रश्चरणामृतं च चरणौ प्रक्षाल्य तस्याऽग्रहीत्,-
सम्पूर्णे न्यसिचच्च तन्निजगृहे (शुद्धिर्निषेकात्सतः)।। ४३८ ।।

तद्गेहे सुखपूर्वकं प्रभुरभूत्स्थाने वसं,श्च प्रभो-
स्तत्पुत्रो रघुनाथकस्त्वतिशयं सेवां मनोयोगतः।
कुर्वन्नस्ति, समीपमेव स सदोवास प्रभोः, स प्रभुं
हित्वा नो तु ययौ रघुः क्वचिदपि (स्थेयं सतः सन्निधौ) ।।४३९।।

वङ्गीयो ननु चन्द्रशेखरपदस्तत्रैव चैकोऽमिलद्
वैद्यः, सोऽत्र तु पुस्तकानि सुमनाः स्थाने लिखित्वाऽकरोत्।
निर्वाहं निजजीवनस्य, स नवद्वीपे तथा चैकदा
चक्रे गौरनिमायिदर्शनंमपि (प्राप्तिः सुयोगः सतः)।। ४४० ।।

शंसां मिश्रमुखात्प्रभोश्च सततं शृण्वन्नभू,त्साम्प्रतं
तस्याभून्मुदिताऽधिका सुमनसो गौरप्रभोर्दर्शनात् ।
भिक्षां गौरमहाप्रभोर्निजगृहे सोऽभूत्तथा कारयन्
(भुङ्क्ते संततमेव गेहिमनुजः, सद्भोजकः क्वापि सः)।। ४४१।।

एवं तद्द्वयवङ्गबन्धुसुहृदोः काश्यां दश द्वादश
स्थाने संततमाग्रहाच्च दिवसांस्तस्थौ निमायिप्रभुः।
तन्मध्ये प्रभुदर्शने ननु महाराष्ट्रीयविप्रस्तथाऽऽ-
यानेकोऽत्र बभूव (साधुनिकटे सल्लोकयोगः स्वतः)।। ४४२ ।।

आसीत्सम्मिलनं च तस्य सुहृदः श्रीस्वामिसाधुप्रबो-
धानन्देन तथाऽपि, सोऽकृत महाशंसां प्रभोः स्वामिनि-।
गत्वा प्रेमरसस्य च प्रियतमश्रीकीर्तनस्याद्भुत-
प्राऽऽनृत्यस्य (तथा प्रियप्रभुकृते सत्प्रेमनृत्योऽपरः)।। ४४३ ।।

प्रायः सर्वमुपेक्षते भुवि वचो ह्यद्वैतवादी यथा
निर्दिश्याऽत्र परात्मनोऽरसमना मायाञ्च लीलां, तथा।
चक्रे स प्रभुभक्तिभावफलितप्रेम्णो ह्युपेक्षामिव
स्थाने तद्विषयेऽपि चाकृत तथौदासीन्यभावं स्फुटम्।। ४४४।।

वार्तेयं रुरुचे न तस्य तु महाराष्ट्रीयभक्तस्य, स
ह्यागत्य प्रभुमुक्तवान्, प्रभुरहो! तं बोधयन् भाषते।
'संसारेऽत्र विभिन्नकप्रकृतयो लोका भवन्ति ध्रुवं-
(लोकाः सत्त्वरजस्तमःप्रकृतयोऽलोको गुणेभ्यः परः।। ४४५ ।।

पूर्णश्रीभगवत्कृपा भवति वै यस्योपरीह क्षितौ,
तस्यैव प्रभुमाधवप्रियतमप्रेमोपलब्धिर्भवेत्।
अर्थः को भवतः परेण भुवने, लोको ब्रुवाणोऽस्तु तद्
वाञ्छेद्य,त्प्रभुकप्रसादलभने नित्यप्रयत्नोऽस्तु भोः !-।। ४४६।।

एवैषोऽस्ति पथस्तथाहि परमः श्रेयस्कर'श्चेदृशं
सन्तुष्टं स्वमिमं तु भक्तनिवहं कृत्वा निमायिप्रभुः।
काशीतश्चलितः प्रयागमविदच्छ्रीतीर्थराजं तथा
(तीर्थं तारयति, प्रयागमहिमा तत्सङ्गमाद्राजते) ।। ४४७ ।।

तत्रागत्य निमायिनी भगवती भागीरथी भानुजा-
कालिन्द्या मिलते, सिताऽसितरसाऽऽकृत्योस्तयोः सङ्गमात्।
सर्वः सम्मिलनावलोकनदिशा प्राप्नोति लोकस्तथा
ह्यानन्दं परमं (विशिष्टघटनं दत्ते विशिष्टं सुखम्)।। ४४८ ।।

चैतन्यः सहसा महाप्रभुरभूद् व्यग्रः स्वकृष्णप्रिया-
कालिन्दीक्षणतस्तथा द्रुतमहोऽकूर्दिष्ट यम्यन्तरे।
भावावेशगत,श्चकार च बलो भद्रो बहिस्तं तथा
धृत्वा (केवलमस्ति भद्रकबलं चैतन्यमित्रं हितम्)।। ४४९ ।।

अद्भुतामलौकिकीञ्च दृष्ट्वा तत्प्रभुस्तु तीर्थराजशोभाम् ।
स्तोत्रपाठमेष चास्ति कुर्वन् गद्गदस्वरान्निमायिभावात्।।४५०।।

स्थित्वा त्रीणि दिनानि च प्रभुरयं तीर्थे प्रयागेऽचल-
च्छीवृन्दाविपिनोन्मुख,श्च मथुरां प्रापच्चलन् वै चलन्।
आप्त्वैष प्रथमं तु यामुनजले विश्रामघाटं प्रभुः
सस्नौ, श्रीव्रजभूमिपावनरजो लब्ध्वा समावेशनम्-।। ४५१ ।।

फुल्लित्वाऽऽत्मनि नास्ति चास्य, लुठितो भूत्वा स धूलौ प्रभुः
स्वानन्दं प्रकटं तथा स्म कुरुते, क्रीडाञ्च कुर्वन् बभौ।
कालिन्दीकमनीयनीलकमलश्यामोदकेऽतिक्षणं,
हुङ्कारं सुमनाः प्रदाय च पुनर्गौरो बहिर्निस्सृतः-।। ४५२ ।।

क्लिन्नैरेव तथाम्बरैः सहृदयः कुर्वन् पुनः कीर्तनं
नृत्यन्नस्ति, च मन्त्रमुग्धसदृशा नृत्यं प्रभोरद्भुतम्।

दृष्ट्वा श्रीमथुरानिवासिजनता ते दर्शनार्थिव्रजाः
पश्यन्तो निखिला निमेषरहिताः सन्ति प्रति श्रीप्रभुम्।। ४५३।।

योऽप्यायाति स एव तु प्रभुमहो ! श्रीकृष्ण-कृष्णोक्तितो
दृष्ट्वैवाऽत्र करोति कीर्तन,मभूत्स्थाने सहस्रं नृणाम्।
सम्मर्दो ननु पुञ्जितः, प्रभुरयं विस्मृत्य देहस्मृतिं
ह्युन्मत्तश्च ननर्त (सौहृदभराद् देहप्रतीतिक्षयः) ।। ४५४।।

तस्मिन्नेव तथाक्षणे सहृदयः स्थाने ददर्श प्रभुः
सम्मर्दे सह वैष्णवोऽस्ति तु बहु प्रेम्णैकविप्रस्तथा।
कुर्वन् कीर्तनमत्र, तस्य हि तनौ भावाः सहैवाखिलाः
स्थाने स्म ह्युदयन्ति सत्त्वजनिताः (सत्त्वात्मको वैष्णवः)।। ४५५।।

तस्याद्भुतं प्रेम विलोक्य चैतत्
प्रभुः प्रसन्नोऽतिशयं बभूव।
तथा करं तस्य ननर्त धृत्वा
(ह्येकाकिनृत्यात्सहनृत्यमच्छम्) ।। ४५६।।

संकीर्तने पृच्छति तं समाप्ते
द्विजं 'महाभाग !' महाप्रभुस्तु।

'अदोऽद्भुतप्रेमनिधिर्निमायी
कुतोऽत्र लब्धो भवतो महात्मन् !'।। ४५७।।

ऊचे दीनतया द्विजस्त्वतिशयं 'प्रेमावतारो महा-
राजो मान्यवरो ममोपरि कृपां श्रीमाधवेन्द्रः पुरी ।
कृत्वा मय्यमदान्निमायिसुमनाः सन्मन्त्रदीक्षां प्रभो !,
मद्दीक्षागुरुरस्ति स त्वथ (यथा सोपान,माप्तिस्तथा)।।४५८ ।।

यत्किञ्चित्त्वपि लक्ष्यते मयि प्रेमश्रीर्भवतो निमायिनः।
सा तस्यैव सतः कृपाफलं (क्षीराब्धेरमृतांशुसम्भवः)।। ४५९।।

श्रुत्वैवैष महाप्रभुर्यतिपुरीश्रीमाधवेन्द्राऽभिधां
पादे तस्य पपात तु द्विजपते,र्भूयश्च भूयस्तथा।
चक्रे तन्नमनं, परं स भयतोऽद्धा कम्पमानोऽवदत्-
'स्वामिन्!कीदृशमेतदत्र कुरुते स्थाने ह्यनर्थं भवान्।। ४६०।।

संन्यासी मयि पापमर्पयति भो! भूत्वा, तु पूज्यो भवान्
वन्द्यो मेऽस्ति च माननीयपुरुषः, संन्यासितः साम्प्रतम्।
सर्वेषामलमस्त्यथाश्रमगुरुः, स्पृष्ट्वा ततो मत्पदे
स्वामिन्मामघभागिनं न कुरुता-' (मंहो ह्यनौचित्यतः)।। ४६१।।

ऊचे गद्गदकण्ठतः प्रभुरसा'वासन्तु बोधन्नहं
स्थाने विप्रवर ! प्रियोत्तमगुरुश्रीमाधवेन्द्रस्य तु।
लोकेष्वेव हि शक्यतेऽत्र भवितुं प्रेमेदृशं, विद्यते
भक्तेरुद्गमनस्थलं स भगवान् वै माधवेन्द्रः पुरी।। ४६२।।

तच्छीश्रीयुतमाधवेन्द्रकपुरीशिष्यस्य शिष्योऽस्म्यहं,
तस्मान्मे गुरुसन्निभो ननु भवाँ'ल्लब्ध्वा प्रमाणं प्रभोः।
सन्तोषः परमोऽभवत्सुमनसो विप्रस्य तस्या,ऽऽत्मनो
निन्ये गेहमथ प्रभुं स (हि गृही गेहं सता पावयेत्)।। ४६३।।

गत्वा कारयति स्म तत्र च गृही भिक्षां प्रभोर्ब्राह्मणः
सत्कारं कृतवांस्तथाह्यतिशयं, सेवां यथाशक्ति सः।
कुर्वन् देहमनोधनैः सुमनसोऽद्धाऽभून्निमायिप्रभोः
(सत्सेवापरता निमायिमनसः संसारिणस्त्वर्थता) ।। ४६४ ।।

सङ्गे विप्रमसौ विधृत्य सुमनास्तीर्थेषु गौरप्रभु-
श्चक्रे स्नानमथाऽखिलेषु यमुनानद्याश्चतुर्विंशतौ-।
वैकुण्ठर्षि-दशाश्वमेध - वटकस्वामि - प्रयाग - ध्रुव-
श्रीगुह्येष्वधिरूढतिन्दुककयोर्गोकर्णकाऽकूटयोः- ।। ४६५ ।।

तद्रङ्गस्थलमञ्चकस्थलकयोः सूर्येऽसिकुण्डे तथा
च स्थाने क्रतुकर्मणां, कनखले बोधेऽथ मोक्षे पुनः।
कुब्जाकूपपदेऽविमुक्तपदकेऽद्धा मल्लयुद्धस्थले
कूपे चाऽथ चतुःसमुद्रपदके, श्रीकृष्णगङ्गास्थले।। ४६६ ।।

गोकर्णभूतेश्वरदीर्घविष्णु-
स्वयंभुवां तीर्थविशेषधाम्नाम्।
विश्रामघाटस्य महासुविद्या-
तीर्थस्य चक्रेऽथ सुदर्शनं च ।। ४६७ ।।

सम्प्रत्ययं द्वादशकाननाना-
मेव प्रभुः श्रीव्रजमण्डलस्य।
चक्रे निमायी स्फुटमीक्षणेच्छां
(तपस्विनोऽस्यां भुवि काननेच्छाः)।। ४६८ ।।

तच्च भवान् वनयात्राऽर्थं तु चचाल निमायी।
तद्द्विजसङ्गसहायो- (ऽत्यन्तमुदोऽपरसङ्गात्) ।। ४६९ ।।

●●

श्रीवृन्दावनादितीर्थानां दर्शनम्

"क्वचिद् भृङ्गीगीतं क्वचिदनिलभङ्गीशिशिरता
क्वचिद् वल्लीलास्यं क्वचिदमलमल्लीपरिमलः।
क्वचिद्धाराशाली करकफलपालीरसभरो,
हृषीकाणां वृन्दं प्रमदयति वृन्दावनमहो !"
(विदग्धमाधवनाटक - १/२९)

१७. वृन्दाकाननवातावरणं प्रमदयतीन्द्रियवृन्दम्।
क्वचन मधुरभृङ्गीगुञ्जनमिह कर्णप्रीतिं यच्छति
यमुनानिलभङ्गीशीतलताकायं सुखयत्यपरम्।
क्वचिदिह विविधं वल्लीलास्यं मोहयतीक्षणमधिकम्
क्वचनाऽमलमल्लीपरिमलितः पवनो नासां मदयति।
क्वचन कटकफलरसभरधारा प्रीणात्यन्तं रसनाम्
प्रियपदरमणं वृन्दाविपिनं भुवि केवलमानन्दम्।।

संपश्यन्मथुरापुरान्मधुवनं तालं च पान्थो वनं
चैतन्यो बहुलावनादि कुमुदं गौरो वनानि प्रभुः।
मार्गेऽनेकसुतीर्थकुण्डनिवहे स्नानं निमायी तथा
कुर्वन्नाचमनं पुनर्भगवतो मुख्यां तु लीलास्थलीम्-।।४७० ।।

श्रीवृन्दावनभूमिमापयति स त्रैलोक्यसत्पावनीं,
तद्वृन्दाविपिने निमायिसुमनास्त्वेव प्रवेशात्प्रभुः।
भावावेशगतोऽवनौ तु पतितोऽद्धा मूर्च्छितो, मत्तवत्
पश्यत्येष ततस्त्वितश्च परितो विस्फार्य तच्चक्षुषी-।।४७१।।

दृष्टं तेन- कदम्बवृक्षततयः कुत्रापि तु प्रस्थिता
विद्यन्ते, च करीरवृक्षनिवहे तस्य प्रसूनं तथा।
रक्तं रक्तमथास्ति तत्र लगितं, गावश्चरन्तीह च
क्वापि, क्वापि तु कुर्वते किलकिला-रावं व्रजस्यार्भकाः।।४७२।।

नृत्यन्तीह च बर्हिणः क्वचन, तु क्वापीह हंसास्तथा
कालज्ञा जलपक्षिणश्च रसिकाः कोकाः प्रयान्ति द्रुतम्।
कालिन्दीतटमुन्मुखा ननु पुनश्चोड्डीय चोड्डीय ते,
नेत्रे प्रेमदृशैष पश्यति तथा विस्फार्य सर्वोन्मुखम्।। ४७३ ।।

उत्थाय द्रुतमालिलिङ्ग सुमना वृक्षान् कदापि प्रभु,-
स्तेभ्यः पुष्पभरः स्तृणाति पतितो भूयः पदाब्जे प्रभोः।
मन्ये स्वप्रियपादयोः सहृदयाः श्रद्धाञ्जलेः पादपाः
स्थाने पुष्पमिवार्पयेयुरधुना (स्वीयोऽर्चनीयोऽतिथिः)।। ४७४ ।।

पूर्वज्ञातसमो दधाव सुमना गौरप्रभुर्गाः प्रति
स्थाने घूर्णयति स्म कोमलकरं तासाञ्च पृष्ठे निजम्।
उत्थाप्य प्रभुमुन्मुखाः सुरभयश्चोत्थाप्य पुच्छं तथा
धावन्ति स्म निमायिसौहृदयतिं रम्भारवेणान्विताः-।। ४७५ ।।

हस्तौ तस्य तथा लिहन्ति चरणा,वागत्य पार्श्वे प्रभो-
रागत्य व्रजपक्षिणस्त्वतिशयं जल्पन्ति किञ्चित्तथा।
स्वस्वोक्तौ, प्रभुरेष चालयति कं श्रुत्वा तदीया गिरः
प्रेमाक्ता (रसभावनाविषयता साधारणीव्यापृतेः)।। ४७६ ।।

सङ्केतेन तदुत्तरं सहृदयो दत्ते स बुद्ध्वा ध्रुवं
तद्वाचो, विधिनाऽमुना प्रभुमुदः सीमाऽद्य नो विद्यते।
वार्तामागत एव सर्वविषयामेषोऽत्र वृन्दावने
व्यस्मार्षी,च्च पृथक् कृतो ननु झषो नीराद्यथाह्यर्पितः-।।४७७।।

भूयोऽब्धौ विपुले, करोति परमानन्दानुभूतिं, तथा
चैतन्यो रजसि व्रजस्य सुमनाः पूते लुठित्वाऽन्वभूत्।
श्रीकृष्णप्रियभावकोऽत्र परमानन्दस्वरूपं सुखं
(चेतःकाङ्क्षितलब्धितो हृदि सुखं, किन्त्वस्ति काङ्क्षान्तरम्)।। ४७८ ।।

गत्वेतो व्रजमण्डलस्य सुमनाः प्रायोऽखिलानां कृतं
तीर्थानामभिदर्शनं, सुमनसः काले निमायिप्रभोः।
अत्रासीद् वनमेव सत्यमवनौ श्रीकृष्णवृन्दावनं-
(वृन्दा-नाम-वनं हि भक्तिविपिनं वंशीविहारिस्थलम्)।।४७९।।

विप्राणां दश विंशतिस्तु, कुट्यो गोपालकानां तथाऽऽ-
स,न्नो काननमेव काननमभूत्सर्वत्र काले तदा।
अत्यन्तं ननु भावुकः सहृदयो भक्तस्तथा दर्शनं
कर्तुं ह्यापयति स्म चात्र, मथुरां कृत्वा परावर्तत।। ४८० ।।

तीर्थानि व्रजमण्डलस्य हि तथा कुण्डान्यजायन्त तु
प्रायो लोपमितानि चाधिकतया, नामापि तेषां जनाः।
नाजानंस्तु, यदा स्वभक्तसहितो गौरप्रभुः कीर्तनं
संन्यासग्रहणाच्च पूर्वमकरोद् द्वीपे वसन्नेव सः ।। ४८१ ।।

लुप्तानि व्रजमण्डलस्य सुमनास्तीर्थानि कर्तुं स्फुटं
गोस्वामिप्रियलोकनाथमपरं भूगर्भसत्पण्डितम्।
जीर्णोद्धारमथ प्रभुः सहृदयस्तेषां विधातुं तथा
काले प्रेषितवांस्तदैव सुहृदौ श्रीकृष्णवृन्दावनम् ।। ४८२ ।।

संन्यासित्ववचो यदा सुमनसो गौरस्य ताभ्यां श्रुतं,
तर्हीमौ प्रभुदर्शनाभिलषितौ हित्वा तु वृन्दावनम्।
आस्तां सञ्चलितौ हि दक्षिणमुखं, तेनाऽद्य वृन्दावने
प्राप्तस्यापि बभूव नो सुमनसस्ताभ्यां प्रभोः सङ्गमः।।४८३ ।।

चक्रे ननु लुप्तं तीर्थं कतिचित्सः।
स्थाने प्रकटं श्रीगौरः स्वयमेव ।। ४८४ ।।

यत्स्थाने हतवांस्तथाहि भगवान् कृष्णो ह्यरिष्टासुरं,
ग्रामस्तत्र तु विद्यते व्रजभुवि ह्यारिष्ठनामाऽपरः।
गत्वा तत्र महाप्रभुर्जनभरं पप्रच्छ 'चैतत्स्थले
राधाकुण्डनिरूपणं तु मिलति स्थाने पुराणेष्वहो !-।। ४८५ ।।

राधाकुण्डमथाऽस्ति कुत्र ननु त'न्न ग्रामवासी जनोऽ-
दःप्रश्नोत्तरमस्य दातुमशकद् गौरप्रभो,स्तेषु नो।
राधाकुण्डनिकेतने परिचितः कश्चिच्च सङ्गी प्रभोः
राधाकुण्डपदप्रतीतिरहितो विप्रोऽपि, तत्स स्वयम्-।। ४८६ ।।

भूत्वा ध्यानरतो विवेद सुमना राधाककुण्डं प्रभुः,
केदारद्वयमध्यसंभृतजले प्रस्नाय चाल्पे भवान्।
राधाकुण्डमहत्त्ववर्णनमहो ! चक्रे, तदेव स्थलं
राधाकुण्डपदेन तेन दिवसेनैव प्रसिद्धिं गतम् ।। ४८७ ।।

कृत्वा स प्रकटं निमायिसुमना राधाककुण्डं प्रभुः
सम्प्राप्तः सुमनःसरोवरमथ, स्थानेऽत्र दृष्ट्वाऽभवत्।

श्रीगोवर्धनपर्वतं पुलकितो, भूमौ विलुठ्यानमत्
साष्टाङ्गं गिरिराजमेष (गिरयः सर्वंसहाभूधराः)।। ४८८ ।।

तस्य श्लेषयति स्म तन्निजहृदाऽल्पाल्पा गृहीत्वा शिलाः,
श्रीगोवर्धनपर्वतो भगवतोऽभिन्नोऽस्त्ययं विग्रहः।
निर्दिष्टो वपुरेव तद्भगवतः कृष्णस्य शास्त्रेष्वसौ
('गोमध्येऽस्मि वसामि' चेति वचनात्कृष्णस्तु गोवर्धनः)।।४८९।।

गोवर्धने श्रीहरिदेवदर्शनं

चक्रे निमायी स्नपनं पुनः प्रभुः।
स ब्रह्मकुण्डे च विधाय साम्प्रतं
तत्रैव भिक्षां कृतवान् यतीश्वरः ।। ४९० ।।

तद्गोवर्धनपर्वतोपरि तथा गोपालजीमन्दिरं
तत्कालेऽस्ति, चकार यत्प्रकटनं श्रीमाधवेन्द्रः पुरी।
तत्संदर्शनकस्पृहा सुमनसोऽस्याऽभूत्तु नैषीत्परं
चैतन्यो गिरिराजकोपरि तथाऽध्यारोढुमेव प्रभुः ।। ४९१ ।।

'कस्मादस्तु निमायिबालभगवद्गोपालजीदर्शनं'
चैतन्योऽस्ति स चिन्तयं,स्तु भगवान् सर्वान्तरात्मा ह्यवेत्।
भक्तस्येप्सितमात्मनो,ऽस्ति स परं भावक्षुधः सर्वदा
(कश्चिद्वस्तु, परः क्रियां, तु भगवान् भावं परं काङ्क्षति)।।४९२।।

भक्तानामिह हस्तयोस्तु स विना विक्रीयते काकिणी-
मूल्येनैव, गिरेरधोऽवतरणं स्थाने पुनः किं वचः ?।
तत्काले त्वभवत्स्थितिर्भगवतो गोपालकस्यास्थिरा,
भ्राम्यन् संततमेव चास्ति यवनोत्पातैरितस्तत्र सः।। ४९३ ।।

कुञ्जे क्वापि कदापि तस्य भवति त्वेवार्चनं, कर्हिचिद्
ग्रामे त्वेव विराजते क्वचन वै, गोपालकृष्णः सखा।
स त्वस्ति व्रजवासिनां, तु परमात्मा वाऽथ भावीश्वरो,
भावी शङ्करवेधसोरथकृते वा वल्लभायाः श्रियः।। ४९४ ।।

प्राचीनः 'कनुआ' स एव नियतोऽसौ वर्तते तु व्रजे,
यर्ह्यस्ति व्रजवासिनां तु यवनेभ्यो भीस्तदाऽस्यापि वै।

भव्या,ऽतो व्रजवासिनस्त्वकुटिला गोपालबाला व्रजे
गोपालं निजसङ्ग एव दधिरे तत्रैव, यत्राप्यगुः ।। ४६५ ।।

मूर्तीस्तेषु दिनेषु तुर्कपृतनैका ध्वंसयन्ती तथाऽऽ-
याताऽऽ-सीद्, व्रजवासिराजतनया ग्रामाऽन्नकूटाद् भयात्।
अस्मादेव तथाह्यनेषत निजं ग्रामे तु गोपालकं
गाठौलीपदके (तथाप्रियमहो ! ग्रन्थौ स्थले बध्यते)।। ४६६ ।।

ते चत्वारि दिनानि पञ्च च तथा तत्रैव सेवार्चनं
कुर्वन्तस्त्वभवन् हि तस्य निभृतं, ग्रामस्त्वसौ विद्यते।
गाठौली गिरिराजपर्वततले, शुश्राव गौरो यदा-
साक्षाद्दर्शनदत्तये तु भगवान्मन्ये ममैवाऽधुना- ।। ४६७ ।।

गोपालस्तु गिरेरधः सहृदयः स्थानेऽवतीर्य प्रभु-
र्गाठौलीपदके विराजति, तदाऽऽनन्दस्य सीमा प्रभोः।
न त्वासी,त्सुमनाः परिक्रममथाऽऽरेभे प्रभुर्मानसी-
गङ्गास्नानमसौ विधाय च गिरेर्गोवर्धनस्योषसि ।। ४६८ ।।

सप्तक्रोशपरिक्रमां कथयते गोवर्धनाद्रेर्जनः,
प्रारब्धा च परिक्रमा भवति यत्स्थानात्समाप्तिं जनाः।
तस्मिन्नेव तु कुर्वते, च बहवो लोका नतिं दण्डवत्
कुर्वन्तस्तु परिक्रमां हि निखिलां कुर्वन्ति (भक्तिर्नतिः)।।४६९।।

सम्पूर्णां च परिक्रमां प्रभुरपि श्रीपर्वतस्याकरोद्,
भट्टाचार्यबलो महाप्रभुयतेरास्ताञ्च सङ्गे तथा।
साधुः स द्विजको, निमायिहृदयावेतौ तु भृत्यावपि,
स्थाने सम्प्रति चापिपंश्च निखिला गोविन्दकुण्डे तथा।। ५००।।

गाठौलीस्थलके निशम्य च ततो गोपालकस्यागतिं
तत्राप्ताः प्रभुको विलोक्य सुमना मूर्तिं मनोमोहिनीम्।
गोपालस्य विमुग्धतां ननु गतः, स प्रेम्ण्यचेतास्तथा
भूत्वा नृत्यपरोऽभवत्सहृदयो गोपालजीसम्मुखे ।। ५०१ ।।

कुर्वंश्च स्तुतिमस्ति तस्य सुमना गोपालकस्तोत्रकै,-
र्गोपालस्य तथाहि दर्शनसुखं ग्रामेऽत्र गाठौलके।

स्थित्वा त्रीणि दिनानि तु प्रभुरहो ! स्थाने दधानोऽभवत्
(लब्धुं सत्सुखमेव मानवतनुर्नेत्रादिकद्वारतः) ।। ५०२ ।।

अस्यानन्तरमेष पावनसरो नन्दीश्वरो गोकुलं
खेलातीर्थमहावने सहृदयोऽसौ शेषशायी तथा।
लक्ष्मीभद्रवने च लौहवनकं भाण्डीरकाख्यं वनं
चेत्यादिप्रियबालकृष्णभगवल्लीलास्थलीदर्शनम्- ।। ५०३।।

कुर्वाणः पुनरागतश्च मथुरां, सेवां प्रभोर्ब्राह्मण-
श्चक्रेऽत्यन्त,मतस्तु तस्य च गृहे तुष्टः स भूत्वाऽवसत्।
सम्मर्दं नगरस्य तत्र सुमना दृष्ट्वा स बुद्ध्वा रहः
श्रीवृन्दामथुरान्तरे सहृदयश्चाक्रूरघाटेऽवसत् ।। ५०४ ।।

चक्रे सम्प्रति पुण्यतीर्थमिलनं गत्वाऽथ वृन्दावनं
तत्स्थानात्क्रमशो निमायिसुमनाः, प्रस्कन्दनक्षेत्रकम्।
केशीतीर्थमथ प्रभुः सहृदयो गौरोऽथ रासस्थलीं
तत्कालीहृदमेष (तत्स्थलमिदं) च द्वादशादित्यकम्-।। ५०५ ।।

एवाऽऽप्तः सुमना निवृत्य च पुनः सोऽक्रूरतीर्थे प्रभुः
सायञ्छीप्रभुदर्शनाय बहवस्तत्रापि लोकाः पुनः।
आयान्तस्त्वभवन्निमायिहृदया यान्तस्तथा,ऽतो भवान्
वृन्दाया यमुनातटेऽथ रहसि स्थाने स्थितः कीर्तनम्-।।५०६।।

कुर्वन् बभौ भगवत,स्त्वथ कृष्णदास-
स्तत्रैव नाम भुजजो ननु राजपुत्रः।
एको बभूव शरणेऽस्य, विहाय गेह-
द्वारं ह्युवास स तथा प्रभुणैव सार्धम्।। ५०७ ।।

एकस्मिन् दिवसे बभूव विरवः सम्पूर्णवृन्दावने
'श्रीकृष्णः पुनरेव सम्प्रति समुद्भूतोऽत्र वृन्दावने।
नृत्यं सोऽथ करोति कालियफणे कालीदहे, काशते
स्पष्टं कालियनागमस्तकमणि'-(र्लिङ्गेन वस्तु स्फुटम्)।।५०८।।

श्रुत्वेदं वचनं जनास्तु बहवः पार्श्वे प्रभोरागताः
प्रष्टुं - सत्यमिदं वचोऽस्ति ननु किं ? 'गत्वा भवानेन वै।
स्थाने पश्यतु, सत्यमस्ति ननु वाऽसत्यं' जगाद् प्रभुः
(प्रत्यक्षे विषये भवे कथमिहाऽपेक्षाऽऽप्तवाचो भवेत्?)।।५०९।।

प्राप्तस्तत्र जनोऽधिको निशि तथा गत्वाऽथ कालीदहे,
सत्यं तत्र तथैककृष्णपुरुषश्चासीत्स्थितो, दूरतः।
दीव्यन्नेकमणिर्यथा च ददृशे, लोकाः सरन्तोऽभव-
न्नग्रे तन्मुखमेव कौतुकतयाऽऽनन्देन सार्धं तथा।। ५१० ।।

चक्रे तु प्रकटां समक्षभगवत्कृष्णेक्षणस्य स्पृहां
भट्टाचार्यबलोऽपि च प्रभुपुरो गत्वाऽथ कालीदहम्।
प्रेम्णैकं लघुकं तु तस्य चपटं यच्छन् कपोले प्रभु-
र्ब्रूते 'लोकगतिस्तु मेषसदृशी (मूढो हि मेषायते)।। ५११।।

एकाऽन्धावुरणी पतिष्यति, तदा तत्पृष्ठ एवोरणी
सर्वाऽन्धौ पतिता स्वयं, भगवतः काले कलावत्र वै।
प्रत्यक्षं, भुवि दर्शनं, ननु वचः किञ्चित्तु साधारणं-
यत्सर्वस्य निमायिनो भगवतः साक्षाद् भवेद् दर्शनम्।। ५१२।।

कश्चित्कोटिषु मानवेषु भवति स्थाने तथा भाग्यवा-
नेको द्वौ पुरुषोऽत्र, यस्य भगवत्स्वेच्छानुकम्पावशात्।
सौभाग्यं स्फुटदर्शनस्य मिलितं स्यात्तन्निमाय्यात्मनो
(नानारूपतयाऽत्र भाति भगवान्, स्पष्टस्वरूपः क्वचित्)।।५१३।।

स्थित्वाऽत्रैव कुरु प्रभोर्भगवतो नाम्नो जपं, तत्र का
वार्ताऽऽसी,दुषसि प्रपृच्छ जनतां' तत्याज भद्रो बलः।
रात्रौ स प्रभुबोधितः स्वगमनाकाङ्क्षाञ्च कालीदहे
(संसारो दिवसेऽपि कालियसरो, वाच्यः स रात्रौ तु किम्?)।।५१४।।

सम्मर्दोऽत्र जनस्य चापयति तत्स्थाने, जनैरीक्षितं-
तत्रैको ननु कृष्णवर्णतरणीवाहो निधायोडुपे।
दीपं वै विदधाति मीनमृगयां, वंशी तदीये करे
चासीन्मीननिबन्धनस्य (तनुभृद्बन्धोऽत्र नानाविधः)।। ५१५।।

लोकभ्रमो ह्यपगतो, जनता यदाऽऽप्ता
प्रातर्निमायिसुमनःप्रभुदर्शनार्थम्।
पप्रच्छ तर्हि निखिलान् प्रभुगौरकृष्णः
'किं कृष्णदर्शनमभूद्भवतां समेषाम् ?'।। ५१६।।

तेजस्विवृद्धसुमनाः प्रभुमाह चैको
वृत्तं समस्त,मथ 'तत्र तु दर्शनं नो।
तज्जातमेव, नियतं भगवन्निमायि-
प्रत्यक्षदर्शनमभूदिह' चोक्तमन्ते ।। ५१७।।

पश्यञ्जगाद परितः प्रभुगौरचन्द्रः
'कुत्रेह चास्ति भगवा,नपि मे पिपासोः।
संदर्शनं भगवतो ननु कारयन्तु,
ह्यत्यन्तमस्मि भगवल्लभनार्थमुत्कः'।। ५१८।।

कुर्वाणः स निमायिकप्रभुमुखं सङ्केतमाह द्विजोऽ-
सावेवात्र पुरः स्थितोऽस्ति तु हरिः संन्यासिछद्माऽऽकृतौ'।
श्रुत्वैवेदमथ प्रभुर्द्विजपतेर्वृद्धस्य तस्याऽग्रही-
त्पादौ चैष रुदन् रुदन् कथयति (प्रेम्णोऽपरं रोदनम्)।।५१९।।

'निष्ठेयं तु महानुभाव ! भवतो धन्याऽद्भुता विद्यते,
प्रत्यक्षं भवतोऽभवद् भगवतोऽवश्यन्तु संदर्शनम्।
तर्ह्येवात्र चराचरे तु धरते विश्वे भवान् भावनां
स्पष्टं भागवतीं (करोति भगवद्भावो ह्युदारं जनम्)।।५२० ।।

भक्तस्य त्वमलस्य नो भगवतः स्वस्यातिरिक्तं परं
किञ्चिद् भासत एव रूपमवनौ, सर्वत्र वै जायते।
तस्य स्वप्रियदर्शनं' प्रभुरसावेवञ्च नानाविधं
कृत्वा तद्द्विजकस्तुतिं विसृजति स्थाने तदीये तु तम्।।५२१ ।।

श्रीवृन्दाविपिने निवृत्य दिवसे स्नानान्निमायी जपाद्
गौरोऽक्रूरकतीर्थ एव कुरुते स्माऽऽगत्य भिक्षां प्रभुः।
विप्रा ग्रामगता द्विजातिजनता चान्या प्रभोराग्रहं
भिक्षार्थं खलु नित्यमेव कुरुते (साधुप्रियः सज्जनः)।। ५२२ ।।

क्वापि क्वापि निमन्त्रणं दश दशाऽऽयातं सहैव प्रभो-
र्हेतौ सम्प्रति पञ्च पञ्च तु नृणां (स्थाने भवत्याग्रहः)।
आसीत्तत्र दशा महाप्रभुयतेः स्थाने विचित्रा, स्मृति-
स्त्वायाताऽपि यदाऽस्य तस्य वचसोऽत्रैव स्थले यामुने-।।५२३।।

'अक्रूरस्य निमज्जतस्तु भगवत्साक्षात्क्रियाऽजायता'ऽ-
कूर्दिष्ट द्रुतमेव तर्हि यमुनामध्ये निमायी भवान्।
विस्मृत्य स्वतनोश्च बोधममनास्तीक्ष्णे प्रवाहे तथाऽ-
चेताः सन् यमुनान्तरे स्म वहते-(ऽचेताः प्रमाता स्थले) ।।५२४।।

एतस्मात्प्रभुरक्षणं तु महता दाक्ष्येण कार्यं ह्यभूद्
भट्टाचार्यबलस्य, तद्द्विजपतेर्हेतोरतः सम्मतिम्।
लब्ध्वा भट्टबलस्तथाहि चलितुं धृत्वा निवर्त्य प्रभुं
चक्रे निश्चयमेष (रक्षणभरः साधोस्तपस्याऽपरा)।। ५२५ ।।

चक्रेऽसौ च निवेदनं प्रभुपुरः 'स्थाने विशेषं प्रभो!
सम्प्रत्यत्र रहो न तिष्ठति, तथा चाऽऽयाति भूयोऽधिकम्।
हे चैतन्य ! पुनर्निमन्त्रणमपि, स्थाने विचित्रैव हेऽ-
वस्थाऽप्यत्र तु जायतेऽथ भवतो-(ऽवस्थानुसारं स्थितिः) ।।५२६।।

मत्प्रार्थना तदधुना चलितव्यमस्मा-
न्माघाऽर्कमाकरगतिस्त्वपि सन्निकर्षे
अस्मत्क्षणाद्यदि चलिष्यति, तत्प्रयागे
कर्तुं क्षमस्तु भविता मकराभिषेकम्।। ५२७ ।।

सम्प्रत्याज्ञा । यादृश्यस्तु' ।। ५२८ ।।

'भट्टाचार्य ! महाशय !' प्रभुरतिप्रेम्णा 'तवैवा'ऽवदत्
'सम्पूर्णाः कृपया स्वकृष्णभगवच्छीपुण्यलीलास्थलीः।
शक्तो द्रष्टुमहं, त्वमेव भुवि मे वृन्दावनस्येक्षणं
संकार्याऽकुरुथास्तु सार्थकमहोऽदोजन्म मे प्राणिनः-।।५२९।।

तवैव तस्मादयमस्ति देहो,
नेतुं त्वमिच्छेरमुमेव यत्र।
नयस्व तत्रैव, न भाविनी मे
ह्यापत्तिरस्मिन्नपि किञ्चिदात्मन्।'।। ५३० ।।

लब्ध्वा सम्मतिमस्य गौरसुहृदस्त्वत्यन्तमेवाऽभव-
न्मोदः सर्वजनस्य, च प्रभुकृपापात्रं स राजात्मजः।
क्षत्रो ब्राह्मणसाधुमाथुरजनोऽमू द्वावपि प्रस्तुतौ
जातौ तत्प्रभुसङ्ग एव चलितुं (हेयो न सङ्गः सतः)।।५३१ ।।

सार्धं भट्टबलेन ते च मथुरां चत्वार एवाऽऽगमन्,
कालिन्दीजलगामतीत्य च ततश्चेलुः प्रयागोन्मुखाः।
श्रीकृष्णव्रजपावनावनिपरित्यागं प्रभोः कुर्वतोऽ-
पारं दुःखमभू,त्स शोकविकलो भूत्वा पपात क्षितौ।। ५३२ ।।

चाऽभूदचेतनदशः पतितोऽतिकालं,
केनापि येन विधिना मिलितास्त्रयस्ते।
चक्रुः प्रभुं सहृदयं त्वथ सावधानं
सङ्गे निधाय निखिलाश्चलितास्तमग्रे।। ५३३ ।।

●●

पठानेभ्यः प्रेमदानं तथा प्रयागे प्रत्यागमनम्

१८. धर्मो द्विविधो वस्तूनामिह।
सिद्धः साध्य,स्तत्र प्रथमो जातिगुणात्मा द्विविधः
जातिर्वस्तुप्राणदरूपा, गुणो विभेदकहेतुः।
सिद्धे धर्मे जातिगुणत्वे, त्वन्तरमिह कलनीयम्-
पाकरञ्जनद्वारा गुणता क्वचिदपसरति, न जातिः।
मलयाचलचन्दनमध्यस्थितमिन्धनमपि चन्दनवत्
सज्जनसङ्गतिसतताऽऽसक्त्या दुर्गुणतासु सुगुणता।।

चैतन्योऽयमनिच्छयाऽस्ति यमुनामुत्तीर्य गौरश्चल,-
च्छीवृन्दावनपुण्यभूपरिहृतावस्याऽस्ति कष्टं भवत्।
अत्यन्तं, प्रभुसङ्गिनः सहृदया धृत्वा च भट्टादय-
स्तं यान्ति स्म (हि सङ्गिनः समहृदः स्युः प्रेमिणो यात्रिणः)।।५३४।।

शक्तः सम्प्रति सोऽधिकं न चलितुं गौर,स्ततः सङ्गिभिः
स्वैः सार्धं घनसुन्दरस्य स तरोरेकस्य चाऽऽस्त प्रभुः।
छायायां, चरति स्म गौः कतिपया तत्रैव पार्श्वे तथा,
विश्रामं विदधद् बभूव सुमना यत्र ह्युपास्य प्रभुः।। ५३५।।

सुन्दर्यो व्रजमण्डलस्य सरला गावोऽधुनापि स्मृतिं
गोपालस्य निजस्य तत्र चपलप्रेमप्रकृत्याकृतेः।
तत्प्रेयोहृदि कारयन्ति, परितश्चासंश्चलन्त्यस्तथा
गावः सन्ति परस्परं विहरणे बालाश्च गोचारकाः।। ५३६।।

अस्ति श्रीव्रजमण्डलस्य परिधिः क्रोशास्त्वशीतिस्तथा
चत्वारो,ऽस्ति तथाह्यदश्चतुरशीतिक्रोशवाण्यां कियत्-।
माधुर्यं, कियती पुनः सरलताऽद्धा निश्छलत्वं कियत्,
तज्ज्ञातुं प्रभवेत्तथाहृदयवान् सल्लोक एव क्षितौ ।। ५३७।।

न ग्रामे व्रजमण्डले जवनिकाबन्धो विशेषस्तथा,ऽ-
न्योन्यं स्त्रीपुरुषा विना परिचयं क्रीडन्ति होलीमहम्।
भावान्निष्कपटाद् दिनेषु सुहृदोऽहो ! होलिकायाः, क्षितौ
कोऽप्यस्त्येव तु नो विकाररहितः प्रायो-(ऽविकाराल्लयः)।। ५३८।।

भावस्तु व्रजमण्डले भुवि परस्थानाद् विकारी परं
न्यूनोऽस्ति, व्रजमण्डले तु कथनं 'सारे'ऽस्ति साधारणी।
वार्तैकेव, न बुध्यते सहृदयैः 'सारे' तु गालिर्व्रजे,
प्रायोऽत्र प्रतिभाषणे कथयते बालो हि 'सारे'ऽखिलः।।५३९।।

श्रीलीलापदमेव संततमहो ! कृष्णस्य बालानना-
दप्यत्र व्रजमण्डले श्रवणगं स्थाने भविष्यत्यलम्।
भाषन्ते 'रसिया-' पदं प्रियतमश्रीकृष्णलीलापरं
त्वत्यन्तं मनुजास्तथाप्यपठिता मिष्टस्वरेण व्रजे ।। ५४०।।

गीतेभ्यः स्रवति प्रियः सुमनसस्तेभ्यो रसः शृण्वतः,
श्रोता तत्र रसे तथाहि मधुरे मत्तो यथा जायते।
गायन्ति स्म च गीतमत्र मिलिता गोपालबालास्तथा
भागेऽन्यत्र विहाय सम्प्रति तु गा (गानप्रिया गोप्रियाः)।। ५४१।।

गायन्ति तथोत्थाप्योत्थाप्य च हस्तौ।
सञ्चाल्य कटिं ते सम्भूय तु सर्वे।। ५४२ ।।

१९. आप्तो लघुको नन्दकुमारस्त्विह कालियदहपुलिने।
कन्दुकखेलार्थं बालैः सह मधुरमनोहरमूर्तिः
संसृतिरखिला खेलामात्रं, तस्यामपि शिक्षार्थम्।
कन्दुकमिव गोलं भूवलयं, मण्डलमपि रविशशिनोः
खेलाधारो ज्योतीरसदौ गोला, गोलं लक्ष्यम्।
तच्चरणाघातात्कन्दुकमिह संपतितं ह्रदमध्ये
(अरररर) स तु कन्दुकसङ्गेनैवाऽकूर्दत दहरे (ह्रदे)।
दहरब्रह्मोपासनयैव स्वाप्तिः, श्रुतिनिर्देशः
दहरं-हृदयं, तन्मध्यस्वाप्त्यै सहसाधनसरणम्।
कालियकामगरलदूषितरसहृदयविशोधनहेतोः
अवतारणमन्तर्हृदि कृष्णस्याखिलखेलालक्ष्यम्।।

गायन्ति स्म निमायिनः कतिपये गोपालबालास्तथा,
तेष्वेको मुरलीं त्रिभङ्गललितस्थित्या स्थितो बालकः।
मध्ये वादयति स्म, चेष्टितमसौ निर्देशयन् सङ्गिनां
तानेनाऽथ सहैव शीर्षमभितः संभ्रामयंश्चात्मनः-।। ५४३।।

वंशीं वादयति स्म, मिष्टमुरलीतानं निमायिप्रभुः
शुश्राव व्रजमण्डलेऽथ विहरद्गोपालसङ्घोपरि।
तद्दृष्टिः पतिता, पुनस्तु किमलं, स प्रेम्णि सन् गद्गदो
व्यस्मार्षीत्स्वमथोत्पपात सहसोच्चैः (प्रेमभावोऽद्भुतः)।। ५४४।।

मेदिन्यां पतितो निमायिहृदयोऽसावुच्छलन्नुच्छलन्
भूत्वा सोऽलमचेतन,श्च समयेऽस्मिन्नेव तत्राऽऽगतः।
कश्चिद्राजसुतः स्वधर्मगुरुणा सार्धं तथा मुस्लिमः
संयुक्तो दश-विंशकैस्तुरगिभी (राजत्वभा सेनया)।। ५४५।।

कोऽप्येको ननु तेषु सादिषु तथाऽसंज्ञं ददर्श प्रभुं,
फेनो निस्सरति स्म च प्रभुमुखान्नेत्रे तदीये तथा।
आस्तामूर्ध्वमथोन्नते, प्रभुयतेरेवं विलोक्य स्थितिं
सादी स्वामिनमेष जल्पति वचोऽदः स्वं, ततः सादिनः-।।५४६ ।।

सर्वे शीघ्रमवातरन्निजनिजाऽश्वेभ्यस्तथाऽऽकर्षिता
दृष्ट्वाऽस्याद्भुतरूपसौभगयुतां दिव्यां प्रभोराकृतिम्।
जातास्तं प्रति सर्व एव तु हठा,त्तेषां समेषामभू-
दुत्पन्नं विषये महाप्रभुयतेः प्रेम प्रगाढं हृदि ।। ५४७ ।।

तैर्बुद्धं- -भविता तथाऽस्य किमपि द्रव्यन्तु संन्यासिनः
पार्श्वे, लालसयाऽस्य सङ्गिनिवहैस्तस्यैव दत्तोऽस्ति वै।
धत्तूरो'ऽथ तथा विचिन्त्य निखिलांस्तत्सादिनामग्रणी-
र्बध्नाति प्रभुसङ्गिनो ननु दृढं स्थाने ब्रुवाणोऽस्ति च-।।५४८।।

'अत्रैव समेषामेषां कुरु घातम्'।
(सङ्गी निजघाती नूनं वधपात्रम्)।। ५४९ ।।

भट्टाचार्यमहाशयस्तु सरलः श्रुत्वैव दोलायितो
वङ्गीयोऽत्र वधस्य नाम, सुहृदां वङ्गीयसाध्वात्मनाम्।
कामं विश्रुतमस्ति चैव शिथिलं धौतं, परस्मिन् पुन-
र्देशे साहसिनां नृणामवसरे वै भव्यभव्यात्मनाम्- ।। ५५० ।।

व्यामूढा ननु जायतेऽत्र पटुता,ऽसौ कम्पमानोऽभवद्
दीनो भट्टमहाशयो,ऽत्र विषये साधुद्विजो माथुरः।

कृत्वा साहसमाह सोऽथ 'कुरुते तु व्यर्थमेवाऽसितं
सन्देहं निखिलो भवानुपरि नो (द्रव्यं स्वचित्तं परम्)।।५५१ ।।

एतस्यैव निवासिनो ननु वयं स्थानस्य वर्तामहे,ऽ-
दःस्थानाधिपतेर्नयन्तु निकटे धृत्वा भवन्तस्तु नः।
अस्माकं बहवो हि सन्ति यजमानास्तत्र शिष्यास्तथा
ते सर्वे च विदन्ति नः (परिचितक्षेत्रप्रकाशे भयम्?)।। ५५२।।

कर्मैवं वयमत्र कर्तुमवनौ क्वापि क्षमा ?' नाऽभवत्
सन्तोषस्तु जनेषु तेषु वचनादस्माद्द्विजस्या,ऽधुना।
सङ्गी राजसुतो महाप्रभुयतेरासीत्तृतीयस्तथा
नाम्ना सोऽस्ति च कृष्णदासपदकः (क्षत्रो हि दासोऽपरः)।।५५३।।

आवेशस्त्वनयाऽऽगतो घटनयाऽस्त्रे कृष्णदासात्मनः
क्षात्रे, जल्पति गर्जनेन स समं 'तु ज्ञायते, साम्प्रतम्।
यूयं मां विविदाऽत्र नो, वयमहो ! स्मो राजपुत्रास्तु, नो
नित्यं योधनमेव कर्म भवति ह्यस्त्रं गृहीत्वा मृधे।। ५५४ ।।

दत्ते मया सम्प्रति तादृशे रवे,
योद्धा सहस्रं भविताऽत्र पुञ्जितः।
क्षणेन चैषां वचसां निजस्य वः
स्वादो दृढानां मिलितो भविष्यति'।। ५५५ ।।

पश्यन्तस्त्वभवन्ननेन वचसा चित्ते मनाक्सादिन-
स्ते स्वं पीरगुरुं प्रतीह निखिला भूत्वा च भीता यथा।
गाम्भीर्येण मनाक्समं कथयते शान्तस्वरे पीरजी-
(साधुर्धर्मगुरुश्च सिद्धपुरुषः सर्वत्र शान्तस्वरः) ।। ५५६ ।।

'इच्छामो वयमेतदत्र तु ज्ञातुं- स्वस्थतनुर्युवा तथा।
तेजस्वी किमियांश्च सुन्दरः संन्यासी पतितोऽस्ति मूर्च्छितः?'।।५५७।।

'एष गुरुर्न,श्चाऽस्य कदाचित्क्वापि मृगीकावृत्तिरुदेति।
सम्प्रति तस्या एव तु हेतोरस्ति तथाऽसंज्ञः पतितोऽसौ'।।५५८।।

एवेयद् वदति प्रभुः सहृदयोऽसौ कृष्णदासे क्षणे
तस्मिन्नेव तु चेतनात्वधरणादुत्थाय तस्थौ तथा।

उच्चैः प्रेम्णि ननर्त गद्गदहृदाऽद्धा, राजपुत्रस्तदाऽ-
पृच्छत्खाँबिजली- (यतिः सहृदयो लोके तथाह्यद्भुतः)।।५५९।।

'आसीत्सम्प्रति यावदत्र पतितः किं साधुबाबा! भवां-
श्चैतन्येन विना ?, प्रमादवशतोऽदःसङ्गिभि- (र्ज्ञायते)।
धत्तूरः परमाशितोऽस्ति भवत,स्तेनैव चासीद् भवां-
श्चैतन्येन विना (यतीश्वरशिवो धत्तूरसेवी स्वतः)।।५६०।।

निरीक्षतां रूप्यपणान्निजांस्तथा
वक्ता भवान् यच्च, स एव दास्यते।
दण्डस्त्वमीषामुचितो निमायिन-
स्ते सङ्गिनां मोहनभोजिनामिह' ।।५६१।।

सारल्येन तथाधिकेन सहितं तूचे प्रभु'र्भ्रातरः!
सन्त्येते मम सङ्गिनः सहृदया, देहः परस्त्वेव मे।
एषान्तु व्रजमण्डलस्य कृपया जातं समेषां हि मे
तीर्थानामवलोकनं सुमनसामत्राऽधुना सम्भवम् ।।५६२।।

संन्यासी ननु भिक्षुकोऽस्मि, विदधे नो कामिनीकाञ्चन-
स्पर्शं क्वापि, तथा किमत्र भविता धत्तूरदानात्तु मे।
लाभः कस्यचना,ऽऽकुला भवत नो यूयं, तथाऽऽयाति मे
मृग्यावृत्तिरथ क्वचित्क्वचन (कौ नावृत्तिहेतोर्यतिः)।।५६३।।

आवृत्तावभवं त्वचेतनस्तस्या एव, न कारणं परम्'।
श्रुत्वैवं प्रभुतश्च बन्धनं मुक्तं तैरथ सर्वसङ्गिनाम्।।५६४।।

एतद्राजसुतस्य धर्मगुरुणाऽन्योन्यं प्रभोः साम्प्रतं
किञ्चिद् धार्मिकभाषितं प्रचलितं, सोऽत्यन्तमेवाऽभवत्।
शान्तो मुस्लिमराजपुत्रयुवकः स्थाने सुशीलस्तथा
सुस्निग्धप्रकृतिः पुनः सहृदयो (नाऽच्छस्थितिः सीमिता)।।५६५।।

एव श्रीप्रभुदर्शनेन पतितो भारिन् प्रभावो महा-
नेतस्योपरि, सोऽभवत्सरलतां तत्तन्मयत्वं प्रभोः।
दृष्ट्वा भावुकतां निमायिमनसो मुग्धो, हृदाऽलाडयत्
तस्मिंश्चाऽथ (निमायिभावहृदयस्तु प्रेममात्रप्रभः)।।५६६।।

धर्मान्धो नहि पीरधर्मगुरुकोऽप्यासीद्, विचारस्तथाऽऽ-
सीद् बोद्धुं सदसद्विवेकसहितः प्रेमप्रसङ्गं पुनः।
शक्तिस्तद्धृदयेऽपि, च प्रभुयतेस्तत्प्रेमपूर्णोक्तिभि-
स्त्यक्त्वा मुस्लिमताऽऽग्रहं स शरणापन्नो बभूव प्रभोः।।५६७।।

धृत्वोवाच पदे प्रभोः स 'तु भवान्नारायणो वस्तुतः,
शान्तिर्मे महती बभूव भवतः संदर्शनात्साम्प्रतम्।
उद्धारस्य गृणातु कञ्चन ममोपायं निमायी भवान्
(कर्तव्यः पुरुषो निमायिहृदयोऽसन्मुक्तिकामैर्गुरुः)।।५६८।।

व्यस्मार्षं निजकं स्वरूपमवनौ मिथ्याभिमाने त्वहं
पीरत्वस्य, भवान् विगृह्य च करं निस्तारयामास माम्।
मज्जन्तं, कृपयाऽग्रमार्गमपि च ब्रूतां भवानेव मां
सम्प्रत्यत्र' (निमायिभावसुमनोलाभः क्वचिद् भाग्यतः)।।५६९।।

'अस्त्यद्धा भवतस्तथाहि हृदयं शुद्धं' जगाद प्रभु-
'स्तु स्थातुं (हृदयं निमायिहृदयं) 'नात्राऽभिमानः क्षमः।
अन्तर्यामिनिमायिभावभगवान् जानाति सर्वात्मनो
वार्ता,मस्ति च सर्वशक्तिसहितः कर्तुं समर्थोऽखिलम्।।५७०।।

भावो नास्ति तिरोहितो ननु हृदः कस्यापि तस्मात्प्रभो,-
र्नाम्नाऽऽकारय तं तु केनचिदपि, ध्यानं च शुद्धात्मना।
तद्रूपस्य करोतु कस्यचिदपि, प्रीतः स भावी प्रभु-
स्तेनैव ध्रुव- (मच्छवस्तु नियतं प्रीणाति सर्वात्मनः)।।५७१।।

संसारे निखिलेऽत्र सन्ति हि यतो यावन्ति नामानि वै
तस्यैव त्वखिलानि सन्ति सुहृदो रूपाणि यावन्ति च।
तं कस्यापि विना प्रतीतिरवनौ नाम्नोऽथ रूपस्य वा
नैवात्र प्रभवेत् (प्रतीतिरयते सच्चेतनद्वारतः) ।।५७२।।

कार्याऽर्चना भगवतो ननु दास्यभावाद्,
वाऽऽचार्य-शिक्षक-गुरुं न निजं तु बोधेत्।
एतत्क्षणात्स्वमिह बोधतु रामदासं,
कल्याणमस्ति भवतस्त्विह चैव साधो !'।।५७३।।

तस्मादेव तथा स नाम समयात्स्वं रामदासं दधौ,
च 'श्रीकृष्ण!' पुनर्ननर्त सुमनाः 'श्रीकृष्ण!' चोक्त्वा तथा।
चक्रे पूर्वत एव सोऽथ बिजली-खाँ-राजपुत्रः प्रभौ
स्थाने त्वात्मसमर्पणं (सहृदयो हार्दार्पणस्यालयः)।।५७४।।

मूर्तिः प्रेममयी प्रभोः सुमनसः संराजमाना त्वभूत्
स्थाने पूर्वत एव तस्य हृदये संस्कारिणः कोमले।
रोद्धुं सम्प्रति किन्तु नाऽशकदहो ! स स्वं, गुरोरात्मनो
भूयोऽदःपरिवर्तनस्य पतितस्तस्मिन् प्रभावोऽधिकः।।५७५।।

सोऽपि श्रीप्रभुपादपद्मयुगले श्रीकृष्ण-कृष्णोक्तितोऽ-
लोट,त्तस्य ददौ निमायिसुमनाः प्रेमश्लिषां, निर्मले।
मन्ये तद्धृदये भवेत्तु कृतवाञ्छक्तिप्रसारं प्रभु-
(र्लोकः सारयति स्वभाव,मपरो लोकः प्रभावं परम्)।।५७६।।

चैतन्यस्य च लब्ध एव सुहृदः प्रेम्णस्तथाऽऽलिङ्गने,ऽ-
नृत्यद्राजसुतो यथा सरलहृन्मत्तो, तदैव क्षणे।
त्यक्त्वा मुस्लिमधर्मपद्धतिमहो! जग्राह स श्रद्धया
श्रीमद्वैष्णवसत्त्वधर्मशरणं (सत्त्वं हि धर्मोऽपरः)।।५७७।।

श्रीमत्कीर्तन एव संततमभून्मग्नो निजैः सङ्गिभिः
सार्धं सोऽथ च सर्व एव यवनः सर्वः पठानोऽभवत्।
ख्यातो वैष्णवनामतः, सुमनसामेकं तु तेषां पृथक्
संजातं दलमेव (सात्त्विकहृदां लोकात्समाजः पृथक्)।।५७८।।

गच्छति हिन्दूनां बिजलीखाँ कावपि तीर्थे यत्र, तु तत्र।
आदरमस्यात्यन्तमकार्षीद् वैष्णवलोकस्तत्स्थितितुष्टः।।५७९।।

एवं प्रेमरसप्रदानममनाः कृत्वा निमायी पठा-
नेभ्यो गाङ्गतटे च सूकरपदक्षेत्रं स सौरौं-स्थलम्।
आप्तः, सौरपदे विधाय सुमना गङ्गानदीस्नानकं
प्रीतोऽत्यन्तमसौ (हि वैष्णवजनो गङ्गाम्बुना प्रीयते)।।५८०।।

आदेशेन निवर्तनाय सुमनाः स्वं कृष्णदासं स्थला-
दस्मादेव च साधुविप्रमवदत्तं माथुरं सङ्गिनौ।

एतस्मिन् वदतस्तु तौ प्रभुपदे धृत्वा रुदन्तावुभौ-
(कः प्रेयोविरहं तथासहृदयः सोढुं भवेत्तु क्षमः?)।।५८१।।

'स्वे पार्श्वे यदि नेहतेऽत्र धरणं स्थाने सदा तु प्रभो!
तत्स्यादिशमवश्यमेव चलितुं यावत्प्रयागं भवान्।
हे गौराङ्ग! ददातु, तत्र मकरस्नानं विधायाऽऽगता-
वावां भाविनि भाविनौ' (हि महति क्षेत्रे प्रियं त्यज्यते) ।।५८२।।

स्वीचक्रे प्रभुरर्थनां सहृदयो गौरस्तयोश्च द्वयोः,
सर्वैः सङ्गिजनैः स्वयं भगवतीभागीरथीतीरतः।
सञ्चक्राम भवान् प्रयाग,ममलः प्रायः पवित्रोऽखिलो
ग्रामो गाङ्गतटस्य चास्ति जननीगङ्गाप्रभावाद् बहु।।५८३।।

प्रायः सर्वगृहस्थलोकनिवहा ग्रामस्य तस्याऽऽस्थयाऽ-
त्यन्तं साधुमहात्मनां सुमनसां यच्छन्ति भिक्षां, ततः।

यात्रां राजपथेन कर्हिचन नाऽद्धा भद्रभद्रा महा-
सन्तः सद्विरतास्तथा विदधते (साधुः सता भ्राम्यति)।।५८४।।

कुर्वन्तस्तु निरन्तरं सहृदया मातुस्तथा दर्शनं
पानं चामृततुल्यपूतपयसो गङ्गातटेनैव ते।
उन्मुक्ता विचरन्ति, गाङ्गतटतो यात्राविधाने पदे
प्रत्येकं मिलति प्रयागफल- (मास्तीर्थः प्रयागो महान्)।।५८५।।

पूतं गाङ्गतटं निमायिमनसां कौ राजमार्गस्त्वहो !
बोधव्योऽत्र महात्मनां, प्रभुरपि ग्रामेषु यात्रान्तरे।
गङ्गातीरगतेषु पावनहरिश्रीनामसंकीर्तन-
प्रस्तारं विदधच्च लोकनिवहं प्रेमाम्बुधौ प्लावितम्-।।५८६।।

कुर्वाणः सुमनाः प्रयागममनाः प्राप्ताः, पुनस्तत्र च
प्रेम्णि श्रीयमुनावलोकनमसौ कृत्वा तथा वातुलः।
भूत्वा नृत्यति, तु प्रयागपुलिनेऽस्मिन् पावने सङ्गमे
सम्मर्दो ननु काममेव लगितः संतिष्ठते सर्वदा ।।५८७।।

तत्सम्मर्दविभा तु चापि ववृधेऽत्यन्तं प्रभोरागते,-
रागत्य प्रभुणा तथाहि ननृतुः सार्धं सहस्रं जनाः।

मत्ताः प्रेम्णि निमायिनः सुमनसोऽसंज्ञाश्चं भूत्वा क्षितौ
पेतुः (श्रीरसपानभूमिपतनं ह्युत्थानमन्थात्मनः) ।।५८८।।

एवं प्रयागपुलिने प्रभुगौरलब्धे-
राप्लाव एव च समापतितस्तु भक्तेः।
प्रेमासवं सहृदयाः प्रभुदत्तमद्धा
पीत्वा बभूवुरखिलाश्च यथा विमत्ताः।।५८९।।

२०. सततं विस्मृत्य स्वं रसिकाः-
श्रीकृष्ण! ! प्रियतम! तव सुन्दरमूर्तिः सकला सृष्टिः
गोविन्द! स्वप्रियगोभक्तैः काले यस्यां क्रीडसि।
हरिनामा त्वं जनभयहरणात्प्रह्लादप्रिय! मुरहर!
नारायण ! नाथाऽखिलजगतो वासुदेव! सम्बोधन !-।।

चक्रुर्भगवतोऽदोनामनिकरैः।
आकाशवलयं ते गुञ्जितमहो ! ।।५९०।।

●●

श्रीरूपस्य प्रयागे महाप्रभुदर्शनम्

२१. आशा कार्या वा नहि कार्या।
आशाबलतो जीवनचक्रं जीवानामिह सततम्
प्रकृतिक्रीडाक्षेत्रे लोके प्रचलति चेतनतायाम्।
का वार्ता केवलमनुजाना,मपि चरकृमिखगपशवः
आशाक्रान्ताः पूर्वस्थाने धावन्ते स्वान्नार्थम्।
एवं जीवयति प्रीणयति प्रतिजीवानप्याशा
किन्तु दुराशां निनिन्द गणिका पिङ्गला भुवि हताशा।
"आशा परमं दुःखं, सुखमिह परमं किल नैराश्यम्"
नश्वरलब्धिदुराशाक्रमतो यत्क्रियतेऽदो व्यर्थम्।
साधनसाध्यविवेकः कार्योऽवश्यं बुद्धिमतामिह
साध्यं सच्चित्स्वाप्तिः, परमं राधाधवपदशरणम्।।

श्रीरूपश्च सनातनः सहृदयावेतावुभौ भ्रातरौ
तद्गौडेश्वरमन्त्रिणौ सुमनसां स्यातां न वै विस्मृतौ।
कृत्वेतौ ननु रामकेलिपदकग्रामे प्रभोर्दर्शनं
लब्ध्वा नूतनजन्म तौ च सहजौ गौरात्प्रयातावुभौ।।५९१।।

एवं श्रीप्रभुदर्शनेन च हृदोरन्तस्तथाह्येतयो-
र्गूढा भावुकता पुनर्भगवतो भक्तिर्निमाय्यात्मनोः।
पूर्णं प्रस्फुटिते, स्वपूर्वकृतिषु स्थानेऽनुतापोऽनयो-
रासीदद्य भवन्निमायिहृदये- (ऽपूर्वोऽनुतापस्तपः)।।५९२।।

लोके सार्थकता मनुष्यवपुषः सत्सङ्गतो जायते,
तर्ह्येवात्र निरर्थकत्वमवनौ स्पष्टं प्रभात्यात्मनः।
सच्चित्ते गतजीवनस्य, समये तत्रैव साध्वात्मनः
पश्चात्तापकृशानुरस्य हृदये स्थाने ज्वलञ्जायते ।।५९३।।

स्वर्णाभं त्वनलेऽत्र दीव्यति मनः स्थाने पतित्वा, तथा
पश्चात्तापकृशानुतापमिलनात्प्रज्वल्य चेतोमलम्।
भस्म प्रत्युत जायते, ननु पुनर्हेमैव सत्केवलं
शेषं तिष्ठति नो मलस्य च भवेन्नामापिं तस्मिन् पुनः-।।५९४।।

भूत्वा दीव्यति निर्मलं जगति तत्पूर्णं, तथा दर्शनं
तद्द्वारेण तु जायते भगवतः, किं दर्शनं जायते ?।
तत्रागत्य विराजते हि भगवा,न्नो गेहमेवात्मनो
भूयः किन्तु कलेवरं रचयते तत्स प्रियात्मा तथा।।५६५।।

मुख्यं तन्ननु साधुसङ्गतिफलं ह्येवाऽनुतापोंऽहसो
लोके पूर्वकृतस्य, मानवतनोर्यस्याऽनुतापोऽभवत्।
नो लब्ध्वापि च साधुसङ्गति,मभूल्लब्धा यथार्था न वा
साधोः सङ्गतिरेव तस्य, ननु वाऽपात्रं तथेयांस्तु सः- ।।५६६।।

संसारे निजपूर्वजन्मविहिताऽधर्मौघहेतो,श्चिरं
तस्यावश्यकताऽधुनाऽस्ति समयं यत्साधुसेवाकृतेः।
उद्वेगो गतकर्मणां ननु कृते काले यदाप्यात्मनि
स्याच्च श्रीप्रभुलब्धये,ऽस्तु हृदयं स्थाने भवत्त्वाकुलम्- ।।५६७।।

ज्ञेयं तु तदैव प्राप्तं हि यथार्थम्।
सत्सङ्गफलं (कौ साधुः परमात्मा)।।५६८।।

आस्तामध्वनि सोदरौ सुकृतिनावेतावुभावेव, का-
वास्तां वास्तविकावनुग्रहजगज्जीवावसाधारणौ।
आस्ताञ्च स्वजनौ तथा भगवतो, गौरप्रभोरीक्षणा-
देवाऽभूत्परिवर्तनं ननु बृहद् भ्रात्रोर्द्वयोरेतयोः ।।५६९।।

कृत्वैव प्रभुदर्शनं ननु घृणा द्रव्यप्रतिष्ठापद-
प्रेयोवस्तुकुटुम्बबन्धुनिवहाज्जाताऽनयोः पूर्णतः।
श्रीकुञ्जेषु निमायिनोः सुमनसोर्वृन्दावनस्थानयो-
श्चेतोऽलिर्भ्रमणार्थमस्ति सुहृदोः स्थाने भवंस्त्वाकुलः।।६००।।

संसारी भुवि यत्प्रतिष्ठितपदप्राप्त्यै भवत्युद्यतः
सर्वं कर्तुमथाऽत्र, बन्धनमिव त्वासीत्तदेवाऽनयोः।
घोरं सम्प्रति राजमन्त्रिपदकं स्थाने प्रतीतं भवच्-
(चेतो रज्यति तावदत्र विषये, यावन्न चिद् भासते)।।६०१।।

श्रीरूपस्तु न गौडमेव गतवान् स्थानं निवृत्या,ऽऽत्मनो
नौकायां धनसम्पदं स सुमनास्त्वारोप्य यातः समम्।
तत्कालं दश-विंशसेवकजनैर्जन्मस्थलीं स्वां फते-
हाबादं (भवरागरञ्जनफलं काले विरागोऽखिलः)।।६०२।।

गत्वा स तत्र विबभाज निजार्धवित्तं
विप्रेषु निर्धनजनेषु, कुटुम्बहेतोः।
किञ्चिन्न्यथाद्, दशसहस्रमथैकमोदी-
पार्श्वे तथा समचिनोद्धनमत्र गौडे ।।६०३।।

अत्र श्रीलसनातनस्य तु दशा जाता विचित्राऽधिका
श्रीरूपादपि, तन्निवृत्य गतवान् वै राजधानीं तु सः।
जातः सम्प्रति राजकार्यकरणे पूर्णोऽसमर्थो यथा
(तावद्रजभयं, न यावदपरं ब्रह्माण्डराजे मनः) ।।६०४।।

जायन्ते मनसैव सर्वकृतयः, किन्त्वेकमेवास्ति तत्,
कामं कारयतु त्वनेन मनुजोऽदोलोककर्माऽथवा।
संसारे परमार्थमार्गविशदप्रक्षालनं, कर्हिचित्
कर्तुं शक्ष्यति नो मनः सुमनसो द्वे कर्मणी त्वेकमाः!।।६०५।।

जानाति स्म सनातनो - 'नरपतिः स्थाने मयि स्निह्यति
प्राणेभ्योऽप्यधिकं, ददामि सहसाऽहं त्यागपत्रं यदि।
मन्त्रित्वा,त्तु कदापि मुस्लिमनृपो नाङ्गीकरिष्यत्यदो,ऽ-
द्यत्वे तस्य तथोत्कलाधिपतिना प्रक्रान्तमास्ते मृधम्।।६०६।।

विश्वासं दधते ममोपरि तथा सर्वाधिकं स, क्षणे
चैवं मोक्ष्यति मां कदापि तु स नो' सञ्चिन्त्य सोऽदोऽखिलम्।
'अस्वस्थोऽस्मि, च राजकार्यकरणे पूर्णोऽसमर्थोऽस्मि, तद्
विश्रामं तु लषामि किञ्चन' नृपं चोवाच सन्देशतः।।६०७।।

चिन्ताऽभून्महती नृपस्य विषयेऽदोऽस्वस्थताया, निजाऽऽ-
स्थानीमुख्यचिकित्सकं सुमनसोऽमुष्योपचाराय सः।
शीघ्रं प्रेषितवान्, प्रगम्य कृतवान्नाडीपरीक्षां तथा
वैद्योऽमुष्य स (नाडिकापरिचयी वैद्यो हि मुख्यायते)।।६०८।।

सोऽनार्यः परमस्य बोधतु तु किं नाडीं ?, सतो वेदनां
तु ज्ञातुं परमार्थमार्गसुमनाः कौ वैद्य एव क्षमः।
आसीत्कश्चिदमुष्य, पुस्तकभरेऽदोलोकवैद्ये तु नो
रोगस्याऽस्य निदानमस्ति न पुनस्तादृक् चिकित्सा तथा ।।६०९।।

ऊचे नृपवैद्योऽदोदेहपरीक्षाम्।
कृत्वाऽखिल- (माधिं जानाति परीक्षा ?)।।६१०।।

'रोगो महाशय ! तु मे भवतोऽत्र कश्चिन्
नो लक्ष्यते वपुषि' तत्तु वचो निशम्य।
स सिस्मिये सहृदयश्च सनातनश्री,-
र्नोवाच किञ्चिदपि चोत्तर,मस्ति मौनम्।।६११।।

गत्वा जल्पति बादशाह-नृपतिं चास्थानवैद्यो 'मम
श्रीमन् ! कोऽपि न लक्षितः सुमनसो देहे तु तस्यामयः।
स स्वस्थस्तु तथा स्थितो, विलसति शृण्वन् कथां पण्डितैः
स्थाने भागवतीं (निमायिभगवद्रोगी निमायी नरः)।।६१२।।

अद्यावधि दृष्टो रोगी तु तथैवम्।
वैद्येन मया नो कश्चित्वपि लोकः' ।।६१३।।

श्रुत्वैवेयदहो ! चुकोप नितरां भूप,स्तदैव क्षणे
स ह्युत्थाय गतः सनातनसुहृद्वासस्थलं च स्वयम्।
आसीनोऽत्र सनातनोऽस्ति सुमनाः शृण्वन् कथां वस्तुतो,
विद्वांसो दश विंशतिश्च परितः सन्त्यस्य च ब्राह्मणाः।।६१४।।

आयान्तं सहसा विलोक्य नृपतिं ह्युत्थाय वासे निजे
तस्थौ श्रीलसनातनः सहृदयः कृत्वा तथाभ्यर्थनाम्।
एतस्यासनयोग्यमासनमदादेकं यथा सुन्दरं
(यद्यस्योचितमस्ति देयमवनौ तत्तस्य, शिष्टक्रिया)।।६१५।।

सर्वेषु 'मल्लिक ! महाशय !' चासितेषु
प्रोवाच स प्रकटयन्नृपतिस्त्वशान्तिम्।
स्वां कृत्रिमां किमपि 'तेऽभवदद्य रोगः
को ?' (रोगिणः कुशलता ध्रुवमेषणीया)।।६१६।।

मन्दञ्च मन्दमयमन्यमनस्कभावात्
किञ्चित्तथैव वदति स्म सनातनश्रीः।
'श्रीमन्मनः शिथिलमस्ति तथैव किञ्चित्,
कात्स्न्र्येन कार्यकरणे न मनः प्रवृत्तिः'।।६१७।।

'वार्ता तु किञ्चिदपि वै भविताऽत्र, सत्यं
सत्यं तथाहि वद मां, ननु कोऽस्ति रोगः ?।
अस्वस्थताऽस्ति ननु का ?, च तथाहि कार्ये
को हेतुरस्ति सुमनः ! स्वमनोऽप्रवृत्तेः ?'।।६१८।।

ऊचे तादृशमेव साम्प्रतोपेक्षाभावदिशा सनातनः।
'नो; किञ्चिन्न वचो विलक्षणं, स्वास्थ्यं नास्ति परं समञ्जसम्'।।६१९।।

शक्तो रोद्धुमहो ! न सम्प्रति तथा भूपः प्रभावं निजं,
ह्युच्चैराह स 'राजकार्यभरतस्तेऽयं प्रमादो नहि।
न्याय्यो,ऽहं युवयोर्द्वयोः सहजयोः स्थाने किंयन्तं दधे
विश्वासं त्वधिकं, हि वेत्सि-(नृपतिर्विश्वासमेति क्वचित्) ।।६२०।।

पश्याम्यस्मि परं- क्षणे समुचिते त्वेवेच्छथो वञ्चनां
दातुं मेऽत्र युवामुभौ, न कथये विश्वासघातं त्विदम्।
भूयोऽन्यत्कथयेय किं?, तव तथा भ्राता प्रयातः फते-
हाबादं तु पलाय्य, च त्वमधुनाऽरुग्णोऽपि गेहे स्थितः-।।६२१।।

आपत्तौ कृतरुग्णताककपटो,ऽदश्छद्मतान्तोऽस्ति का
वार्ता सन्निहिता ?, वदाऽद्य ननु मां त्वं सत्यसत्यं तथा।
विध्वस्तं तु तव प्रमादवशतो मे राजकर्माऽखिलं,
कार्यं ते ननु राजकर्म (मतिमान् स्याद्राजकर्मोद्यतः)।।६२२।।

स्वं कर्म चलित्वा संधारय शीघ्रम्'।
(कर्तव्यविधानं विद्वत्पुरुषार्थः) ।।६२३।।

सार्धं नम्रतया प्रभूतमधिकं निर्भीकभावेन तु
प्रोचे श्रीलसनातनः सहृदयः 'श्रीमंस्तु कामं भवान्।
यत्तद् बोधतु, चिन्तयन्नभवमा ! वार्तां सदैवात्मना
राज्येऽस्मिन् भवतो हितस्य (सचिवो राज्ञो हितैषी भवेत्) ।।६२४।।

अद्याप्यस्मि च शुभचिन्तको हे श्रीमन् ! भुवि भवतो,ऽधुना।
शक्यं किन्तु न भवितुं मया राज्यं कर्म हि विवशात्मना'।।६२५।।

लोहितलोहितनेत्रे संजनयन् प्रभुराह।
'किं भवितुं नहि शक्यं ?' (राजमनोऽनुगलोकः)।।६२६।।

सनातनो नम्रतया तथैवो-
त्तरं ददौ 'सम्प्रति मन्मनो मे।
वशेऽस्ति नो, तच्चलितं ह्यकस्मा-
च्छ्रीमंस्तु वृन्दावनसम्मुखं हे!' ।।६२७।।

'श्रोतुं सर्वमिदं नेहेऽस्मि त्वं दिश वार्ताम्।
एकां, संधरसे वा राज्यं कर्म न ?' तद्वाक्।।६२८।।

दृढतया सनातनोत्तरं 'ननु कृतं निवेदनं पुरा।
न विधिनाऽधुना हि केनचित्प्रभुरहन्तु राजकर्मणि'।।६२९।।

दृष्ट्वैतां तु सनातनस्य दृढतां जातः परं विस्मितः
स्वामात्यस्य हुसेनशाहनृपति,र्यः सर्वदाऽद्यावधि।
आदेशस्य मम प्रतीक्षणविधौ तस्थौ च बद्धाञ्जलि-
र्मत्संवेतनभोगिसेवकनर,स्त्वग्रे स एवाऽद्य मे- ।।६३०।।

निर्भीको वचनोत्तरं तु कुरुते चैवं, ह्यनेनाऽभवत्
स क्रुद्धोऽसमये तु न प्रकटनं क्रोधस्य बुद्ध्वोचितम्।
अल्पं प्रेम स कृत्रिमं प्रकटयन्नूचे नृपः 'शोभनं,
मुञ्चेदं, न विधेहि साम्प्रतमदःस्थानीयकार्यं, परम्-।।६३१।।

युद्धविधाने तूत्कलदेशम्। त्वं मम सङ्गेऽद्धा चलिताऽसि ?'।।६३२।।

तद्वच्छ्रीलसनातनः कथयति 'श्रीमन्!' पुनर्मेऽस्ति नो
विद्वेषो ननु कर्मणः सुमनसः कस्माद् विशेषा,त्परम्।
यावल्लौकिककर्म चास्ति, निखिलं छेत्तुं तु मां धावते,
शक्याम्यस्मि तथाहि किञ्चिदपि नो कर्तुं विभो! साम्प्रतम्- ।।६३३।।

कस्यचित्कर्मणः । पातु नाऽऽशां मया'।।६३४।।

क्रोधं भीषणमात्मनोऽवनमयन् रोषेण चर्वंस्तथा
स्वोष्ठं 'शाकिरमल्लिक ! त्वमधुना वार्तां करोष्यात्मनः।
संज्ञाने त्वथवा मदे,ऽस्ति ननु ते ज्ञातं ?' बभाषे नृपो
'वार्तां केन करोषि?-(सज्जनमनः किं वेत्तु वै दुर्जनः?)।।६३५।।

स्वोक्तौ चिन्तय भूयः, संचिन्त्याऽथ च बुद्ध्वा।
त्वं देह्युत्तरमद्धा' (संचिन्त्यैव हि वाच्यम्) ।।६३६।।

ऊचे श्रीलसनातनो'ऽस्ति विहितः कश्चिन्मदो नो मया,
श्रीमन् ! सन् स्मरणेऽधिकेऽस्मि विदधे वार्तां, प्रतीतं तु मे।
यद्गौडैकतथास्वतन्त्रपतिना वङ्गावनिस्वामिना
वार्तामस्मि करोमि (कोऽपि लभते वार्ताक्षणं भूपतेः)।।६३७।।

अल्पादेशवशात्तु यस्य नृपतेर्देशोऽत्र देशस्तथा
ध्वस्तः सम्प्रति शक्यते हि भवितुं भ्रष्टोऽथ नष्टः पुनः।
यस्याज्ञा नहि निष्फला च भवितुं शक्नोति, चाच्छं मया
पर्यालोचित,मुत्तरं ननु तथाऽऽलोच्यैव कुर्वेऽधिकम्-।।६३८।।

श्रीमन्! भवितुं हे ! नु क्वापि दशायाम्।
शक्यं नहि राज्यं कार्यं ह्यधुना मे'।।६३९।।

'वेत्सि त्वं, भविता किं तेऽदोथाष्ट्यर्फलं ?' तत्।
ऊचे क्रोधरवेऽसौ भूपो मुस्लिमधर्मी।।६४०।।

आह सनः शीर्षं नमयित्वा 'वेद्म्यधिकं, शीर्षं भवितेदम्।
द्राग्धरतो विच्छिन्न,ममुष्याऽल्पं त्वपि न श्रीमन्! मम चिन्ता' ।।६४१।।

अग्रे किञ्चिदहो ! न वक्तुमशकद् भूप,स्तदैव क्षणे
क्रोधाविष्टमुवाच मुस्लिमनृपः 'कोऽप्यस्ति ?' द्वौ सेवकौ।
शीघ्रं तस्य पुरः प्रणम्य नृपतेः स्थाने तथा तस्थतुः
(पात्रं सिध्यति तन्त्रतो भुवि पुरस्कारस्य दण्डस्य वा)।।६४२।।

राजाऽऽह त्वथ 'कर्मचारिण'मुभौ 'राज्यप्रधानं तथो-
क्त्वैतं सम्प्रति शीघ्रमेव कुमतिं कारागृहे प्रापय'।
राजाऽऽज्ञा क्षणतस्तु तादृशजनैः संपालिता, तत्क्षणं
कारायां नृपवन्दिनं सहृदयः कृत्वा सनः प्रेषितः।।६४३।।

अत्रादेशमथेत्थं कृत्वा तूत्कलदेशम्।
यातश्चाहवहेतोर्भूपो भाति हि शास्ता।।६४४।।

श्रीरूपस्य (विदन्तु) सम्प्रति परभ्रातुः स्थितिं, बन्दिनः
स्वभ्रातुर्भवनस्य राज्ञि तु समाचारश्रुतेः पूर्वतः।

स श्रीलप्रभुमार्गणे विसृजति स्म द्वौ पुरीं सेवकौ
(श्रीवृन्दापथसंक्रमाय सुमनोयोगोऽनिवार्यो हृदः) ।।६४५।।

तावागत्य तथोदतुः प्रभुसमाचारं– तु वृन्दावन–
श्रीयात्राकरणाय काननपथाद्यातोऽस्ति गौरप्रभुः।
वृन्दाकाननयानवृत्तलभनाद् गौरप्रभो– (र्वल्लभं)
रूपोऽनूपमथाऽनुजं स्वसहजं सङ्गे विधायाऽऽत्मनः–।।६४६।।

वृन्दाकाननमुन्मुखः प्रचलितो गौरप्रभोर्मार्गणे,
स्वभ्रातुश्च सनातनस्य निकटेऽदोभावपत्रं तथा।
एकं सोऽथ विसर्ज्य रूपसुमना यातस्तु यानक्षणे–
(भ्राताऽन्यत्र सहोदरो न मिलते, नाना मिलेयुः परे)।।६४७।।

'श्रीगौरप्रभुमार्गणेऽतिविकलो वृन्दावनं याम्यहं,
श्रीचैतन्यपदारविन्दमधुकं पातुं मनोऽलिस्तु मे।
उन्मत्तः प्रथते भवन्निव, ततोऽप्यात्मानमद्य क्षणं
धर्तुं नात्र तु शक्नुवानि (सुमनःपानाय धावत्यलिः)।।६४८।।

श्रीचैतन्यनिमायिगौरचरणौ यत्रापि कौ भाविनौ
तत्रैवाऽभिगतस्तदीयशरणापन्नो भविष्याम्यहम्।
चिन्तां मा कुरुतां भवांस्तु वचसः कस्यापि, कर्ता शुभं
चैतन्यो भवतस्तु मङ्गलमयो–(ऽचिन्तो हि तच्चेतनः)।।६४९।।

काराबन्धनतो न केवलमतो गौरः स एव द्रुतं
कर्तोन्मुक्तमहो ! भवन्तमपि कौ सांसारिकाद्बन्धनात्।
निक्षिप्याऽमुकमोदिबन्धुविपणौ रूप्यं सहस्रं दश
स्थानेऽहं चलितः कृते तु भवतः (कोऽन्यो? यथा सोदरः)।।६५०।।

कारावासविमुक्तिमार्गविषये तस्योपयोगो यदि
स्यात्किञ्चित्त्वपि सम्भवस्तु, कुरुतां, मुक्तश्च कारागृहात्।
श्रीचैतन्यपदाब्जदर्शनमथाऽऽगत्य व्रजं तु द्रुतं
वृन्दायां कुरुतां (मनुष्यवपुषो वृन्दाप्तिरेवोद्गतिः)।।६५१।।

एतत्पत्रमहो ! सनातन ! सुहृद् ! गुप्तप्रकाराद् भव–
त्पार्श्वेऽहं विसृजामि, मङ्गलमयो भ्रातः ! करोतु ध्रुवम्।

कल्याणं भवतो निमायिभगवान्' गुप्तप्रकारादिदं
पत्रं स्माऽऽपयते सनातनकरे (गुप्तं किमप्यौषधम्)।।६५२।।

तच्चेतोऽपि तथाहि विह्वलमभूत्पत्रं पठित्वा, ततः
श्रीचैतन्यपदाब्जदर्शनकृते केनापि केनापि नो।
कारोन्मुक्तिकृते बभूव विधिनोपायं स संचिन्तयन्
(कारा-संसृति-मुक्तिमिच्छति भवे कोऽपि प्रमाता जनः) ।।६५३।।

रूपस्तत्र निजानुजेन सहितोऽनूपेन कुर्वन् प्रियं
काशीतः प्रभुमार्गणं सहृदयश्चाप्तः प्रयागं तथा।
गत्वा पारमथ प्रयागनगरे (झूसी-) प्रतिष्ठानतः
प्राप्तः साम्प्रतदारगंजनिकटे (द्वारादवाप्तिः सतः)।।६५४।।

तत्रैवास्य निमायिदर्शनमभूच्चैतन्यदेवस्य च
स्थानेऽनेकजनावृतस्य सुहृदः, प्रेम्णि प्रभुर्विह्वलः।
श्रीसंकीर्तननृत्यमेष विदधद् भक्तैः समं दर्शने
चासीद्यन् प्रियबिन्दुमाधवहरेः (सर्वत्र दृश्यो हरिः)।।६५५।।

सम्मर्देन सहैव तेन सह वै तौ द्वावपि भ्रातरौ
स्थाने सम्मिलितौ, महाप्रभुमहो! योऽप्यत्र तं दृष्टवान्।
नृत्यन्तं च स एव तेन चलितः सार्धं, निवृत्तः प्रभु-
र्दृष्ट्वैवं प्रियबिन्दुमाधवहरिं (मेनो निमायिप्रियः)।।६५६।।

एकस्तत्र निमन्त्रणञ्च दिवसे सद्ब्राह्मणो दाक्षिण-
श्चक्रे श्रीलमहाप्रभोः, सहृदयो भिक्षां विधातुं प्रभुः।
तद्गेहे गतवा,न्निमायिनिकटादोघे तथा निस्सृते
तद्विप्रस्य गृहे त्विमौ च सहजौ पृष्ठे प्रविष्टौ प्रभोः।।६५७।।

उद्याने लघुके बहिर्निजगृहाद् विप्रः शिलापट्टके
चाऽऽतस्तार तथाऽऽसनं प्रभुकृते, तस्मिन्निषण्णः प्रभुः।
उद्यानस्य निभालयन् सहृदयश्चासीच्छटां सर्वतः
(साध्वात्मा प्रकृतिच्छटां भगवतः पश्यन् प्रसन्नोऽयते)।।६५८।।

तस्मिन्नेव तथाक्षणे सहृदयौ रूपस्त्वमूपस्तथा
साष्टाङ्गं प्रभुपादपद्मयुगले चेमावुभौ भ्रातरौ।

चक्राते नमनं, विलोक्य विनतं रूपं स्वपादे प्रभु-
श्चोत्थाय द्रुतमासनात्स्थिरमभूत् (स्थैर्यस्वभावो यतिः)।।६५९।।

चोत्थाप्यैष बलेनाऽऽलिङ्गंस्तं ह्युरसा स्वम्।
तच्छीर्षे मृदुहस्तं गौरो घूर्णयति स्म।।६६०।।

चैतन्येऽथ महाप्रभौ सहृदये स्थाने निषण्णे ह्युभा-
वायातौ सुगृहीतगौरचरणौ बन्धू निषण्णाविमौ।
चाऽनूपस्य महाप्रभुः परिचयं पप्रच्छ गौरः समा-
चारं साधु सनातनस्य सुमना जिज्ञासयामास सः।।६६१।।

निशाम्य वृत्तं निखिलं तथान्ते
'प्रभो ! भवच्छीपददर्शनार्थम्।
कारागृहान्तस्तु स कालकोष्ठे
संतप्यमानो भविता'ऽऽह रूपः ।।६६२।।

ऊचे गौरमहाप्रभुर्ननु हसन् 'स क्वाऽद्य कारागृहे?,
मुक्तः सोऽद्य भवेत्ततस्तु, 'भगवान् कर्ता तु चैव द्रुतम्।
भ्रातॄणां भविता तु वः सुमनसां वै सङ्गमो, मेऽधुना
किञ्चित्कालमिहैव तिष्ठ निकटे' (पार्श्वे सुबन्धुर्भवेत्)।।६६३।।

उक्त्वेदं निजपार्श्वमेव सुमनाः स्थानं ददावेतयो-
रावासाय तथा द्वयोः सहजयोर्भ्रात्रोर्द्वयोर्भोजनम्।
भद्रः कारितवान्, प्रसादमददादन्नं प्रभोश्चानयोः
(सर्वार्त्तिः सुहृदां हि नश्यति भवे लब्धे प्रसादे सतः)।।६६४।।

एवमिमौ तु सगर्भौ पावनतीर्थसमीपे।
चावसतां प्रभुसेवाकर्मणि सम्मदयुक्तौ।।६६५।।

●●

महाप्रभु-वल्लभाचार्यः

२२. नौमि श्रीवल्लभमाचार्यम्।
आचिनुतेऽर्थं बाल-वल्लभं तदिह वल्लभाचार्यः
गोपीवल्लभ-बालमुकुन्दो यत्प्रियपरमोपास्यः।
पोषणमात्मनि तदनुग्रहणं भागवतस्वारस्यम्
इह तेने गृहमेधिसमाजे पुष्टिमार्गमवलम्बम्।
कुर्याच्छरणागतपोषणमथ वा नहि गीतावक्ता
बालोपासनपोषणमिह परमर्थो वल्लभपुष्टेः।
नन्दयशोदावत्सलरसता मुमुचे स्वं गोपालम्
'रक्षतु मधुरां वृत्तिं, द्वारं रचयतु निरतविरतयोः'।
बाललालनं वल्लभमार्गे नन्दयशोदासदृशम्
वर्धयतु प्रेयसि निदिशतु श्रेयसि भारतमवनीम्।।

स्पष्टं त्वस्ति हि - पुष्टिमार्गघटकश्रीवल्लभाचार्यजी
श्रीचैतन्यमहाप्रभोः सुमनसस्त्वासीत्समः कालिकः।
सादृश्यं ह्यनयोर्महापुरुषयोरस्ति प्रभूताधिकं
(ह्यायात्येव समानता दृशि, यदि स्याद् दृश्यमेकं सतोः) ।।६६६।।

भक्तौ द्वावपि वैष्णवौ भगवतोऽनन्या,वुभावेव ता-
वाचार्यौ जनशिक्षकौ, सुमनसौ भक्तिप्रवृत्तिप्रियौ।
श्रीमद्भक्तिनियोजकौ, भगवतः स्वे स्वेऽवतारस्तथा
मन्येतेऽखिलभक्तलोकनिवहैर्वै सम्प्रदाये ह्युभौ ।।६६७।।

कथ्येते स्म महाप्रभू सहृदयौ द्वावेव, जन्मोभयो-
रेवाऽभून्ननु केवलं जगति षड्वर्षानुपूर्व्येण च।
श्रीचैतन्यमहाप्रभोस्तु भगवाञ्छ्रीवल्लभाचार्यजी
षड्वर्षाणि पुरैव चावतरितो भूमावमुष्यां तथा- ।।६६८।।

यातोऽब्दद्वयपूर्वमेव च ततः संसारतोऽतस्तिरो-
भावं, त्यागविरक्तिभावमिलितं प्रेम द्वयोर्जीवने।
एवाऽभूदखिलात्मना विकसितं, प्रेमप्रभावान्निजाद्
द्वावेवाऽकुरुतां सुभक्तिरसतः पृथ्वीं परिप्लावितामू।।६६९।।

तौ नम्रौ रसिकौ तथैव सरलौ शान्तौ गुणग्राहिणौ
द्वावेवाऽगुणदर्शिनौ प्रियतमप्रेम्णस्तथोपासकौ।
अन्योन्यं त्वनयोर्महापुरुषयोर्वारद्वयं सङ्गमोऽ-
प्यत्राऽभू,दथ तस्य नो विवरणं निष्पक्षमद्याऽऽप्यते।।६७०।।

अत्यन्तं तु परस्परं सहृदया-(-वेतत्पुनर्ज्ञायते-)
-ऽकाष्टां स्नेहमिमौ, वसन् सुमनसोर्भावोऽभविष्यद् द्वयोः।
गाढश्चाधिकमेव, चास्तु न कथं ?, प्रेमामृतेनात्मनः
संसारं प्रभवेद् विधातुममरं यः, स क्षमः स्यात्कथम्-।।६७१।।

धातुं संकुचितं परस्परमहो ! विद्वेषपूर्णन्तु वा
भावं स्वं, तदिह प्रसङ्गवशतोऽत्यन्तं तु संक्षेपतः।
अस्त्यावश्यककार्यमेव भगवच्छ्रीवल्लभाचार्यजी-
वृत्तोद्घाटन- (मस्ति सङ्गतिरिह स्थाने निमायिस्मृतिः) ।।६७२।।

प्रेमत्यागविरागसङ्गममयी चैतन्यता जीवने
यस्यास्तीह स एव पात्रमवनौ चैतन्यवृत्तावलेः।
नाप्रासङ्गिकमत्र तेन भविता श्रीवल्लभाचार्यजी-
वृत्तं (जीवनमेव वल्लभमयं वृत्तं निमाय्यात्मनाम्)।।६७३।।

तच्चारुचरित्रादानन्दनिवृत्त्योः।
चित्ते भवितैव प्राप्ती रसिकानाम् ।।६७४।।

जन्माऽभूच्च महाप्रभोः सुमनसः श्रीवल्लभस्यान्वये
विप्राणामिह तैत्तिरीयकयजुर्वेदीयसम्बन्धिनाम्।
भारद्वाजकुलीनशुद्धकुलके,ऽदःपूर्वजा दाक्षिणा
भट्टोपाधिविभूषिता द्विजवराश्चासन् (वरो दक्षिणः)।।६७५।।

आसीत्तस्य च वेलनाटपदतः स्थाने प्रसिद्धं कुलं,
श्रीमल्लक्ष्मणभट्टनामजनको भागारुयल्लाऽभिधा।
माताऽस्य, न्यवसन्नमी ननु जनाः कृष्णातटे दक्षिणे
व्योमस्तम्भनगान्तिकेऽथ नगरे काकुम्भके चान्ध्रके।।६७६।।

अग्रहार-नाम चास्य पृष्ठतः पिता ह्युवास।
ग्राममागतो (नरस्तु सर्वदेशवल्लभोऽस्तु) ।।६७७।।

काशीमागतवानथैकसमये पत्नीयुतो लक्ष्मणो
भट्टस्तीर्थभराटनेन, हनुमद्घाटे च तत्रैव सः।
आदायैकगृहं ह्युवास, समये तस्मिंस्तु काश्यामभूद्
विद्रोहो विपुलः (स्थले शिवमयेऽपि द्रोहभावः क्वचित्) ।।६७८।।

तस्माद् भट्टमहोदयश्च चलितो देशं सदारो निजं,
पत्नी गर्भवती तथाऽस्य सुहृदस्त्वासी,च्च चोडापुरे।
चम्पारण्यसमीपमध्वनि (चतुर्भद्रे पुरे) वल्लभाऽऽ-
चार्योत्पत्तिरभूत् (सुभद्रपुरुषोत्पत्तिर्हि भद्रस्थले) ।।६७९।।

सामग्रीं निखिलां स लक्ष्मण-पिता चानीय चम्पारणात्
पुत्रस्याऽकृत जातकर्म निखिलं संस्कारमात्मोचितम्।
काश्यामेव पुनर्ह्युवास मतिमानागत्य, जन्माऽभवद्
वैशाखेऽस्य महाप्रभोर्हरितिथौ रात्रौ च पक्षेऽसिते ।।६८०।।

संस्कारं कृतवांश्च लक्ष्मणपिताऽसौ पञ्चवर्षायुषि
ह्यस्य ब्रह्मपथेन तूपनयनं, वेदादिशास्त्रस्य हि।
तस्मादेव तथा क्षणादयमभूच्छिक्षां दधानो गुरोः
(संस्कारो गुरुशिक्षयैव मनुजे पात्रे भवत्युन्नतः) ।।६८१।।

आसीदेष यदा समैकदशकः, पूज्यः पिताऽस्याऽभवत्
स्वर्गस्थस्तु तदैव, तत्कतिपयाञ्छिष्यान्निजां मातरम्।
सङ्के स्वं च विधृत्य देशमगम,त्त्वत्रायमल्पायुषि
श्रीविद्यानगरस्य राजसमितौ कृत्वा तथा पण्डितैः।।६८२।।

शास्त्रार्थं विजयस्य लाभमकरो,दाचार्यपादस्थितिं
लेभे,ऽमुष्य समादरो बहु महाराजस्य पक्षात्कृतः।
तद्विद्यानगरस्य, चास्य विसृता ख्यातिस्त्वनेनाधिकं
दूराद्दूरतरं (पुनाति महतः ख्यातिः प्रभूतस्थलम्)।।६८३।।

भूयो बह्वनुयायिभिर्ननु निजैः सार्धं भवान् वल्लभ-
श्रीर्विद्यानगराच्च पण्ढरपुरं कन्याकुमारीं गतः।
यात्रामाध्यमत,श्च पण्ढरपुरात्तु त्र्यम्बकं नासिकं
चौङ्कारेश्वरनर्मदातटमसौ माहिष्मतीं वल्लभः- ।।६८४।।

तस्मात्सिद्धवटञ्च चैद्यपुरकं भूयो विशालां भवान्
यातो धौलपुरं तथाहि दतियास्थानं, परास्तान् पुनः।
कुर्वाणः स्वविपक्षिणस्तु सुमना गृह्णंश्च तत्तत्स्थले
मानं राजसभासु सोऽथ मथुराद्वाराऽऽगतो गोकुलम्।।६८५।।

आज्ञा भागवती विधातुमभवच्छ्रीभक्तिमार्गं स्फुटं
तत्रैवाऽधिगता तथाऽस्य, भगवान् स्वप्ने च गद्यात्मकम्।
एकं मन्त्रमथोपदिष्टमकरो,ज्जीवस्य यद्ब्रह्मणा
सम्बन्धः क्रियते (चराचरजगत्त्वंशः परं ब्रह्मणः)।।६८६।।

अत्रैव केचिद् भवतश्च शिष्याः
शरण्यमाप्तास्तु, भवानिहैव।
स्थित्वा च शास्त्रं प्रणयन् बभूव
(स्थाने प्रमाता स्फुटति प्रणेता) ।।६८७।।

सम्पूर्णव्रजतीर्थकस्थलमथाऽभ्राम्यद् भवांस्तत्परं,
भूयो भागवतो भवान्ननु गतो भक्तिप्रचारार्थमाः!।
भागे सम्प्रति दक्षिणे सहृदयः, सिद्धप्रसिद्धस्थले
तस्मिन् गुर्जरसिन्धयोश्च नगरेऽनेकत्र गत्वा भवान्-।।६८८।।

शास्त्रार्थं कृतवांस्तु पण्डितभरैः, श्रीभक्तिमार्गस्य चाऽ-
लं चक्रे प्रतिपादनं, सुमनसः सर्वत्र तत्राऽस्य तु।
पाण्डित्यस्य तथा प्रसिद्धिरभव,न्नाडिन्धमा, भाटियाः,
श्रीमन्तोऽस्य च मानिनश्च पुरुषाः शिष्याः सहस्रं गताः ।।६८९।।

आचार्यस्य यथेष्टमस्य च कृते पूजोपहारास्त्वपि
ह्यायान्तस्त्वभवं,श्च गुर्जरभुवोऽत्यन्तं जना भावुकाः।
सत्कारं बहु चक्रिरेऽस्य विपुलं, यात्रां समाप्याऽकरोत्
तीर्थे साम्प्रतमेष दक्षिणभुवः पूर्वोत्तराशास्थिते ।।६९०।।

गच्छन्नुत्तरतीर्थकेष्वथ कुरुक्षेत्रं सदात्मा हरि-
द्वारं तापसकेशमेष टिहरीं केदारबद्रीपती।
गङ्गोत्रीप्रभृतिं निवृत्य च हरिद्वारं पुनश्चागतः
कुर्वन्नैमिषकाननप्रभृतिकश्रीतीर्थसंदर्शनम्- ।।६९१।।

यातः पुरीभगवतः प्रियदर्शनार्थं,
तन्नाथदक्षिणपथेन महेन्द्रशैले।
कुर्वन् भवान् परशुरामसुदर्शनं स्व-
ग्रामाऽग्रहारमयमागतवांश्च भूयः ।।६९२।।

आचार्यः समयं तथा कतिपयं स्थित्वाऽग्रहारे पुन-
र्दध्यौ पावनभारतभ्रमणकं कर्तुं द्वितीयक्रमम्।
तद्विद्यानगरञ्च लौहगढकं श्रीवल्लभो मङ्गल-
प्रस्थं सोऽथ भवंश्च पण्ढरपुरं प्राप्तस्तथाऽऽद्याश्रमी।।६९३।।

आगत्याऽथ निमायिपण्ढरपुरं चक्रे भवान् दर्शनं
श्रीमद्विट्ठलनाथजीभगवतो, ऽसौ ब्रह्मचारिश्रियम्।
सर्वां दण्डकमेखलाऽजिनजटेत्यादिं दधानोऽभवद्
यावत्सम्प्रति, वल्लभोऽवसदयञ्च ब्रह्मचर्याश्रमी ।।६९४।।

अत्रैव प्रभुविट्ठलोऽस्य भगवान् कर्तुं विवाहं ददा-
वादेशं, तमसौ परं भगवदादेशं व्रती वल्लभः।
स्वीचक्रे, पुनरेष गुर्जरभुवो यात्राञ्च कुर्वन्नितो
व्याख्यानं निजशिष्यसेवकजने श्रीभक्तिमार्गस्य च-।।६९५।।

आप्तः पुष्करदर्शनाद् व्रजमसौ गोवर्धने (गोपति-)
श्रीगोवर्धननाथजीप्रकटनं जातं, स्वयोगं ददौ।
तत्सेवार्चनयोश्च तत्र, सुमनास्तत्स्थानसेवाऽखिलाऽऽ-
भारं श्रीयुतमाधवेन्द्रकपुरीसाधौ त्वयं न्यक्षिपत् ।।६९६।।

स्थाने ठाकुरसाधुपूरणमलः श्रीनाथजीप्रेरितः
श्रीगोवर्धननाथमन्दिरकृतिं प्रारब्धवान्, वल्लभः।
आचार्यो व्रजमण्डलाच्च चलितो यात्रां चकारोत्तरा-
तीर्थानामपरक्रमे, प्रभुजगन्नाथस्य यात्रां पुनः- ।।६९७।।

कृत्वा, शिवकाश्यामागत्य च तस्थौ।
(ऊर्ध्वस्थितिकाशी सम्पूर्णनिवासः) ।।६९८।।

बुद्ध्वेच्छामिह वल्लभो भगवतश्चैकस्वजातिद्विजाऽ-
ग्रश्रीदाक्षिण-देवभट्टसुहृदः सम्पन्नया कन्यया-।

लक्ष्म्या सर्वगुणैर्विवाहमकरोद् देव्या, पुनर्गोकुलं
प्राप्तः पूर्वसमं भ्रमन् कतिपयं काश्यामुषित्वा दिनम्।।६९९।।

भूयः सम्प्रति गुर्जरप्रभृतिके क्षेत्रे तृतीयक्रमेऽ-
भ्राभ्य,च्चाथ तृतीयवारमधुना बद्रीकनारायणम्।
दृष्ट्वाऽऽप्तः प्रियगोकुले, स यमुनातीरेण तद्गोकुलात्
प्राप्तः साम्प्रतमागरामथ भवंस्तीर्थप्रयागं, तथा- ।।७००।।

पारेऽन्यत्र च सङ्गमस्य यमुनातीरे ह्यरैलाऽभिध-
ग्रामेऽसौ विरचय्य गेहमवसत्, किञ्चिद् ह्युषित्वा दिनम्।
ग्रामेऽरैलपदेऽत्र वल्लभगृही कार्शीं भवानागत,-
स्तद्गत्वा चरणाद्रिमल्पसमयं तस्थौ (चुनारं) भवान्।।७०१।।

आचार्यस्य बभूव चाऽद्य निकटे द्रव्यस्य न न्यूनता,
जातास्त्वस्य सहस्रमत्र धनिनः शिष्यास्तथा मानिनः।
स्थाने श्रेष्ठिकुसीदिनः, सहृदयस्तद्धर्मकृत्येष्वसा-
वत्यन्तं धनमुत्ससर्ज सुमनाः स्थाने यथेच्छं तथा।।७०२।।

आदेशान्निजमातुः काश्यां भोजयति स्म।
विप्राणां च सहस्रं भक्त्या त्रिंशतमेषः।।७०३।।

काशीतः पुनरेष किञ्चिदथ चाऽरैले प्रयागं भवन्
स्थित्वा कालमितो व्रजं, सुमनसोऽमुष्याऽऽगरासन्निधौ।
गोघाटेऽथ समागमोऽभवदहो ! श्रीसूरदासेन चाऽ-
स्मिन्नेव भ्रमणे (तमोविनशनज्योतिःप्रदाऽर्कभ्रमिः)।।७०४।।

तत्रैवाऽथ बभूव सोऽस्य शरणापन्नश्च सूरो, भवान्
धृत्वा सूरमथाऽऽगतः सहृदयः सङ्गे च गोवर्धनम्।
श्रीगोवर्धनदासजीप्रियनवाऽऽवासप्रतिष्ठां भवां-
स्तस्मिन् कारितवांश्च (देहभवनं गोवर्धनस्यात्मनः)।।७०५।।

विद्वांसो बहु पुज्जिताः सुमनसः सन्तो महान्तस्तथा
तस्यां मन्दिरसंस्कृता,वथ ततश्चारैल एवाऽऽगतः।
तस्थावत्र पुनर्भवान्, सुमनसस्तत्रैव जातोऽस्य वै
गोपीनाथ-सुताऽपरः (सुपुरुषः स्रोतः सुजातात्मनाम्)।।७०६।।

आत्मैकशिष्य-पुरुषोत्तमदासके ज्यो-
तिष्टोमयज्ञकरणाय ददौ प्रयागे।
आज्ञां भवान्ननु तदैव, समाप्तिमाप्तो
निर्विघ्नमुत्तमविधेर्बहुशोभया यः ।।७०७।।

गत्वा तत्र ततश्चुनारनृपतेरभ्यर्थनातो भवां-
स्तस्थौ, विट्ठलनाथजी परसुतस्तत्रैव जातोऽस्य च।
अन्ते भागवताऽध्वना सहृदयो जग्राह काश्यां भवान्
संन्यासं (प्रकृतेस्तथा भगवतो न्यासोऽर्पणीयः सता)।।७०८।।

गेहद्वारमहो ! विमुच्य सुमनाः काषायवस्त्रं तथा
धृत्वा दण्डकमण्डलुद्वययुतः सूत्रेण सार्धं शिखी।
निर्वाहं कुरुते स्म साम्प्रतमसौ भिक्षान्नतो वल्लभा-
चार्यो (वस्तु समस्तमेव भगवद्द्वारैव भिक्षाऽऽत्मनाम्) ।।७०९।।

वैराग्यं समये तदाऽस्य सुहृदोऽपूर्वं तथाऽऽसी,दियत्-
सम्पत्ति,र्महती तथातिशयिता साधु प्रतिष्ठा, पृथक्।
पत्नीबालजनाच्च शिष्यभृतकाद् भूत्वा भवान् पूर्णतोऽ-
र्चापूजासु च कीर्तने भगवतो नाम्नः सदा त्वापृतः।।७१०।।

एवं कौ निजजीवनेन परमत्यागस्वरूपेण च
त्यागादर्शमथात्मनः कुलनृणां शिष्यप्रशिष्यात्मनाम्।
हेतोरत्र दिशन् भवान् सहृदयोऽसारादतः प्रस्थितः
संसारादभवत्तृतीयदिवसे शुक्ले विलीनः शुचौ ।।७११।।

काशीगोकुलयोर्महाप्रभुरथाऽरैले चुनारे तथै-
वावात्सीच्च विशेषतः सहृदयः श्रीवल्लभाचार्यजी।
चत्वारेषु तथैव सन्ति सुहृदोऽमुष्योपवेशाः स्थले-
ष्वेतेष्वद्य च यावदत्र लसिताः (स्थानप्रसिद्धिः सता)।।७१२।।

ख्याताः सन्ति महाप्रभोरिह तथा ते चोपवेशाख्यया,
स्थाने गोकुलिया तथाऽस्य कुलजो गोस्वमिनामोच्यते।
कथ्यन्ते बहु भारतेऽत्र विषये सर्वोपमायामथाऽऽ-
चार्या वैभवशालिनश्च धनिनोऽदःसम्प्रदायस्य तु।।७१३।।

वंशस्याऽस्य कुसीदिनश्च धनिकाश्चार्या महान्तस्तथा
शिष्याः सन्ति च सेवका,स्त्विह तथाऽऽचार्यद्वितीयात्मजम्।
श्रीमद्विट्ठलनाथनामकमहाराजं तु गोस्वामिनं
साक्षात्स्वीकुरुतेऽस्य सम्प्रति पथः कृष्णावतारं जनः।।७१४।।

चक्रेऽत्यन्तमथ प्रचारमिह सोऽदःसम्प्रदायस्य, सोऽ-
त्यन्तं कर्मपरायणः सहृदयो धर्मे तथाऽऽस्थान्वितः।
आचार्यो बलवान् बभूव, तनयाः सप्ताऽभवन् विट्ठलाऽऽ-
चार्यस्य (प्रथिता हि सप्तविधका ज्ञानस्य सद्भूमिकाः)।।७१५।।

गोविन्दो, रघुनाथजी, गिरिधरः, श्रीबालकृष्णो, घन-
श्यामः, श्रीयदुनाथजी सहृदयाः श्रीगोकुलेशस्तथा।
एषां सप्त पदासनानि विषयेऽद्धा तत्र तत्राऽधुना
यावत्सन्ति (भुवि स्थिरत्वमयते सत्त्वं, प्रमाणं हि सत्) ।।७१६।।

पश्चादस्य च वंशजा ववृधिरेऽत्यन्तं तु, येऽद्यावधिं
काशी-गोकुल-बम्बईक-मथुरा-श्रीनाथकद्वारके।
स्थाने भिन्नविभिन्नके स्थितियुताः सन्तीह सद्वल्लभाः
(साध्वी वल्लभता कृपा भगवतः पुण्यात्मनामात्मनाम्)।।७१७।।

गोस्वामिबालान् भगवद्धियाऽदः-
शिष्यानुजीवी मनुतेऽर्चतीह।
अद्यावधिं वल्लभवंशजातान्
(साधारणस्य प्रियता विशेषे) ।।७१८।।

श्रीमद्वल्लभजो न खण्डनपरोऽसौ सम्प्रदायस्तथा
वैशिष्ट्येन, विहाय दार्शनिकगां सिद्धान्तवार्तां (मम-।
यावज्ज्ञातमथास्ति च प्रभुहृदो-)ऽस्मिन् सम्प्रदाये पर-
स्यार्चापद्धतिखण्डनं न मिलतेऽद्धा सम्प्रदायस्य वै।।७१९।।

श्रीमद्वल्लभसम्प्रदायभुवने वा सम्प्रदायान्तरं
स्थाने वैदिककर्मखण्डनमहो ! नो विद्यते, तत्र तु।
प्राधान्येन निदेशिता सहृदयैः श्रीकृष्णसेवैव (हि
श्रीकृष्णो जनमानसे मधुरताऽऽधानावतारोऽवनौ)।।७२०।।

एषामध्वनि मन्यते सुहृदि मुख्यो ब्रह्मसम्बन्धसं-
स्कारः, शिष्यककर्णयोर्ननु गुरुर्मन्त्रं ददाति प्रियम्।
तन्मन्त्रस्य निमायिभावरसधेस्तात्पर्यमेतत्तु-"नः
श्रीकृष्णो ननु रक्षकोऽस्ति-(मधुरश्चेयोऽत्र रक्षाकरः) ।।७२१।।

तस्माद् वर्षसहस्रतोऽस्ति ननु नो जातो वियोग,स्ततो
यातानामखिलस्त्रितापवशतां नः प्राणिनामात्मनाम्।
आनन्दोऽस्ति तिरोहितः, सहृदयस्तादृग्दशावानहं
श्रीगोपीजनवल्लभात्मभगवच्छ्रीकृष्णहेतोर्निजम्- ।।७२२।।

प्राणान्तःकरणेन्द्रियाङ्गमथ च स्त्रीज्ञातिगेहात्मजाऽऽ-
त्मद्रव्याणि समर्पयामि निखिलं धर्मं तथाह्यान्तरम्।
दासोऽहं भवतो निमायिसुहृदो हे कृष्ण !" जीवात्मनां
मन्त्रेण त्विह मन्यतेऽलममुना संबन्धनं ब्रह्मणा ।।७२३।।

(सम्बन्धे-)ऽत्र विनाऽर्पणं भगवतो (जाते समं ब्रह्मणा)
काचित्स्त्री पुरुषोऽन्नवारिधरणं कर्तुं न शक्नोति तु।
वस्त्राभूषणवित्तवाहनजगद्वस्तूपभोगं तथा
कर्तुं न प्रभुरस्ति (सर्वमलमीशावास्यमेतज्जगत्) ।।७२४।।

श्रीकृष्णार्पणपूर्वकं भगवतः सर्वं प्रसादं तथा
संबुध्योपभुनक्तु, साम्प्रतमहोऽसावेव सारोऽस्य तु।
भावः प्रांशु कियानथास्ति, पुरुषः शुद्धात्मना वस्तुतो
धर्मस्याऽस्य तथाहि पालनमहो! कुर्या,त्तदा निश्चितम्- ।।७२५।।

गेहस्थितिवतोऽप्यस्यात्र भवितुम्।
शक्नोति भुवने कल्याणमपरम् ।।७२६।।

नाना ग्रन्थमसौ लिलेख भगवाञ्छ्रीवल्लभाचार्यजी
स्वं सिद्धान्तमथ स्वयं सहृदयोऽद्धा बोधनार्थं, पुनः।
श्रीमद्भागवते च सुन्दरमसौ भाष्यं तथा पूर्वमी-
मांसायामलिखन् (नराः सुकृतिनोऽद्धा पूर्वमीमांसया)।।७२६।।

त्वत्यन्तं ननु युक्तिभिः सह बहुग्रन्थेषु च श्रीमदा-
चार्यैर्बोधितमत्र वल्लभपदैः श्रीभक्तितत्त्वं, तथा-।

सारः पञ्चसु वर्णितो मतिमता श्लोकेषु तु स्वाखिल-
ग्रन्थाना-(मिह पञ्चकोषनिहितः स्वात्मा परात्मा प्रियः) ।।७२७।।

कुर्वन्ति स्फुटमेत एव सुधियः सिद्धान्तमस्योचितं
श्लोकाः पञ्च, च पञ्चभिर्मतिमतां श्लोकैरमीभिः सताम्।
ज्ञातं भावि- जनः प्रवृत्तिपथकं यः पुष्टिमार्गं पुन-
र्ब्रूते-पुष्टिपथे तथाऽखिलकृतित्यागो निषिद्धः कृतः-।।७२९।।

तस्यास्ति स्खलितं तथा महदिदं, श्रीवल्लभाचार्यतो-
द्वौ मार्गौ कथितौ - निवृत्तिरपरा लोके प्रवृत्तिः परा।
सर्वश्रेष्ठमसौ गृणाति सुमतिर्मार्गं निवृत्तिं, परं
संसारे विरलो निवृत्तिपथिकः (सृष्टिः प्रवृत्तेः फलम्)।।७३०।।

कश्चित्तस्य यदा क्षमोऽनुसरणे न स्या,त्ततोऽसौ तदा
श्रीकृष्णार्पणबुद्धितः सहृदयो वर्णाश्रमानुश्रिया।
कुर्वन् कर्म भवेन्निजस्य भुवि तत्प्रीत्यर्थमेवाखिलं
(प्रीतिस्तस्य निमायिनो भगवतो भक्तौ स्वमुक्तेर्वरा)।।७३१।।

गार्हस्थ्यग्रहणं मनुष्यजगतो ब्रह्मव्रता,त्तद् वन-
प्रस्थानं (कृतिभिस्तथैष कथितो मार्गः प्रवृत्ति-) स्ततः।
संन्यासंग्रहणं, जना भ्रमवशात्सर्वांश्च संन्यासिनो
बोधन्ते तु निवृत्तिमार्गपथिकान् (वृत्तिर्निवृत्तौ परा)।।७३२।।

संन्यासी घटते निवृत्तिजगतः सोऽद्धा तु, सत्येव हि
ज्ञाने, काममसौ क्वचिद् भवतु वा स्थित्यां तु कस्यामपि।
सर्वस्वं तत एव तत्त्वमिलनात्त्यक्त्वाऽवधूतो भवेद्
हंसोऽद्धा परमो विहाय तु विधेः क्लेशं निषेधस्य च।।७३३।।

चेष्टा तस्य शिशूपमाऽस्तु जडवन्मत्तोपमा वा, तथा
संन्यासग्रहणं क्रमाद् विदधतो ज्ञानात्प्रवेशं सतः।
एकस्माच्च पराश्रमे सुमनसो मार्गः प्रवृत्तिस्त्वयं
(सत्यं ब्रह्मविवर्तनं च तनुभृत्प्रावर्तनं संसृतिः) ।।७३४।।

प्रत्यक्षं निजजीवनेऽत्र भगवाञ्छ्रीवल्लभाचार्यजी
लोकाञ्छिक्षयति प्रवृत्तिपथमेवाऽमुं प्रदर्श्य स्वयम्।

नो सोऽस्वीकुरुते निवृत्तिपथसर्वश्रेष्ठतां, न्यूनम-
स्याऽत्यन्तं त्वधिकारिणं निदिशते-(ऽगम्या निवृत्तिस्तनोः) ।।७३५।।

श्लोकाः पञ्च लसन्ति सारविषयाः श्रीवल्लभाचार्यजी-
सिद्धान्ताः, प्रभुभक्तितत्त्वजगतः सन्दोहरूपानमून्।
बोधन्ते ननु पुष्टिमार्गपथिकाः श्रीवल्लभप्रेमिणो,
ह्याचार्यः कुरुते निदेशमवनौ श्रीवल्लभः स्पष्टतः-।।७३६।।

२३. धावति मनुजोऽत्र ग्रहणार्थम्।
आहारोद्देश्यं भुवि धावनमखिलानां जन्तूनाम्
भवति सहजमिह, किन्तु प्रज्ञायुक्तानामाश्चर्यम्।
बुद्धिमतां मनुजानां गेहं (गृह्णात्यलमात्मानम्)
त्याज्यं, तद् वा श्रीकृष्णार्थं प्रयोजनीयं सततम्।।

सिद्धान्तो निखिलोत्तमस्त्वयमहो ! - संत्याज्यमेवाऽभितो
गेहं (किन्त्विह पूर्वजन्मविषयात्सर्वः स्वसंस्कारतः।
गेहत्यागविधौ क्षमो न घटते, तस्माद्) भवेत्पूर्णतः
सामर्थ्यं त्वपि मानवात्मनि गृहत्यागक्रियाया न चेत्- ।।७३७।।

स्थित्वा तर्हि गृहेऽत्र कर्म निखिलं श्रीकृष्णहेतोः क्रियात्
तत्प्रीत्यर्थकमेव, (कर्मकरणात्पापं तु यज्जायते।
तत्पापं भविता न, तादृशि कृते-) ऽनर्थस्य सर्वस्य यत्
श्रीकृष्णो ननु मोचको (ननु सुहृद् ह्यर्थप्रदोऽनर्थहृत्)।।७३८।।

२४. सजति प्राणी प्रतिपलमवनौ।
प्रकृतिपुरुषयोः सम्मेलनतोऽदोऽखिलदृश्यक्रीडा
चित्रपरिस्थितिसंघटितेयं नानाकौतुकमिलिता।
प्रकृतिश्चेतनपुरुषमिलनतश्चेतनवत्प्रतिभाति
जडप्रकृतिसङ्गात्खलु पुरुषोऽविवेकजडतां धरते।
सङ्गत्यागः सामान्यानां दुष्कर एवास्त्यवनौ
सङ्गजनितमलशोधनमौषधमिह केवलसत्सङ्गः।।

सिद्धान्तस्त्वयमस्ति साधु सुहृदां सर्वोत्तमः- सङ्गतिः
कर्तव्यैव न कस्यचि,न्ननु परित्यागोऽत्र सर्वात्मनाम्।

सङ्गानां करणीय एव स (तु परं नानाऽत्र जन्मान्तरा-
ज्जीवानां तु समाजमध्यमिलिताऽऽवासस्वभावोऽस्ति तत्)- ।।७३६।।

सर्वात्मसङ्गपरिमोचनकार्यशक्ति-
र्न स्या,त्तदा सुजनसाधुमहात्मसङ्गम्।
एव क्रिया,त्सजति यन्मलमत्र सङ्गात्,
तस्यौषधिः सहृदयाः स्फुटमेव सन्तः।।७४०।।

२५. विष्णौ सम्मुखता जीवनता।
जगदिदमखिलं विष्णुमयं वा विष्णुव्याप्तं निखिलम्
तत्सम्मुखतायां सज्जीवनमिह सुखमिति वै भूमा।
सङ्गिभिरखिलैर्विष्णुसमर्चा करणीया वा स्वयमिह
बाधायां तत्सङ्गस्त्याज्यो, विष्णुमुखत्वं सङ्गः।।

(गेहस्थो भुवि यो गतो, व्यवहृतिः कार्याऽमुना कीदृशी,
ब्रूतेऽमुष्य कृतेऽधुना) ननु यदि स्वस्त्रीकुटुम्बादयः।
श्रीमद्भक्तिपरायणा निजमनस्तुल्या भवेयु,स्तदा
तैरप्यत्र समर्चनं भगवतः सेवादिकं कारयेत् ।।७४१।।

ते सेवासु यदि प्रभोरलमुदासीना भवेयु- (स्तथा-
ह्यादेशे कृत एव सेवनकृतौ स्युः प्रस्तुतास्तर्हि) तैः।
नो संकार्य, परं क्रियात्स्वय,मथ स्युस्ते विरुद्धा यदि
श्रीसेवासु- (निमायिसेवनकृतौ प्रीतिर्निमाय्यात्मनाम्) ।।७४२।।

विहाय तर्हि पूर्णतो गृहं, विविक्तमेव च।
गतः क्रियात्समर्चनं निमायिसौहृदप्रभोः।।७४३।।

२६. स्नेही परमस्त्वपि परिहेयः।
स्नेहः- प्रेमा, प्रणयः प्रीति,श्चिक्कणघृततैलादिः
अनुरागोत्पादनसाधनमिह भगवति, तनुपोषणमिव।
सीतारामप्रियतापोषणहेतुस्नेहः स्नेहः
स्नेहो विषमिव हेयो यस्माद्रामरूक्षतोऽत्पत्तिः।।

दोषोऽस्ति कोऽपि नहि, विष्णुपराङ्मुखो य,-
स्त्यागेऽस्य, (केनचन चैव न रक्षणीयः।

संसारिभोगरुचितस्त्विह कोऽपि योगो),
(योगो, यतो भगवतो मिलनं हि साध्यम्) ।।७४४।।

२७. प्रियतमशरणागतिषड्विधता श्रीमद्वल्लभगदिता
कर्माणि श्रीकृष्णप्रीत्यै, सत्सङ्गौषधिधरणम्
विष्णुपराङ्मुखसङ्गित्यागो, भगवति दृढविश्वासः।
अनुकूलग्रहणं सेवायां प्रतिकूलपरित्यागः
आत्मनिवेदनपूर्वकमात्मनि कार्पण्यस्वीकरणम्।।

सेवायामनुकूलकं भगवतस्तस्यैव यच्चिन्तनं,
तस्यां यच्च विघातकं जगति तत्त्यागं क्रियात्सर्वथा।
विश्वासो भवति स्त्रियोऽस्य वचसः साध्व्या यथा पूर्णतो,
मत्पाणिग्रहणं चकार विधिनाऽग्नेः सम्मुखे यो वरः-।।७४५।।

कर्ता सोऽलमवश्यमेव दयितो मे रक्षणं, तत्समं
श्रीकृष्णे ह्यवलम्बरक्षण,मसावश्यन्तु मां रक्षिता।
भूयः स्वात्मनिवेदने भगवति स्थाने कृते तत्र वै
दैन्यातिग्रहणं, तथाऽस्ति शरणप्राप्तिस्त्वियं षड्विधा।।७४६।।

पञ्च श्लोकाः । ते सन्तीमे- ।।७४७।।

"गृहं सर्वात्मना त्याज्यं, तच्चेत्त्यक्तुं न शक्यते।
कृष्णार्थं तत्प्रयुञ्जीत, कृष्णोऽनर्थस्य मोचकः ।।१।।

सङ्गः सर्वात्मना त्याज्यः, स चेत्त्यक्तुं न शक्यते।
स सद्भिः सह कर्तव्यः, सन्तः सङ्गस्य भेषजम्।।२।।

भार्यादिरनुकूलश्चेत्कारयेद् भगवत्क्रियाः।
उदासीने स्वयं कुर्यात्, प्रतिकूले गृहं त्यजेत् ।।३।।

तत्त्यागे दूषणं नास्ति, यतो विष्णुपराङ्मुखः।
अनुकूलस्य सङ्कल्पः, प्रतिकूलविसर्जनम् ।।४।।

रक्षिष्यतीति विश्वासो भर्तृत्वे वरणे यथा।
आत्मनैवेद्यकार्पण्ये, षड्विधा शरणागतिः" ।।५।।

भूयः स्पष्टम्। एते बोध्याः- ।।७४८।।

(सर्वोत्तमं) गेहविसर्जनं, वा
श्रीकृष्णतोषार्थमशक्तिहेतोः।
स्थित्वा गृहे वै भगवत्सुसेवाऽऽ-
त्मना विधानं निखिलक्रियाणाम् ।।७४९।।

संत्याज्योऽखिलसङ्गो, ऽसामर्थ्ये भुवि साधु।
सत्सङ्गः करणीयो (भैषज्यं वरसङ्गः)।।७५०।।

कुटुम्बलोके, यदि सोऽनुकूलः,
स्थित्वा, ऽथ नो तं परितो विहाय।
एकान्तभावाद् भगवत्समर्चा-
सेवाविधानं नरदेहलक्ष्यम् ।।७५१।।

श्रीसेवोचितभावद्रव्यस्वीकरणं च।
एतस्याः प्रतिकूलत्यागः स्वात्मविवेकात्।।७५२।।

श्रीविष्णौ विश्वासः। शैथिलाच्छून्योऽद्धा ।।७५३।।

आत्मनिवेदनपूर्वं सद्गुणदैन्यनिधानम्।
(सज्जनकेवललक्ष्यं श्रीशरणागतिलब्धिः)।।७५४।।

सिद्धान्तोऽस्ति कियान्महान्ननु तथा सर्वात्मनां सम्मतः,
कुर्यात्कोऽपि कृतेऽपि तु स्फुटमियच्छङ्कां, सुपुष्टां निजाम्-।
वार्तामेव विधाय चात्र भुवने त्यागाश्रये जीवने
सम्पूर्णे विषयोपभोगमनसः कुर्यात्तु संपोषणम्- ।। ७५५ ।।

तदा, कृते तस्य किमस्त्युपायः,
शक्नोमि वक्तुं भगवत्पदेन।
अलं, तथैवेदमपक्षतोऽहं
"दुरत्यया मे सुहृदोऽस्ति माया"।। ७५६ ।।

श्रीचैतन्यसमक्षणस्तु सुमना भूत्वा तथैवं, पुनः
स्थित्वा गोकुलमध्यमेष भगवाञ्छ्रीवल्लभाचार्यजी।
पूजापद्धतिकप्रचारमकरोच्छ्रीबालकृष्णस्य कौ
(वृद्धे वत्सलता तथैव तरुणे, भावान्तरं नेदृशम्)।। ७५७ ।।

एतेषां प्रति बालकृष्णभगवच्छ्रीगोपतिं जायते
भूयोऽत्यन्तमलौकिकी व्यवहृति,र्मूर्तिस्तदीयाऽधिकम्।
एवाऽल्पा भवति प्रिया च, दिवसे भोगोऽर्प्यतेऽनेकशः
(कस्मात्प्रौढ़समाऽशनादिचरिते बालस्य तत्पोषणम्?)।।७५८ ।।

श्रेयो गौडमहात्मनां ननु यथाऽऽप्तं जीर्णवृन्दावन-
श्रीभूमेर्नगरीकृतेर्भुवि तथा श्रेयोऽस्ति गोस्वामिनाम्।
भूयो निर्जनगोकुलप्रभुधरासंवासनस्य स्फुटं
लब्धं गोकुलियात्मनां (विदधते सन्तः पुराणं नवम्)।। ७५९।।

ग्रन्थान् सोऽथ महाप्रभुः सहृदयोऽरैले स्थितो वल्लभा-
चार्यः संविदधौ बहूं,श्च समये यस्मिन् प्रयागेऽभवत्।
रूपानूपमुखादिभक्तसहितो गौराङ्गदेवस्तदा
श्रीमद्वल्लभको बभूव सुमनाः सोऽरैल एव स्थितः।।७६० ।।

श्रुत्वा निमायिप्रभुभक्तिभाव-
प्रशंसनं तन्मिलनार्थमेषः।
आप्तः स्वयं वल्लभकः, प्रसङ्गोऽ-
ग्रिमस्तयोरस्ति निमायिसाध्वोः ।। ७६१ ।।

●●

महाप्रभुवल्लभाचार्यस्तथा महाप्रभुगौराङ्गदेवः

२८. श्रीमद्गौरवल्लभौ फलितौ मधुरवत्सलाधारौ।
तत्सुखसुखिता प्रेमावृत्तिर्मधुरमधुरहृदयानाम्
परमार्थो, व्यवहारकुशलताऽमलवत्सलताऽऽश्रयणम्।
कृष्णरसस्फुटवितरणहेतो राधोत्पत्तिर्गौरः,
नन्दयशोदावत्सलमयता वल्लभतायां स्पष्टा।
गौराङ्गोऽथ वल्लभाचार्यो मधुरवत्सलप्रतिमे
कृष्णप्रियरसभाववितरणं कुरुतामरसेऽभावे।।

किञ्चित्कालमथ प्रयागजनतां संकीर्तनादात्मन-
श्चैतन्यो मधुरान्महाप्रभुरयं गौराङ्गदेवः प्रियः।
तस्थौ सङ्गमपार्श्वमेव सुमना नृत्येन कुर्वन् पुन -
श्चोद्दण्डेन निमायिभावहृदयः पूतां प्रसन्नां तथा।।७६२ ।।

सम्मर्दस्त्वभवद्यदा बहु, रहोवासेच्छया, तत्र तद्
दारागञ्जसमीपमेष सुमना ह्यागत्य तस्थौ प्रभुः।
चैतन्यश्च दशाश्वमेधनिकटे, प्रायः प्रसिद्धिः प्रभोः
सर्वेषां विदुषां प्रतिष्ठितनृणां कर्णे प्रयागस्य च-।। ७६३ ।।

मान्यानां धनिनां सतां सुमनसामासीदवाप्ता, तत -
श्चैतन्यप्रभुदर्शनाय बहु तत्संकीर्तनप्राप्तये।
लोकास्तन्निकटे निमायिहृदयास्त्वायान्त एवाऽभवन्
(श्रुत्वाऽऽश्चर्यगुणं दिदृक्षितहृदो नूनं प्रयान्ति प्रियम्)।।७६४।।

आचार्योऽपि महाप्रभोस्तु भगवाञ्छ्रीवल्लभश्चाशृणो-
च्छ्लाघा,मेकयुवा सुगौडधरणीजातश्च संन्यासिकः।
चेतो भक्तिमयेन दर्शकनृणां संकीर्तनेनात्मनो
नृत्येन प्रसभं तु चुम्बकनिभं कर्षत्यहो ! स्वामुखम्।। ७६५ ।।

तस्यापि प्रभुदर्शनार्थमभवद् वाञ्छा तदा, दर्शना -
दाचार्योऽपरकृष्णभक्तसुहृदः स्वं वञ्चितं तादृशः।
क्वाऽधाषाच्च महात्मनः, कतिपयैः शिष्यैः समं तु स्वयं
तत्प्राप्तः प्रभुदर्शनाय हि भवान् (श्रीवल्लभो वल्लभः)।।७६६ ।।

बुद्ध्वा चागत एव स प्रभुपदेऽनंसीत्तु संन्यासिनं,
मौनं चाऽऽस्त तथा स्थले, प्रभुरपि ख्यातिं ह्यमुष्याऽमलाम्।
चैतन्यः श्रुतवानभू,न्ननु यदा ज्ञातं तु तेनाऽस्त्यसा-
वेवाचार्यशिरोमणिः सहृदयः श्रीवल्लभो भट्टजी-।। ७६७ ।।

अनेन तत्स प्रससञ्ज, चाधिकं
प्रेमश्लिषां स त्वमुना प्रशंसनम्।
कुर्वंश्च पाण्डित्यतथाप्रभावयो-
श्चकार गौरप्रभुरस्य भूरिशः ।। ७६८ ।।

चैतन्यो निजपार्श्वमेव सुहृदोर्भ्रात्रोस्ततश्चानयो-
राचार्येण निषण्णयोः परिचयं संकारयामास सः।
रूपानूपसुसंज्ञयोः, परिचये संप्राप्त एवाऽनयो-
राचार्यः सुहृदोर्द्वयोः सहजयोः कर्तुं तदालिङ्गनम्-।। ७६९ ।।

सोऽसार्षीच्च तयोर्दिशं, निजपुरो दृष्ट्वा सरन्तं तथाऽऽ-
चार्यं दीनतया तथा कथयतस्तु भ्रातरौ द्वाविमौ।
संकोचेन सहाऽधिकेन सुहृदौ पृष्ठे सरन्तावुभौ
'मत्स्पर्शं भगवन्! भवान्न कुरुतां (स्पृश्यः पवित्रः सता)।।७७०।।

जाता विप्रकुलेऽपि चात्र यवनम्लेच्छप्रसङ्गाद् वयं
कौ प्रायो यवना बभूविम, तथा म्लेच्छाभमेवाऽभवत्।
आचारव्यवहारमात्रमखिलं नोऽद्यावाधिं, कौ भवा-
नाचार्योऽस्ति समर्चनीयचरणो विद्वान् कुलीनद्विजः।।७७१ ।।

स्पर्शक्रियार्हौ भवतो नहि स्व'-
स्तथा ब्रुवाणौ सहजाविमौ च।
आचार्यपादे प्रणतिं पतित्वाऽ-
काष्टां क्षितौ दूरत एव साधु ।। ७७२ ।।

आचार्यस्त्वनयोस्तथातिशयितां शालीनतां नम्रतां
दृष्ट्वा तादृशदीनताञ्च चकितोऽभूद् वल्लभः साम्प्रतम्।
आश्चर्येण, तदैव सोऽथ सुमना गायन्निदं वैष्णवः
श्रीमद्भागवतीयपद्य-(मपरं तादृक्षणात्स्मर्यते) ।। ७७३ ।।

२६. श्वपचोऽपि गरीयान् भुवने।
जात्यनुरूपा वृत्तिर्भवतु ह्युच्चावच्चाकारा
कर्मेन्द्रियजगतामिह, किन्तु स्वज्ञानेन्द्रियजगतः।
उपयोगं श्वपचो यदि कुरुते प्रेम्णा सच्चिद्विषये
देवहूतिकृतकपिलस्तुत्यां सोऽपि गरिष्ठः प्रथितः।
यज्जिह्वाग्रे नाम प्रलसति सततं कृष्णप्रभृति
तपोहोमतीर्थश्रुतिपाठं तैः सुकृतं कृतमखिलम्।।

तयोर्दधावाऽऽमुखमत्र शीघ्रं
च प्रेमपूर्वं विदधत्तयोश्च।
आलिङ्गनं वल्लभकः प्रशंसां
तद्भक्तिभावस्य चकार भूयः ।। ७७४ ।।

आचार्यस्तदनन्तरं निजगृहं चागत्य भिक्षाकृते
गेही प्रार्थितवान्महाप्रभु,मसावङ्गीचकार प्रभुः।
आचार्यस्य निमन्त्रणं, च चलितोऽरैलं समं सङ्गिभिः
स्वैराचार्यनिवासमेष निखिलै- (रात्मा भुनक्तीन्द्रियैः)।।७७५।।

अत्राऽरैलकृते प्रयाति यमुनामुत्तीर्य कश्चिज्जनो,
नौरेका रुचिरा तदैव च ततः श्रीवल्लभस्वामिना।
संग्राह्य प्रभुसर्वसङ्गिसहितं तस्यां निमायिप्रभुं
संवेश्य स्वयमासितं परदिशि (स्थाने विवेकिस्थितिः)।।७७६ ।।

श्यामं श्रीयमुनाम्बु मेघसदृशं दृष्ट्वैव चारु प्रभु-
र्नौकायामलमेव नृत्यमकरोद् भावं प्रगाढं गतः।
नौकाऽभूदधिकन्तु वेपथुमती, भीता भयेनाऽभवन्
सर्वे सङ्गिजनाः, स्वभावयमने नाऽभूत्प्रभुस्तु प्रभुः।। ७७७ ।।

कुर्वन्नृत्यमथ प्रभुः सहृदयः स प्रेम्णि कुर्वंस्तथो-
न्मत्तोऽकूर्दत सर्वथा तु यमुनातीक्ष्णप्रवाहान्तरे।
हाहाकारवोऽत्र नावि परितः प्रावर्तत प्रेमिणां
(कारुण्यं सति चेतसि प्रभवति स्थाने निमाय्यात्मनि)।।७७८।।

मज्जच्चोत्प्लवमानत्र यमुनाश्यामाम्बुनि श्रीप्रभो-
रङ्गं कान्तियुतं हिरण्यसदृशं भद्रं प्रतीतौ गतम्।
अत्यन्तं, यमुनाप्रवाहसलिलेऽसार्षीन्निमायिप्रभुः
(संसारे सरति ह्यमायिसरलो, वक्रः परं बध्यते)।। ७७६ ।।

तदैव के ह्यौडुपिकश्चुकूर्दे
केनापि धृत्वा विधिना च येन।
नावि प्रभुं स्थापितवा,नरैलं
पारे परस्मिन्नखिलाः समीयुः ।। ७८० ।।

आचार्यस्य च शिष्यसेवकजनश्च ग्रामवासी जन-
श्चक्रे स्वागतसत्कृतिं त्वतिशयं गौरप्रभोः सङ्गिभिः।
आचार्योऽपरसद्गृहस्थसदृशस्त्वत्यन्तया श्रद्धया
चक्रेऽभ्यर्थनमस्य भिक्षणमथ प्रेम्णा तथाऽचीकरत्।। ७८१ ।।

श्रीचैतन्यमहाप्रभोः सुमनसो भिक्षाक्रियानन्तरं
तस्योच्छिष्टमहाप्रसादमपरे भक्तास्तथा सङ्गिनः।
सर्वेऽलप्स्यत, सर्वभोजनतथासम्पादनानन्तरं
चाचार्यः प्रभुपार्श्वमापयदयं (सङ्गो हि सारोऽतिथेः)।।७८२ ।।

लोकेऽभ्यागतसेवनस्य च तथा सोऽयं महत्त्वं पुन-
र्गेही ज्ञापयितुं महाप्रभुपदोः संमर्दनायोद्यतः।
त्वत्यन्तं स्वपदे परं प्रभुरयं गौरोऽथ संकोचय-
न्नूचे लज्जितभावतः- (सहृदयः संकोचवान्मानवः)।। ७८३ ।।

'मामाचार्य ! भवान् कथन्नु कुरुते संन्यासिनं लज्जितं,
त्वाचार्यः पितृसन्निभो ननु वयोवृद्धोऽथ पूज्यो भवान्।
हेऽनर्थं कुरुते भवान्मयि किमेतत्साधुसंन्यासिनि?'
(त्वस्वस्थो ननु सेव्यते, लघुरपि स्नेहक्षुधं स्वीक्रियात्)।। ७८४ ।।

सारल्येन सहाऽधिकेन वदति श्रीवल्लभाचार्यजी
'संसारे भगवंस्तथाऽऽश्रमगुरुः संन्यासिताकारणात्।
सौभाग्येन तथापि मे ननु भवान् भूत्वाऽतिथिः प्राप्तवान्
कुट्यामस्ति ममाऽधुना (सहृदयो ह्यभ्यागतो दुर्लभः)।। ७८५।।

चाण्डालातिथिमप्यहो ! सुमनसा बुद्ध्वाऽथ नारायणं
शास्त्रेष्वस्य समर्चनं तु विहितं, नारायणस्याकृतिः।
साक्षादस्ति पुनर्भवांस्तु, भवतोऽद्धा पादचर्याऽध्वनाऽ-
हं भावी कृतकृत्य एव' (गृहिणां कार्तार्थ्यमभ्यागतात्)।।७८६।।

संकोचिप्रकृतिर्महांश्च सरलोऽभूत्काममेव प्रभु-
र्वृद्धानां तु पुरस्तथा सरलता लज्जा पुनः शीलता।
तस्यात्यन्तमवर्धतैव, स निजस्वाभाविकप्रश्रया-
दूचे'ऽहं भगवत्प्रसादलभनादाचार्यदेवाऽद्य हे ! -।। ७८७ ।।

सन्तुष्टो भवतो गृहेऽतिशयितं जातो, ममाऽस्ति ध्रुवं
सौभाग्यं परमं, यदत्र भवदातिथ्योपलब्धेर्मम।
आगत्याधिगतस्तथा स्ववसरः, प्रत्यक्षमाप्तं तु मे
तीर्थानां फल-(माप्तलब्धिरवनावात्मानुभूतिः स्फुटम्)।। ७८८।।

तु त्वत्तुल्यमहात्मदर्शनमहो ! साधारणानां नृणां
लोके दुर्लभमस्ति, यस्य च पुनः प्राप्तिः कृपायास्तव।
सौभाग्यं कथनीयमेव भुवि किं तस्यात्र' चैवंविधं
कुर्वाणौ तु परस्परं स्तुतिमभूतामेव सन्तावुभौ ।। ७८६ ।।

आचार्यस्तदनन्तरं प्रभोराज्ञातो गतवान् स्वभुक्तये।
आगत्य प्रभुसन्निधौ पुनश्चक्रे कृष्णकथादिकं गृही।। ७६० ।।

श्रुत्वा तत्समये प्रभोस्तिरहुताऽऽवासी प्रशंसामुपा-
ध्यायो मैथिलपण्डितो रघुपतिर्नामा तदीयेक्षणे।
एकः साम्प्रतमागतः सहृदयोऽरैले च तत्रैव, सोऽ-
भूदेकोऽच्छकविश्च साधुसुहृदां पादेऽनुरागं दधौ।। ७६१ ।।

कृत्वा स प्रभुपादयोः प्रणमनं स्थाने निषण्ण,स्ततो
लब्ध्वा तस्य महाप्रभुः परिचयं प्रोवाच तं 'तु श्रुतम्।
प्रख्यातोऽस्ति महान् कविर्ननु भवान्, काव्यं तदेव ध्रुवं,
काव्यं कौ ननु शक्यते कथयितुं-(काव्यं रसास्वादनम्)।।७६२ ।।

श्रीकृष्णलीलागुणवर्णनं वै
यत्राऽस्तु, पद्यं रचितं निजेन।

श्रीकृष्णसम्बन्धि भवांस्तु किञ्चिन्-
निशामयत्वत्र' (रसो हि कृष्णः)।। ७९३ ।।

ऊचे बद्धकरद्वयाञ्जलिरुपाध्यायः कविः स 'प्रभो !'
दैन्येनातिशयेन 'किन्नु कवितां विद्यामहं, कामतः।
युञ्जेऽतश्च ततः पदानि, वचसः श्रीकृष्णलीला परा,ऽ-
चिन्त्यास्तस्य गुणाश्च सन्ति निखिलाः (सोऽवाङ्मनोगोचरः)।।७९४।।

मायाविवर्तपतितः प्रभुरस्मि कर्तुं
तद्वर्णनन्तु किमहं ननु मूढजीवः?।
एकं तथाहि पदमस्ति, तथा प्रियं तन्
(न ज्ञायते-) ऽत्रभवतो भविताऽथवा नो'।। ७९५ ।।

ऊचे शीघ्रमथ प्रभुर्भगवतः कौ विद्यते सर्वथा
श्रीकृष्णस्य कृपोपरीह भवत,स्तर्ह्येव नम्रस्त्वियान्।
एतावत्प्रतिभास्थितावपि भवान्, ब्रूतां, विधाता भवान्
यत्किञ्चिच्छ्रुतिगोचरन्तु भवितेवाऽद्धा तदेवाऽमृतम्'।। ७९६ ।।

उक्तेऽस्मिन् प्रभुणा महामहिमकोपाध्यायनामा कविः
कृष्णश्रीपितृनन्दकस्तुतिपरं प्रेमात्मपद्यं त्विदम्।
गायन् कोकिलकूजिताभमधुरादात्मीयकण्ठात्स्वरा-
दत्यन्तं त्वभवत् (प्रियप्रियतरः प्रेयोऽवतारो यतः)।। ७९७ ।।

३०. भीता भवतो भजन्तु विविधम्।
श्रुतिमपरे स्मृतिमितरे भारतमन्ये मनुजाः सुधियः,
अहं नौमि तं नन्दं, यस्याऽलिन्दे परमानन्दः।
'राम ! राम ! हे !' ब्रूते सर्वो, नहि 'दशरथे'ति कश्चित्
ब्रूयादेकवारमपि 'दशरथ!' तत्कोटिकोटिसुफलम्।।

पद्येऽस्मिञ्छुत एव साम्प्रतमभूद् गौरो निषण्णस्तथो-
त्थायाऽसौ शयनाद् बलादलमुपाध्यायस्य चालिङ्गनम्।
कुर्वञ्जल्पति 'वाह ! धन्यमहहा ! भाग्यप्रशंसां क्षमः
श्रीनन्दस्य विधातुमत्र भुवि कः, प्रोक्तं कथं भोः! कथम्?-।।७९८।।

"वन्दे तु नन्दमहमत्र तथाहि यस्या-
लिन्दे चकास्ति परमेश्वर-मूर्तरूपः"
पद्यं हि सुन्दरमहोऽधिकमेव सत्यं,
ब्रूतामपीह कृपयेदृशमेव चान्यत्'।। ७९९ ।।

कवेर्विधत्तां कविताप्रशंसा-
मात्रं यथार्हं तु भवा,नवाप्तः।
तेनैव मोदो बहु जायतेऽस्य,
श्लोकस्य शंसैव पुरस्क्रियाऽलम् ।। ८०० ।।

गायन् पुनरुपाध्यायोऽभवदथ।
तेनैव निजकां कण्ठेन कविताम् ।। ८०१ ।।

३१. ब्रूमो मधुरमधुरमिह तत्त्वम्।
सम्प्रति कथयितुमीशे? सम्प्रति को वा प्रतीतिमेतु
गोपतितनयाकुञ्जे गोपीकामुकपरमानन्दः।
गोपी नवनीतेन्द्रियवृत्तिस्तत्कामी मधुमूर्तिः
हृषीकेशपुरुषस्निग्धान्तः स्फुटति श्यामकिशोरः।।

श्रुत्वेमानि पदानि सोऽथ परमप्रेमाणि च श्रीरघू-
पाध्यायस्य महाप्रभुः प्रकटयन्मोदं वरज्ञानिनः।
प्रश्नं पृच्छति तं तथा कतिपयं, प्रोचे निमायी 'महा-
भाग ! प्राञ्जलधीनिधे ! कविवर! प्रज्ञाबहिर्वर्तते-।।८०२ ।।

नूनं त्वदीयनिशितप्रतिभाप्रशंसा-
कार्यं, लषामि भवतोऽहमदस्तु वेत्तुम्।
रूपेषु बोधति भवान्निखिलेषु सर्व-
श्रेष्ठं तु रूपमिह किं त्विह नामरूपे?'।। ८०३।।

'सर्वश्रेष्ठमहं हे ! बोधे श्यामलमेव।
श्यामस्यैव निमायिन्नास्यं स्वादु निमायि'।। ८०४ ।।

'अच्छं, बोधति किं हे ! वासस्थानसमूहे।
सर्वश्रेष्ठनिवासस्थानं?' (सिध्यति वासात्)।। ८०५ ।।

'मधुरपुरीमधुत्वसम्मुखेऽत्र विरसा पुरी तथाऽखिला।
मधुपुरी ततस्तु सर्वतो जगति वासकस्थलं वरम्'।। ८०६ ।।

'उचितमेतदस्ति वै, परं भगवतो वयस्सु किं वयः?।
वरवरं निबोधते भवान्' (रसयते वयो विशेषकम्)।। ८०७ ।।

ऊचे गद्गदकण्ठतो रघुपतिः 'प्रष्टव्यमेतत्त्वपि
स्थाने किञ्चन गौरभावुक ! वचः ?, कौमारमेव प्रभो ! ।
अत्राऽऽस्ते कमनीयमध्वनि वयः कृष्णस्य तस्याऽखिल-
श्रेष्ठं ध्येयमथात्मनाञ्च परमं (कामः कुमारेऽप्रभुः)।। ८०८ ।।

आनन्दाब्धिविहारं कर्तुं त्वर्हति चेतः।
उन्मत्तं ननु भूत्वा तस्यैव ह्यवधानात्'।। ८०९ ।।

अत्यन्तमेव प्रभुकः प्रसन्नः
पप्रच्छ भूत्वा'ऽस्तु, गृणात्वथैकम्।
वचः पुनः, काव्यरसेषु सर्व-
श्रेष्ठं भवान् बोधति कं प्रमातः !।। ८१० ।।

सार्धं दीनतयाऽधिकं कविरुपाध्यायो बभाषे 'प्रभो!
वार्तेयं कथनस्य नास्ति, विषयो गम्योऽनुभूतेस्त्वयम्।
शृङ्गारस्य पुरः परस्तु भवितुं शक्नोति को वा रसः?
श्रेष्ठोऽस्यां भुवि सम्मतोऽखिलतया (भावाः प्रभेदाः रतेः)।।८११।।

अन्यस्मिन्ननु नाममात्ररसता (मन्ये) रसे, वस्तुतो
वक्तव्यो हि रसोऽस्ति यः, स तु रसः शृङ्गार एवाऽऽदिमः'।
श्रुत्वेमानि तदुत्तराणि तदुपाध्यायस्य चालिङ्गनं
मत्तः प्रेम्ण्युपरि प्लुतिञ्च विदधद् गौरो निमायी जगौ-।।८१२।।

श्रीमाधवपुरीपद्यं प्रभुरिदम्-
(माधुर्यमनसां कृष्णप्रमुखता) ।। ८१३ ।।

३२. परतानिश्चयनं परमोऽर्थः।
नेत्रप्रियताऽधिकता श्यामलवर्णश्यामाकारे
वासस्थानेषूत्तमवासो मधुपुर्या मधुवर्षी।
ध्येया कृष्णकिशोरावस्था, मधुरो नन्दकिशोरः
रतिभावो भावानां मूलं, तद्रसपाको ह्यपरः।।

एवं गौरमहाप्रभोः सुमनसः प्रश्नोत्तरं तद्वघू-
पाध्यायस्य कवेर्निशम्य पुरुषाः सर्वे प्रसन्नाः स्थिताः।
तत्राऽत्यन्तमथाऽभवं,श्च समयः सन्ध्याऽऽगतः सन्निधा,-
वाचार्यं स्वनिवर्तनस्वनुमतिं गौरो ययाच प्रभुः ।। ८१४ ।।

श्रुत्वा गौरनिमन्त्रणाग्रहमिदं तद्ग्रामवासी द्विज-
श्चक्रेऽन्योऽपि, जगाद तर्हि सुमनाः श्रीवल्लभाचार्यजी।
स्थानेऽत्राऽस्य पुनर्निधानमुचितं बोधेऽस्मि न भ्रातरो !,
भूत्वा प्रेम्णि तु विह्वलोऽत्र यमुनामध्ये ह्ययं कूर्दते।। ८१५ ।।

स्थानाच्छ्रीयमुनावलोकनमितः संजायतेऽनन्तरं,
यत्स्थानादहमेतमानिनय तत्तत्रैव संस्थाप्य तु।
आगन्ता,ऽस्तु पुनश्च यस्य सुमनोभावो, गृहीत्वा तथाऽऽ-
यायात्सोऽमुमलं' (निमायिसुमनोभावे हि भावः सतः)।।८१६।।

आचार्यवाक्श्रवणतो निखिला बभूवु-
र्मौनं, कुटुम्बसहितोऽकृत वल्लभोऽस्य।
अभ्यर्चना,मथ तथाहि दंशाश्वमेधे
चासय्य नावि स तमापयति स्म घाटे।। ८१७ ।।

●●

रूपस्य प्रस्थापनं तथा प्रभोः काश्यामागमनम्

३३. कालोऽर्पयति प्रियसत्सङ्गम्।
नानाजन्मनि पुरुषो भ्राम्यति, लभतेऽतादृक्सङ्गम्
जन्मविशेषे काले लभते तादृक्प्रियसत्सङ्गम्।
यश्चैतन्यप्रियसत्सङ्गः श्रीरूपेणाऽवाप्तः
भक्तिरसामृतसिन्धुप्रभृतिग्रन्थास्तत्फलममृताः।।

श्रीरूपः प्रभुपादपद्मनिकटे भ्रात्रा प्रयागे सहाऽ-
नूपेनावसदात्मनो दश तथा यावद् दिनानि स्थले।
मेधावी मृदु भावुकश्च मतिमानासीदसावास्तिकः
श्रीचैतन्यमहाप्रभोरतिकृपापात्रं निमाय्यात्मनः ।। ८१८ ।।

आसीत्काममुष्य सम्प्रति पुनः सन्देह एवाऽत्र किं
कल्याणोद्भवने, तथाहि सुमतिः कल्याणरूपस्त्वसौ।
आसीत्पूर्वत एव, कौ गुरुकृपा जाताऽस्तु यस्योपरि
स्थाने प्राग्-(गुरुदीपको नयनयोरावश्यकोऽन्धे भवे)।।८१९ ।।

भूयः सोऽस्य विनश्वरस्य जगतोऽनित्येषु भोगेषु वै
शक्नोति क्षणिकेषु केन विधिनाऽद्धा कर्तुमेवात्मना।
सत्सौख्यानुभवं?, करिष्यति कथं स्पर्शं स हंसो गतो
भूयो वायसभोजनस्य? (सुमनोयोगो विधौ पावने)।। ८२० ।।

संसारे कृपया गुरोस्तु भवितुं किं शक्यते नो नृणां?,
भूयात्साम्प्रतमेकवारमपि चेत्पात्रे कृपा सद्गुरोः।
भूयस्तत्पुरुषः कियानपि महान् कामं स पापी कथं
न स्याद्, भावि विखण्डितं सपदि वै तत्संसृतेर्बन्धनम्।।८२१।।

मुक्तो बन्धनतो गुरोः परकृपापात्राधिकारी स वै
भावी, साकृतिरूपनाम तु गुरुर्हि ब्रह्मणो विद्यते।
ईशः सद्गुरुरेव, चास्थिपललप्रत्याकृतिर्नो गुरुः
शक्नोत्येव भवे कदापि भवितुं (दीपो विशिष्टो, रविः)।।८२२।।

अल्पज्ञस्य तु सर्वशक्तिपदवी प्राप्तुं क्षमा भाविनी
कस्मादेव शरीरिणः, सहृदयश्चैतन्यदेवप्रभुः।
श्रीरूपस्य दृशीह चास्थिपलयोरासीन्न जीवो वपु-
र्धारी (ब्रह्म विशेषरूपसहितं कालेऽत्र काले स्फुटम्)।।८२३ ।।

आसीत्तस्य कृते स गौरसुमनाः प्रेमस्वरूपस्तथा
साकारः, सविशेषमच्छमलमासीद् ब्रह्म, कुत्रापि नो।
गौरस्य त्ववतारिताप्रणयने चेष्टा कृता तेन (का -
वार्तानामवतारमार्गणमहो ! प्रेयान् हृदि प्रेमिणः)।। ८२४ ।।

श्रीकृष्णस्य स विग्रहं निजगुरुं बुद्ध्वैव रूपोऽत्र तल्-
लीलानां कथनं चकार, यदि कौ श्रीकृष्णचैतन्ययोः।
तद्दृष्टावभविष्यदन्तर,मदोवार्ताप्रमाणीकृतौ
तच्चेष्टामकरिष्यदेष-(हि मनोभावानुसारं कृतिः)।। ८२५ ।।

चैतन्योऽस्त्यवतार एव भुवने स्थानेऽवतारीह वा,
लोको बोधतु चाऽत्र किञ्चिदपि कौ, चैतन्य एवास्य तु।
श्रीकृष्णोऽस्ति, च सत्यमेव भुवनेऽत्राऽदो वचो वस्तुतो,
यत्रास्त्यात्मनि भेदबुद्धि-(रिह कौ भेदात्मनाऽनेकता)।।८२६ ।।

तत्रैव क्रियते तथाऽस्य वचसः पूर्णाग्रहो-विद्यतेऽ-
सावेवं ननु नै,वमस्ति, सुमनः श्रीरूपदृष्टावभूत्।
भावो भेदमयो न, तत्तु लिखति श्लोके त्वसौ मङ्गले
स्थाने भक्तिरसार्णवस्य (रसधिस्थायी प्रियात्मा हरिः)।।८२७।।

३४. वन्दे चैतन्याङ्घ्रिसरोजम्।
मूकं कुरुते वाचालं श्रीमाधवपरमानन्दः
पङ्गुं लङ्घयते गिरिशिखरं ह्युदारया निजकृपया।
रूपवराको भक्तिरसामृतसिन्धुप्रणयनवृत्तौ
यत्प्रेरणया घटितः, सोऽनुग्रहविग्रहहरिगौरः।।

एष्वेव वै दश दिनेषु तथा प्रयागे
स्थित्वा बुबोध सुहृदः प्रभुतस्तु रूपः।
अत्यन्तगूढमृदुमर्म निमायि भक्ते,-
र्ग्रन्थेषु वर्णितमनेन तदेव च स्वे।। ८२८ ।।

सत्याऽऽसङ्गमदोहृदः सहृदयो वेत्ति स्म गौर,स्ततोऽ-
स्मै वैराग्यमुवाच स ह्युपदिशन् 'हे रूप ! पश्य स्फुटम्
संसारोऽयमहो ! कियांस्तु विषयाभोगेषु मत्तो भवन्-
नास्ते (मानवताऽपि किं विषयतामत्तप्रशस्ता भवेत्?)।।८२९।।

पुत्रद्रव्यकुटुम्बकीर्तिपदवीप्रेयःपदार्थाप्तये
चिन्तायान्तु महार्घजीवनमिदं व्यर्थं तथा जायते।
एता रज्जव एव जीवमवनौ वै कामिनी काञ्चनं
कीर्तिश्चात्र दृढं बबन्धु-(रवनौ कश्चिन्मुमुक्षुर्नरः)।। ८३० ।।

एतत्कारणतोऽयमल्पमपि नो शक्तोऽटनेऽतस्ततो,
मार्गोऽदस्त्रितयात्पुनर्भगवतः प्राप्तेः परस्यां दिशि।
त्यागं संकुरुते नरः स्वमनसा त्वेषां त्रयाणां यदा,
स्थाने तद्दिशि जायते स पुरुषो यानाधिकारी तदा।। ८३१ ।।

येषामेषु तु जायते त्रिषु सुखस्वादानुभूतिः, क्व सद्-
भक्तिस्तत्र, च कीदृशं मनुमतां प्रेम प्रभौ, स प्रभौ-।
किं वार्ताकरणस्य, शब्दकथनस्याऽऽस्तेऽधिकारी तथा
नाप्येकं (ह्यधिकारिता कुशलतौचित्याऽऽक्तभावात्मनाम्)।।८३२।।

यो बद्धः परितः स्वयं, भगवतो मार्गस्य तद्वर्णनं
संसारे तु विनोदमात्र,मथ किं कश्चिद् विनाऽऽस्वादनम्।
स्वादं संकथये,ज्जनोऽपि रसने युक्तं क्षमो जायते
नो वक्तुं, तु निशम्य कोऽपि भविता किं वक्तुमेव क्षमः?।। ८३३ ।।

रूप ! त्वं सुमनस्तु चिन्तय मनाग्, यत्स्त्रीकृते जायते
संसारो ननु वातुलो, ह्यवितथं सा विद्यते किं भवे?।
एका पुत्तलिका तथाहि भुवनेऽदःपञ्चभूतात्मिका
(बालाभः पुरुषोऽत्र खेलति भवे स्त्रीपुत्तलीसंयुतः)।। ८३४ ।।

काञ्चित्सुन्दरसुंन्दरीमिह रहस्त्वं पश्य, तस्यां स्थितौ,
रोगः संग्रहणी यदाऽस्तु जनितस्तस्या,श्च सेवाकृते।
तत्पार्श्वे मनुजस्तु कश्चिदपि न स्याद्, द्रक्ष्यसि, ह्युद्भवन्
तत्सम्पूर्णशरीरतस्तु भविता दुर्गन्धिरेतत्स्त्रियः- ।। ८३५ ।।

वस्त्रस्पर्शकृते लषिस्यति मनो नो, नासिकातस्तथाऽ-
स्या गाढं मलमासरच्च भविता,ऽस्याः शौचयानात्पुनः।
वारम्वारमहो ! जवासममुखं पीतं भवेत्कुञ्चितं,
यातेऽन्तो नयने तथाह्यभवतां स्रस्तावभद्रौ स्तनौ।। ८३६ ।।

स्यान्नेत्रोभयकोणयोर्ननु भृतं स्थाने मलं, तद् भवेत्
पृष्ठेऽस्या जठरं विकुञ्च्य लगितं, लिप्ते भवेतां तथा।
जङ्घे मूत्रपुरीषयो,र्ननु तनौ रोमाञ्च एवेक्षणाद्
येषां सम्मुखमागतस्तु भविता (सौन्दर्यमा! दैहिकम्)।।८३७ ।।

पीताः संपतिता नखा, ननु मुखे दुर्गन्धिराविर्भवन्
स्याद् वाण्यामतिवेदना च करुणा प्राप्ता, च तस्याः पतिः।
तां सर्वस्वमितश्चतुर्दिनपुरा मत्वाऽनुभूतिं भवेत्
कुर्वंस्तत्परिरम्भणे तु महतोऽत्यन्तं सुखस्यात्मनि-।। ८३८ ।।

दूरं तत्परिरम्भणं त्वभवदाश्चैवं स एव स्थितौ
स्थाने स्थातुमपि क्षमो न निकटे, रूपं तथेयच्च यत्-
संसारे भवितुं क्षमं तु विकृतं, कुक्षौ मलस्यैव यत्-
सौन्दर्यं निभृतस्य निस्सरणतो दुर्गन्धयुक्तस्य तु-।। ८३९ ।।

नष्टं हि क्षणतो भवे,त्सुमनसस्तस्मिन् सुखान्वेषणं,
बुद्ध्वा स्वध्वनि जीवनस्य परमं सौख्यं तदेवात्मनि।
तस्याप्त्यै च विमत्तता तु कियदस्थाने महामूर्खता?
(भूमौ मानवदेहधारणफलं सच्चित्सुखास्वादनम्)।। ८४० ।।

देहेऽस्मिन्ननु पञ्चभूतघटिते युक्ते नवच्छिद्रकैः
क्वाऽऽनन्दो मलमूत्रवृन्दभरितेऽरे ! कुत्र शान्तिः सुखम्?।
सौन्दर्यं क्व?, परात्मनो भगवतो ह्यानन्द-छाया परं
साऽऽसी,द्या विकृतेः कुरूपगतितां प्राप्ताऽभवद् वस्तुतः।।८४१।।

छायां तु विहायाऽऽनन्दं च यथार्थम्।
संमार्गय, शान्तिर्ह्याप्ता भविता ते।। ८४२ ।।

रूपाऽस्ति त्वियमेव काञ्चनदशा,ऽदः कामिनीतः परं,
पृथ्वी-नाम वसुन्धराऽस्ति, वसुतो रत्नं जनैर्गृह्यते।

पृथ्व्यामत्र च संभूतानि विविधं रत्नान्यसंख्यानि, च
द्वीपाः सप्त तथाब्धयो,ऽपरिमितं तत्रास्ति रत्नं भृतम्।।८४३।।

सप्तद्वीपवसुन्धराधिपतितां प्राप्यापि शान्तिः परं
मर्त्यस्यात्र न लभ्यते, त्रिभुवनस्वामित्वमिच्छत्ययम्।
स्वामित्वं लषतीह स त्रिभुवनस्वामी च मर्त्यो गतः
संसारे सुतरां चतुर्दश भुवा-(मन्तः स्पृहाया न नुः)।। ८४४।।

ब्रह्माण्डस्य तथाखिलस्य विहिते स्वामित्वलाभेऽपि नो
शान्ति,स्तद् दश विंशतिं त्रिभुवने भूमौ सहस्रं शतम्।
ग्रामान् योऽधिकृतान् विधाय मनुजस्तत्स्वामितायाः स्वकं
कर्तुं वाञ्छति हर्षितं, स तु कियान्मूर्खो महान् वर्तते।।८४५।।

पश्य ध्यानपुरस्सरं, मृदि तथा स्वर्णे च भेदोऽस्ति किं,
पृथ्वीतस्तु यथाहि निस्सरति मृच्छ्वेता च पीता हरित्।
कृष्णा स्थानविभेदतो, ननु तथा हेमाऽपि रूप्यं पुनः
कौ पीता धवला मृदेव (धरणीरूपान्तरं वस्तुकम्)।। ८४६ ।।

श्रेष्ठत्वं निहितं हि तत्र मनुजैः, श्रेष्ठं तु तद् विद्यते,
श्रेष्ठं त्वं स्वयमेव तत्तु चकृषे, भूयस्तथा तु स्वयम्।
मत्तस्तस्य च लब्धयेऽत्र यतसे,ऽस्तित्वं पृथग् तेऽस्ति नो
छायायाः- (परमात्मसूर्यकिरणाच्छायोद्गमस्त्वन्यतः)।। ८४७ ।।

छाया ते वपुषोऽस्ति, च भ्रमवशाच्छायां ग्रहीतुं तु तां
धाव त्वं, तु कथं कियन्तमपि नोऽशक्यं प्रयासं कुरु।
आगन्ता न करे कदाचिदपि ते छाया, कथं धावनात्
पृष्टे क्वापि तु शक्यतेऽत्र भुवने छायां ग्रहीतुं क्षणे?।।८४८।।

छायास्तित्वममन्यथा ननु पृथक् तु त्वं, यदा तां निजा-
मेवाऽग्रेसर च प्रबुध्य भुवने हित्वा, तदा सा पुनः।
त्वत्पृष्ठे त्वनुयास्यति, क्व दिवसे सा यातुमेव क्षमा
हित्वा त्वा,मबुधो वचो मम?' (रहोबोधार्थमेवाऽत्र वाक्) ।।८४९।।

'आम्' रूपो वदति 'प्रभो' ! ननु शनैः 'किञ्चिद् बुबोध त्वहं
किञ्चित्सम्प्रति, वस्तुतो न तु तथा श्रेष्ठत्वमस्तीह कौ।

स्वर्गे, नो च कनिष्ठता मृदि, हृदि स्थाने परं श्रेष्ठताऽ-
स्माकं चास्ति कनिष्ठता-(ऽवरवराधारो मनोमान्यता)।।८५०।।

इच्छेद् यत्तु यदा कौ मन्वीताऽवरमत्र।
मन्तुं यर्हि तथेच्छेत्तन्मन्वीत वरं तत्'।। ८५१ ।।

'आ'मुक्तं प्रभुणा'ऽस्ति सत्य,मधुनाऽदो विद्धि चेत्थं, यथा
श्रेष्ठं सम्प्रति रूप्यमेव मनुषे स्म त्वं तु यावत्क्षणम्।
तस्यैवाप्तिकृते हुसेननृपतेस्तस्थौ सभायां तथा
जात्याऽभूद्यवनो हुसेननृपतिस्त्वं संस्कृतो ब्राह्मणः।। ८५२ ।।

स्वामिद्रोहिकृतघ्नकः स, सुकृतैस्त्वं जीवनाऽऽवाहको,
मूर्खः स, त्वमभूश्च पण्डितनरः, सोऽभूत्प्रमादी तथा।
आसीस्त्वं ननु जागरूकपुरुषो,ऽधर्मी स, चासीः पुन-
र्धर्मात्मा (महदन्तरेऽपि सति हि स्तः सङ्गिनौ स्त्रीनरौ) ।।८५३।।

हीनस्त्वन्निखिलेऽभवत्स वचने, श्रेष्ठोऽभवस्त्वं तत,-
स्तत्तुल्यः परमत्र न त्वमभवः सम्पत्तिशाली भवे।
सर्वश्रेष्ठसुखस्य साधनमहो ! सम्पत्तिमेवाऽबुध-
स्तावत्त्वं (वसु भौतिकं तु परमं, साधारणानां मतिः)।।८५४।।

तस्माद् धार्मिकतां च जागरुकतां सर्वं तु बुद्ध्वाऽऽत्मनो
विद्वत्तां च कुलीनताप्रभृतिकं तुच्छं, सदैवाऽभवः।
तन्मूर्खस्य पुरस्तथा थर-थरं वै कम्पमानो यथा
भीतोऽस्थाः (परमार्थबोधविरहान्नाना ह्यसन्मान्यता)।।८५५ ।।

ज्ञातं सम्प्रति ते यदा–नहि सुखं सत्यं परं विद्यते
वित्ते, तर्हि तु यत्त्वया श्रमजलस्थानेऽर्जितं कौ धनम्।
उत्स्राव्याऽस्रमहो,ऽद्य भक्तिपथके जाते प्रवेशे तु तत्
प्राप्तो मृत्तिमिव प्रलोट्य, सुमनः! किं सत्यमस्तीति नो?' ।।८५६।।

रूपः शनैः कथयते 'किमथ प्रभो ! मे
तानि प्रतीतिमगमन्ननु रूप्यकाणि।
भारो यथा तु दिवसेन यथा तथा स्वं
पिण्डं विमोचितममूनि विलोट्य कृच्छ्रात्'।। ८५७ ।।

श्रीरूपस्य करं प्रभुर्निजकरे धृत्वा जगाद स्वरे
तस्मिन्नेव 'तु चिन्तयाऽत्र सुमनो ! भद्रं त्वमेवाऽधुना।
रूप्येऽस्ति त्वथ गौरवं?, त्वमबिभेर्नाऽद्धा हुसेनान्नृपाद्,
भीतेः कारणमेतदेव - न नृपाद्रूप्याप्तिविघ्नोऽस्तु मे।।८५८ ।।

जातः सम्प्रति ते यदा मतिमतोऽद्धा सम्पदस्तुच्छता-
बोध,स्त्वेकहुसेनशाहनृपतिर्लक्षं हुसेनाश्च किम्?।
आयायुर्नहि भेष्यसीह तदपि त्वं तादृशेभ्यो, यतोऽ-
भूद् भीर्यन्ननु कारणादलमहो ! नष्टन्तु तत्कारणम्।।८५९ ।।

लूनायां व्रततौ विषस्य धरणेः स्थानात्तु भूयो यथा
तस्याश्चोपरि जायमानफलतो मृत्योर्भयं मृत्युदात्।
लोकानां नहि जायते, स्वहृदयान्निस्सारिते सम्पदः
श्रेष्ठत्वेऽत्र तथा पुनर्भुवि पुरो नावश्यकं कस्यचित्-।।८६० ।।

दैन्यस्याऽऽश्रयणं तथाकृपणतापूर्वन्तु वा याचनं,
यावत्कौ गुणकारणान्नहि वयं मत्वा महान्तं, परम्।
स्वीकुर्मो धनकारणान्निजहृदि स्थाने महान्तं जनं,
तत्कुर्मो धनिकादरं व्यवहृतौ, विद्धीह तावत्तथा-।। ८६१ ।।

स्थाने नो हृदये विराजति पुनर्वृत्तिस्तथाख्यासुरी-
(वित्तं केवलमस्ति साधनमहो ! सौख्यस्य) - बोधात्मिका।
यद्दृष्टौ न धनस्य किञ्चिदिह कौ स्थाने विशेषं मह-
त्त्वं, यस्त्वेकविकारमेव तु धनं पृथ्व्यास्तथा बोधते-।। ८६२।।

कस्यापीह पुरः कथं कृपणतापूर्वं स याचेत्?, तथा
तद्दृष्टौ सम एव चास्ति भुवने सर्वो धनी निर्धनः।
तृष्णैवात्र धनस्य भेदमवनौ भावं जनानां हृदि
स्थाने वै धनिनिःस्वयोर्जनयति (स्वाप्तिः पराशाक्षयात्)।।८६३ ।।

यदा न किञ्चिद् ग्रहणस्य लोका-
त्कुतोऽपि वाञ्छैव हृदि स्वकीये।
तदा यथैवाऽस्य धनी तथैवाऽ-
त्राऽकिञ्चनो (भेदमतिः स्पृहातः)।। ८६४ ।।

३५. तुष्टे मनसि क्षित्यामस्यां को धनिकः को निःस्वः।
मानसमेव मनुष्याणामिह हेतुर्बन्धनमुक्त्योः
स्वस्मिन् विषये यादृक्, तादृङ्मनोमुख्यताऽन्यस्मिन्।
तृष्णाक्षयतो यादृक्सुखता तत्षोडशमप्यंशम्
इहाऽमुत्रसुखमर्हति नाऽद्धा, मनोविलासस्त्वलमिति।।

एषैवाऽस्ति दशा (प्रभुः कथयते) कीर्ते, र्ह्यनित्या पुन-
स्तुच्छैवास्ति तथाहि कीर्तिरपि कौ स्थाने यथाऽस्यां धनम्।
एतामत्र यथार्थतस्तु मनुतामेकं धनस्यैव का-
वङ्गं (दैहिकमर्जनं हि निखिलं देहाश्रितानां धनम्)।।८६५।।

प्राप्येते भुवने प्रयत्नकरणाद् वित्तञ्च कीर्तिः कथं?,
प्राप्येते ननु पूर्वजन्मविहितैरेतेऽत्र कौ कर्मभिः।
भत्ताभा भरतो जडो ननु यथा स्थानेऽभविष्यंस्तथा
मुक्ता जीवनमा! व्यतीत्य भुवनेऽसंख्या पुनर्ज्ञानिनः-।।८६६।।

तेषां नाम न कोऽपि वेत्ति, भरतस्यैवाऽवधूतत्वकाऽऽ-
दर्शस्थापनकर्मकीर्तिरवनौ भाग्येऽभवत्कीलिता।
जायन्ते धनिका भवे तु बहवो मूर्खास्तथा पूर्णतः,
कुर्वाणा धनहेतुयत्नमवनौ सन्ति प्रविद्वज्जनाः- ।। ८६७ ।।

तेषां तावद् वित्तं कीर्तिः । एव प्राप्ते नो जायेते।। ८६८ ।।

३६. कथितं तदैव तु नृणां विषये-
फलन्ति तरवो भूस्थितबीजोद्भूताः साधारणतः
इह याथार्थ्ये फलनं धर्मः प्रकृते,स्तत्फलभूः स्त्री।
निष्कर्षोऽयं सञ्चितफलनं, विद्या न च पुरुषार्थः,
फलति परं भाग्यं पुरुषाणां, तद् विहितप्रारब्धम्।।

सर्वत्राऽध्वनि भाग्यमेव तु फलीभूतं भवत्यर्थतः,
सर्वं कौ नहि विद्ययैव नितरां सम्पद्यते नैव च-।
संसारे ननु पौरुषेण, च धनं कीर्तिर्यदा भाविनी
भाग्यस्यैव गतेस्तथाह्यधिगतेऽस्माकं, तदा कीर्तये-।।८६९।।

मूर्खत्वं भवति प्रयत्नकरणं, पापस्य कौ वासना-
जन्यस्याऽभिनवस्य चात्र रचनामेकस्य कुर्मो वयम्-।
कृत्वा कीर्तिमनोरथं, भुवि ततः कुर्वन्ति कीर्तेः कृते
ह्यायासं ननु तेऽत्र मन्दमतयो (व्यर्थश्रमी मन्दधीः)।।८७० ।।

ब्रह्माण्डस्य तु यश्चतुर्दशभुवोऽनेकस्य चक्रे तथा
स्वामित्वं, ननु तादृशः समजनि ब्रह्मा ह्यसंख्यः पुनः।
नष्टश्च,त्र न कोऽपि वेत्ति भुवने नामापि तेषां, तदाऽ-
सौ क्षुद्रो भुवने स्वकीर्तिममरां प्राणी विधातुं नरः-।। ८७१ ।।

वाटोद्यानककूपमन्दिरजगत्स्वं नाम कृत्वैव चाऽ-
क्षुण्णं रक्षितुमिच्छतीह, स कियान्मूर्खो महान् वर्तते।
भ्रातर्हेऽस्ति पतिव्रता सहृदया कीर्तिस्तु, सा पुंश्चली
स्त्री नास्तीति, तमेकमेव पुरुषं वव्रे तु सा श्रीहरिम्।।८७२ ।।

तस्मान्मुञ्च तु मुञ्च मुञ्च सुमनस्तस्यास्तथाऽऽशां, न तेऽ-
स्मिन् कीर्तिर्मिलितुं क्षमा न मिलितुं हे रूप ! मित्र ! क्षमा।
संसारे मिलितुं क्षमा नहि, पतिः कीर्तेः स तु श्रीहरि,-
स्तस्मात्तत्प्रभुकीर्तिवर्णनकृतौ कल्याणमस्तीह कौ।। ८७३ ।।

संसारे यदि कीर्तिरत्र सुहृदा ते वर्धनीयैव, तत्
कीर्तिं श्रीलहरेस्तु वर्धय, भुवि त्वं धेहि कीर्तिं त्विमाम्।
भूमौ कीर्तिपतेस्तु कीर्तनकरो भृत्योऽह,माम्, भाविनी
कीर्तिस्त्वां हरिसाधुकीर्तनकरत्वाल्लाडयन्ती स्वतः।। ८७४ ।।

यस्मांन्निशम्य स्वपतिप्रशंसां
ध्रुवं भवत्यत्र सुखं समेषाम्।
प्रशंसकं तु प्रति चानुरागः
संजायतेऽत्र स्वत एव नूनम्' ।। ८७५ ।।

रूपो बद्धकरो जगाद सहितो दैन्येन भावेन चा'ऽ-
मेतावन्ननु हे प्रभो ! सहृदय ! श्रीमत्पदानुग्रहात्।
बुद्धं मे त्विह - भक्तिमार्गसरणेच्छैः साधकैः कामिनी-
कुश्रीकाञ्चनकीर्तिरूपपदवीद्रव्यप्रतिष्ठात्मकः- ।। ८७६ ।।

त्यागं विधाय निखिलस्य तु तस्य (याव -
त्प्रेयःपदार्थनिकरो -) ऽग्रसरोऽत्र मार्गे।
भव्यो,ऽधुना कतिपयञ्च लषामि बोद्धुं
गौरप्रभो ! जगति साधनतत्त्वमस्मि'।। ८७७ ।।

'एवं शास्त्रभरे' जगाद 'कथितं जीवस्वरूपं' प्रभुः
'खण्डं पूर्वमहो ! विधेहि तु शतं केशाग्रभागस्य, तत्।
तेष्वेकस्य पुनर्विधेहि च शतं खण्डं, स्वरूपं सतो
जीवस्याऽस्ति ततोऽपि सूक्ष्ममधिकं, जीवोऽतिसूक्ष्मोऽस्त्यतः।।८७८।।

जीवोऽस्त्यत्र चराचरे जगति वै व्याप्तः समानात्मना,
ब्रह्माण्डे तिलरक्षणार्हमपि न स्थानं, भवेद्यत्र नो-।
जीवः, स्थूलतयाऽथ जीवजगतो भेदद्वयं विद्यते,
कथ्येते जडचेतनौ जगति तौ वा स्थावरो जङ्गमः।। ८७९ ।।

काष्ठप्रस्तरकादि कौ जडमथाऽस्यां स्थावरं कथ्यते
लोकैः स्पन्दनकृत्क्रियाकृदथवाऽद्धा जङ्गमश्चेतनः।
श्रेष्ठः स्थावरतो जडान्ननु मतो वै जङ्गमो, जङ्गमे
श्रेष्ठा हस्तिहयादयो भुवि चरा वै बुद्धिमन्तस्तथा।। ८८० ।।

श्रेष्ठस्तेष्वपि मानवो मतियुतस्तन्मानवे ब्राह्मणो,
विद्वांस्तेष्वपि, तत्परिष्कृतमतिः श्रेष्ठो, निजे जीवने।
तेष्वप्यत्र तथा सदाचरणकृच्छ्रेष्ठ,स्तथाकर्तृके-
षु श्रेष्ठोऽपि स, यस्य जातमपरं ज्ञानं भवेद् ब्रह्मणः।।८८१।।

ब्रह्मज्ञानिषु चापि योऽत्र भुवने जातोऽस्तु मुक्तो,ऽस्ति स
श्रेष्ठो, मुक्तजनेष्वपीह जगति श्रीकृष्णभक्तोऽस्ति च।
सर्वश्रेष्ठतया,ऽत्र यस्य हृदये श्रीकृष्णभक्तिस्तथा
शुद्धा, वै भवितुं ततोऽधिकतरः श्रेष्ठो न कोऽपि क्षमः।।८८२ ।।

श्रेष्ठत्वपरमाकाष्ठा त्वियमहो ! ।
(कृष्णस्तु भगवान् स्थाने स्वयमिति)।। ८८३ ।।

३७. श्रीमति भागवतेऽस्ति यथोक्तम्-
सिद्धिकृते कश्चिद् भुवि यतते मनुष्याणां सहस्रे
यततामपि सिद्धानां कश्चिद् वेत्ति तत्त्वतः पुरुषम्।
लोकेऽनेकजन्मनामन्ते ज्ञानी तमथाऽऽपयते
सर्वं वासुदेव इति बोद्धुर्महात्मनो दुर्लभता।
नारायणपरायणो मुक्तानामपि लोकेऽसुलभः
कोटिष्वपि तत्परायणेषु प्रशान्तहृद्दुर्लभता।।

संसारे निखिलं भवेदधिगतं कामं प्रयत्ने कृते
किन्तु श्रीहरिकृष्णभक्तिलभनं त्वत्यन्तमा ! दुर्लभम्।
एवैकोऽस्ति तथाहि भक्तिलभनोपायो,ऽखिलायां स्थितौ
च स्थाने समयेऽखिले प्रभुहरेरेवाऽत्र संकीर्तनम्-।।८८४।।

कौ नाम्नां विदधद् भवे,त्प्रभुहरिप्रेमोपलब्धेस्तथा
मुख्योऽत्र श्रवणं च कीर्तनमथैवास्ति ह्युपायः, पुनः।
संसाराखिलसाधनाश्रयपिरत्यागं च कृत्वा हरे-
रेव ग्राह्यममायिनस्तु शरणं (साधु ह्यमायी सुहृत्)।। ८८५ ।।

कृत्वाऽत्राऽध्वनि सर्वधर्मकपरित्यागं तथा केवलं
तस्यैव स्मरणञ्च चिन्तनमथ स्थानेऽत्र कुर्वन् भवेत्।
एकं स्थूलमहं दिशामि भगवत्प्रेयःकृपाऽहैतुकी-
भक्तेस्त्वामिह रूप! हे! परिचयं, त्वं बोधिता तेन तु-।।८८६ ।।

कार्या भगवतो भक्तिर्ननु कथम्।
श्रीभक्तिहृदयै- (र्भक्तः सहृदयः)।। ८८७ ।।

३८. कपिलो भागवते स्वयमूचे
देवहूतिमात्रा संपृष्टो भक्तियोग-सन्मार्गम्।
"भक्तियोगबहुविधता भामिनि ! भावविविधताहेतोः
पुंसां भावविभेदकारणं स्वभावगुणवैविध्यम्।
तामसराजससात्त्विकपरमं निर्गुणमस्ति तुरीयम्
व्यवधानेन विना हेतुं यत्स्यात्पुरुषोत्तमविषयम्"।
श्रवण-मनन-संभाषणमखिलं योजनीयमखिलात्मनि।।

"सर्वेशस्य च जीवमात्रहृदयस्थानस्थितस्यात्र मे
प्रेयोवत्सलतागुणप्रभृतिकश्रुत्यैव काञ्चिद् विना।
बाधां, केवलकं समुद्रदिशि कौ गङ्गाप्रवाहो यथाऽ-
द्धैतस्यां वहमान एव भवति स्थाने स्वकीये, तथा-।।८८८ ।।

शुद्धा यन्मनसो गतिस्त्वविरलं भूयान्ममैवोन्मुखी
धावन्ती, तदहैतुकी त्वधिगता वाऽभूत्तथैकान्तिकी।
(बोधव्यं) मम भक्तिरस्य सुहृद"स्तद्भक्तिलब्धेः पुनः
श्रीकृष्णो नहि दूरमस्य वसति (श्रीमाञ्छ्रियः किं पृथक्?)।।८८९।।

स त्वागत्य निमायिभावको भक्तेनाऽऽसजति द्रुतं प्रियः।
भक्ते वत्सलतेयमेव तु श्रीशस्याऽस्य तथाह्यमायिनः।। ८९०।।

आदौ साधनभक्तिरत्र सुहृदां संजायते, साधनाऽऽ-
ख्याभक्ते रतिभक्तिरात्मनि, रतेः शुद्धाख्यभक्तिस्तु वा - ।
भक्तिः प्रेममयी ह्युदेति, गदिता रत्याख्यभक्तेस्तथा
भेदाः पञ्च तु भक्तिशास्त्रनिवहे (श्रीः पञ्चकोषान्तरे)।।८९१ ।।

तन्नामानि च - शान्त-दास्य-सखिता-वात्सल्य-माधुर्यकाऽऽ-
ख्योपेता रतिरेव, शान्तरसकोपास्तौ तथोदाहृतौ।
आचार्यैर्जनकः शुकः, सुमनसोऽनेके तथोपासका
भक्ता दास्यरतेः (प्रभौ भगवति स्थाने भवेद् दासता)।।८९२।।

उक्ताः सख्यरतेरुदाहरणतो गोपालबाला व्रज-
स्थानीयाश्च तथाऽर्जुनप्रभृतयो, नन्दो यशोदा तथा।
वात्सल्यात्मरतेरुपासकतया श्रीदेवकी श्रीवसुः
संबोध्या (गुणरत्नरोहणभुवो वात्सल्यसन्देशदाः)।। ८९३ ।।

श्रीमाधुर्यरतेरुपासनविधौ गोप्यो व्रजस्यैव कौ
बुध्यन्ते निखिलोत्तमाः सहृदयै,र्दृष्टान्तरूपाः पुनः।
सन्त्येतस्य च रूक्मिणीप्रभृतयो राज्ञ्यः सहस्रं तथा
श्रीलक्ष्मी-(र्मधुराधिकारिगुणतोपस्तौ हि काष्ठाऽपरा)।।८९४ ।।

आदौ शान्तरसे कनिष्ठमननाऽद्धा भावनाऽस्त्यात्मनो,
दास्ये स्वं च लघुं निबुध्य विविधां सेवां स्वसेव्यस्य तु।

कर्तुं वाञ्छति, किञ्च सख्यरतिकस्याराधको मन्यतेऽ-
प्यल्पं स्वं च करोति सेवनमपि, स्वोपास्यदेवाऽऽमुखे-।।८९५ ।।

निःसंकोचहृदा तथाचरति स त्रयस्यन्निवाभाति नो
किन्तूपासकयोर्यथा निखिलवृत्तौ शान्तदास्यात्मनोः।
वात्सल्येन पथा ह्युपासनकरश्चित्ते निजे स्वं प्रियं
श्रेष्ठं बोधति, नोपरीह कुरुते व्यक्तं, सेवामपि-।। ८९६ ।।

सेव्यस्याऽऽतनुते,ऽपि तिष्ठति तथा संकोचतोऽद्धा विना,
स्वं सेव्यं प्रति किन्तु तत्र ममताऽप्येतत्त्रयापेक्षया।
एका प्राकृतिकी तथाहि भवति, स्थाने रसेऽस्मिंस्त्विदं
वैशिष्ट्यं (ममतैव वत्सलहृदो भावो विशेषायते)।। ८९७ ।।

कान्ताभावरतावमूस्तु निखिलाः पञ्चैव वार्ता, हृदा
सेव्यं श्रेष्ठमपि स्वकञ्च मनुते, सेवाक्रियाभावना।
चित्ते तिष्ठति तूत्कटा, भवति नो कश्चित्तु तत्सम्मुखे
संकोचो, भवति प्रगाढममताऽप्या-(ऽऽत्मा हि कान्तो बहिः)।।८९८।।

सर्वं दैहिककर्म देहगतयो देहस्तथाह्यात्मनः
स्वप्रेयःकृत एव सौहृदतया माधुर्यभावेऽर्प्यते।
तत्कान्तारतिरेव चेयमपरा सर्वोत्तमा विद्यतेऽ-
(- नेका दास्यसखित्ववत्सलदशा त्वेकः सतीकान्तकः)।।८९९।।

एकः कश्चिदसंख्यकेषु भुवनेऽदोराधनाराधकः
किं कोटौ भवति?, क्षितावि‌ह यदाऽलभ्यस्तथोपासकः।
एवाऽस्मिन्ननु शान्तदास्यसखितादेस्तर्हि कान्तारते-
र्नूनं किं कथनीयमेव मधुरात्मोपासकस्यात्मनः ।। ९०० ।।

संक्षेपे कथितं मयेदमपरं श्रीभक्तितत्त्वं तु तेऽ-
त्यन्तं, त्वं सरसः कवित्वहृदयोऽद्धा बुद्धिमान् विद्यसे।
लोकानां भगवत्कृपाधिकरणं पात्रं, त्वमीषामतो
भावानां (सुहृदां निधेहि पुरतः) कृत्वाऽधिकं वर्णनम्।।९०१ ।।

सम्प्रति काशीं गन्तुमहं श्वः। चिन्तयमानस्त्वस्मि निमायी'।।९०२ ।।

ऊचे गद्गदकण्ठतः प्रभुपदोः कुर्वन् प्रणामं 'प्रभो !'
श्रीरूपः 'कृतकृत्यमानवजनिर्जातोऽस्मि, लब्धाऽद्य मे।
एतावन्मुदिताऽभविष्यदपरा यावन्न लब्धाऽखिल-
ब्रह्माण्डाधिपतित्वतोऽपि (मुदिता पुण्यात्मसद्भावना)।।६०३ ।।

आज्ञाऽधुना किं मम जायते ?, श्री-
पादान्तिकेऽत्यन्तमथोत्कटा मे।
इच्छा निवासस्य, भवेद्यथाऽऽज्ञा'
(वरेण्यसङ्गो हि तदिच्छयैव) ।। ६०४ ।।

'रूप ! त्वं' वदति प्रभुः सहृदयो गौरः 'समर्थोऽसि, ते
नास्त्यावश्यकता विशेषमधुना मत्सङ्गतेः, साम्प्रतम्।
श्रीवृन्दाविपिनं तु याहि सरलं, तत्रत्यसर्वप्रिय-
श्रीतीर्थभ्रमणं विधाय सुमनो ! यावत्तु शक्यं भवेत्-।।६०५ ।।

कर्तुं त्वं प्रकटं यतस्व सुहृदा सर्वाणि तीर्थानि, च
श्रीपुर्यां मिलनं मया कुरु तथाह्यागत्य कालान्तरे।
श्रीमद्गौडपथेन' सोऽपरदिने चेयन्निगद्य प्रभु-
र्नौकायामधिरुह्य तु प्रचलितः पारे परस्मिन् यतिः।। ६०६ ।।

प्रस्थाप्याऽथ च यातो गौराङ्गस्तत एव।
रूपं दासमनूपं कृष्णं माथुरविप्रम् ।। ६०७ ।।

श्रीरूपो मथुरां महाप्रभुपदे चापत्तथा चिन्तयन्
स्वभ्रात्रा सह, तत्र तस्य मिलितोऽद्धा पूर्वगौडाधिपः।
श्रीरूपस्य सुबुद्धिरायकमहा-राजः, स गौडावने
वृन्दामेत्य तथाह्युवास सुमनोगौरप्रभोराज्ञया ।। ६०८ ।।

स्थाने चैकपणांशलब्धचणकैर्विक्रीय काष्ठं, निजं
निर्वाहं कुरुते स्म, शेषपणकैर्वङ्गीयसाधुव्रजे।
सेवां सोऽकृत, देहतैलमलनस्य स्नानपूर्वं प्रथा
वङ्गे, तत्र न बुध्यते समुचितं स्नानन्तु तैलं विना।। ६०९ ।।

तैलं सोऽथ सुबुद्धिरायसुजनः क्रीत्वा निजैस्तैः पणैः
साधुभ्यः प्रददे,ऽपि भोजयति तान् द्रप्सं चिपट्टान्नकम्।
रूपानूपयुगेन तस्य सहसा विश्रामघाटेऽभवत्
संयोगः (समचेतसोर्भुवि विना सङ्केतमामेलनम्)।। ६१० ।।

यादृक् कर्तुमसौ शशाक सुजनो रायः सुबुद्धिस्तथा
चक्रे स्वागतसत्कृतिं सहजयोः स्थाने द्वयोरेतयोः।
यात्रां कर्तुमतो वनोपवनयोरप्येष ताभ्यां समं
पद्भ्यामेव जगाम च व्रजबहि-(र्व्याजं विहारे भवेत्)।।६११ ।।

संपश्यन्तु विधेर्विधानमवनौ - ह्यो यावदेको महा-
राजोऽभूत्सचिवो महान्ननु परो, द्वावेव तौ साम्प्रतम्।
याचन्तौ शकलं तथा गृह-गृहं वै साधुवेषेऽटतः
सन्तौ तादृशभिक्षुकौ (सहृदयत्वस्वीकृतिः स्वाकृतिः)।। ६१२ ।।

निर्वाहस्तु सहस्रशः समभवत्स्थाने ययोराश्रयात्
प्राज्ञानां विदुषां सतां सुमनसां, तावेव सम्प्रत्यहो ! ।
द्वारे त्वेककदर्यचित्तगृहिणश्चैकांशरोटीकृते
तिष्ठन्तौ कुरुतः प्रतीक्षण- मिदं यत्सम्भवं वर्तते-।। ६१३ ।।

निस्सृत्याऽद्य गृहात्तु कोऽपि शकलं दद्याद्, विधातस्त्वहो !
भाग्यस्यास्ति विलक्षणा ह्यवितथं खेला विशाला परम्।
कश्चित्सुन्दरमार्मिकं कथितवान् पद्यं कविः कीदृशं
दुर्लक्ष्यां तु विडम्बनामलमिमामेवाऽथ कृत्वा विधेः-।। ६१४ ।।

३६. विधानमद्भुतमस्ति विधातुः।
कीदृशमपि कुलमस्तु ख्यातं, पितरावपि सद्गुणिनौ
सहजस्तथापराक्रमशीलः सत्यपरः सहधर्मी।
शौर्यवीर्यसम्पन्नः स्वयमपि परमो महानुभावः।
विधिना सोऽपि भवति विडम्बितो, विधिरखिलैर्दुर्लङ्घ्यः।।

सर्वश्रेष्ठकुलेऽभवद्रविकुले यस्योद्भवः कौ महा-
राजानामपि पूजितो दशरथोऽभूच्चक्रवर्ती पिता।
सत्यास्था च पतिव्रता जनकजाऽऽसीद्यस्य पत्नी सती,
कीनाशोपमसाहसी हि समरे शूरश्च वीरस्तथा-।। ६१५ ।।

सेवायाञ्च पराक्रमी च परमो यस्यानुजो लक्ष्मण,-
स्त्रैलोक्ये नहि कोऽपि यत्समधनुर्धारी च शूरोऽभवत्।
साक्षाद्विष्णवतार एव सुकृती रामः स्वयं यो,ऽवनौ
तस्याप्यत्र तथाहि येन विधिना नाना कृता वञ्चना।। ६१६ ।।

कावस्यां कुशकण्टकाकुलवने भ्रान्तं विपत्त्या सहाऽ-
ब्धा वर्षाणि तथा चतुर्दश पुनस्तेनापि रामात्मना।
अन्येषां पुनरत्र किं तु वचनं ?, हे देव ! धातस्तथाऽ-
स्त्यस्माकं नमनं तु ते चरणयो-(र्नम्योऽसहायैर्जयी)।।६१७ ।।

हे !, भगवच्छ्रीरामचरित्रे वर्णनमेतद् वास्तवमस्ति।
एव विनोदः काव्यनिबद्धु-(र्भावरसव्यक्तिस्त्विह काव्यम्)।। ६१८।।

अत्राऽऽपच्च महाप्रभुः सहृदयो वाराणसीक्षेत्रकं
गङ्गातीरपथेन भक्तनिकराद् गौरः प्रयातो निजात्।
प्राप्तोऽमुष्य च चन्द्रशेखरसुहृत्स्थाने बहिर्वै पुराद्,
दृष्ट्वैव प्रभु,मस्य सोऽकृत नतिं भूमौ विलुठ्य प्रभोः।।६१९।।

प्रेम्णाऽऽलिङ्ग्य तमाह च प्रभुः 'क्वात्र त्वं ननु चन्द्रशेखर !।
आगन्ताऽस्मि यदद्य, ते कथं ज्ञातं?' (ज्ञानपुरस्सरं गतिः)।।६२०।।

'स्वप्नोऽदर्शि मया'ऽऽह चन्द्रशिखरो 'रात्रौ गतायां प्रभो !
काश्यामद्य तथाऽऽगतोऽस्ति तु भवां,स्तन्मार्गणेऽस्म्यागतः।
किन्तु श्रीपदयोः सुदर्शनमभूदत्रागतस्यैव मे,ऽ-
तो धन्यां कुरुतां स्वपादरजसा मत्पर्णशालामपि'।। ६२१ ।।

चैतन्योऽथ च वैद्यचन्द्रशिखरस्य त्वाग्रहाद्यातवान्
गेहं तस्य, तथाऽऽप्त एव च समाचारे, प्रभोर्दर्शने।
सम्प्राप्ता रघुनाथ-मिश्रतपनौ पुत्रः पिता वै महा-
राष्ट्रीयो द्विजकस्तथा स, बहवश्चान्येऽपि भक्ता द्रुतम्।।६२२।।

चक्रे याचनमत्र मिश्रतपनो बद्ध्वाऽथ हस्ताञ्जलिं
चैतन्ये सुहृदि प्रभौ सहृदये 'काश्यां निवासं क्रियात्।
यावत्तावदथो करोतु भगवन् ! भिक्षां ममैवौकसि'
स्वीचक्रे प्रभुरेष मिश्रविनतिं (स्वीकार्य एव प्रियः)।। ६२३ ।।

गौराङ्गोऽथ च वैद्यचन्द्रशिखरस्यैवाऽऽस्त गेहे स्वयं,
चक्रे वासमिहाऽथ भिक्षणकृते मिश्रस्य गेहेऽचलत्।
चैतन्यस्तपनस्य, चैवममनाः काश्यां स मासद्वयं
प्रायोऽस्थात् (पितरावुमापशुपती सर्वस्य काशीपती।। ६२४ ।।

अत्रैव प्रभुणा मिमेल च श्रीरूपस्य सहोदरोऽग्रजः।
आगत्य प्रभुहृत्सनातनो, यद्वृत्तान्तमनन्तरं पुरः-।। ६२५ ।।

●●

श्रीसनातनस्य कारागृहान्मुक्तिस्तथा काश्यां प्रभुदर्शनम्

४०. मिलनाऽऽतुरतायां का बाधा?
'छिद्रान्वेषणपरता जगतः प्रायः प्रियसखि !, सम्प्रति
अपि रात्रिर्घनतमसाऽऽछन्ना, न ते युज्यते गन्तुम्'
'मा मैवं सखि ! तत्प्रियमिलनोत्कण्ठायामिह सत्याम्
युक्तायुक्तविचारणा यदि तत्स्नेहाय जलं दत्तम्' ।।

श्रीरूपस्तु निमायिनो ननु शिरोधार्यं विधाय प्रभो-
रादेशं चलितः प्रयागनगराद् वृन्दावनं, साम्प्रतम्।
वृत्तान्तं तु सनातनस्य सुहृदस्तस्यानुजस्य शृणु,
श्रीरूपात्तु सनातनो वयसि कौ ज्येष्ठोऽभवद् वस्तुतः।।९२६।।

लब्धो रूपमहोदयस्य सुहृदः श्रीभक्तिमार्गोपदे-
शः स्थित्वा निकटे प्रभोः सुमनसस्तत्पूर्वमेवाऽत्र तु।
अस्मिन्नो वयसा, गुरोस्तु कृपया श्रीभक्तिमार्गे तथा
श्रेष्ठत्वं हि विचार्यते (नृवपुषि श्रेष्ठत्वतो ज्येष्ठता)।। ९२७।।

रूपस्तु प्रथमं महाप्रभुकृपापात्रं बभूव, ह्यतः
स्वश्रेष्ठं च सनातनः सहृदयोऽमुं बोधते वै गुरुम्।
आसीच्चाखिलवैष्णवेऽपि समयेऽस्मिन्मान्यतैवेदृशी
(ह्यार्दं कौ यदि मन्यते जनतया साधो,स्तदा मान्यता)।। ९२८।।

तच्छ्रीरूपसनातनाविति तथा श्रीवैष्णवे मण्डले,
कथ्येते न सहोदरौ तनसनारूपौ, लघौ सत्यपि।
संसारे वयसा, प्रभोः प्रथमतो हेतोः कृपाया गुरो,
रूपस्यैव हि गृह्यते प्रथमतः संज्ञा सनाऽपेक्ष्या ।। ९२९ ।।

कारावासमसीप्रकोष्ठपतितो ध्यायन्मनोमोहिनीं
चैतन्यस्य सनातनः समभवत्सन्मूर्तिमेवाऽनिशम्।
अन्नं वारि तथाहि किञ्चिदपि नोऽरोचिष्ट तस्याऽधुना
निद्रा-नाम न नेत्रयोरपि (तथानिद्रा ह्यचिन्तस्य नुः)।।९३० ।।

'गौराचाँद' ! च 'गौरचन्द्र' ! रटनं यान्त्यस्य नक्तंदिवं
यामाः कुर्वत एव चाष्ट, च गता रात्रिस्तथाऽऽप्तं दिनम्।
सन्ध्याऽभूच्च दिनं व्यतीत्य विषये भूयस्तमोऽतन्यत,
ध्यानं त्वस्य तथाऽस्य किञ्चिदपि न (ध्यानं मनोयोगतः)।।६३१।।

त्वेषोऽस्त्यस्मृतसर्वकर्मनिकरश्चैतन्यचिन्तात्मनि,
श्रीचैतन्यपदारविन्दयुगले त्वेवारुणे गुञ्जनम्।
कुर्वन्नस्ति सदाऽस्य चित्तमधुपो, देहोऽस्ति भस्त्रोपमः
कारावासमसीगृहेऽत्र पतितः श्वासान् दधानोऽधुना।। ६३२ ।।

बाह्यज्ञानमभूदमुष्य च यदा स्थाने तदैवास्य हृत्
पस्पन्दे, स्मरणादमुष्य वचसो–देहोऽधुना मे तथा।
श्रीचैतन्यपदोः पृथक् तु पतितः कारागृहे विद्यते,
चासावागत एव मूर्च्छितदशोऽमुष्मिन् विचारेऽभवत्-।। ६३३ ।।

श्वासांश्चात्मनि दीर्घदीर्घमजहा,त्तन्मध्यमेवाऽस्य च
स्वभ्रातुर्निभृतात्मनाऽत्र मिलितं पत्रं, पठित्वाऽस्य तत्।
वैकल्यं ववृधे तथाह्यतिशयं, व्यग्रोऽभवत्स्वं शिर-
श्चैतन्याङ्घ्रितले च मङ्गलमये घर्ष्टुं सनाऽसौ तनः।।६३४ ।।

तत्पञ्चद्विसहस्ररूप्यकसमाचारं तु मोदीगृहे
लब्ध्वैवैष शुशोच–मे ननु भवेन्मुक्तिस्तु कारागृहात्।
एतच्छ्वेतमृदध्वनैव (तदिदं धन्यं भवेज्जीवनं)
श्रीचैतन्यपदाब्जदर्शनमहं चाप्तुं भवेयं क्षमः ।। ६३५ ।।

प्रेमावेशतथास्थितावयमिदं स्थाने वचो व्यस्मरत्
पूर्णत्वेन तु- पापमस्ति निभृतं कारागृहान्निस्सृतिः।
दत्वोत्कोच,मदो निमायिनियमादद्धा विरुद्धं परं
नास्त्यस्मिंस्तु गतिर्वराकनियमस्य, प्रेम्णि कीदृग् विधिः?।। ६३६ ।।

आयासतस्तु नियमस्य परं तथास्ति
प्रेमा,ऽऽह तत्र समये स जनं प्रधानम्।
कारागृहस्य 'ननु कोऽस्मि ?, तु वेत्सि मां त्वं
भ्रात–' (र्भवे परिचयात्सदसत्प्रबोधः)।।६३७।।

'श्रीमन्! वेद्मि भवन्तं पूर्णं, राज्यकमन्त्री।
मुख्यस्त्वस्ति भवानाः!' कारामुख्यजनोक्तिः ।।६३८।।

'तेऽस्ति त्विदमपि ज्ञातं, कथमहम्।
कारागृहतले मुख्योऽस्मि सचिवः?' ।।६३९।।

ऊचे नम्रतया स जेलरनरः 'श्रीमन्निदं मानवः
सर्वो वेत्ति वचो, न कोऽपि भवता राज्येऽपराधः कृतः।
सेवां हातुमियेष सम्प्रति भवान् स्वां, तद् भवन्तं नृपः
कारावेश्मनि रुद्धवा-' (नधिपतिर्विद्यात्प्रमातुः स्थितिम्) ।।६४०।।

'शक्तस्त्वं ननु वक्तुं, स्वां सेवां कथमैच्छम्।
हातुं?' पृच्छति सार्धं स्नेहेनैष निमायी ।।६४१।।

'श्रीमन् ! पण्डितधीमल्लोकास्याच्छुतमेवम्।
कर्तुं श्रीभजनं हे ! वाञ्छत्यद्य भवानाः !' ।।६४२।।

'किं भजनं ननु कर्माऽच्छं भुवि वाऽथ सदोषम् ?।
को विषयेऽत्र विचारस्ते'- (ऽखिलतो ग्रहणीयम्)।।६४३।।

सारल्येन जगाद चैव महताऽस्मिन् साम्प्रतं जेलरः
'श्रीमन्नत्र तु किं दिशेय विषये ?, गार्हस्थ्यकृच्छ्राध्वना।
द्रव्याणां तु वयं तथाऽत्र भुवने जाता हि दासा यत,-
स्तं व्यस्मार्ष्म तु पूर्णतो, नृवपुषो येनेह चोत्पादिताः।।६४४।।

संसारे प्रभवेम चात्र विषये किं वक्तुमेव ?, प्रभोः
कर्तुं वाञ्छति सौहृदेन भजनं हित्वाऽखिलं यद् भवान्।
तन्नूनं भुवि भाग्यवानिह भवान्, किं कर्म चातः परं
शक्नोतीह महत्तरं तु भवितुं किञ्चिन्निमाय्यात्मनाम्'।।६४५।।

'अच्छं, त्वं दिश चैत,त्कर्तुं वाञ्छति भक्तिम्।
यो लोको,ऽस्य सहायः– पापं पुण्यमहो ! वा?' ।।६४६।।

'यस्य तु शक्यं यावदपि स्यात्तादृशलोकानां हि सहायः।
सोऽत्र भवे,न्नास्त्येव ततोऽन्यः पुण्यकरो लोको महनीयः' ।।६४७।।

दृष्ट्वाऽसौ परितः सनातनः कर्णे जल्पति जेलरस्य सः।
'साहाय्यं मम देहि तर्ह्यदःकारातो भवने बहिः सतः' ।।६४८।।

बिभ्यन्नल्पमथाऽऽह सोऽत्र परितः पश्यन् स्वरे कम्पिते
'श्रीमन्नस्ति तु शक्तितो मम बहिः स्थाने वचोऽदो, नृपः।
अस्मिंस्तु श्रुत एव वै वचसि मां सप्राणमेव क्षिता-
वन्तःस्थाप्य च कारयिष्यति मम स्थाने वधं मुस्लिमः'।।६४६।।

'मन्त्रित्वे ह्युपकारमस्मि कृतवान् भ्रातर्गुरुं ते गुरुं,
कर्तुं त्वं न परं क्षमस्त्वियदपि, स्थाने सहस्रं दश।
रूप्यं मेऽमुकमोदिनोऽस्ति निहितं, पत्रं लिखित्वाऽधुनै-
वाऽहं तानि ततो विलभ्य तरसा दास्यामि ते, सेत्स्यति-।।६५०।।

कर्म ते गेहिनः। बालवत्सौकसाम्' ।।६५१।।

तत्पञ्चद्विसहस्ररूप्यकपदं श्रुत्वैव कारागृह-
स्वामी सोऽल्पपणांशवेतनभृतिस्तु द्रव्यसर्वस्ववित्।
किङ्कर्तव्यविमूढतां ननु गतो, रूप्यं सहस्रं दश
स्वे क्वापीह न जीवने भुवि तले साक्षाद् ददर्शाऽपि सः ।।६५२।।

लब्धं भावि तथाल्पसाहसकृतावेवाद्य तत्पुञ्जितं
मुद्राणामयुतं, पुनस्त्विदमहो ! संचिन्त्य, हर्षस्थितिम्।
वैवश्यस्य तथा स्वरे कथयते संकोचयन् साम्प्रतं
'श्रीमन्! रूप्यवचोऽस्ति किं?-(नृवपुषा साहाय्यकं कार्यमाः!) ।।६५३।।

अहन्तु दासो भवतः पुराऽपि
ह्यद्यापि दासोऽस्मि, परन्तु भूपः।
प्रष्टा तु, दास्यामि किमुत्तरं?' (हि
प्रश्नोत्तरं सेवकलोकदेयम्) ।।६५४।।

मन्मन्त्रस्तु (सनातनश्च बुबुधे) चक्रे कृतिं 'कोऽप्यहं
बन्दी नैव' दृढस्वरे कथयतेऽसौ 'चौरदस्यूपमः।
आचारो मयि राजबन्दिसदृशो (जानाति राजापि यत्)
सर्वस्त्वत्र विधीयते-(स्तरसमाऽऽचारोऽत्र शत्रावपि)।।६५५।।

''गङ्गास्नानकृते गतः स, (वद तं) तत्रैव गङ्गान्तरे
प्रावाक्षीद्, बहु मार्गणेऽपि च पुनर्नाप्तिस्तदीयाऽभवत्''।
हाताऽद्यैव तु गौडदेशमहमाः !, क्षेत्रेऽद्य भूयस्तथा
नागन्तैव, तदा कथं नरपतेर्ज्ञातं भविष्यत्यदः' ।।६५६।।

उक्तिर्जेलरमानसेऽतिसरले ह्येषाऽऽस्त, चाऽऽस्ताऽत्र किं ?,
तत्पञ्चद्विसहस्ररूप्यचलितप्रज्ञाऽभिसन्धाकृते।
एकाऽकाट्यमिषं तथाऽस्य मिलितं, जातः सनावार्तया
कारावासनिरीक्षकः सहमतो (भावान्मतैक्यं समात्) ।।६५७।।

मोदिगृहान्ननु रूप्यं गुप्तदिशाऽखिलमाप्तम्।
गुप्तपलायनसर्वाऽऽयोजनमत्र च जातम्।।६५८।।

आसीद् घोरनिशाऽन्धकारबहुला, सर्वे शयाना जना-
श्चासन्, क्वापि कदापि रुद्धरवतो मध्येऽत्र मध्ये परम्।
कारारक्षिनरस्तथा विमनसा 'तालो गवाक्षः पुनः-
र्दीपश्चावितथास्तु साहब !' तथाह्युक्त्वा तथोक्त्वा व्यरौत्।।६५९।।

भूयो भित्यवलम्बनेन पुरुषो रक्षी व्यलोट,त्तथा
निद्रादेवितथाप्रभावमहिमा व्याप्तोऽखिलेऽभूज्जने।
आस्तां किन्तु विजाग्रताविह तथा द्वावेव, चैकः प्रभो-
र्लिप्सुः श्रीलसनातनः सहृदयः संदर्शनस्यात्र तु-।।६६०।।

तत्पञ्चद्विसहस्ररूप्यलभनोष्माह्लादितो गौडभू-
कारागारनिरीक्षको ननु परो, ह्येकस्य चिन्ता प्रभोः।
हर्षोऽन्यस्य च रूप्यकस्य, नहि नुस्त्वायाति निद्रा पुन-
श्चिन्तायामिह मर्त्यभावजगतो हर्षे तथात्यन्तयोः ।।६६१।।

मन्दं श्रीलसनातनस्य समये कोष्ठाररेऽपावृते,
विश्वस्तेन च रक्षकेण सहितश्चैकेन तत्कोष्ठके।
कारामुख्यनरः प्रवेशमकरो,न्मन्दस्वरेणाऽऽह स
'श्रीमन् सर्वमथ प्रबन्धनमभूत्सम्यग्, विलम्बोऽधुना-।।६६२।।

यानस्यैव निमायिनस्तु भवतः' श्रुत्वा तदीयं वचो
मन्दं श्रीलसनातनः कथयते 'सज्जोऽप्यहं पूर्णतः'।
उक्त्वेदं सविधे तथाहि पतितं चेशाननामाख्यकं
विश्वस्तं द्रुतमेव जागरयति त्वेकं स भृत्यं निजम्।।६६३।।

ईशानस्तरसोत्थितश्च नयने स्वे मर्दयंस्तस्य वै
सङ्केतेन चचाल तत्परमसौ चोत्थाप्य कन्थां निजाम्।

सर्वे ते ननु पाशबन्धनगृहैकद्वारतः क्षुद्रतः
श्रीगङ्गातटमाययु- (र्मृदुशिशुर्मात्रन्तिके धावति)।।६६४।।

तस्मिन् पूर्वत एव पारगतये नौकाऽभवत्सज्जिता,
तस्यां सर्वजनश्च मौनमभवत्स्थाने निषण्ण,स्ततः।
नौका सा चलिता, सनातनसुहृद् गौडस्य राजस्थली-
मन्त्ये साम्प्रतमाः! क्रमेऽनम-(दहो! नम्यं स्थलं स्वाश्रयम्) ।।६६५।।

गङ्गापरपारं चाल्पक्षणतस्तु।
आपत्स (निमायी ह्याप्नोति सुलक्ष्यम्)।।६६६।।

गत्वा पारमयं सनातनसुहृत्कार्तज्ञ्यदृष्ट्यैकदा
कारागरनिरीक्षकं प्रति तथाऽपश्य,त्ततो जेलरः।
बिभ्यंस्तन्नमनं चकार सुहृदः, स्थित्वा निवृत्तः पुन-
र्नौकायां (सदसद्धराकृतिकरस्तामेव चासेवते) ।।६६७।।

हित्वा राजपथं सनातनसुहृच्चाग्रे ससाराऽधुना
वल्लीपादपवेष्टितेन सुमना झाटाध्वना, ह्युत्सुकः।
श्रीगौरेक्षणकाय चेयदभव,न्न ध्यानमेवाऽस्य वै
निर्भिन्दत्कुशकण्टकाश्मगुटिकापाषाणकादेः पदोः।।६६८।।

उक्त्वा सम्प्रति 'गौर ! गौर !' स निशाघोरान्धकारे रुद-
न्नाशां याति च पश्चिमा,मथ भवन्नेवं वने कानने।
पार्श्वं प्राप स पातडाऽभिधगिरे,श्च स्वामिभक्तस्तथे-
शानो नाम स सेवकोऽस्य विपदस्त्वेवं दशायामपि-।।६६९।।

सङ्गे संततमस्ति सम्प्रति चलं,स्तत्पातडाऽद्र्यन्तिकेऽ-
वात्सीदेककदस्युनायकनर,स्तत्सन्निधौ ज्योतिषी।
एकोऽभूत्स दिदेश तस्य गणितं कृत्वा,ऽमुकस्यान्तिकेऽ-
स्ति द्रव्यं पथिकस्य सम्प्रति किय-(न्नक्षत्रविज्ज्योतिषी) ।।६७०।।

लुण्टाको निजसङ्गिभिः स पथिकद्रव्यं लुलोटाऽवधी-
त्ता,न्मार्गव्ययकाय गूहति मृदुः स्म स्वामिभक्तः पुनः।
ईशानोऽपि तथाऽष्ट हेमघटिता मुद्राः स्ववस्त्रान्तरे,
दस्यूनां पतिमत्र च स्म दिशते पूर्वं त्वथ ज्योतिषी-।।६७१।।

पार्श्वेऽदोजनसेवकस्य निभृतं सन्त्यष्ट मुद्रा,स्तथा
मुद्रायाः श्रुत एव नाम्नि कृतवान् सत्कारमेतद्द्वयोः।
अत्यन्तं, बहु भोजनप्रभृतिकस्यापि प्रबन्धं पुन-
श्चक्रे दस्युपति- (र्हि सत्कृतिरलं प्रस्तूयते लोभतः)।।६७२।।

पश्चादद्य दिनद्वयस्य सुमना लब्ध्वाऽत्र संभोजनं
शिश्ये श्रीलसनातनः सुखयुतं, दस्युप्रधानं तथा।
आहा'ऽऽवां कृपया परत्र तु गिरेः पारे भवान् प्रापय'
ह्युल्लासेन जगाद तं दलपति- (स्तूल्लासतेष्टाप्तितः)।।६७३।।

'आमाम्, तादृशमेव (जल्पति यथा) नूनं प्रबन्धो (भवा-)
नस्माभिस्तु करिष्यते'ऽत्र मतिमान् संचिन्तयामास तत्।
राजामात्यसनातन'स्त्वियदसौ भूत्वाऽपि दस्युर्हि नौ
सम्मानं कुरुतेऽधिकं कथमियाञ्जातो विनम्रोऽस्त्ययम्- ।।६७४।।

अस्याऽन्तेऽलमवश्यमेव किमपि च्छन्नं रहस्यं' तथे-
शाने चिन्तयतोऽस्य दृष्टिरपतत्पप्रच्छ 'किं रे! तव।
पार्श्वे नास्ति सदात्मनोऽपि किमपि द्रव्यन्तु ?, सत्यं तथा
सत्यं जल्प, तु रक्षितं नहि तिरोधाय त्वया किञ्चन ?' ।।६७५।।

कार्पण्येन तदूचे स 'श्रीमन् ! मम पार्श्वे।
मुद्राः सन्ति तु सप्त' (स्वर्णस्यात्र महत्ता) ।।६७६।।

तं भर्त्सयन् कथयेऽत्र सनातनो 'धत्!
ते दुर्हृद,स्तव तु विद्यत एव लोभः।
अद्यापि ?, लुण्ठकपतेस्त्वधुनैव गत्वा
चायाहि सर्वमिदमत्र तथा प्रदाय' ।।६७७।।

ईशानः सविधे गतो निजस्वाम्युक्त्या दलनायकस्य सः।
मुद्राः सप्त निधाय चाऽऽह 'मत्स्वामी प्रेषितवानिदं तव'।।६७८।।

ऊचे सोऽथ विहस्य तु 'पुनरपि स्थाने स्वपार्श्वे त्वया
त्वेकं गूहितमेव, मे विदितमासीत्पूर्वमेव स्फुटम्।
सत्यत्वेन (तथाऽस्तु) चास्मि मुदितोऽत्यन्तं तव स्वामिनो,ऽ-
मूस्तस्यैव पुनः प्रदेहि' (कुरुते दस्युर्न सल्लुण्ठनम्)।।६७९।।

तन्मध्ये तु सनातनोऽपि सुमना ह्यागत्य तत्राऽभव,-
न्मुद्रास्तास्तु विलोक्य तं दलपतिं प्रत्यर्पयन्तं तथा।
ऊचे चाग्रहपूर्वकं 'ननु भवान् गृह्णातु मुद्रास्त्विमाः,
क्वापि क्वापि तु नो मया दलपते ! वै क्षेपणीयाः क्षितौ-।।६८०।।

अहन्तु कारागृहतः पलाय्य
त्यक्त्वा नृपामात्यपदं तथाऽऽप्तः।
पारे परस्मिन् कृपयाऽऽपय त्वं
मां' (त्रायते यो मिलनात्स मित्रम्) ।।६८१।।

चत्वारोऽस्य कृता दलाधिपतिना सङ्गे जना,स्तद्गिरेः
पारेऽन्यत्र सनातनोऽयमभव,च्चाग्रे चलन् वै चलन्।
ईशानं वदति 'प्रतीतिरयते त्वीशान! पार्श्वेऽपरं
द्रव्यं सम्प्रति किञ्चिदस्ति ननु ते ?' (सर्वं प्रतीतौ सतः)।।६८२।।

ईशानस्त्रपितो जगाद 'सुमनः! श्रीमंस्तु मुद्राऽन्तिके
मे चैकाऽप्यपराऽस्ति' तर्हि वदति 'भ्रातस्तु ते मेऽधुना।
नास्त्यावश्यकता' सनातनसुहृ'न्मे तेऽधुना कीदृशः
सङ्गस्त्वेव ?, निजं गृहं त्वमधुना स्थानं निवर्तस्व तु' ।।६८३।।

ईशानो जगृहे रुदन् रुदंश्च स्वस्वामिपदे, गृहन्तु सः।
निर्यातः कथनेऽस्य चाधिके (सत्सङ्गो घटते सदिच्छया) ।।६८४।।

कण्टस्तम्बपथस्थले भवन् वै हाजीपुरकं सनातनः।
तद्वत्प्राप (निजप्रियाप्तये प्रेमी ह्याश्रयतेऽपि दुर्गमम्)।।६८५।।

आवृत्तोऽस्य च राजकार्यमिषतः किञ्चित्तु हाजीपुरे
श्रीकान्तः स्थितवा,नमुष्य सहसा तेनाऽभवत्सङ्गमः।
श्रीकान्तोऽमुमहो ! विलोक्य सुहृदं साधोर्हि वेषेऽभवत्
त्वत्यन्तं ननु विस्मितः, कतिपयं स्थातुं चकाराऽऽग्रहम्- ।।६८६।।

कालं तत्र, परञ्च तत्र वसनं नाऽनेन तु स्वीकृतं,
श्रीकान्तो ग्रहणाय तर्हि कृतवान्मार्गव्ययस्याग्रहम्।
सङ्गे धर्तुमनेन किञ्चिदपि नो तु स्वीकृतं, भाषिते
जातेऽत्यन्तमथैकमेष जगृहे भूटानिकं कम्बलम् ।।६८७।।

आसीन्मुस्लिमभिक्षुकेण सदृशो वेषोऽस्य, तन्मार्गणं
भिक्षायाः प्रभुगौरनामजपनं कुर्वंश्च काशीमसौ।
प्राप,त्तत्र बभूव चास्य विदितं- ह्यस्ति स्थितः श्रीप्रभु-
र्गौराङ्गो ननु चन्द्रशेखरगृहे (स्थाने सता स्थीयते)।।९८८।।

ज्ञात्वैव वृत्तमिदमेष सहाऽधिकेनो-
ल्लासेन चन्द्रशिखरस्य गृहस्य पार्श्वे।
प्राप्तो, निषद्य च बहिः प्रभुदर्शनार्थं
कुर्वन् प्रतीक्षणमभूत्तु सनातनश्रीः ।।९८९।।

शुद्धप्रेम्ण्यपि जायते कियदहोऽत्यन्तं तथाऽऽकर्षणं,
गौराङ्गोऽथ सनातनाऽऽगमनकं गेहस्य चान्तःस्थितः।
वेत्ति स्मा,ऽऽह तथा स चन्द्रशिखरं पार्श्वस्थितं 'वैष्णवो
ह्यासीनोऽस्ति तु चन्द्रशेखर ! बहिः साधु,स्तमाकारय' ।।९९०।।

गत्वा बहिः पश्यति तत्र चन्द्रः-
कोऽप्यत्र नो वैष्णवसाधुरस्ति।
अन्तो निवृत्य प्रभुमाह 'कश्चि-
त्साधुः प्रभो ! वैष्णवको बहिर्नो' ।।९९१।।

विहस्य भाषते प्रभु'र्ध्रुवं, तथाऽस्ति, शोभनम्।
निरूपय त्वमात्मना' (हि दृश्यते स्वभावना)।।९९२।।

भूयोऽयान्ननु चन्द्रशेखर,स्त्वेकं मुस्लिमसाधुमच्छलम्।
मुक्त्वा वैष्णवसाधुरस्य नो तत्राऽऽयान्ननु कोऽपि दर्शने ।।९९३।।

आगत्य सार्धमवदत्तु स विस्मयेन
'द्वारे प्रभो ! सरलमुस्लिमसाधुरेकः।
त्वस्ति स्थितो, मम न वैष्णवकस्तु साधु-
र्भूयोऽपि कोऽपि ददृशे ननु तं विहाय'।।९९४।।

स्मित्वा प्रभुः कथयते 'ननु बोधसे यं
हे चन्द्रशेखर ! तु मुस्लिमभिक्षुकं त्वम्।
सद्वैष्णवः परमभागवतः स एव
प्रेमी, मदीयनिकटेऽत्र तमेव कुर्याः'।।९९५।।

आप्तोऽन्तश्च सनातनं शशिशिराः सङ्गे प्रभोराज्ञया
कृत्वा, श्रीलसनातनः प्रभुपदे भूमौ विलुठ्यानमत्।
दूरादेव, दधाव शीघ्रमथ तं चालिङ्गितुं तु प्रभु-
र्ह्युत्थायैष (निमायिभावमनसो व्यापार एवाऽद्भुतः)।।९९६।।

दृष्ट्वैव प्रभुमेष सर्पमिलनात्पृष्ठे यथा बिभ्यतो
लोकस्यापसरंस्तु तं कथयते दैन्येन सार्धं 'न माम्।
हे नाथ ! स्पृशतु, प्रभोऽस्मि भवतोऽहं स्पर्शयोग्योऽत्र न'
(स्पृश्यो बालजनः, पवित्रपुरुषः, स्नेहेन च श्रद्धया)।।९९७।।

भक्तानां ननु वत्सलः सहृदयो गौरः कदा तद्वचः-
श्रोता स्या,त्स दृढं सनातनतनोः कुर्वंस्तथाऽऽलिङ्गनम्।
ब्रूते 'सम्प्रति पावनोऽहमभवं, स्पर्शः शरीरेण यत्
सञ्जातोऽद्य सनातनस्य (मिलति प्रेमी प्रभोर्भाग्यतः)।।९९८।।

श्रीकृष्णसत्प्रेम सनातनाङ्ग-
स्पर्शेन लब्धुं भुवि शक्यतेऽत्र।
अनेकदोषान्वितपापिनोऽपि'
(श्रीप्रेमलब्धिर्ह्यमलात्मसङ्गात्) ।।९९९।।

जातः श्रीलसनातनः प्रभुकृपाभाराभिभूतो यथा,
तस्मै स्वान्तिकमेव गौरसुमनास्तत्रासनं दत्तवान्।
कारागारसमस्तवृत्तममनाः पप्रच्छ तस्य प्रभुः,
श्रुत्वा सर्वमुदन्तमेष भणति 'त्वद्भ्रातरौ सोदरौ-।।१०००।।

वृन्दावनं (मम) गतौ (मिलितौ प्रयागे),
त्वं तिष्ठ मेऽन्तिकमिहैव तथाऽल्पकालम्'।
मौनं निशम्य नतशीर्षसनातनोऽस्थात्,
तस्यैव शोचति तथा विषये निमायी।।१००१।।

●●

श्रीसनातनस्याऽद्भुतं वैराग्यम्

४१. देहो धर्मसाधनं ह्याद्यम्।
साध्यप्राप्तौ साधनमद्धा साधकजनसर्वस्वम्
तद्रीत्या साधनपरिरक्षणमिह साधककर्तव्यम्।
साधनमथ साधनमेवास्ति, त्वन्यत्साध्यं तस्मात्
सिद्धान्तोऽयं स्मृतितो नश्यति मायाऽविद्यातमसा।
अयमपि देहः साधनमात्रं, साध्यते यद्धर्मादि
सिद्धैर्धर्मादिभिरिह भवति त्वपरसाध्यसंसिद्धिः।
साधनरक्षणकर्तव्यत्वं बध्नात्येवं पुरुषम्
देहासक्तौ परमिह, यत्तत्साध्यं देहाद्यवनम्।।

आसीत्त्यागमयं तु जीवनमहो ! सम्पूर्णमत्र प्रभो,-
रासीत्तस्य तथा प्रियः सुमनसस्त्यागश्च सर्वाधिकम्।
त्यागं संसृतिभोग्यवस्तुजगतः कुर्याद् यदापि क्षितौ,
यावन्मात्रमपीह, शोभनमहोऽद्धा तावदेवाऽधिकम्।।१००२।।

वैराग्यं तु विना न तिष्ठति तथा त्याग,स्ततो मर्कट-
श्रीवैराग्यविरुद्ध एष सुमनास्त्वासी,त्परीक्ष्याऽऽत्मना।
सम्यग् भक्तजनं बहु स्वशरणापन्नं ददर्शैष यद्
वैराग्यं ननु जीवनेऽस्त्यथ न वाऽमीषां निमायिप्रभुः- ।।१००३।।

वैराग्यं यदि पश्यति स्म- कुरुते तु स्मोपदेशं महा-
वैराग्यस्य तदा स तस्य, च यदा वैराग्यकाऽपूर्णता।
हि ज्ञाता भवति स्म, तस्य स तदा श्रीकृष्ण-हृद्यप्रभोः
प्रीत्यर्थं गृह एव चाऽत्र वसतो निष्कामभावेन हि-।।१००४।।

संसारिप्रथितस्वकर्मकरणस्यैवोपदेशं ददौ,
जज्ञे स- व्यवहारमत्र कुरुते ज्ञानी नरोऽपि क्षितौ।
एव स्वप्रकृतेस्तथा त्वनुसृतेः सर्वस्य तत्पूर्णत-
श्चक्रे नाग्रहमेष भौमविषयात्स्थानान्तरार्थं गतेः ।।१००५।।

अत्यागिनं स्म कथयत्यपि नैष दुष्टं,
त्यागं न कर्तुमखिलो विषयस्य शक्तः।

त्यागी तु कौ विरल एव तथाहि कश्चित्
(तज्ज्ञो जनो ग्रहणमोचनयोर्विवेकी)।।१००६।।

श्रीमद्रूपसनातनव्यवहृतेरेव त्वबोधत्प्रभु,-
श्चित्ते साम्प्रतमेतयोर्ननु महावैराग्यमस्ति द्वयोः।
सत्यं, पूर्वमिमावुभौ हि सहजौ यावानहो ! भोगिना-
वत्यन्तं, विहितौ ततोऽप्यधिकमाः ! कौ पृष्ठतस्त्यागिनौ ।।१००७।।

त्वत्र श्रीलसनातनस्य विषयेऽद्धा श्रूयते- निर्मिते
गेहे वा वसनं तु दूरमुटजे, तस्थावयं नाधिकम्।
एकस्माद् दिवसान्निमायिहृदयस्त्वेकद्रुमस्याऽप्यधो
(वृक्षः पक्षिजगन्निवास, इह कौ जीवात्मनां पक्षिता)।।१००८।।

मासान् द्वादश कानने निवसनं वृक्षस्य कस्याप्यधो,
हित्वा तं दिवसे परत्र चलनं चाऽधो द्वितीयस्य तु।
व्यापारो ह्ययमेव चास्य सुहृदस्त्वासीत्तथा दैनिको
(वासस्थानकृते कियान्नु कलहः ? कौटुम्बिकाभ्यन्तरे) ।।१००९।।

गेहेभ्यो व्रजवासिनां लघु-लघु प्रार्थ्याऽग्रहीद्रोटिका-
खण्डं, तानि यथा-तथा च यमुनानीरेण सार्धं विधेः।
कण्ठाऽधो गिरति स्म, शेषमवनौ स्थाने न्यधात्तत्पुन-
र्मृष्ट्वा वारिणि खादति स्म दिवसेऽन्यस्मि- (न्नहोऽस्तेनता)।।१०१०।।

प्रावाराय दधार मार्गपतितैश्चीरैस्तथा निर्मितं
कन्थामात्रमथैकमेष, निकटे पात्रेषु चास्याऽभवत्
एकां मृद्घटितां विना न करुवामन्य,त्तथाऽस्य प्रथा
ह्येवाऽऽसीत् (करुवा करेऽथ गुदरी स्थाने गले-) ऽमायिनः।।१०११।।

श्रीवृन्दावनपावनावनितले वर्षाण्यसौ विंशतिं
त्वेवं यापितवा,नमुष्य विरतेः प्रेमावतारो ह्यतः।
गौराङ्गो बहु तुष्टिमात्मनि गतो, वृन्दावनाद्योऽपि चाऽऽ-
यातः, पृच्छति सत्सनातनसमाचारं तमेव प्रभुः ।।१०१२।।

काश्यामेव सनातनस्य स महावैराग्यशिक्षां ददौ
गौराङ्गः, स्फुटमुक्तवान्न सुमनाः, कौ बुद्धिहीनाय तु।

मूर्खाय स्फुटमुच्यते, सुमनसां सङ्केत एव त्वलं
भूयो बुद्धिमतां कृते हि भवति (प्रज्ञा भुनक्ति क्षितिम्) ।।१०१३।।

आसीच्छ्रीलसनातनो हि परमोऽद्धा बुद्धिमान्, शासनं
तस्यैवाऽत्र धियाऽभवत्प्रखरया ह्येकस्य देशस्य च।
एतस्मिन्नपि तस्य चोपरि कृपा पूर्णा तथाऽऽसीत्प्रभोः,
सङ्केतं पुनरेष किं न बुबुधे (धीमान् हि सङ्केतवित्) ।।१०१४।।

स्पष्टं घटनयाँऽमुष्याऽग्रिमकया।
अत्रैव भविताऽस्माकं परिचयः- ।।१०१५।।

श्रीगौरस्य सनातनस्य सृहृदोरन्योन्यसम्मेलनं
दृष्ट्वा सम्प्रति वैद्यचन्द्रशिखरोऽभूद् विस्मितो,ऽनेन तु।
गौरो मुस्लिमसाधुना मिलति किं प्रेम्णेयताऽयं प्रभु,-
वार्तां किं कुरुते सहोदरसमं भूयो द्रवीभूय च? ।।१०१६।।

आसीद् वैद्यमहोदयः सहृदयो मग्नो विचारे तथा-
ह्यस्मिन्नेव, स वै सनातनमुखं मध्ये च मध्ये पुनः।
पश्यन्नस्त्यपवार्य तु प्रभुदृशं, कृत्वा तथाऽधो मुखं
किञ्चिच्चिन्तयति स्म, वैद्यकमनोभावं प्रभुस्त्वौहत ।।१०१७।।

तस्माच्छ्रीलसनासुहृत्परिचयं ब्रूते ददानः प्रभु-
'र्वेत्सीमं नहि चन्द्रशेखर !, तथाऽसौ गौडदेशावनेः।
सम्राजो भवति प्रधानसचिवो, भक्तो महान् पण्डितः
(काठिन्येन निमायिभक्तिपथिको वै जायते पण्डितः)।।१०१८।।

सर्वाणि स्वकुटुम्बबान्धवपदद्रव्यप्रतिष्ठादिकं
मत्वा तुच्छमथापहाय भगवद्भक्तिं विधातुं त्वसौ।
निर्यातोऽस्य सहोदरावपि पुनर्द्वावेवमद्धा गतौ
वृन्दावासमहो ! विधातुमपरं, त्यक्त्वा गृहद्वारकम् ।।१०१९।।

मे तौ सम्मिलितौ प्रयागविषये, सत्यं, गृहं तेऽधुना
जातं तीर्थममुष्य पादरजसा' श्रुत्वा प्रशंसां निजाम्।
स्थाने श्रीलसनातनः प्रभुमुखा,त्पृथ्व्यां विशँल्लज्जयाऽऽ-
सी,न्नैकोऽपि ससार तस्य वदनाच्छब्दोऽत्र संकोचिनः ।।१०२०।।

पृथ्वी नखेन लिखति स्म तथा कृताधो-
दृष्टिर्निजेन स पुनर्ध्रुवमस्ति पश्यन्।
किञ्चिद् बिलं यदि मिलेदिह तर्हि सीता-
तुल्यं तदन्तरमहं तु समाविशेयम् ।।१०२१।।

लब्ध्वैवैष सनासुहृत्परिचयं भूमौ विलुठ्याऽनम-
च्चन्द्रः, किन्तु सनातनोऽस्य चरणौ जग्राह भूयो रुदन्।
विस्फुट्याऽथ रुरोद, तच्चरणयोरेकः परस्यात्मनः
शीर्षं घर्षति, तौ परस्परमहो! कृत्वा तथाऽऽलिङ्गनम्-।।१०२२।।

प्रेमावेशमथाऽल्पमीषतुरथ स्वं कर्तु,मासीत्परं
वेगोऽसावधिकस्त्वियान्, हि चरणस्पर्शात्तथाऽऽलिङ्गनात्।
प्रेम्णश्चाश्रुविमोचनान्न तु तथाऽभूच्छान्त एव, प्रभु-
र्दृष्ट्वा प्रेम तयोर्द्वयोश्च मनसि ह्यासीत्प्रसन्नो भवन् ।।१०२३।।

ऊचे 'त्वं नय चन्द्रशेखर !' सुहृत् किञ्चित्क्षणानन्तरं
गौराङ्गश्च 'सनातनं सहृदयं धृत्वा तु गङ्गातटे।
अस्य श्मश्रु तथोष्ठलोम निखिलं वै मुण्डय, क्षौरकम्।
संकार्याऽस्य विशुद्धवैष्णवसमं प्रेयः स्वरूपं कुरु'।।१०२४।।

आज्ञापालनमस्य शेखरश्चक्रे, गाङ्गतटं प्रगम्य सः।
संकार्याऽऽगतवान् सनातनक्षौरं, तञ्च विधृत्य सङ्गतः ।।१०२५।।

पार्श्वे श्रीलसनातनस्य ननु (तद् भूटानिकं कम्बलं)
किञ्चिन्नूतनवस्त्रमस्ति न (विना) चान्य,त्ततः शेखरः।
वस्त्रं नूतनमस्य दातुमलष,न्न स्वीचकार त्वसौ
साधुर्नूतनवस्त्रकस्य धरणं (रागिप्रियं नूतनम्) ।।१०२६।।

सोऽभून्नो बहुधाऽऽग्रहेऽपि विहितेऽद्धा सम्मतो, वृत्ततोऽ-
तो जाता मुदिता प्रभोस्तु महती, तन्मध्यमेवाऽऽगतः।
भिक्षाकारणहेतुतश्च तपनो मिश्रो विनेतुं प्रभुं,
दृष्ट्वा 'मिश्र! महाशय !' प्रभुरमुं तूवाच गौरो हसन्-।।१०२७।।

'गच्छति वृद्धिं मत्परिवारः सम्प्रति चावां द्वौ ननु जातौ।
स्यादुभयोर्भिक्षा तव भोज्यौ' (कौ गृहिणां ह्यस्यां बहु भारः) ।।१०२८।।

ऊचेऽल्पत्रपितस्वरे च तपनो मिश्रः कृताऽधःस्वदृग्
भावेनाऽथ 'महाप्रभो !' विनयिना'ऽस्त्यद्धा कुटुम्बं तु ते।
सम्पूर्णा वसुधैव, वेतनभृतिस्ते सेवकोऽस्मि त्वहं
(भाग्यं सेवकतोपलब्धिरवनौ सौहार्दमात्रात्मनः) ।।१०२९।।

राज्ञस्त्वेव तथा समर्पयति कौ चानीय वस्तूनि वै
भृत्यः स्वामिपुर,स्ततोहि भवतो वस्तूनि, कर्ता यथा।
आज्ञां, तादृशमेव चार्पणकृतौ शक्तो भविष्याम्यहं
(सर्वं वस्तु परप्रभोश्चयनकृत्कुर्यात्ततोऽसंग्रहम्) ।।१०३।।

दानं दातुमथ क्षमः स ननु यः स्थाने स्वतन्त्रो भवेद्,
ह्यात्मीयः क्वचनाऽपि वस्तुनि भवेद्यस्याधिकारस्तथा।
सर्वं वस्तु यदा प्रभोर्ननु, पुनः स्थानेऽत्र भृत्यस्य किं ?'
(भृत्यत्वे कलहो न, केवलमिह स्वस्वामितास्थापने) ।।१०३१।।

तस्याऽदोवचसा बहु प्रभुरभूद् गौरः प्रसन्नः, सना-
साधोः कारितवांस्तथा परिचयं तत्रै,व लब्धेऽतिथेः।
संश्लिष्टस्तपनोऽमुना परिचये, तत्पादयोर्वन्दनं
चक्रे श्रीलसनातनोऽपि (सुहृदोः सत्सङ्गतिर्व्यापृतिः)।।१०३२।।

भूयः श्रीलसनातनोऽपि चलितः पृष्ठेऽस्य पृष्ठे प्रभो,-
र्गेहं श्रीतपनस्य, गौरसुमनास्तद् भोजनस्यासने।
सीदन्नेव 'सनातनं' कथयते '(तस्यापि) चाकारय,
(स्थाने कारय भोजनं)' (सहृदयैर्विस्मर्यते नाऽनुगः)।।१०३३।।

सद्भाग्यस्य सनातनस्य तपनो मिश्रो दयालुस्त्वथै-
तस्योच्छिष्टपरप्रसादमलषद् दातुं निमायिप्रभोः।
संस्पृष्टं त्वधरामृतेन, तदसौ मिश्रो बभाषे गृही
'सम्प्रत्यस्ति मनाक्सनातनसुहृत्कृत्यं तु शेषं प्रभो!-।।१०३४।।

भवान् करोतु भिक्षणं, स चेहते मया समम्'।
पुनर्जगाद न प्रभु,श्चकार भिक्षणं च सः ।।१०३५।।

गौराङ्गप्रभुभिक्षणे सति तदुच्छिष्टप्रसादं ददौ
गेही श्रीलसनातनाय तपनो मिश्रः, प्रसादञ्च तम्।

लब्ध्वैवाऽथ सनातनस्त्वनुभवं चक्रेऽखिलाघं तु मे
स्पष्टं गच्छति मत्तनोर्ननु बहिर्निस्सृत्य निस्सृत्य च।।१०३६।।

लब्ध्वा प्रसादं मुदिता बभूवाऽ-
पूर्वैव चैकाऽद्य सनातनस्य।
कदाचिदस्यापि तथेयती नो
पूर्वन्तु लब्धा मुदिताऽत्र जाता ।।१०३७।।

मिश्रः श्रीलसनातनस्य लभने जाते प्रसादस्य स
ह्यानिन्ये निजगेहतो ननु नवं वस्त्रं, हठेनाऽस्य च।
देहे श्रीलसनातनस्य सुहृदोऽभूत्तत्तु संश्लेषयन्
(पश्चाद् भोजनकस्य देयमतिथेः शक्तौ हि वस्त्रं नवम्) ।।१०३८।।

ऊचे श्रीलसनातनस्तु करुणे धृत्वा पदेऽस्य स्वरेऽ-
त्यन्तं 'नो कुरुतां महाशय ! भवान्मे मिश्रजी ! त्वाग्रहम्।
वस्त्रं नूतनमद्य नो परिदधे, नो मन्यते चेद् भवान्,
देह्येकं मम वस्त्रमात्मवसितं किञ्चित्पुराणं तदा' ।।१०३९।।

जातो मिश्रगृही तथाहि विवशः, सोऽन्ते स्वगेहात्तदै-
कं धौतं तु पुराणमत्र सुगृही निस्सार्य नीत्वाऽऽगतः।
द्वे खण्डे कृतवान् विपाट्य ननु त,च्चैकेन चक्रे सना
कौपीनं त्वथ गालनीं, परमसौ व्यावर्तयच्चाङ्गके ।।१०४०।।

साम्प्रतं सोऽभवत्। पूर्णतो वैष्णवः।।१०४१।।

स्थाने तत्र समागतस्तु स महाराष्ट्रीयविप्रोऽपि, च
प्राप्य श्रीलसनासुहृत्परिचयं तद्भोजनाभ्यर्थनम्।
चक्रे, त्वाह सनातनोऽत्र विषये 'गेहेऽहमेकस्य नो
कर्ता भोजनमद्य-(निश्चितगृहे भुङ्क्ते हि सिद्धो यतिः)।।१०४२।।

विप्राणां गृहतस्तथा मधुकरीं भिक्षां ग्रहीष्याम्यहं
याचित्वैव, च गेहतोऽपि भवतः स्थानात्तथा, याचिता।
कुर्यान्मे न विशेषमाग्रहमहो ! गेही भवा'न्नो पुन-
श्चक्रे कोऽपि सनातनाऽऽग्रहमथ (श्रद्धेयमेव व्रतम्)।।१०४३।।

कुर्वन्नभून्मधुकरीमुदरस्य पूर्तिं
संयाच्य स, प्रभुरमुष्य विरक्तिमच्छाम्।
सन्तुष्टिमाप बहु मानस एव दृष्ट्वा,
पार्श्वे प्रभोश्चरणयोस्तु सनातनोऽस्थात्।।१०४४।।

पार्श्वे श्रीलसनातनस्य हि निजाऽऽवुत्तेन दत्तं सितं
यावत्सम्प्रति कम्बलं ननु तदासी,त्कम्बलं तद् बहु।
आसीत्सुन्दरमेव कोमलमहो ! तस्योर्णमत्युज्ज्वलं
कौशेयादपि वै महार्घमभवद् ह्यर्घोऽस्य रूप्यत्रयम्।।१०४५।।

रूप्यत्रयाऽऽविकमहस्सु हि तेषु लोक-
स्तु प्राववार महतोऽपि महान् धनाढ्यः।
तद् भावि नूनमधुना च सहस्रमूल्यं,
तत्कम्बलं प्रति पुनस्तु पुनः प्रभोर्दृक्।।१०४६।।

मेधावी बुबुधे सनातनसृहृन् - मत्पार्श्वगं कम्बलं
नाऽदस्तु स्वदते प्रभोः स गतवांस्तत्रैव कालेऽरतिः।
गङ्गाजीपुलिने, स्वशीर्णपटकं तत्रैकसाधुर्ददौ
गङ्गायां परिधाव्य शोषणकृते (गङ्गाश्रयाः साधवः)।।१०४७।।

गत्वाऽन्तिकं तस्य सनातनोऽवदन्-
'ममोपकारं त्वमियन्तमातनु।
भ्रातर्ममाऽदो धर कम्बलं, निजां
कन्थामिमां देहि च मे निमायिनः'।।१०४८।।

आश्चर्यतस्तु चकितः प्रति कम्बलं तत्
पश्यन् स साधुरवद'त्कुरुते कथं भोः !।
हास्यं मयाऽधनजनेन, हि मे विदीर्णा
कन्था, कुतोऽपि करवै परमार्गणं तु'।।१०४९।।

ऊचे श्रीलसनातनस्त्वतिशयस्नेहेन 'नो बोध तु
भ्रातर्हास्यमिदं, वदाम्यहमहो ! सत्यं तु सत्यं, यदि।
एतत्कम्बलकस्य वै विनिमये दद्याः स्वकन्थां, तदाऽ-
त्यन्तं ते तु ममोपरि ह्युपकृतिः साध्वात्मनो भाविनी' ।।१०५०।।

'किं वाञ्छति भवान् कन्थाविनिमये।
दातुं त्वतिमहार्घं कम्बलमिदम्?' ।।१०५१।।

'एकं त्वत्र रहस्यं, देहि त्वं मम साधो ! ।
अस्त्येवंविधकन्थापेक्षाऽद्धा महती मे'।।१०५२।।

कन्थां साधुरदात्प्रमोदसहितं, सार्धं मुदा तामसौ
प्रावृत्याऽथ सनातनः सहृदयश्चन्द्रस्य चाप्तो गृहम्।
दृष्ट्वा नाऽत्र सनातनोपरि सृहृत् तत्कम्बलं सोऽबुधत्-
'कन्थां प्राप्य कुतोऽपि चैष दलितां क्षिप्त्वाऽऽगतः कम्बलम्' ।।१०५३।।

भूयोऽप्यज्ञ इव प्रभुः परं पप्रच्छाऽथ 'सनातन ! प्रिय! ।
नो तत्कम्बलमीक्ष्यते तव, स्थाने कुत्र तदत्र रक्षितम्?' ।।१०५४।।

भावेन त्रपितेन किञ्चिदवदत्साधुः सनाश्रीतन-
'स्तेऽपाराऽस्ति कृपा यदा मयि तदा तत्कम्बलं स्थास्यति।
प्रेमात्मन्नवशिष्टमेव कथमा ! भोगस्वरूपं प्रभो !,
तद्यातं मम पूर्वपापसहितं त्वच्छ्रीकृपावेगतः' ।।१०५५।।

सन्तुष्टोऽतिशयं बभूव सुमना ब्रूते शनैर्वै शनैः
'सद्वैद्यो ननु यः सनातन ! भवेऽस्मिञ्जायते, स्वस्थताम्।
याते रोगिणि चापि यच्छति दिनं किञ्चित्स तस्यौषधिं,
रोगः स्थास्यति चेन्मनागपि तनौ, वृद्धिं गमिष्यत्यसौ- ।।१०५६।।

मन्दं मन्दमहो ! पुनस्तु, मतिमान् वैद्यस्ततो रोगिणो
रोगस्यांशमपीह मुञ्चति तु न स्थातुं, तथाह्यत्यजः।
त्वं सर्वं, त्वपि तत्र चेतसि सति क्षुद्रा यथा वासना-
भूदेवोत्तमकम्बलस्य लगिता (क्षुद्रं, ह्यतृप्तिर्यतः)।।१०५७।।

भिक्षाखण्डकभोजनं सतो याचित्वा,ऽतिमहार्घकम्बलम्।
चाङ्गे, नेदमहोऽत्र शोभते (शोभाऽत्यन्तसमानयोगता) ।।१०५८।।

सञ्चिन्त्यैष सनातनः सहृदयोऽपारानुकम्पां प्रभोः
सञ्जातो हृदि गद्गदो,ऽस्य च गलोऽद्धा संभृत,स्तत्प्रभोः।
सोऽरोदीच्चरणौ विधृत्य सुहृदश्चोत्थाप्य तं स्वोरसा
गौरः श्लेषयति स्म (निश्छलकृपालब्धौ निजात्मार्पणम्) ।।१०५९।।

उपस्थिता भक्तजनास्तथाखिलाः
शंसन्ति ते भूरि तु भूरि चानयोः।
सनातनस्याऽत्र विरक्तिमद्भुता-
मपारसद्वत्सलतां निमायिनः ।।१०६०।।

●●

श्रीसनातनाय शास्त्रीयशिक्षा

४२. मधुरं चैतन्याख्यज्योतिः।
दैविकभौतिकदैहिकतापैः खिन्नानामखिलानाम्
उपचारो विविधो व्यवहारे, तु न कस्यापि प्रशमः।
सुकरोपायं हरिसंकीर्तनमखिलक्लेशविनशनम्
अदिशत्कृत्वा स्वयमिह जनताबन्धुरबन्धुनिमायी।।

गौराऽपारकृपोपलब्धिघटनापश्चाद् बभूव प्रभुं
जिज्ञासाऽस्य सनातनस्य कतिचिच्छास्त्रीयकं प्रश्नकम्।
प्रष्टुं, बद्धकरद्वयाञ्जलिरसौ ब्रूते 'प्रभो! साधन-
त्यक्तोऽहं परमार्थमार्गविषयाऽबोधोऽस्मि, जानेऽपि नो-।।१०६१।।

तु प्रश्नं परमार्थकं विषयिणां सङ्गी च संसारिणां
कर्तुं, तत्तु दयां विधाय विषयाऽऽसक्तान् भवानेव नः।
गत्वा बोधितवान् पशूंश्च शयितान् गेहं यथा, तादृग-
स्माकं देहि मनुष्यतां हि पशुतामेतां विलोप्याऽद्य भोः!।।१०६२।।

शिक्षां मां ननु बोधते मदुचितां, तामेव देह्यस्मि कः ?,
कर्तव्यं मम किं ? तथा भगवताऽस्माकं समं कः पुनः।
सम्बन्धोऽस्ति ?, निमायिनो भगवतः किं च स्वरूपं ?, वचः
सक्षेपे दिशतां ममेदमखिलं' (संक्षिप्तवार्ता स्थिरा)।।१०६३।।

तेनोक्तं 'भगवत्कृपा त्वयि सनासाधो!' निमाय्यात्मना
'ते शङ्कैव तु का क्षमाऽत्र भवितुं ?, जानन्नपि त्वं त्विमान्।
संप्रश्नान् कुरुषे तथाहि जनताकल्याणहेतोः सुहृत्,
(स्थानेऽस्तु) प्रकृतिस्तु साधुसुहृदामेषा भवत्यत्र कौ-।।१०६४।।

तेषां चाखिलचेष्टितं जगत्क्षेमस्यैव कृते तु जायते।
पृच्छ त्वं, लषसेऽद्य किं तथा प्रष्टुं?'(कोऽपि तथाहि भावकः)।।१०६५।।

'एतज्ज्ञातुमहं लषामि भो !, या जीवेषु विभिन्नता प्रभो !।
संसारे विविधा प्रतीयते, कस्मात्सा भवति? प्रियप्रिय!' ।।१०६६।।

'शास्त्रेष्वत्र चतुर्विधस्तु कथितो जीवो' जगाद प्रभु-
'हे रूपाग्रज ! मुक्तनित्यसहितो बद्धो मुमुक्षुस्तथा।
मुक्ताः श्रीसनकादिकप्रभृतयः, सांसारिकं बन्धनं
न व्याप्नोति कदापि संसृतितलेऽमून् संस्थितानप्यहो!।।१०६७।।

एतेऽहर्निशमेव साधुशरणश्रीकृष्णसंकीर्तने
संलग्ना निवसन्ति, नित्यपदके सप्तर्षिनाकाधिपौ।
जीवे सन्ति तथा प्रजापतिमनू चेत्यादयोऽमी सदा
सृष्ट्यर्थं तु वसन्ति कर्मनिरताः (कर्मप्रवृत्तिर्जगत्)।।१०६८।।

योऽमुष्य क्षणभङ्गुरांश्च जगतोऽनित्यस्य वै नश्वरान्
भोगानत्र विहाय साधु भगवत्पादाब्जयोराश्रयम्।
धर्तुं वाञ्छति, कौ मुमुक्षुपदको जीवः स, धार्यास्तथा
शक्यन्ते परमार्थमार्गपथिकाः प्रायोऽत्र वर्गेऽखिलाः।।१०६९।।

जायन्ते निजभावतस्तु सततं लोके म्रियन्ते तथा
चैतेभ्यस्त्वतिरिक्तमत्र ननु ये, येषां प्रवृत्तौ पुनः।
कृत्याकृत्यविवेक एव न भवेऽस्मिन्, बद्धजीवास्तु ते
कथ्यन्ते (कुरुते विवेकवरणं सत्साधुसङ्गाज्जनः)।।१०७०।।

श्रेण्यामिहैव विषयेषु च सन्ति बद्धा-
स्त्वज्ञा नराः पशुखगा निखिलास्तु जीवाः।
एतेऽत्र साधनमहो ! भजनं न कर्तुं
शक्ष्यन्ति, साम्प्रतमुवाच कृते तु तेषाम्-।।१०७१।।

४३. पुनरिह जननं पुनरिह मरणं पुनरिह जठरे शयनम्
जननं प्रकृतिविशोधनकृतये, सत्यपवर्गे मरणम्
जठरे शयनं निश्चयनार्थं भवतु प्रभुभक्तेरिह।
कृतनिश्चयविस्मरणं मायाऽविद्याबलतो नृणाम्
समाधानमस्योक्तं सद्भिः - सत्सङ्गस्वस्मरणम्।।

जीवानां ननु योनयश्चतुरशीतिर्लक्षमुक्तास्तथा
शास्त्रेष्वत्र, पदाब्जतो भगवतो भूत्वा पृथक् चासु वै।
नानायोनिषु देहभाग् भ्रमणकं कुर्वंस्तु सन्तिष्ठते
(भ्रान्तिक्षेत्रमनन्तमस्ति घटितं जीवात्मनोऽविद्यया) ।।१०७२।।

एतेषां चिरकालतो भगवतो विच्छेदहेतोर्गता
वृत्तिस्त्वस्ति बहिर्मुखी, परममी विस्मृत्य मायापतिम्।
मायाबन्धनमागता, भगवतोऽत्यन्ता दुरूहा तु तान्
दैवी योनिषु वर्तते गुणमयी माया नयन्ती बहु' ।।१०७३।।

'मुक्तिः प्रभो! भुवि भवेत्कथमत्र माया-
बन्धा,द्यदा भ्रमति कौ तदधीन एव।
जीवो, न किञ्चन तदा ननु विद्यतेऽस्यां
निस्तारसाधनमथैव निमायिनोऽस्य'।।१०७४।।

'आ,मस्ति वै साधन,मेकमेवाऽ-
ब्धा साधनं, योऽत्र विहाय मायाम्।
मायापतिश्रीशरणं सरे,त्तन्-
माया ह्यलङ्घ्यापि विमुच्यतेऽब्धा'।।१०७५।।

'एतत्त्वेव निमायिन् ! पृच्छाम्यस्मि, कथं भोः !।
गन्तव्यं ननु मायास्वामिश्रीशरणेऽब्धा ?' ।।१०७६।।

'भ्रातस्त्वत्र तथा कृपैव गणिता मुख्या, कुपा तु त्रिधा
मुख्या, शास्त्रकृपा तथा गुरुकृपा चान्त्या प्रभुश्रीकृपा।
एतास्वत्र हि कस्यचित्त्वपि तथा सत्यां कृपायां भवे
सन्नृणां भवितुं क्षमाऽथ शिथिलं सांसारिकं बन्धनम् ।।१०७७।।

अग्रसरास्ते कौ भवितुञ्च। श्रीप्रभुकाष्ठां तु प्रभवन्ति' ।।१०७८।।

'एतज्ज्ञातुमहं लषामि- विमुखो भूत्वा कथं हे प्रभो !
जीवोऽयं प्रभुतोऽत्र योनिषु तथा नाना भ्रमन् वर्तते।
पृथ्व्यामस्ति तु दुःखमेव सुतरां दुःखं, भविष्यत्यलं
स्वर्गादौ सुखमेव तु (प्रिय इवाऽऽभाति ह्यगो दूरतः) ।।१०७९।।

जीवानां ननु शान्तिर्नो तत्रापि तु, कुत्र ?।
गत्वैषां चरमा वै शान्तिः संभवति श्रीः'।।१०८०।।

'आबद्धोऽस्त्यखिलः सनातन! भवे तु ब्रह्मपर्यन्तमा-
कीटाज्जन्तुरहो ! निमायिभगवन्मायागुणैः, किं वचः?।
स्वर्गस्याऽत्र, तथाहि यावदथ नो तु ब्रह्मलोकं परा
शान्तिस्तु प्रभुपादपद्मगमनादेव त्ववाप्तुं क्षमा' ।।१०८१।।

'तु ब्रह्मणो ननु भविष्यति शान्तिरद्धा,
त्वीशश्चराचरभवस्य तथाहि सोऽस्ति।
दुःखं कृतेऽस्य किमहो !, स तु पूर्णविश्वं
निर्माति संसृतिमनःसुमनो ! निमायिन् !'।।१०८२।।

ऊचे विहस्य सुमना'स्त्वपरोऽस्ति चेशः
श्रीकृष्ण एव स, सनातन! हे ! न जाने।
ब्रह्मा प्रतिक्षणमहोऽत्र कियानसंख्य-
श्चोदेति नश्यति' (जगद् भवनाशलीला)।।१०८३।।

आश्चर्येण समं सनातनवचो- 'ह्युक्तं त्वया किं ? प्रभो!,
ब्रह्माण्डस्य तथाखिलस्य ननु तु ब्रह्माऽपरोऽस्तीश्वरः।
ब्रह्माणो ननु सन्ति संसृतिभरेऽसंख्या, ममेदं वचो
बुद्धौ नागतमाः!, स्पृहा मम तथाऽदोबोधनस्य प्रभो!' ।।१०८४।।

स्नेहेनैव जगाद सोऽथ महता गौरो'ऽच्छ,मेवं पुन-
र्बोध त्वं, ननु यत्र सम्प्रति तथा काश्यां तु पुर्यामसि।
एवन्त्वेव लसन्ति भारततलेऽस्मिन् सप्त पुर्यस्तथा
पुण्याः पापविनाशिकाश्च नगरं लक्षाधिकं विद्यते।।१०८५।।

जम्बूद्वीपधरेयमस्ति नवभिः खण्डैर्युता चेदृशै-
स्तन्नामानि च भारतं कुरुहरी वै केतुमालं तथा।
भद्राश्वं परमं हिरण्मयमया ! वै रम्यकं किन्नरं
खण्डैरेभिरिलावृतं कथयते द्वीपं युतं जम्बुकम् ।।१०८६।।

जम्बूद्वीपधरास्थलाद् द्विगुणितो द्वीपस्तथा प्लक्षकः,
प्लक्षात्त्वस्ति च शाल्मली द्विगुणिता, द्वीपः कुशाख्यस्ततः।
क्रौञ्चाख्यो द्विगुणस्ततो द्विगुणितः शाक,स्ततः पुष्करः,
सप्तैवं ननु सिन्धवः क्षितितले-(ऽत्यन्ता विशाला क्षितिः) ।।१०८७।।

नो बोद्धुं पुरुषस्तथा कलियुगोद्भूतः समर्थोऽखिलं
जम्बूद्वीपमथैव, पारमवनौ प्राप्नोति नाऽसौ तथा।
एव क्षारमहोदधे,र्दधिघृतक्षौद्रादिरत्नाकरान्
बोद्धुं तु प्रभवेत्पुनर्ननु स किं? (मन्दायते धीः कलौ) ।।१०८८।।

एकैकस्य च विद्यते रसनिधिर्द्वीपस्य पश्चात्तथै-
कस्त्वेको, ननु सर्वतो भुवि लघुर्द्वीपोऽस्ति जम्बूस्तथा।
एते सन्ति च सप्त हि क्षितितले द्वीपास्ततः कथ्यते
सप्तद्वीपवती धरा, कथयते भूलोकमेतत्त्वपि।।१०८९।।

एवं भूस्थलतो भुवर्ल्युपरि सन्ति स्वर्महर्वै जनो
लोकाः षट् तु तपश्च सत्य,मथ वै नीचैस्तलं चातलम्।
विद्यन्ते वितलं च सप्त सुतलं लोकास्तलस्यातलं
पातालं च रसातलं, लघु लघु प्रत्येकलोकेऽत्र च- ।।१०९०।।

लोकाः सन्ति तथाऽमिताः, प्रथमतोऽद्धा नाक एवेक्षतां,
लोकाः सन्त्यमिता,स्तथाऽलमुडवो दीव्यन्ति रात्राविमे।
येऽसंख्या, निखिलाः पृथङ् ननु पृथक् स्वर्गस्य लोकाः पुनः
सन्त्येते, ह्यमितास्तु तेष्वपि तथा जीवाश्च पृथ्वीसमम्।।१०९१।।

अस्तीन्दुध्रुवसूर्यभौमसदृशः स्वर्गे ह्यसंख्यः पुन-
र्लोक,स्तत्र रवित्विषोऽपि न तथाऽपेक्षा पुनर्जायते।
ते सर्वे तु भवन्ति वै वितिमिराः स्वस्वप्रकाशैस्तथा
(लोके कर्मणि हीह रात्रिदिवसौ विश्रामकार्यक्षणौ)।।१०९२।।

लक्षं कोटिरहो ! न, तेऽपरिमिता लोका महान्तस्तथा
विद्यन्ते रविभा तमोमणिसमा येषां पुरो ज्ञायते।
लोकास्ते निखिलास्तु दिव्यमहसाऽद्धा स्वर्ग एवाऽऽत्मना
गण्यन्ते (हि विशेषता प्रकृतितो लब्धैर्गुणैर्वस्तुनः)।।१०९३।।

स्वर्लोकादुपरि प्रभाति च महर्लोको,ऽपि तत्राऽमिता
जीवाः सन्ति, जने तथा तपसि वै सत्ये स्वतन्त्राः पुनः।
लोकाः सन्ति सहस्रशो लघु लघु, स्वर्गोपमं विद्यतेऽ-
धोलोकेष्वपि सप्तसु प्रियसुखं (देहप्रबन्धः सुखम्)।।१०९४।।

विद्यन्ते नरकस्य चापि सुमनो ! लोकास्तु तत्रैव हे,ऽ-
द्धा लक्षं नरकोऽपि, चास्त्यधिपतिर्ब्रह्मा त्वमीषां तथा।
लोकानामपरश्चतुर्दश, वरोऽस्ति ब्रह्मलोकोऽखिले
(श्रीब्रह्मा निखिलप्रजापतिपिता, स्थानं पितुः स्याद् वरम्) ।।१०९५।।

एतल्लोकमयं चतुर्दश तथाऽस्ति ब्रह्मणोऽण्डं, ततो
ब्रह्माण्डं कथयन्ति, नाऽत्र सततं स्वामी त्वथैकोऽब्जजः।
ब्रह्माण्डे, परिवर्तते शतसमापश्चात्स, नो नः शतं
तद्वर्षाण्यपि, वस्तुतः शतसमाः श्रीब्रह्मणस्त्वात्मनः'।।१०९६।।

'ब्रह्मवर्षमानमस्मि वेत्तुमाः ! प्रभो !, ह्यजस्य।
एकवर्षमस्मदीयवर्षकैः कियद् दिनन्तु ?'।।१०९७।।

'अच्छं, त्वं कुरु साम्प्रतन्तु गणनां- दृश्यं प्रकारादपि
स्यान्नो यत्तु कुतोऽपि, यस्य विधिना केनापि भागः क्षमः।
नो कर्तुं 'परमाणु'रत्र दिशते तत्, तद्द्वयं जायते
चैकोऽणुस्त्रसरेणुरत्र भवति ह्येकस्त्वणूनां त्रयम्।।१०९८।।

आम्, स्थाने त्रसरेणुरत्र भुवने संलक्ष्यते, ऽर्कत्विषा
योऽल्पोऽल्पो ननु चोत्पतन्निव कणो वातायनाल्लक्ष्यते।
एवाऽस्ति त्रसरेणुरेष, स तथाऽद्धा भारहीनो, यतः
पृथ्व्यां तत्पतनं न सम्भव-(महो! भाराः श्रयन्ति क्षितिम्) ।।१०९९।।

यावत्त्रिंत्रसरेणुमग्रसरति ह्युल्लङ्घ्य सूर्यः क्षणं,
कालः स त्रुटिरुच्यते, त्रिंशतकैर्बोधस्तथैको मतः।
एतावत्त्रुटिभि,स्त्रिभिर्ननु लवो बोधै,र्निमेषो लवै-
रेकश्च त्रिभिरुच्यते, क्षणमितः कालो निमेषत्रयात् ।।११००।।

काष्ठा पञ्च तथा क्षणै,श्च दशभिः कालो लघुः पञ्चभिः
काष्ठाभि,र्दश पञ्च चात्र लघुभिः कालो घटी जायते।
मूहूर्तश्च घटीद्वया,त्प्रहरकं षट् सप्त घट्यां तु वा
जातायां (दिनवृद्धिकक्षयदिशा) ह्येकं मनुष्यात्मनाम्।।११०१।।

एकञ्च प्रहरैर्दिनं भुवि निशा चैका चतुर्भिस्तथा,ऽ-
होरात्रं प्रहरैस्ततोऽष्टभिरथैकं, सप्त चैकः पुनः।
सप्ताहो दिनरात्रिभि,र्दश तथा वै पञ्च पक्षो दिनै-
रेको,ऽस्यां भुवि शुक्लकृष्णपदतः पक्षद्वयं वर्तते ।।११०२।।

मासः पक्षकयुग्मतो भवति वै, मासद्वयेन त्वृतु-,
श्चैको वै ऋतुभिस्त्रिभिस्त्वयनकं, तच्चोत्तरं दक्षिणम्।

नामभ्यां ह्ययनद्वयं, भुवि तलेऽस्मिन्मानवानां समा
चैका तु ह्ययनद्वयेन (विविधोद्धर्षः समाभ्यन्तरे) ।।११०३।।

देवानां दिनमुत्तरायणमहो ! तेषाञ्च रात्रिस्तथा
बोद्धव्यं ननु दक्षिणायन,मतो ब्रूमो वयं यां समाम्।
देवानां दिनमेकमेव ननु सै,कं देववर्षं तथा
तद्व्योमर्तुवपुर्दिनैः, कथयते यद् दिव्यवर्षं भवित् ।।११०४।।

देवाब्दैस्तु चतुःसहस्रकमितं सत्यं, सहस्रत्रयाऽ-
ब्दं त्रेता, द्विसहस्रकमितं च द्वापरं वै युगम्।
पृथ्व्यामेकसहस्रवर्षककलि,श्चैवं व्यतीते युगे
ह्येकस्मिन् द्रुतमेव नो लगति वै भूयो द्वितीयं युगम्।।११०५।।

तत्तस्याग्रिमपृष्ठयोस्तु समयः सन्ध्या तथा कथ्यते
सन्ध्यांशो,ऽष्ट शतं कृतस्य च समा,स्त्रेतुः शतं षट् समाः।
दिव्याब्दैस्तु पुनश्चतुःशतसमाः सन्ध्या च सन्ध्यांशकः
कालो द्वापरकस्य, च द्विशतकं वर्षं कलेः स्वीकृतः।।११०६।।

देवाऽऽदित्यसहस्रवर्षकमितं कावत्र (लक्षं त्रय-
श्चत्वारिंशदथाऽत्र विंशतिरहो! भूमौ सहस्रं समाः)।
एवं ह्येकचतुर्युगं भवति वै, त्वेकं च मन्वन्तरं
कौ यातेऽत्र तथैकसप्ततिमिते तादृक् चतुष्के युगे।।११०७।।

पृष्ठस्थः परिवर्तते त्वमरराट्सप्तर्षिमन्वादिको,
नूत्नः सम्प्रति जायते ह्यपगते चैकत्र मन्वन्तरे।
अत्येतीह यदा चतुर्दश तथा मन्वन्तरं तादृशं,
तर्ह्येकं दिनमब्जजस्य महती रात्रिश्च वै तावती।।११०८।।

स्वर्गेशा मनवश्चतुर्दश दिनेऽस्यैकत्र तु ब्रह्मणो
जायन्ते परिवर्तिताः, कथयते कल्पं तथा तद्दिनम्।
एकं, सृष्टिकृतिं दिने स विदधत्स्थाने भवत्यब्जजः
संहृत्याऽऽत्मनि ताञ्च सृष्टिमखिलां शेते च कृत्वा निशि ।।११०९।।

भूयोऽसौ ननु जात एव दिवसे कार्ये भवत्यापृतो,
वस्तून्यापणिको यथा भुवि दिने विस्तार्य नाना बहिः।

आस्ते, पण्यगृहेऽखिलञ्च पिहितं संहृत्य धत्ते निशि,
प्रातः सोऽथ यथावदेव तनुते भूयः प्रसारं, तथा-।।१११०।।

व्यापारं विदधत्त्वजः प्रतिदिनं संतिष्ठते, ब्रह्मणो
व्योमर्तुस्वरसंख्यकैश्च दिवसैस्तु ब्रह्मवर्षं मतम्।
आयुश्चेदृशवर्षकैः शतसमास्त्वेकस्य हि ब्रह्मणो,
लोकानां नशनं हि कल्पसमये त्वेव त्रयाणां, परम्-।।१११११।।

ब्रह्मायुःपरमाश्चतुर्दशभुवो ब्रह्माण्डकस्याऽस्य वै
नाशः संघटते, महाप्रलयकं तत्कथ्यते, तत्त्वजः।
सार्धं संविशति प्रमुक्तपुरुषैः स्वब्रह्मलोकस्य च,
स्थाने श्रीभगवत्तनौ, पुनरहो ! ब्रह्मा नवो जायते'।।१११२।।

श्रुत्वाऽऽयुः परमेष्ठिनः प्रभुमुखाज्जातः परं विस्मितः
पप्रच्छैष सनातनो'ऽस्ति तु महाश्चर्यस्य वार्ता प्रभो !।
एषे,मां तु निशम्य चातिविपुलं वैराग्यमुत्पद्यते,ऽ-
स्माकं किञ्चिदपि त्वदोगणनया नाऽऽयुर्निमायिप्रभो ! ।।१११३।।

स्वीकुर्मः शतवर्षमत्र परमायुर्यद् वयं, ब्रह्मण-
स्तत्त्वेकस्य तथा क्षणस्य किमहो !, स्थाने लवस्यापि नो।
कोट्यंशेन समं, च गर्वमियदास्त्वस्यां करोति स्थितौ
मूर्खोऽयं मनुजो' (मनुष्यनिवहे मूर्खोऽसता गर्वितः)।।१११४।।

तस्योत्तेजितभावतः सममथोल्लासेन गौरो ददौ
चैतन्यप्रभुरुत्तरं, सुमनसो दीव्यन्मुखं तत्क्षणे।
आसीत्तस्य सनातनं तु दिशतो, निस्सृत्य निस्सृत्य तनू-
न्नेत्राभ्यां बलतः सनातनतनावंशुर्मुदः प्राविशत् ।।१११५।।

'लोकेऽयं मनुजः सनातन! यदा (तर्ह्येव) नो बोधति,
मायायां परिवेशमेव पतितः क्षुद्रं निजं बोधति।
सर्वं, कूपहरिस्तथाब्ध्यनुमितिं कुर्यात्तु किं ?, तत्कृते
कूपान्नास्ति बृहत्तरो ननु परः कोऽप्यब्धिरेव क्षितौ।।१११६।।

प्रत्यक्षं भुवि पश्यसीह, दिवसं ब्रूषे यमेकं स्वकं,
तस्मिन्नेव भवन्ति सन्ति भुवने लक्षं तु जीवास्तथा।

स्पष्टं मृत्युमनेकवारमिह ये गच्छन्ति, जन्माऽपरं
भूयो नूत्नमनेकवारमथ च स्थाने दधन्ते क्षणात्।।११७।।

एकं त्वेव दिनं तवाऽऽभवदहो ! तेषां व्यतीतं पुन-
र्जन्माऽनेक,मतोऽस्ति कीटसदृशं चाग्रे सुरब्रह्मणोः।
आयुर्नस्तु, तथाखिलेषु विषयेऽद्धाऽस्मिन् पुराणेष्वहो!
विस्तारेण सहैव शोभनतयाऽत्यन्तं स्फुटं वर्णितम् ।।११८।।

अस्यैव बोधाय कथा तथैका
मनोहराऽत्यन्तमहो ! पुराणे।
आयाति सर्वत्र कृते नराणां
(पुराणवृन्दं श्रुतिबृंहणार्थम्) ।।११९।।

आसीत्सत्ययुगे तथैकनृपतिः श्रीरैवतो विक्रमी
त्वत्यन्तं ननु शक्तिमांश्च परितः, शक्तश्च लोकेऽखिले।
श्रीमद्ब्रह्मवरेण गन्तुमथ चाऽऽगन्तुं स तत्स्वेच्छया
(सर्वं लौकिकमाप्यमात्मजनृणां लोके पितुर्ब्रह्मणः)।।११२०।।

लोकः प्रांशुरभूच्चतुर्गुणमितः सत्ये युगेऽदोयुगात्,
तस्यैका दुहिता च रैवतपितुर्नाम्नाऽभवद्रेवती।
प्रांशुः किञ्चिदभूत्तु साऽतिशयिता सामान्यबालादृशा-
(-ऽसामान्या रचना हि कौतुकजनिर्ब्रह्माण्डमध्ये विधेः) ।।११२१।।

नो लब्धो बहु मार्गणेऽपि च महाराजस्य कश्चिद् वर-
स्तद्योग्यस्तदचिन्तयन्ननु पिता- 'ब्रह्माणमेवाऽधुना।
पृष्ट्वाऽऽयामि, निजात्मजापरिणयं कुर्यां समं केन वै ?,
केचिद्राजसुतास्तु सन्ति रुचिराः, कस्तेषु सर्वोत्तमः-।।११२२।।

भावी, श्रीविधिनैव निर्णयममुं संकार्य चायाम्यहं'
संचिन्त्याऽयमिदं तथात्मतनयां च ब्रह्मलोकं नृपः।
सङ्गे त्वागतवान् विधाय, समये तस्मिन्ननेकैः सुरैः
श्रीब्रह्मा ऋषिभिस्तथा परिवृतो हाहाकहूहूकयोः-।।११२३।।

शृण्वन् गानमभूदतो नरमहाराजोऽप्यसौ रैवतः
कृत्वा तत्प्रणतिं स्थले सहृदयो ह्येकत्र मौनं तथा।

आसिष्टा, ऽभवदत्र चार्धघटिकापश्चात्समाप्तं पुन-
र्गानं, तर्हि पितामहो ननु हसन् पप्रच्छ तं रैवतम्-।।११२४।।

'ब्रूहि भ्रातः ! । कस्मादाप्तः'? ।।११२५।।

भूपो बद्धकरो जगाद 'भगवन् ! हे !' दीनभावाद् 'भव-
च्छ्रीपादेक्षणकारणेन चलितश्चाप्तो, मया चिन्तितम्-।
एतस्या दुहितुर्वरस्य विषये प्रष्टा भवन्तं, भवान्
कर्ताऽऽज्ञां भुवि यस्य सम्प्रति कृते, तस्यैव दास्याम्यहम्' ।।११२६।।

स्मित्वाऽऽह भगवान् ब्रह्मा 'कथय तु।
ते को नृपसुतोऽत्यन्तं त्वभिमतः ?'।।११२७।।

संचिन्त्य किञ्चिदवदन्नृपतिः 'प्रभो ! मे
सर्वाधिकं त्वभिमतो ह्यमुकः कुमारः।
भूयो यथा दिशति, तादृशमेव कर्ता, ऽऽ-
ज्ञामेव धर्तुमहमागतवांस्तु धातः।' ।।११२८।।

श्रुत्वेयत्तु विचालयन् स भगवान् स्वश्वेतकूर्चं विधि-
श्चैवोच्चैर्हसति स्म दीर्घ,मवदद् 'गृह्णासि राजन्निह।
काले यन्नृपपुत्रनाम, कियदा ! नष्टं पुरा तत्कुलं,
न ज्ञातं तव - चेह चार्धघटिकाकाले तु हे रैवत !-।।११२९।।

यातं विंशतिशस्तु वारमवनौ सत्यादिकं वै युगं,
वंशानामपि नाम चिह्नमवसत्तेषामिदानीन्तु नो।
भूपोऽन्यः कृतवांस्तथा तव पुरीं स्वां राजधानीं, कलि-
स्त्वायन् सम्प्रति वर्ततेऽवनितले (कालोऽनिमेषो विभुः) ।।११३०।।

गच्छ त्वं त्वधुना, व्रजे भगवतः शेषावतारो बलः
श्रीकृष्णस्य निमायिनोऽग्रजसखा भ्राताऽवतीर्णोऽस्ति कौ।
गत्वैतां निजकन्यकां त्वमपरां तस्यैव यच्छाऽखिलं
कर्ता सोऽथ समञ्जसं' (हलधरः पुष्णाति शेषः प्रजाः) ।।११३१।।

आदेशं भगवद्विधेर्ननु शिरोधार्यं विधायाऽऽनतिं
तत्पादे क्षितिमागतोऽथ स महाराजः सुतां रेवतीम्।
श्रीरामाय तथा प्रदाय च तपोहेतोर्ययौ पर्वतं
(दृष्टान्तौ मुचुकुन्दरैवतनृपौ भूस्वर्गकालान्तरे) ।।११३२।।

दृष्ट्वा तथाऽत्र बलरामहली स्वपत्नी-
मत्यन्तलम्बतनु,मेष गले तदीये।
दत्वां हलं निजमधश्च विकृष्य चक्रे
स्वात्मोपमां' (हि कुरुतेऽन्नमयीं हली कुम्) ।।११३३।।

आश्चर्यस्य महाप्रभो ! वचोऽत्यन्तं, तिष्ठति सोऽपि पद्मजः।
न स्थायी, जगदेकसत्पतेरप्यन्ते भवति त्वियं गतिः'।।११३४।।

'उत्पन्नो ननु योऽस्ति, तस्य नियतं ह्यन्तोऽत्र भाव्य,द्य वा
कामं श्वोऽस्तु, तथा,ऽस्मि सम्प्रति दिशंस्त्वा,मत्र विश्वे यथा।
ब्रह्माण्डं यदिदं चतुर्दशजगद्युक्तं, तथा स्वामिनोऽ-
स्याऽसंख्या विधयश्च सन्ति हरयः काले तु काले हराः।।११३५।।

यज्ञाङ्गद्रुमकस्य तूपरि यथाऽसंख्यानि तिष्ठन्ति हि
स्थाने तस्य फलानि, तादृशमहो ! विश्वेऽस्ति यज्ञाङ्गवत्।
ब्रह्माण्डं ननु लम्बितं ह्यगणितं, ब्रह्माण्डकप्राणिनो
यज्ञाङ्गान्तरसूक्ष्मकीटसदृशा (विश्वं तथाऽसीमितम्) ।।११३६।।

ब्रह्मा नाभिसरोजतो ननु महाविष्णोस्तथा जायते,
क्षिप्रं सृष्टिविधौ तथा स लगति, ब्रह्मा तथाऽसंख्यकः।
गङ्गामातृनदीप्रवाहसदृशं निस्सृत्य निस्सृत्य तत्
कामं सृष्टिविधौ प्रवृत्तिमयते (सृष्टिक्रिया राजसी) ।।११३७।।

श्वासाऽधोनयनात्तु तस्य भवति ब्रह्माण्डनाशस्तथो-
र्ध्वश्वासग्रहणान्महाप्रभुहरेर्ब्रह्माण्डमुत्पद्यते।
सार्धं ब्रह्मपितामहेन, सुमना ! ह्यस्यास्तथा व्यापृतेः
संज्ञा संसृतिचक्रमस्ति (भगवच्चक्रं परं संसृतेः) ।।११३८।।

भ्राम्यत्तिष्ठति कुम्भकारचक्राभं संसृतिचक्रमेतदाः!।
लोकानां रचना स्वतो भवन्ती त्वेतेन तथाहि जायते'।।११३९।।

अत्यन्तवैराग्यरवेऽवदत्तत्
सनातनो'ऽदोभवचक्रमुक्तेः।
प्राप्तेरुपायं दिशतु प्रभो ! हे !'
(हि मुक्त्युपायाप्तिरमायिसाधोः) ।।११४०।।

'श्रीकृष्णोऽस्ति तु पूर्णतः पृथगतश्चक्रा,न्न काचित्कृतिः
संसारस्य विधौ स्थितौ ननु लये तस्यास्ति, सन्ति स्वतः।
त्वेतद् ब्रह्महरीश्वरप्रभृतयः कुर्वन्त एव, त्वसौ
गोपीभिः सह नित्यमेव सुरसक्रीडारतस्तिष्ठति ।।११४१।।

वृन्दावनं स पदमेकमपीह हित्वा
चेतस्ततः सरति नो, भुवि सर्वभावात्।
सर्वात्मना गमनतः शरणे तु तस्याऽ-
दश्चक्रमुक्तिरपरा भवितुं क्षमाऽतः'।।११४२।।

'वेत्तुमीहे प्रभो ! । साधु तत्साधनम्'।।११४३।।

'तु स्पष्टं कथितं सनातन ! मया, नो स प्रसन्नोऽयते
योगेन क्रतुना जपेन तपसा पाठेन वा पूजया।
तत्प्रीत्येकलसाधनं जगति तद्भक्तिक्रियैवाऽस्ति चाऽ-
नन्येना,ऽपि तु को ग्रहीतुमिह तं नाऽप्रेमभक्त्या क्षमः ।।११४४।।

उक्त्वा स्वं स वृणोति यं, सुमनसं लीलान्तरे चात्मनः
कृत्वा सम्मिलितं करोति ननु तं गोपीं तथा स्वां सखीम्।
तत्क्रीडानुभवं सखीत्वविरहे नो कर्तुमेव क्षमोऽ-
ऽन्यः कश्चिद्, भवितुं स्वयं ननु सखी कोऽप्यल्पमेव क्षमः?।।११४५।।

क्रीडायां पुरुषार्थतस्तु निजतः कुर्वन्ति तस्याऽत्र ये
लोकाः सम्मिलनाभिमानमवनौ, गन्तुं न तत्सन्निधिम्।
अस्यां कर्ह्यपि शक्नुवन्ति ननु ते, दीनोऽत्र भूत्वा यदाऽ-
नन्यः साधु निराश्रयो भुवि परित्यागं विधायाऽऽत्मनः-।।११४६।।

सर्वप्रकारपुरुषार्थधनस्य, कुर्यात्
तस्यैव केवलमिहाश्रयसन्निबन्धम्।
तस्योन्मुखं पदविसारणकाधिकारः
प्राप्तुं तदा भुवि कदापि तु शक्यतेऽत्र'।।११४७।।

'कथं भवेदनन्यताप्तिरत्र हे महाप्रभो ! ? ।
सुभक्तिकाङ्कुरोद्गतिः कथं भवेन्निमायिनी?' ।। ११४८ ।।

'अनन्यताप्तिसाधनं सनातनोत्तमं परम्
यथा रहूगणं नृपं दिदेश हंसराड् जडः-।। ११४९ ।।

४४. पवते महत्पादधूलीनामभिषेकः केवलमिह।
भागवतस्यायं निष्कर्षः सोदाहरणं स्पष्टः
व्यासं प्रति नारदसंकथने प्रथमे त्वेव स्कन्धे।
अन्ते चैकादशकस्कन्धे निमियोगेश्वरसङ्गे
मध्ये बहुशो, जडभरतोक्तौ निर्यासः परमेषः।।

सम्बन्धे भरतो जडोऽत्र भगवान् ब्रूते "विनां लोटनं
राजन् ! साधु महात्मपादरजसि स्थाने रहूश्रीगण !।
नो शक्यं भगवत्कृपाप्तिभवनं यज्ञेन दानेन गे-
हत्यागाच्छ्रुतिपाठतोऽथ तपसा वाऽम्ब्यग्निभान्वर्चनात्" ।।११५०।।

तत्प्राप्तेरिह साधनं सहृदय ! त्वेकं- क्रियाल्लोटनं
श्रद्धापूर्वकमाप्तपूतसुहृदां पादाब्जधूलौ सताम्।
साधूनां परमक्षमात्मभगवद्भक्ताऽमलप्रेमिणां,
शीर्षे तां निदधीत, सत्त्विदमहोऽस्त्येकं तथा साधनम्।।११५१ ।।

यः कर्तुं भगवत्कृपानुभवनं सत्साधुसेवां विना
वाञ्छत्यत्र, विना स नावमथवाऽपारस्य चाम्भोनिधेः।
पोतं त्विच्छति चान्यपारगमनं तीर्त्वा कराभ्यां ध्रुवं,
प्रह्लादः पितरं हिरण्यकशिपुं सद्भक्तराजो निजम्-।।११५२।।

वार्तामेतामेव । लक्ष्यीकृत्य ब्रूते-।। ११५३ ।।

४५. यावन्नहि वृणीत पदधूलिस्नानं सन्निःस्वानाम्।
मतिरमला पुरुषोत्तमविषया, यदनर्थापगमोऽलम्
शक्यतेऽत्र पितरधिगन्तुं भुवि कैश्चिदुपायैर्नान्यैः।
मतिः स्वतः परतो वा कृष्णे नहि गच्छेन्मधुरात्मनि
गेहव्रतिनां तनुसक्तानां ममताऽहंताऽऽर्तानाम्।।

"येषां दूरमभूद्धृदोऽत्र विषयः स्थानाद् विकारः पितः!
पूर्णत्वेन, तथार्चनीयभगवद्भक्ताङ्घ्रिरेणोर्नरः।
यावत्सुष्ठु करोति नो सहृदयो ह्याशीर्षपादं तथा
स्नानं, वेदवचोभिरस्य ननु धीर्जाताऽपि तावत्पुनः-।।११५४।।

प्रेयःश्रीप्रभुपादपद्मनिकटेऽयोग्याऽत्र तत्प्रापणे
पूर्णत्वेन तु तिष्ठती"ह फलितं–शीर्षे विना धारणम्।
सर्वात्मप्रियसाधुसाधुभगवद्भक्ताङ्घ्रिधूलेः प्रभु-
श्रीकृष्णाङ्घ्रिपुरस्तु कश्चिदपि नो याने क्षमो मानवः।।११५५।।

यावत्तादृशतत्त्वदर्शिविदुषां भक्त्या सह श्रद्धया
सेवा न क्रियते निमायिमनसा सत्प्रेमपूर्वं नृणा।
यावत्तत्पदयोस्तथाहि भवति स्नेहो न नैसर्गिक,-
स्तावन्नो भगवत्कथाश्रुतिकृतेः सोऽपि क्षमो जायते"।।११५६।।

पार्थं ह्युपदिशन् प्रोवाच भगवान्।
कृष्णः स्वयमहो ! गीताप्रवचने-।। ११५७ ।।

४६. विद्धि त्वं तत्त्वज्ञैः सद्भिः।
तत्त्वविदः कथयन्ति ज्ञानं ह्यद्वयमिह भुवि तत्त्वम्
ब्रह्म ज्ञाने, योगे परमात्मा, भक्तौ भगवानिति।
बुद्धिविचारः, प्रकृतिविवेकः प्रथते ज्ञाने योगे
भक्तौ केवलमृच्छति भगवति तत्सुखसुखिता प्रेमा।।

"त्वं दण्डवत्प्रणतिसेवनपूर्वकन्तु
प्रश्नेन निष्कपटभावकृतेन विद्धि।
तज्ज्ञानमर्जुन ! विनीतहृदा हि पृष्टः-
(लोके कदापि महतो न सतो ह्यभावः)।। ११५८ ।।

कर्ता तव तत्त्वज्ञानी स महात्मा।
तज्ज्ञाननिदेशं" (ज्ञानं परमात्मा)।। ११५९ ।।

एतस्यामुपदेशपात्रमवनौ स्थाने स एवास्ति यच्-
चित्ते श्रीगुरुदेवविप्रभगवद्भक्तेषु भावो भवेत्।
श्रद्धाया, दधति त्वमीषु भुवि ये श्रद्धालुभावं नहि
प्रत्यद्धा परमार्थमग्रसरणा नैवाऽत्र ते भाविनः ।। ११६० ।।

एवाऽद्धा भवितुं पुनः प्रभुकृपापात्रन्तु शक्ताः कथं?,
हे प्रेमिन् ! वचने सनातन ! बहु स्थानेऽत्र किं रक्षितम्।
सारस्याप्यतिसारमस्मि कथये त्वां, प्राणिमात्रस्य कौ
प्रेमाप्तिः पुरुषस्य चात्र परमोऽर्थः श्रीलकृष्णस्य तु।।११६१ ।।

सर्वेषां सततं स एव परमाराध्योऽस्ति जीवात्मनां
वृन्दावल्लभनन्दनन्दनमधुश्रीकृष्णचन्द्रः सताम्।
संसारे पुरुषार्थकस्य नियतं त्यक्त्वा निजस्याश्रयं
सर्वस्य व्रजगोपिकासममहो ! संसारिसम्बन्धतः-।। ११६२ ।।

सामस्त्येन पराङ्मुखस्य पतिसंभावात्तदाराधनं,
चैषैवालमुपासनाकसरणिः स्यादुत्तमात्युत्तमा।
लोकेऽस्मिन् पठनीयशास्त्रनिवहे शास्त्रञ्च सर्वोपरि
श्रीमद्भागवतन्तु (भागवतमाः ! प्राह्लादनादुत्तमम्)।। ११६३।।

एतत्सर्वपुराणलेखनपरं श्रीव्यासदेवो यत,-
स्तत्सारं दधिमन्थनेन हि यथा निस्सार्यते भ्रक्षणम्।
तद्वच्छास्त्रभरं विमथ्य निखिलं निस्सारयामास तत्-
सारं, त्वस्तु, तथैष एव सुहृदां कल्याणमार्गः कृते।। ११६४ ।।

एत,न्मतस्य मम विद्धि तथाहि सारं,
कुर्यादतोऽधिकमथाग्रहमत्र कश्चित्।
कस्यापि कौ तु वचसो, हि तदन्यथा त्वं
जानीहि तर्हि' (भुवि निश्चयवान्महात्मा) ।। ११६५ ।।

४७. अभिमतसारोऽयं चैतन्यप्रभुरागस्फुटमूर्तेः।
आराध्यो व्रजपतितनयोऽद्धा, सेव्यं वृन्दाविपिनम्
व्रजवनिताप्रकटितमाराधनमन्यदेव चादर्शः।
श्रीभागवतं प्रमाणममलं, प्रेमा कोऽपि पुमर्थः
अतोऽतिरिक्तं नाग्रह एव श्रीगौरप्रभुमार्गे।।

'चित्ते ज्ञानमिदं तु मे धर, दृढं धत्स्वाऽनुरागं तथा
स्थाने श्रेष्ठमहात्मसाधुभगवद्भक्तात्मनां पादयोः।
एते सन्तु च कीदृशोऽपि, कुरु नो तन्निन्दनं कर्हिचित्,
सर्वानीशधिया नमाऽत्र विनतो-(ऽदो व्याप्तमस्तीशतः) ।।११६६।।

कल्याणं भविता तवा,ऽस्मि तु हृदा तुभ्यं ददाम्याशिषं,
विस्तारेण हि शास्त्रसम्मतमिदं ज्ञानं मम ख्यापय।
भक्तिग्रन्थभरेऽमलं च विमलं, कर्ता त्वदीयं ध्रुवं
कल्याणं भगवान् हि मङ्गलमयः' (कल्याणकृन्मङ्गलम्)।।११६७।।

उक्त्वेयदभवन्मौनं प्रभुरयम्।
(वक्तव्यशमने ज्ञो मौनमयते) ।। ११६८ ।।

याते मौनमथ प्रभौ चरणयोश्चक्रे प्रणामं समं
भक्त्याऽमुष्य सनातनः, प्रभुरदादाशीर्वचस्तत्तनौ।
हस्तं तस्य च घूर्णयन्, सुमनसस्त्वेवं समीपे प्रभोः
काश्यामेष सनातनः सहृदयः स्थित्वाऽत्र मासद्वयम्-।।११६९।।

शास्त्रीयं विविधं बभूव विविधं प्रश्नं स पृच्छन्, प्रभुः
सर्वं साम्प्रतगुप्ततत्त्वमभवत्तं बोधयन् प्रेमतः।
नाना भक्तिपथस्य गौरयतितो गूढातिगूढं वचोऽ-
बोधच्छ्रीप्रभुतः सनातनसुहृन्मासद्वयेऽस्मिंस्तु सः।। ११७० ।।

येषां वर्णनमेष स्वे ग्रन्थे विविधे च।
विस्तारेण चकार (स्थाने पुष्यति वस्तु)।। ११७१ ।।

●●

स्वामी प्रकाशानन्दो मनसा भक्तोऽभवत्

४८. कुटिलः कश्चिच्चक्रे दासम्।
अद्वयमार्गपथिकजनताभिः सर्वथोपास्यमनिशम्
स्वात्मानन्दासनसुस्थिरमपि तु स्थितमतियतिवृन्दम्
गोपवधूटीविटो हठेनाऽत्यन्तशठोऽपरमधुरः।
आत्मभावतस्त्वारब्धाया माधुर्ये पर्यन्तः।।

नाम्ना स्मो ननु पूर्वतः परिचितास्तु श्रीलपादप्रका-
शानन्दस्य, तथाऽस्य जन्मधरणी तैलङ्गदेशेऽभवत्।
श्रीरङ्गान्तिकमेव दक्षिणभुवो यात्राक्षणे श्रीप्रभु-
श्चैतन्यो बलगण्डिनाम्नि सुमना ग्रामे निमायी यतिः-।।११७२।।

चातुर्मास्यसमाप्तिमेष कृतवाञ्छ्रीवेङ्कटस्यौकसि
स्थाने, वेङ्कटभट्टजी द्विजपतिश्चासीन्महान् वैष्णवः।
श्रीमद्वैष्णवसम्प्रदायमिलित,स्तद्भक्तिभावात्प्रभु-
र्हृष्टो मासचतुष्टयं सहृदयोऽवात्सीत्तदीये गृहे ।। ११७३ ।।

एतस्यैव सुतश्चकार महतीं गोपालभट्टः प्रभोः
सेवां, स्वर्गमिते तथा पितरि स त्वाज्ञानुसारं प्रभोः।
वृन्दारण्यनिवासनाय चलितस्त्यक्त्वा च गेहं, पुनः
श्रीराधारमणाऽर्चनेऽन्तमभवत्तत्रैव यावद्व्रतः ।। ११७४ ।।

श्रीगोपालपिताऽभवत्त्रिसहजो, ज्येष्ठोऽखिले तत्र हि
श्रीमद्वेङ्कटभट्टकोऽस्य जनको, भट्टस्त्रिमल्लस्ततः।
आसीत्सर्वलघुस्त्वयं ननु महाराट् श्रीलपादप्रका-
शानन्दः (परिवृत्य जन्म लभतेऽसाधारणः सज्जनः)।।११७५।।

आसीद्गैहिकनाम चास्य ननु किं संन्यासपूर्वन्तु, तद्-
बोधोऽद्यावधि नाऽचल,त्त्वयमहो ! यातोऽपि संन्यासिताम्।
स्नेहं चाधिकमात्मसोदरसुते गोपालभट्टे दधौ
(स्नेहो ज्येष्ठजनस्य चाऽवरजने स्थायी रसस्यान्तिमः)।। ११७६।।

गोपालः (स तथा विवेद) युवकस्त्वेकोऽस्ति सल्लक्षणो,
भाव्येको ननु पण्डितोऽयमवनौ ख्यातस्तु कालान्तरे।
किन्त्वेतेन यदा श्रुतं - ननु यतेर्ह्येकस्य संसर्गतो
गोपालेन विहाय शास्त्रपठनं वङ्गीययूनस्तथा- ।। ११७७ ।।

आरब्धं ननु "कृष्ण-कृष्ण"- रटनं, जातस्तदा हार्दिकः
क्लेशोऽप्यस्य मनाक्, तथाह्यजनि तद्वाञ्छा च संन्यासिना।
शास्त्रार्थं तरुणेन तेन करितुं, प्रेम्णस्तथाऽऽकर्षणं
नानारूपतया ह्युदेति (निखिलं प्रेम्णैव बद्धं जगत्)।।११७८ ।।

श्रुत्वा कस्यचन प्रशंसनमहो ! दाहोद्गतिः कर्हिचित्
चेतस्येव तु चेतसीह भवति, स्नेहो यथाऽकृत्रिमः।
एकस्तं प्रति जायते च मनसि स्थाने, गुणेभ्यो वयं
चेर्ष्यामो भुवि यस्य, तं प्रति हृदि प्रेमोद्गमस्तु स्वतः,-।। ११७९।।

विक्षुभ्य त्वमुना स्फुटं ननु वयं तन्निन्दनं कुर्महे,ऽ-
नेनाऽकृत्रिमकस्ववृत्तिदमनं कर्तुं तु चेष्टामहे।
किन्त्वेवंकरणाच्च सोऽधिकमहोऽपि स्फायते, भावतो
द्वेषादेव वरं तु, तेन मिलितुं चित्तं तथाव्याकुलम्-।।११८०।।

स्थाने तिष्ठति संततं, परजनैस्तस्य प्रसङ्गे तथाऽऽ-
याते रागवशेन तस्य विषये शब्दाः कटु द्वौ मुखात्।
चत्वारः स्वत एव चाकुलहृदो निर्यान्ति, चापि प्रका-
शानन्दस्य महाप्रभुं प्रति तथाह्येवाऽनुरागोऽभवत्।। ११८१ ।।

ज्ञातं तेन यदा-सहोदरसुतं संन्यासिको यस्तु मे
गोपालं कुरुते स्म लक्ष्यजगतीभ्रष्टं, स एवाऽऽत्मनः।
भट्टाचार्यकसार्वभौमसदृशं चक्रे वशे पण्डितं
विद्वांसं परमं, स बोधति तथा तं चाऽवतारं यतिम्।।११८२।।

एतेन तस्य ववृधेऽधिकमेव चित्ते
कौतूहलं, तदनु तस्य फलस्वरूपम्।
पत्रद्वयं प्रभुकृते त्वमुना विसृष्टं
सव्यङ्ग्य,मत्र विदितं सुहृदां तृतीये।। ११८३ ।।

सम्प्रत्येष विवेद यर्हि–युवकः काश्यां स एवाऽऽगतः
संन्यासी त्विह, तत्तु सोऽत्र विधिना केनापि गौरप्रभोः।
कर्तुं चिन्तयति स्म सङ्गममहो !, भूयात्परं सङ्गमः
कस्मात्? (काविह सङ्गमः समहृदोर्मैत्र्येण वैरेण वा)।।११८४।।

काश्या विश्रुतपण्डितोऽतुलयशाः संन्यासिकः श्रीप्रका-
शानन्दः समभूच्च्व लोकनिवहे सम्माननीयस्तथा।
सर्वश्रेष्ठतया स तद्गतमठाधीशेषु संन्यासिषु
श्रीकाश्यां भुवि बुध्यते स्म (भवति व्यक्तौ प्रकाशः क्वचित्)।। ११८५।।

अज्ञातस्य कथं नु तादृशमसौ कस्यापि संन्यासिनः
पार्श्वे सम्मिलितुं सरे,न्ननु वयोविद्यादिवृद्धस्तथा।
प्रख्यातश्च भवेत्प्रतिष्ठितपदः कश्चिन्निमायी यतिः,
संगच्छेदपि तत्स सम्भवतया (हेतौ दृढे भावना)।। ११८६ ।।

किन्त्वासीद्युवको महाप्रभुरयं, नो पण्डितोऽपि त्वभूत्-
तद्दृष्टौ च महान्, प्रसिद्धिरपि न स्थानेऽत्र तस्याऽभवत्।
दीक्षाऽऽप्ता लघुसम्प्रदायगणितात्संन्यासितो भारती-
नाम्नोऽनेन (हि सम्प्रदायगुरुता दत्ते महत्त्वं यतेः)।। ११८७ ।।

एतत्कारणतो ययौ न मिलितुं संन्यासिदण्डी प्रका-
शानन्दः प्रभुणा प्रतिष्ठितपदं ख्यातं निजं पण्डितम्।
मन्वानो, न बहु प्रभोर्निवसतेर्दूरं क्वचित्तु प्रका-
शानन्दस्य मठोऽस्ति यद्यपि (मनोदूरेऽखिलं दूरगम्)।।११८८।।

आसीत्तस्य तु बिन्दुमाधवमुपस्थाने मठो,ऽपि प्रभु-
श्चामुत्रैव बभूव विप्रतपनश्रीमिश्रगेहे स्थितः।
यानाऽवश्यकतां प्रभुर्न बुबुधे तत्सन्निधौ स स्वयं,
सङ्कोची हि यतो बहु प्रभुरभूत् (सङ्कोचवाञ्छीलवान्)।।११८९।।

सङ्कोचो भवति स्म तस्य गदनेऽत्यन्तं गुरूणां पुर,-
स्तस्मात्तेन च चिन्तितं सुमनसा- गन्ताऽस्मि तस्यान्तिके।
त्वारब्धो भविताऽल्पमल्पमिह नो वादो विवाद,स्तत-
श्चैतन्योऽपि गतो न तस्य निकटे (चैतन्ययोगः क्षणे)।।११९०।।

स्थित्वा दश दिनानि द्वादश तथा।
वृन्दावनमितो (वृन्दा प्रभुरतिः) ।। ११९१ ।।

श्रीवृन्दावनतो निवृत्य सुमनाः काश्यां स मासद्वयं
तस्थौ, साम्प्रतिके प्रवाससमयेऽत्यन्तं तु साधारणः।
संन्यासीव तथा निवासमकरोद् गौरप्रभु,र्न क्वचिद्
भिक्षार्थं स बहिर्गतस्तु न तथा संन्यासिनां दर्शने।। ११९२ ।।

गङ्गास्नानकृते च चन्द्रगृहतः श्रीविश्वनाथेक्षणेऽ-
गच्छत्केवलमेष मिश्रवसतौ भिक्षां च कृत्वा प्रभुः।
तत्रैव प्रियनामकीर्तनजपं कुर्वन्निमायी बभौ
(श्रीकाशीप्रभृतिस्तथाप्रियहरेर्वृन्दावनं जायते) ।। ११९३ ।।

हित्वा भक्तजनांस्ततो द्विचतुरस्तस्यान्तरङ्गान् प्रभो-
र्नान्यस्मिन् महिमा तथा प्रकटितः कुत्रापि कृष्णात्मनः।
'संन्यासी तु विचित्र एव नियतं ह्येषोऽस्ति कश्चि'त्प्रका-
शानन्दो मनसि स्वके मनसि च स्थानेऽयते चिन्तयन्-।।११९४।।

'सार्धं मया परिचये त्वियति स्थितेऽपि
ह्यायाति नैष च मठे मम, नो सभासु।
संन्यासिनां भवति सम्मिलित,स्त्ववश्यं
कश्चिद् विलक्षणमनाः पुरुषोऽस्त्यमायी'।। ११९५ ।।

श्रद्धालुः प्रभुपादयोर्बहु महाराष्ट्रद्विजो यः, प्रका-
शानन्दस्य मठस्य पार्श्वमभवद्वै तस्य गेहं सतः।
स प्रायो गतिकाऽगतिं स्म कुरुते तन्न्यासिपार्श्वे, यथा
तत्सेवामपि चाकरोत्तु सततं द्रव्यादिभिः शक्तितः।। ११९६ ।।

सन्दर्भोऽत्र यदा यदा सुमनसो गौरस्य चाऽऽप्तः, प्रका-
शानन्दस्तु तदा कटाक्षमकरोत्तस्योपरि द्राक् तदा।
निन्दासूचकशब्दभाषणमपि स्थाने तथा तत्कृते
चक्रे (कारयतीह किं न भुवि किं? द्वेषो,ऽपि तु त्यागिना)।।११९७।।

कामं तद्धृदयं बभूव सरसं, सोऽभूत्तथा भावुकः,
सम्मेलाभिरुचिः कविप्रकृतिकश्चैकान्तिकोपासकः।

आसीत्तु प्रणयस्य, किन्तु सुहृदोऽस्याऽद्वैतवेदान्तधी-
स्तीक्ष्णा भावुकतां चकार परितश्छन्नां तथाद्यावधिम्।।११९८।।

तस्याऽभूत्प्रणयस्पृहा सरसता नाद्यावधि प्रस्फुटा,
प्रायो दृष्टमिहेदृशां सुमनसां भूमौ गुरूणां तथा।
कस्याप्युत्तमभावुकस्य सुहृदः संसर्गतस्तु स्वतः
शुद्धा भावुकताऽयते विकसिता (पद्मे विकासो रवेः)।।११९९।।

जीसोर्यद्यपि सेण्टपालपदकः शिष्यः प्रधानः पुराऽऽ-
सीच्छुष्को ननु नास्तिकश्च, स यदाऽपश्यत्तु शूलोपरि।
आरोहन्तमिह स्वमीशुमपरं स्फीतं हसन्तं, ततः
पूर्णं भावुकता स्फुटाऽस्य सहसा, पश्चात्स एवाऽभवत्-।।१२००।।

सर्वश्रेष्ठविसारको भुवि तथा तत्खिस्तधर्मस्य चा,ऽऽ-
सीत्स्वामी ननु नास्तिकप्रकृतिको घोरः कुतर्की पुरा।
तस्य श्रीयुतरामकृष्णकरकस्पर्शेन शीर्षे विवे-
कानन्दस्य तु नास्तिकत्वमगमज्जाने क्व नो, चान्ततः-।।१२०१।।

लक्ष्यस्याभवदेष एव भगवच्छ्रीरामकृष्णस्य वै
संसारप्रसरप्रधानपुरुषो,ऽनेन प्रकारेण तु।
श्रीचैतन्यपदावलोकनदिशैव स्वामिनोऽपि प्रका-
शानन्दस्य च वृत्तयस्तु ललिता लोकेऽत्र जाताः स्फुटाः ।।१२०२।।

श्रीचैतन्यगुणानुवादघटने संन्यासिना दण्डिना
तेनाऽन्ते कवितेयती तु रुचिराऽद्धा गुम्फिता, कौ यतः।
शक्नोतीह कठोरतोऽपि हृदयं नूनं कठोरं द्रवी-
भूतं भावि (निमायिसौहृदकृतिर्धत्ते निमायिस्थितिम्)।।१२०३ ।।

एतत्प्रकाशग्रथितस्य लोके
चैतन्यचन्द्रामृतकाव्यकस्य।
प्रशंसनं यावदपीह कुर्यात्,
तु तावदेवाल्पमहो,ऽस्तु तावत् ।। १२०४ ।।

वार्तास्वेव स सज्जनोऽपरदिने प्रोचे महाराष्ट्रियः
'स्वामिन् ! हेऽमुकवङ्गवैद्यवसतौ संन्यासिको यः स्थितः।

तस्याऽऽस्ये कियदस्ति भारि महदाश्चाकर्षणं, ह्येकदा
यस्तं पश्यति, जायतेऽस्य सुहृदः साधोः स एवाऽऽत्मना।।१२०५।।

वाण्यामपारकरुणाऽस्य, गुणस्य गानं
कुर्वन्नसौ भगवतो भवति त्वसंज्ञः।
संस्तन्मयो दयितकृष्णकथां च ब्रूते
पूर्णं (निमायिचरितः पुरुषो निमायी)।। १२०६ ।।

'रे ! किं वेद्मि न तं?, तु वेद्म्यतिशयं, मन्त्रं तथाऽऽकर्षणं
किञ्चिद् वेत्ति स, चामुनैव सुजनं श्रीसार्वभौमोपमम्।
प्राज्ञं वञ्चयति स्म, किन्तु गलिता दाली न तस्याऽत्र (हि
व्यक्तिः स्थानविशेषके भुवि चमत्कारी तथा सिध्यति)।।१२०७ ।।

एतस्मिन्ननु विश्वनाथनगरे कश्चिन्न कौडीद्वयेऽ-
पि प्रष्टा भजनं तु तस्य, न तथाऽस्मिन्नर्तको मेलिता।
स्त्रीतुल्य,स्त्विह वङ्गबन्धुसदृशो नाऽशिक्षिता भावुका
लोकाः सन्त्यृजव- (स्तथाहि ऋजुता प्रायो जनेऽपण्डिते)।।१२०८।।

ब्रह्मज्ञानवचोऽत्र वेत्ति खलपूं यावज्जनश्चर्मरुं'
तस्याऽदोवचनश्रुतेर्बहु महाराष्ट्रीयसाधोरभूत्।
दुःखं, चिन्तयते स 'कौ किमियतः प्राज्ञस्य च त्यागिनोऽ-
त्यन्तस्यात्र नरस्य ह्यद्यपि तथा दाहानलो जायते-।। १२०९ ।।

एतावान् प्रबलः?, प्रशंसनमियान् ज्ञानी जनः सन्नपि
श्रोतुं नो सहते परस्य, भुवने सत्यं, प्रतिष्ठास्पृहा।
त्वत्यन्तं प्रबला हि तिष्ठति, बुधोऽत्यन्ताद् बुधोऽपि स्वक-
ख्यातिस्थापनहेतवे न कुरुते सङ्कोचमन्याऽस्तुतौ।। १२१० ।।

लोकेच्छा प्रबला तथाहि कियती !' तत्सज्जनो भावुकः
प्रोचे दुःखितचेतसा परदिने सर्वं वचः स प्रभुम्।
चाऽवादीत्करुणस्वरे"ऽत्र नगरे कश्चिन्न कौडीद्वयेऽ-
पि प्रष्टा भजनं तु तस्य" 'सुमनः! स्वामी बभाषे प्रभो!'।।१२११।।

'अस्माकं करणीयमेव भुवने कौडीद्वयेनाऽस्ति किं?,
निर्मूल्यं त्वपि को ग्रहीष्यति?, वयं मूल्यं विनाऽपव्ययम्।

कर्तारस्तु, तथापि कोऽपि यदि नो धर्ता तु यास्याम्यतः
क्षिप्त्वा, कोऽपि कदाचिदत्र पुरि तूत्थाप्य ग्रहीतैव च'।।१२१२।।

एवं चोत्तरकं निशम्य सरलं विद्वेषशून्यं महा-
राष्ट्रीयस्य तु सज्जनस्य ववृधे श्रद्धा प्रभोः पादयोः।
त्वत्यन्तं च, तथा स चिन्तयति 'चोदेति प्रभावो यदै-
कैकस्याऽस्य महाप्रभोस्तु वचसश्चेयान्मदीयोपरि-।। १२१३ ।।

तत्साक्षात्कृतिरस्य चेन्ननु भवेद् गौरप्रभोः श्रीप्रका-
शानन्देन, तदा तु तस्य मठिनो ह्युद्धार एवाऽऽपतेत्।
मूर्खो नास्ति, दुराग्रही स, विरसस्वान्तो न, गौरात्मना
संलापे कृत एव संकुचितहृद् भावी प्रकाशो यतिः-।।१२१४ ।।

विस्मृत्याऽखिलनिन्दनं च भविताऽदःसेवकः, सङ्गमः
किन्त्वद्धा कथमस्तु, नाऽत्र स तथाऽऽगन्ता, प्रभुस्तत्र च।
भावी नैकमतः प्रयातु'मपतत्त्वस्यामसौ सज्जन-
श्चिन्तायां (सुमनाः सदा परकृते चिन्तापरस्तिष्ठति)।।१२१५।।

भावं स स्वमनोगतं प्रकटितं चक्रे पुरस्तात्तपो-
मिश्रस्येन्दुकशेखरस्य च तथाऽन्येषामपि श्रीप्रभोः।
भक्तानां द्विचतुःसतां, तपनको मिश्रोऽवद'द्युज्यते
त्वेका युक्ति- (रसम्भवं त्वपि तथायुक्त्या सतां सम्भवम्)।।१२१६।।

कुर्यात्कोऽपि निमन्त्रणं सहृदयः सर्वस्य संन्यासिन-
स्तत्स्थाने चलितुं प्रभोरपि तथात्यन्ताग्रहं च क्रियात्।
तन्नात्मप्रियभक्तकाग्रहपदोपेक्षां कदापि प्रभुः
कर्ता, ऽवश्यमसौ तु तत्र चलिता' (प्रेमी प्रियाणां वशे)।।१२१७।।

ऊचे महाराष्ट्रियसज्जनोऽदः
श्रुत्वा स शीघ्रं 'स्वयमस्मि सज्जः।
एतत्कृते, ऽसौ किमिवाऽस्ति वार्ता
गुरु- (र्हि सम्मेलनमत्र पुण्यम्)।। १२१८ ।।

धरतु तु भारं प्रभुनयनस्य'।
(अपि मृदु काले कठिनकठोरम्)।। १२१९ ।।

'धातारो वयमङ्ग ! तस्य चरणौ, गन्ता कथं न प्रभुः,
सर्वं त्वं कुरु युक्त'मेष सुजनो भद्रं तथाऽऽसीद् धनी।
नासीद्रूप्यसहस्र-पञ्चशतकप्रोत्सर्जनं तत्कृते
किञ्चिद्वै कठिना कृतिः (स्ववसरापेक्षा सदुत्साहिनः)।।१२२०।।

एवं पुण्यककर्मणः स्ववसरस्त्वत्यन्तसौभाग्यतः
संसारे मिलते पुनः, स कृतवान् काश्या मठस्वामिनः।
तत्सर्वांश्च निमन्त्रितान् सहृदयो वैरागिसंन्यासिनो-
(-ऽस्वार्थं संग्रहिणो भवेदभिरुचिर्मेलाय संन्यासिनाम्)।।१२२१।।

स्वैः शिष्यैर्निजसङ्गिभिश्च निखिलाः संन्यासिनः पुञ्जिता-
स्तत्राऽऽगत्य गृहे तथा समुचिते तत्सज्जनस्य क्षणे।
तत्सर्वाऽऽसनहेतवे ननु महाराष्ट्रीयकः सज्जन-
स्तूलाकाऽऽस्तरणोपधाननिवहात्यन्तप्रबन्धं तथा-।। १२२२ ।।

चक्रे सुन्दरमेव, तत्र मठिनः सर्वे महन्ताः स्थिता-
स्तौरुष्केषु गुरूपधाननिवहाधारेण, शिष्यास्तथा।
तेषां तानभितः स्थिता विदधते वेदान्तसम्बन्धितां
वार्ता- (मात्मपरात्मनोः परिचयो वेदान्ततो जायते)।।१२२३।।

श्लोकं कोऽपि विवेकपुस्तकगतं, कश्चिद् बभाषे तथा
स्थाने शाङ्करभाष्यपङ्क्तमथ वै, सम्पूर्णपाण्डित्यकम्।
व्यस्राक्षीन्ननु निर्विशेषपरमात्मब्रह्मसिद्धौ निजं
(सिद्धिर्बुद्धिचमत्कृतिर्मतिमतां वै निर्गुणब्रह्मणः) ।। १२२४ ।।

मध्ये सर्वमहात्मनां स्थितियुतः श्रेष्ठासने श्रीप्रका-
शानन्दाख्यसरस्वती विलसति स्थाने, तदानीमयम्।
संन्यासी धृतदण्डकः सुरवृतब्रह्मोपमो ज्ञायते,
वैवं सम्प्रति बुध्यते स्म तु यथा श्रीनैमिषारण्यके-।। १२२५ ।।

स्वाष्टाशीतिसहस्रशिष्यनिवहे मध्यस्थितः शौनक-
स्तच्छास्त्रालपनावकर्णनमहो ! कुर्वन् भवेत्पावने-।
तीर्थे,ऽथ प्रभुसन्निधौ च स महाराष्ट्रीयकः सज्जनः
प्राप्तस्तत्क्षणमेव (सौम्यकिरणो हृज्ज्योतिषेऽपेक्षितः)।।१२२६ ।।

निमन्त्रितं पूर्वत एव चक्रे
प्रभुं तु, गत्वा ननु सोऽधुनाऽऽह।
'प्रभोऽखिलो वै भवतः प्रतीक्षां
कुर्वन्महात्माऽस्ति निमायिगौर !'।। १२२७ ।।

सङ्कोचयुक्तविवशत्वरवे जगाद
'भ्रातस्त्वियद्गुरुविरक्तमहात्ममध्ये।
कस्मात्तु मां नयसि?, तत्र किमस्मि कर्ता?,
भिक्षां गृहे तव दिने क्वचनाऽस्मि कर्ता'।। १२२८ ।।

तूचे कातरया गिरा धृतपदोऽत्यन्तं महाराष्ट्रियो
गेही सज्जनको रुदन् स च रुदं'स्त्वायोजनं मेऽखिलम्।
प्रेमिन् ! मात्रभवत्कृते तु विहितं, गन्ता भवान्नो, तदा
व्यर्थं मे भविताऽखिलं (प्रियतमः कश्चित्सतः प्रेमिणः)।।१२२९।।

एतन्निर्धनदीनहीनविषये कुर्यादवश्यं कृपां,
कृत्वाऽदोधमसद्म पावनमहो ! च स्वाङ्घ्रिरेणोस्तथा।
साधो ! धन्यममुं करोतु सुमनो'ऽदःसज्जनप्रार्थना-
सद्वार्ताकसमर्थनं स्म कुरुते सर्वश्च तत्र स्थितः।। १२३० ।।

भक्तानां ननु वत्सलः सहमतो जातः प्रभु,श्चोद्यत-
श्चैतन्यश्चलितुं, सनातनसुहृत्स्कन्धस्वहस्तार्पणः।
आसीद्यं,स्तपनश्च चन्द्रशिखरः पृष्ठे चलन्तोऽभवन्
भक्ताश्च द्विचतुर्जनास्त्वपि तथा (भाति प्रियः प्रेमिभिः)।।१२३१।।

गेहद्वारि गतः सनातनसुहृत्स्कन्धादपानेष्ट च
स्वं हस्तं, स शनैः शनैर्ननु कृताऽधोदृष्टिराप्तो गृहम्।
शीघ्रं श्रीप्रभुपादधावनकृते भृत्यः ससाराऽग्रतो
धृत्वा वारि (तथाऽऽगतातिथिपदप्रक्षालनं संस्कृतिः)।।१२३२ ।।

सङ्कोचेन पदे महाप्रभुस्त्वाकर्षन् स दधाव हि स्वयम्।
अस्तव्यस्तदशश्च कर्दमे तत्रैवाऽऽस्त तु नालिसन्निधौ।।१२३३।।

व्याप्ता नीरवता तथाहि सहसा संन्यासिनां मण्डले,
शास्त्रार्थालपनं च विस्मृतमहो ! सर्वैः, प्रभोः सम्मुखे।

पश्यन्तस्त्वनिमेषतश्च निखिलाः सन्त्यत्र संन्यासिन-
(श्चित्ते दृश्यविशेषरोपणकृते नेत्राऽनिमेषेक्षणम्)।। १२३४ ।।

तेजस्वी परमस्तथैकयुवकस्त्रिंशद्-द्विकत्रिंशद-
ब्दायुः सौभगरूपयुक्ततनुकः किञ्चिद् विनाऽऽऽडम्बरम्।
संन्यासी ननु मौनमास्त निकटे नाले,रदोवार्तया
सर्वाश्चर्यमभूत्तथाहि परमं (लोकोत्तराद् विस्मयः)।। १२३५ ।।

ह्यस्यासीन्मृदुलं प्रभोर्बहु वपुः, कूर्चं तथा श्मश्रु चाऽ-
त्यल्पं स्तो ननु निस्सृते, त्वभवतां तेऽपि स्फुटं मुण्डिते।
तस्मात्षोडशवर्षतुल्यवटुकः सोऽबोधि संदर्शने
(सामान्ये भवति प्रभावि तु वयो, लोकोत्तरस्तद् बहिः)।।१२३६।।

ओष्ठौ पाटलपुष्पपत्रसदृशौ द्वौ तस्य लघ्वाकृती
वर्णेन त्वरुणौ तु दूरविषयाद् भातः स्म गाढेन हि।
रक्तिम्ना निजकेन, मौनमभवत्स्थाने निषण्णः प्रभुः
कञ्चित्तु प्रति दर्शनेन स विना (दृश्यो हृदन्तःप्रियः)।।१२३७।।

स्थानेऽस्मिन् समुपस्थिताः सुमनसः सर्वे च संन्यासिनः,
सङ्केतेन निजाङ्गुलस्य चन कः, कश्चिद् भृकुट्यास्तथा।
त्वत्यल्पेन रवेण कोऽपि कथयन् किञ्चित्प्रभोरेव वै
सम्बन्धेऽस्ति (निमायिभावपुरुषालोकोऽखिलाकर्षकः)।।१२३८।।

तेजोरूपविभाप्रभावनतताशालीनतास्तु प्रका-
शानन्दोऽस्य विलोक्य सोऽथ बुबुधे–चैतन्यदेवः प्रभुः।
एवैषोऽस्ति, परन्तु सर्वपुरतः स स्वप्रतिष्ठास्थिते-
र्हेतोः पृच्छति सज्जनं गृहपतिं त्वेतं महाराष्ट्रियम्-।। १२३९।।

'स्वामिपादस्त्वसौ । आगतो वै कुतः?'।। १२४० ।।

'अस्त्येषोऽत्र स एव स्वामी वङ्गनिवासी।
ऊचे यद्विषयेऽहं पूर्वं क्वापि भवन्तम्'।। १२४१ ।।

'हंहोऽयं ननु चैव' तु प्रकटयन्नाह प्रमोदं प्रका-
शानन्दो'ऽस्ति निमायिभारतियतिः श्रीकृष्णचैतन्यजी।

शृण्वन्नस्मि तु वस्तुतो बहुदिनैस्तस्य प्रशंसामहं,
साध्वद्याऽस्य बभूव दर्शनमहो!, (कृत्वा च लक्ष्यं प्रभुम्-)।।१२४२।।

तत्र भवान् कथमास्ता, ऽऽयात्त्विह, शोभनमस्ति।
नो भवतो यतिसाधोरासितमन्यजनाभम्' ।। १२४३ ।।

किञ्चोत्तरं प्रभुरदाच्छनकैः कृताधः-
शीर्षो'ऽहमस्मि भगवँल्लघुसम्प्रदायी।
आसत्तुमस्मि कथमत्र भवत्समानं
कामं क्षम,स्त्विह तथास्म्युचितं निषण्णः'।। १२४४ ।।

संदृश्य प्रभुनम्रतासरलते सम्पूर्णतः श्रीप्रका-
शानन्दो ननु मन्त्रमुग्धसदृशोऽभूद्, द्वित्रिवारं यदा।
उक्तोऽपि प्रभुरुत्थितो नहि निजस्थाना,त्तदा श्रीप्रका-
शानन्दस्तु ययौ स्वयं सहृदयो ह्युत्थाय स स्वामिकः।।१२४५।।

धृत्वा च प्रभुहस्तमात्मपुरतस्तं त्वेव तूलासने
स्थाने ह्यासयति स्म, सम्प्रति यथा वैवश्यमादर्शयन्।
संकोचेन सहाधिकेन तु तथा संकुच्य चाऽऽऽस्त प्रभुः
(संकोचोऽधिकसत्त्वताप्रतिफलं श्रद्धेयपर्षत्पुरः) ।। १२४६ ।।

मन्दं मन्दमसौ प्रभुर्भगवतो नाम्नां तथोच्चारणं
कुर्वन्नस्ति, निमायिनस्तु भगवच्छ्रीनामकोच्चारणात्।
संस्पर्शात्पवनस्य पद्मदलमाः ! स्थाने यथा स्पन्दते,
तद्बिम्बोपममस्य तादृशमहोऽस्पन्दिष्ट चोष्ठद्वयम्।। १२४७।।

संवार्ताकरणेच्छया किमपि तत्प्रोचे प्रसङ्गं प्रका-
शानन्दो जनयन्न'हं भवति तु स्वामिन् ! करोम्येकमाः!।
आक्षेपं, मिलनं विनैव चलितः पूर्वं भवानागतः,
सम्बन्धी ननु साधुरेव भवति स्थानेऽत्र साधुश्रियाम्।।१२४८।।

एको मठोऽस्ति सुमनो ! भवतोऽत्र काश्या,
मागत्य तत्र न भवान् गृहिणां गृहेऽस्थात्
साधो ! मया न मिलितोऽपि च, बुध्यतेऽतः-
स्वीयं न बोधति भवान्ननु मां निमायिन् !'।।१२४९।।

उत्तरमस्य ददौ नो किञ्चिदपि प्रभुगौरः।
मन्दमुवाच युवैकश्चञ्चलवद्यतिराशु-।। १२५० ।।

४६. 'मौनं स्वीकृतिलक्षणमद्धा'।
आक्षेपः क्रियते व्यवहारे साधारणतो लोकैः,
स्पष्टं क्रियते तस्योत्तरमपि, वचनोत्तरमिह वचनम्-।
सामान्यानां, प्राकृतजनताऽऽक्षेपप्रतिफलकलहः,
किन्तु विवेकी मौनस्थित्या स्वीकुरुतेऽस्वीकुरुते।।

एतस्मिञ्छ्रुत एव चात्र वचने संन्यासिनां मण्डलेऽ-
त्युच्चैः सम्प्रति सर्वतः प्रववृते दीर्घप्रहासः, प्रभुः।
मन्दं मौनमितेऽखिले कथयते मन्दं तु लज्जास्वरे-
'धृत्वा किन्नु मुखं भवद्गुरुजनाऽग्रे स्पष्टमायान्यहम्।।१२५१।।

एतावत्क्षमता स्वे नो बुद्धा, भवतोऽहम्।
कुर्यां दर्शन,मेतत्संकोचेन न चाप्तः'।। १२५२ ।।

ऊचेऽन्यत्र नयन् वचः प्रकाशानन्दो 'न गृहीतवानसि।
दीक्षां केशवभारतीयतेरेव त्वं कटवानिवासिनः?'।। १२५३ ।।

'आम्, मम दीक्षाश्रीगुरुरस्ति। एव स' मन्दं श्रीप्रभुरूचे।।१२५४।।

विरम्य किञ्चित्तु विरम्य चाह
प्रकाशनन्दः स 'वचस्तथैकम्।
प्रष्टुं लषामि, त्वमिदं मनुष्व
न दूषितं, तर्हि करोमि पृच्छाम्?'।। १२५५ ।।

दैन्यस्वरे प्रभुरथाऽऽह 'करोति कीदृग्
वार्तां?, भवान्मम हितस्य तथैव वार्ताम्।
प्रष्टा, भवान् गुरुजनस्तु, सदा ममाऽद्धा
कल्याणमेव हि लषिस्यति' (भूहितः सन्)।। १२५६ ।।

'आम्, तु प्रष्टुमिदं लषामि - भुवने मुख्योऽस्ति संन्यासिनां
धर्मो-भिक्षणतस्तनुं ननु नयन् वेदान्तसच्चिन्तनम्।
कुर्वन्नत्र सदा भवेच्च सततं शास्त्रप्रमाणात्तथा
युक्त्या साम्प्रतमाप्तलोकवचनैः सत्यप्रतीत्यात्मनः-।। १२५७ ।।

निस्सारतामेव तु चिन्तयन् स्यात्
संन्यस्तभावाज्जगतोऽस्य, कस्मात्।
वेदान्तसच्चिन्तनमत्र हित्वा
करोषि चेदं हरिनामगानम्?' ।। १२५८ ।।

ऊचे नम्रतया प्रभुश्च 'भगवन् ! मे तूपदेशं ददा-
वेवं ह्येव परं मदीयगुरुजी, वेदान्तशास्त्रस्य माम्।
बुद्ध्वाऽपात्रमथोपदेशमददादस्यैव मन्त्रस्य स,
ह्यादेशं कृतवान्- जपञ्च विदधत्त्वस्यैव भूमौ भवेः-।।१२५९।।

उक्तं—कलियुगे नास्त्येव च परम्।
तेनाऽथ - सुगमं संसाधनमहो !—।। १२६० ।।

५०. कलियुगसममिह नहि युगमन्यत्।
आत्मध्यानं कृतयुगसाधनमथ यज्ञस्त्रेतायाः
द्वापरपरिचर्या श्रीविष्णोः, साधनपरिणतिसाध्यम्।
कलियुगसाधनसाध्ये केवलमाः ! श्रीनामप्रीतिः
अनुरागश्रुतिकीर्तनचिन्तनमेतत्प्रीतिप्रकृतिः।।

अस्यैवाऽस्मि दिवानिशं जपमहं कुर्वन्नतः, संततं
श्रीनाम्नस्तु जपेन वाऽथ तु तथाध्यानस्थितेरस्य वै।
मस्तिष्के मम चोष्णतेव किमपि स्थानेऽध्यरुक्ष,त्ततो
मत्ताभस्त्वभवं (परव्यवहृतिर्मत्तोऽवनौ कथ्यते) ।। १२६१ ।।

चित्ते नो रुरुचेऽपि किञ्चन गृहद्वारं, तथैव स्वतो
दृग्भ्यामश्रु ससार, तर्ह्यमभवं तु व्याकुलः सर्वतः।
चाऽपृच्छं "भगवन्न"हं गुरुमहाराजं "भवान् कीदृशं
मह्यं मन्त्रमिमं ददा,वहमहो ! जातस्तु मत्तोऽमुना"।।१२६२ ।।

श्रीमद्भागवतस्य तत्कतिपयं श्लोकं निशाम्याऽऽह मां
"नास्त्येषा विकृता स्थिति" र्गुरुमहाराजः स "भद्रं पुनः।
एतल्लक्षणमस्ति, कौ भव जपं कुर्वन्नथैवं" ततः
कुर्वन्नस्मि जपं सदाऽत्र भगवन्नस्यैव वै तद्दिनात्-।।१२६३।।

जानातु नित्यजपनादथ बोधतां वाऽ-
भ्यासं, यथेह हरिनाम्नि ममाऽद्य जाता।
आसक्तिरेव,मथ यत्नमपीह कुर्यां
हानस्य, तर्ह्यपि मया नहि हीयतेऽदः'।। १२६४ ।।

तच्छ्रुत्वाऽपदिशन्महाप्रभुवचः स्वामी जगाद प्रका-
शानन्दो 'हरिनामसंस्मृतिरहोऽत्यन्तोत्तमा विद्यते।
अस्त्युक्ता कलिसन्तरोपनिषदि स्थाने महत्ता बहु
श्रीनाम्नां (हरिनामकीर्तनमहः साध्यः समेषां सताम्)।।१२६५।।

ब्रह्मसूत्रतः कथं तु निःस्पृहो यथा त्वमत्र?।
वेदकान्तदर्शनं न मन्यसे कथं यतेऽत्र?'।। १२६६ ।।

ऊचे प्रभुर्नम्रतया 'नरः कः
श्रद्धालुरेवं भविता श्रुतीनाम्।
तथास्तिको, यो भगवन्मुनिव्या-
सब्रह्मसूत्रं भगवन्निषेधेत्' ।। १२६७ ।।

'वेदान्ते ननु निर्विशेषपरमश्रीब्रह्मणः सूत्रके
व्यासेन प्रतिपादनं तु विहितं, कृत्वा न वै चिन्तनम्।
श्रीब्रह्माऽपरनिर्विशेषमहसोऽद्धाऽहंग्रहोपासना-
द्वारा, त्वध्वनि नृत्यगीतरमणं वेदान्तसूत्रश्रियाम्-।। १२६८ ।।

अङ्गीकारात् । शून्याभं वै' ।। १२६९ ।।

'मन्येऽदो न वचोऽहमत्र, भगवान् यद् ब्रह्मणः केवलम्।
श्रीव्यासो ननु निर्विशेषपरमात्मब्रह्मणः केवलम्।
चक्रे तु प्रतिपादनं, मम मतं त्वेवं-भवेद् वर्णनं
प्राधान्यात्सविशेषकस्य गुणिनः सूत्रेषु तु ब्रह्मणः'।। १२७० ।।

भूत्वाऽल्पं चकितस्तथाहि परितः संन्यासिनां सम्मुखं
दृष्ट्वा जल्पति तत्प्रकाशसहितानन्द'स्त्वशास्त्रीयवत्।
वार्तां कीदृगिमां करोषि- विहितं प्रत्येकसूत्रे स्फुटं
तस्मिन्निर्गुणनिर्विशेषमहसस्तु ब्रह्मणो वर्णनम्- ।। १२७१ ।।

विस्तारेण समं चकार भगवाञ्छ्रीशङ्कराचार्यजी
स्वे भाष्येऽस्य निरूपणं, पठितवान् भाष्यं न शारीरकम्?।
आहोस्विन्मनुषे तथैव ननु न श्रीशङ्कराचार्यकं?'
(ह्यर्कं स्वीकुरुते न कोऽपि नयनी, वक्तव्यमेतेन किम्?)।।१२७२।।

'भट्टाचार्यकसार्वभौमसुधियो भाष्यं तु शारीरकं
स्थानेऽनेन मया श्रुतं, त्ववगतं स्वप्रज्ञया तुच्छया।
किञ्चिच्चापि, जगद्गुरुं जगति कः श्रीशङ्कराचार्यकं
कामं को नहि मंस्यते? (नयनयोरर्कोऽधिदैवं परम्)।।१२७३।।

आचार्यकाद्यो जगतोऽभिवन्द्यो
दशाभिधे शाङ्करसम्प्रदाये।
स एव कावस्ति तु, तस्य पाद-
श्रियोर्दधे पूर्णनिमायिनिष्ठाम्' ।। १२७४ ।।

'ह्येतन्नो मननं त्वभू,न्ननु वचो ब्रूषे विरुद्धं च यत्
तद्भाष्यस्य, बुबोध तस्य भगवद्व्यासस्य चाकृत्रिमान्।
भावाञ्छङ्कर एव कौ तु भगवान्, सम्पूर्णभाष्ये स वै
चक्रे निगुर्णनिर्विशेषमहसस्त्वेकस्य तस्यैव च- ।। १२७५ ।।

अस्तित्वस्य तथाह्युपाधिरहिताखण्डस्य संवर्णनं,
वस्तुत्वेन यदा जगत्किमपि नो ह्यस्त्येव, कश्चिद्यदा।
जीवे ब्रह्मणि भेद एव न तथा, तर्हि स्तुतिः कीदृशी?
कस्य स्याद् विनयोऽर्थना- (ऽसमतया नक्षत्रसूर्यान्तरम्)।।१२७६।।

नित्यशुद्धबुद्धमुक्तकात्मब्रह्मरूपमेव सर्वमास्तु।
ब्रह्मभिन्नमेव नास्ति किञ्चिद्, भासतेऽत्र यत्तु किञ्चिदेतत्-।।१२७७।।

स्वप्नपदार्थाभं ननु सर्वम्। अस्ति तु मिथ्या' (ब्रह्म हि सत्यम्)।।१२७८।।

'तु व्यासो भगवान् स्वयं हि कृतवान् स्वब्रह्मसूत्रश्रियां
भाष्यं, शन्तिरथाऽस्य चास्त्यधिगता तस्मिंस्तु भाष्ये कृते।
च त्यक्तं तत एव तेन किमपि ह्येवापरं लेखनं,
भाष्यं भागवतं विवादरहितं तु ब्रह्मसूत्रश्रियाम् ।। १२७९ ।।

एषाऽस्ति भगवद्व्यासाऽन्तिमकृतिः।
अत्रोक्तमपि य,न्मान्यं तदभितः-।। १२८० ।।

५१. रसतस्त्वानन्दी जीवात्मा।
अक्षरवाङ्मयमूलं वेदोऽक्षरतत्त्वख्यापयिता
सारोऽखिलवेदान्तस्य श्रीभागवतं संकलितम्।
भागवतं केवलरसरूपं भगवन्मयमापेयम्
तद्रसपरिचितरसिको रतिमान् क्वापि भवति नान्यस्मिन्।।

अस्त्यद्धाऽखिलशास्त्रविन्ननु भवान्, ब्रूतां तु सत्यं तथा
सत्यं-भागवतेऽविशेषमहसः प्राधान्यकं ब्रह्मणः।
निर्दिष्टः सविशेषपूर्णकमहाः श्रीकृष्णचन्द्रस्तु वा
साक्षाद् ब्रह्म परात्मको?' (रसमयः स्पष्टं भवेद्रूपवान्)।।१२८१।।

'आमेतन्ननु सत्यमस्ति-भगवाञ्छ्रीव्यासदेवोऽकृत
श्रीमद्भागवतं प्रगृह्य गलिताऽर्थं सर्वशास्त्रश्रियाम्।
श्रीमन्नारदकोपदेशदिशया लेभेऽपि शान्तिं परां
लीलावर्णनतः स तद्भगवतः (शान्तिः प्रसङ्गाद्धरेः)।।१२८२।।

आत्माराममहामुनेरपि ग्रन्थादौ भगवन्निमायिनः।
सङ्केतं भजनक्रियाकृते कृत्वा तस्य स कारणं ददौ-।।१२८३।।

५२. भक्तिः (स्वामिसेवनं) भजनम्।
भक्तिः क्रियते लोभादथवा भयतो लोकैर्भर्तुः
लौकिकभर्ता भक्तापेक्षितभरणाऽवनताऽशक्तः।
भजनसेवनाभावेऽपीशोऽखिलभरणाऽवनमनिशम्
कुरुते साधारणतो, जनताक्लेशहरो हरिरीशः।
तन्निष्कामास्त्वात्मारामा लोभभयस्थितिशून्याः
अपि कुर्वन्त्यहैतुकीं भक्तिं विश्वम्भरपरमात्मनि।।

"अस्ति श्रीभगवद्गुणे प्रकृतितोऽद्धा दिव्यतैवेदृशी,
ह्यात्माराममुनिः कियानपि भवेदज्ञानशून्यो न किम्?।
शुद्धां भक्तिमहैतुकीं भगवतः सोऽपि प्रधत्ते त्वलं"
मन्येऽदो वचनं, परन्तु भगवाञ्छ्रीशङ्कराचार्यजी-।।१२८४ ।।

यद् ब्रह्म गौणं सविशेषमुक्त्वा
स्फुटं, च साध्यं परमं तु मेने।
हि निर्विशेषं, तदिदं किमर्थं?,
ममेयमेवास्ति तथाहि शङ्का' ।। १२८५ ।।

'श्रीमद्भागवतं त्वपीह भगवाञ्छ्रीशङ्कराचार्यजी
जानाति स्म यथाविधि, त्वतिशया श्रद्धाऽस्य चासीत्तथा।
श्रीमद्भागवतं प्रति त्वपि, वचोऽदोऽप्येष वेत्ति स्म यच्-
छ्रीमद्भागवतं बभूव भगवद्व्यासेन लोके स्फुटम्-।।१२८६।।

श्रीकृष्णः सविशेष एव परमं वै सच्चिदानन्दकाऽऽ-
त्मा चास्य प्रतिपाद्यमस्ति, पुनरप्येष प्रधानं तथा।
स्वे भाष्ये त्वविशेषमेव विदधद् ब्रह्माऽमत ह्यन्तिमं
लक्ष्यं चाऽथ तदेव, शङ्करयतेरेषा महत्तैव हि ।। १२८७ ।।

विना महान्तं पुरुषं न कर्तुं
कश्चित्परः साहसमेवमत्र।
'क्षम,श्चकारैष परं महात्माऽ-
दोलोककल्याणभरस्य हेतोः' ।। १२८८ ।।

'सूत्रार्थजगतश्चानर्थकरणे।
लोकस्य किमहो ! कल्याणमिव भोः !'।। १२८९ ।।

मन्दं चाऽऽह महाप्रभुस्तु 'भगवन्नर्थस्तथा कीदृशोऽ-
नर्थः काविह कीदृशो,ऽयमखिलो बुद्धेर्विकारस्त्वहो ! ।
व्यक्तः कर्तुमथ क्षमस्तु किमहो ! सत्यः पदार्थः पुनः
शब्दै,स्तस्य तथाहि सिद्धिरथवा तर्केण कर्तुं क्षमा?।। १२९०।।

अस्त्यद्धा त्वनुभूतिगम्यविषयः सत्यः पदार्थस्तथा,
कोऽप्यर्थः क्रियतां परस्य सुधिया कस्यापि, सर्वं पुनः-।
तथ्यं, त्वेव किमस्ति चार्थकरणेऽन्यद् बुद्धिदाक्ष्यं विना?
(नृत्यन्त्याः प्रकृतेर्महत्प्रकटितं तत्त्वं, प्रपञ्चो यतः)।। १२९१ ।।

व्याख्यानमर्थकरणं भुवि पुस्तकानां
भाष्यस्य लेखनमथैहिकबुद्धिकर्म।

सर्वं त्विदं, किममुना ननु मुक्तिलब्धिः?,
कर्म प्रधीहृदयरञ्जनमात्रमेतत्' ।। १२९२ ।।

'आ,मिदं तु जल्प- पूर्णतः किं? संसृतिस्तिरोहिता विचार्य।
शङ्करेण निर्विशेषमेव ब्रह्म चातिसाध्यतत्त्वमाप्तम्'।। १२९३।।

चैतन्यो मधुरस्वरे क़थयते मन्दं च मन्दं प्रभुः
'शङ्का वा भगवंस्तु तँर्कभवनं जन्मान्तरस्यैनसः।
अज्ञानस्य तु वा फलं, भुवि महाभागः स धन्यो नरो,ऽ-
स्तित्वे यन्मनसीश्वरस्य चन का शङ्कैव नोत्पद्यते।। १२९४।।

अन्तर्यामिनमीश्वरं स च तथा मत्वा पुनः साक्षिणं
विश्वस्याऽखिलशक्तिमन्तमपरं तस्यैव सच्चिन्तनम्।
कुर्वंस्तिष्ठति, तस्य काविह कृते ध्यानं तथोपासना
संवादः पठनं च लेखनमहो ! किञ्चित्तु नावश्यकम्।।१२९५।।

यो बुद्ध्वा भगवन्तमत्र सततं सर्वत्र, धृत्वाऽखिले
चाऽऽचारं भगवन्मतिं सहृदयः कर्ता, ह्यनर्थक्रिया।
तद्द्वारा भवितैव कर्ह्यपि न कौ, तु ग्रन्थभारस्तथाऽ-
ङ्कोऽज्ञानस्य (निमायिभावमनसो ग्रन्थार्हताऽग्रन्थिनः?)।।१२९६।।

विश्वासो नहि यस्य तद्भगवतः प्रेमात्मनश्चाखिला-
न्तर्यामित्वदशस्य, यस्य विविधा जायन्त एवाऽऽत्मनि।
शङ्काः संतत,मत्र शास्त्रमवनौ तस्यैव हेतो,र्निजां
शास्त्रैस्तार्किकबुद्धिमेष पुरुषः कुर्यात्तथाऽऽस्थामयीम्।।१२९७।।

बद्धाऽभून्ननु तर्क एव विषये चेद्यावदन्तं मतिः,
शास्त्राणां पठनं निरर्थकमहो ! शास्त्रस्वधीतेः फलम्।
शुद्धान्तःकरणस्य तर्करहितश्रद्धालुभावार्जनं,
यो यादृग् भुवि तार्किको,ऽस्य तु कृते शास्त्रं तथाऽपेक्षितम्।।१२९८।।

जायेते द्विविधौ तथाहि पुरुषा,वेकः प्रधानो हृदा
मस्तिष्केण परो, भवन्ति पुरुषा न्यूनाः प्रधाना हृदा।
प्रायोऽत्राऽधिकता नृणां भवति कौ मस्तिष्कमुख्यात्मनां
(मस्तिष्कं हि मतिस्थलं, मननता मुख्यः स्वभावो नृणाम्)।।१२९९।।

वार्तां कामपि नो जनस्तु मनुते मस्तिष्कमुख्यो विना
तर्कं, कौ विषमेव यादृशमहो ! स्थाने विषस्यौषधम् ।
तप्तेऽङ्गे त्वनलेन, तैलमलनं कृत्वा च तत्राऽनलाऽऽ-
सेकेनैव हि तद् विशुध्यति, तथा तर्कप्रधानात्मनाम्- ।।१३००।।

तर्केणैव पराजिता भुवि तले बुद्धिर्विधेया नृणां,
बुद्धिं चेयति तस्य सूक्ष्मविषये कुर्वंश्च कुर्वन्नयेत्- ।
तर्कं, तिष्ठतु नो तदग्रगमनेऽद्धा बुद्धिशक्तिस्तु यन्,-
(मिथ्याबुद्ध्यभिमानतो हि मनुते हृद्भावमल्पं नरः)।।१३०१ ।।

स्थूला बुद्धिरथाऽत्र तर्ककरणात्सूक्ष्मा तथा जायते,
सूक्ष्मा काविह बुद्धिरेव परमार्थाऽवारमेतुं क्षमा ।
तर्कैस्तादृशयुक्तिभिश्च भगवत्तत्त्वं परं वर्णितं
वैशिष्ट्येन समं तथा भगवता श्रीशङ्करेणाऽमुना- ।।१३०२ ।।

यद्यातुं महतो महानपि ततोऽग्रे तार्किको न क्षम,-
स्तर्कान्तं कृतवांस्तथाहि भगवाञ्छ्रीशङ्करो वस्तुतः ।
वेदान्तश्रवणाऽऽतताध्ययनयोरर्थस्त्वयानेव यद्
बुद्धिर्यस्य तु तार्किकी, स भुवि तद्वेदान्तबोधेन ताम्- ।।१३०३।।

कृत्वा सूक्ष्मपरिष्कृतां तथा कुर्याद्वै परमार्थगामिनीम् ।
तर्केषु स्थितिरेव नेप्सितं, तर्कातीतपरार्थवर्त्म यत् ।। १३०४ ।।

श्रद्धाऽज्ञानगताऽन्तरं प्रकृतितोऽस्त्याकाशपातालवत्,
तर्कोऽज्ञानिजनेऽपि काविह तथा नोदेति, किन्त्वत्र सः ।
एवाऽल्पं प्रभवेत्परार्थदिशि कौ यातुं, न यावद् भवेत्
सच्छ्रद्धाऽस्य (सती निमायिनि पथि श्रद्धा नयत्यग्रतः)।।१३०५।।

च श्रद्धा हृदयेऽस्ति यस्य, भुवने न स्थातुमेव क्षमः
सोऽज्ञानी तु कदापि, यन्ननु सती श्रद्धा विचारस्य तु ।
जातेऽन्ते भवतीह, यत्र नियतं वै तर्कशङ्कोद्गतिः
पापानां फलमस्ति पूर्वजनिकासम्बन्धिनां, तत्र वै- ।। १३०६ ।।

तर्के हृद्युदिते,ऽपि तस्य दमनं चाज्ञानितन्द्रालुवत्
पापं त्वस्ति महद्, भवेत्तु परमार्थी नाऽलसस्तादृशः ।

श्रद्धालुर्न स सन् करोति कपटं श्रद्धालुरूपस्य, चाऽ
त्यन्तं कापटिकान्निमायिभगवान् दूरं जनात्तिष्ठति।। १३०७ ।।

नोदेत्येव तु भावुकोऽस्ति सरलो यो हृत्प्रधानस्तथा
शङ्का तन्मनसीह, वाञ्छति सदाऽसौ तु प्रियस्यात्मनः।
संश्रोतुं गुणगानमेव, न तथा तस्याऽविशेषस्य वा
कोऽप्यर्थः सविशेषकस्य भुवने सिद्धेर्निमाय्यात्मनः।। १३०८ ।।

संसारे भजनं चलाऽत्र विदधद्, ब्रह्माऽविशेषं यथाऽ-
पि स्याद्वा सविशेषमत्र, भविताऽद्धैव स्वयं तत्स्फुटम्।
श्रीकृष्णाङ्घ्रिसरोजमेव भुवने सत् तत्कृते त्वस्ति, वा
कामं सत्यमसत्यमस्तु जगदाः!, कोऽर्थोऽस्ति तस्यामुना?'।।१३०९।।

५३. चिन्त्यं भगवच्चरणाम्भोजम्।
भ्रमरमनश्चिन्तयते सततं स्वादुरसं स्वाभीष्टम्
तस्यास्वादे जाते भूयः परचिन्तनसम्भूतिः।
सच्चिद्विषयास्वादः केवलमविनश्वरतोपेतः
सच्चित्कन्दः कृष्णपदाब्जं, मनोभ्रमर ! तच्चिन्तय।।

'दम्भस्तर्हि बभूव चैष तु- हृदि स्थानेऽस्ति किञ्चित्परं,
सिद्धं च क्रियतेऽन्यदत्र किमपि, श्रीशङ्करोऽदो जगत्।
सत्यं नो मनुते तथाहि भगवान् स्पष्टं त्रिकालेऽपि वै
("सत्यं ब्रह्म" दिदेश शङ्करयतिः सारं हि "मिथ्या जगत्")।।१३१०।।

मायैकविभ्रमयुतं मनुते प्रसारं
स ब्रह्मणो जगदनिर्वचनीयकस्य।
एवम्मतः स निगदेत्कथमत्र कर्तुं
तु ब्रह्मणो भजनकं सविशेषकस्य?'।। १३११ ।।

'आः ! किं गदिष्यति?, स तु स्वयमेव चक्रे,
रोद्धुं क्षमोऽत्र हृदयस्य गतिं हि कश्चित्?।
"ब्रह्मैव चास्मि, जगदस्ति न" चैष तर्को
मस्तिष्ककस्य, ननु पृच्छतु तद्धृदं तु' ।। १३१२ ।।

५४. रिक्तं किं पूर्णमतिक्रामति?
छन्दो लघुगुरुसंघटनातस्तनुते पद्यं काव्यम्
श्रुत्यभिलाषस्वैरित्वच्छलभावोपायाश्छन्दः।
व्यवहारे रिक्तत्वं लघुता, पूर्णतया गुरुताप्तिः
छन्दो भवितव्यं–सत्पूर्णाऽऽश्रयरिक्तत्वविलोपः।।

'ब्रूते स स्वयमेव "काममपि नो भेदोऽस्तु मन्नाथ ! हे !
जीवे ब्रह्मणि, चास्मि तेऽत्र भगवन् ! किन्तु स्वयं त्वं न मे।
(सामुद्र-) स्त्वखिल-(स्तरङ्ग) इति वै ब्रूते, तु कोऽप्येवमाः !
(तारङ्गो) भुवने (समुद्र) इति नो" (ह्यङ्गं भवत्यङ्गिनः)।।१३१३।।

इदं वचस्तस्य महात्मनो, यो
ह्याजीवनं जीवपरात्मनोस्तु।
कुर्वन्नभूत्सिद्धमभेदभावं'
(संवादसारोऽन्तिमवाक्यसाध्यः)।। १३१४ ।।

आश्चर्येण समं जगाद यतिकस्वामी 'विनोदस्त्वसा-
वाचार्यस्य, यथाऽत्र कल्पितजगत्, तेनोक्तमेतद् वचः।
स्थाने तादृशमेव तु व्यवहृता,वस्तित्वमेवास्ति नो
सत्यत्वे जगत,स्तदा हि विनयः कीदृक् तथा प्रार्थना?।।१३१५।।

आत्मब्रह्मनिबोधाभ्यासं संततमेव।
कुर्वन् काविह तिष्ठे'-(दभ्यासो व्यवहारः)।। १३१६ ।।

'अस्त्येतद् भगवन् ! वचस्तु भवतः सत्यं, परं द्विर्ब्रुवे
भूयोऽहं तु वचस्तदेव -जगतोऽतः क्षुब्धबुद्धेस्तथा।
स्थाने नन्दनकं वचो, भवति नुः शान्तिर्यथार्था हृदो
भावेनैव तु (हार्दिकस्य जगतो व्यक्ती रसः काव्यतः)।।१३१७।।

विस्मृत्याऽखिलतर्कमत्र भगवच्छ्रीशङ्कराचार्यवद्
दीनः सन् विदधीत कौ ननु यदैकान्ते हृदा प्रार्थनाम्।
सच्छान्तिर्मिलितुं क्षमा निजहृदस्तर्ह्येव, संयाचते
षट्पद्यां सुमनाः स्वविश्रुतकृतावाचार्यपादः प्रभुम्-।। १३१८ ।।

५५. ईश्वर ! परिपाल्योऽहं भीतः।
तापत्रयपीडितजीवात्मा नानोपायं कुरुते
तत्त्राणार्थं व्यवहारेऽस्मिन् मर्त्यशरीराबद्धः।
मायाऽविद्याजालमनन्तं किन्त्विह विततं परितः
तन्मुक्तिर्नहि निजसामर्थ्याद् विनेश्वरानुग्रहतः।।

यो मिथ्या मनुते जगत्त्रिसमयेऽसौ शङ्कराचार्यजी
तु ब्रूते भगवान् "सदा प्रकृतितः कुर्वन् पृथिव्या भवान्।
मत्स्याद्यैः परिपालनं प्रभवति स्थानेऽवतारैर्धृतैः।
सन्तप्तः शरणागतोऽस्मि भवतः संसारतापैरहम्-।। १३१९ ।।

प्रभो ! मदीयरक्षणं भवान् करोतु सत्पते !"।
अयं सतो हृदः स्वरोऽस्ति' (सत्स्वरो निमायिनः)।।१३२०।।

'एत-(त्सत्य-) मसत्यमेव तु जगद्, ब्रह्माऽस्ति निर्भ्रान्तमा !
जीवात्मैव, परन्तु यो भुवि जनो नो बोधतेऽद,स्तथा।
हेऽसत्यं जगदेव सत्यमलमाः ! संबोधते, तत्कृते
संसारव्यवहारसत्त्वममत श्रीशङ्करश्रीर्यथा- ।। १३२१ ।।

तद्वच्च व्यवहारभूमिविषयाऽस्ति प्रार्थनेयं सतः,
कामं त्वध्वनि मुक्तिरेव चरमं जीवस्य लक्ष्यं, तथा।
भूते दूरमथ भ्रमे त्वलमदोऽज्ञानस्य नाशोऽस्ति, चाऽ-
ज्ञाने नाशमिते तु जीवपुरुषो ब्रह्मस्वरूपोऽस्ति कौ-।।१३२२।।

अस्ति कि,मस्य स्वस्य तु बोधः। साम्प्रतरूपस्योदयतीह'।।१३२३।।

ऊचे नम्रतया प्रभुस्तु 'भगवन् ! ज्ञानी भवान् पण्डितः
शास्त्रज्ञो गुरुरस्ति नश्च, भवतोऽहं वक्तुमेव क्षमः।
अग्रे किं?, गदिता पुनः परमहं, नेदं वचो वै हृदो,
रूपं मार्जितकं विचारजतो (बुद्धिर्विचारात्मिका) ।। १३२४ ।।

सत्यं रूपममायिनस्तु भगवन् ! प्रेमैव हि ब्रह्मणो,
जीवस्याऽध्वनि लक्ष्यमस्ति चरमं प्रेमोपलब्धिस्तु भोः !।
वस्त्वद्धा कथनस्य तन्न, न गिरा गानं तदीयं, हृदाऽ-
सामान्येन हि जायते, सहृदयैस्तत्स्वाद्यते, नोच्यते।। १३२५ ।।

तत्सिद्धिः क्रियते नहि, प्रकृतितः सिद्धं तथा तत्स्वत,-
स्तत्प्राप्तिर्नहि साधनैः, प्रभुकृपाद्वारैव कौ जायते-।
तत्प्राप्तिर्ननु कस्यचित्तु, भगवाञ्छ्रीशङ्करः केवलं
(भूयोऽहं कथयामि) लौकिकनृणां मस्तिष्कमुख्यात्मनाम्-।।१३२६।।

अत्यन्तसूक्ष्मकरणार्थमथैव बुद्धेः
शारीरकं रचितवान् स निमायिभाष्यम्।
प्रेम्णः पुरो भगवतो, हृदयं तु सर्वं
मुक्त्यादिकं जगति बोधति तुच्छमस्य।। १३२७ ।।

५६. कथयति स स्वयमलमात्मीयम्।
प्रबोधसुधाकरश्लोकः स्फुटमन्तिमहार्दिकभावम्
भगवच्छ्रीमच्छङ्करपादस्याऽऽदिशते तत्कर्तुः।
"श्रीयदुनन्दनचरणकमलयोः केवलचिन्तनयोगे
अस्माकं समयः प्रक्रमतां (ब्रह्माऽन्तिममथ मधु मधु)।।

संसारे बहवो जनाः प्रतिदिनः कृत्वा तथोपासनां
नानाकामनया लषन्ति च फलं सार्धं मनोवाञ्छितम्।
स्वर्गेच्छां भुवि कुर्वते कतिपयेऽस्यां यज्ञयागादिभि,-
र्योगाद्यैर्बहवस्तु कौ विदधते मुक्तेस्तथाभ्यर्थनाम्।। १३२८ ।।

अस्माकं प्रियनन्दनन्दनशिशुश्रीकृष्णचन्द्रप्रभोः
पादाम्भोजयुगस्य तत्परतया तु ध्यान एवात्मनि।
संलग्नस्थितिवासनाऽस्ति पर,मा ! लोकैस्तथाह्युत्तमै-
रस्माकं कि-(महो! विलक्षणहृदां सद्वासनाऽवासना)।।१३२९।।

नः किं नृपत्वेन च मन्दरेण
पर्यन्तमेतन्ननु मोक्षलब्ध्या।
आप्यं ?, सदैव स्थितमस्तु चित्ते
ध्यानं तयोरेव पदाब्जयोर्नः" ।। १३३० ।।

जातः श्लोकमिमं प्रभोः कथयतः स्थाने गलः संभृतो,
देहेऽमुष्य च सर्वसात्त्विकविकारास्तु क्षणादुद्गताः।
ऐच्छत्संवरणं विधातुममना गौरः स्वभावश्रियां,
तस्मिन् किन्तु स न क्षमोऽभव-(दहो! सत्त्वं निमाय्यात्मनः)।।१३३१।।

उद्याते नयने प्रभोरुपरि, तद्देहाच्च घर्मोऽसरत्,
तत्रैवैककगेन्दुकाश्रयतया भूत्वाऽपतन्मूर्च्छितः।
एवं तस्य दशां विलोक्य चकितोऽभूद् विस्मयाच्छ्रीप्रका-
शानन्दः स्वयमस्य वायुमभवत्कुर्वन् स्ववस्त्रेण च।। १३३२ ।।

वार्तायाः समुपस्थितेषु सुहृदः सर्वेषु संन्यासिषु
ह्यस्यादोऽद्भुतकस्थितेस्त्वतिशयो गाढः प्रभावोऽपतत्।
तत्कालं बहवस्तु ते "हरि-हरि" ह्युक्त्वा तथाऽनर्तिषु-
(र्नृत्यं श्रीहरिकीर्तनेन सहितं भक्तिप्रभाचेष्टितम्)।। १३३३ ।।

श्रीमत्स्वामिवृषप्रकाशहृदयेऽप्यारब्धवान् विप्लवो,
वारम्वारमदोमनोऽस्ति कथय'द्रे ! मूर्ख ! तेऽज्ञानमाः ! ।
साक्षाल्लोपयितुं हरिः प्रकटितः संन्यासिवेषे पुरो,
धृत्वाऽदःपदपद्म किं न कुरुषे शीघ्रं क्षमाप्रार्थनाम्'।। १३३४।।

नष्टस्तद्धृदयात्तु सम्प्रति महातावत्प्रष्ठिाग्रहोऽ-
भून्मूलेन समं न, किन्तु स हृदा दासः प्रभोः पादयोः।
सञ्जातोऽस्ति, तदैव सोऽकृत हृदं श्रीकृष्णचैतन्यजी-
नामश्रीहरिपादपद्मयुगले त्वद्धा निमाय्यर्पितम् ।। १३३५ ।।

लोकह्रीवशहेतोर्देहं सम्प्रति किन्तु।
स्थाने संचिनुते स्म (स्थानं भावविभावः)।। १३३६ ।।

चैतन्यं च तदैव जातममनोगौरस्य, सोऽभून्मनाक्
स्थाने लज्जितव,च्च गेन्दुकसृतस्त्वेकत्र स ह्यासितः।
तत्कालं समभूच्च भोजनकृते ह्यामन्त्रणं, चासिताः
सर्वे भोजनकाय (भोजनविधिः सम्मेलनस्याऽन्तिमः)।।१३३७ ।।

सङ्कोचयुक्तमधिकन्तु निषद्य भिक्षां
संन्यासिभिः सममवाप निमायिको,ऽन्ते।
स्वामिप्रकाशपदयोः प्रणतिं च कृत्वा
यातः स भक्तसहितः शशिशेखरौकः।। १३३८ ।।

श्रीप्रकाशानन्दस्यात्मसमर्पणम्

५७. भ्रातस्त्यज मा वृन्दाविपिनम्।
व्रजपादपतलवसनं भिक्षार्थं तद्ग्रामेष्वटनम्
श्यामलनिर्मलयमुनाजलमापिब चीरं कुरु कन्थाम्।
भुवि सम्मानं घोरगरलमाकलयाऽमृतमपमानम्
राधामुरलीधरभजनाजिरमङ्ग ! व्रजवृन्दाभूः।।

वेदान्तस्य तथाऽद्वयस्य महतोऽद्धा पण्डितस्य प्रका-
शानन्दस्य हि भक्तचित्तसुमनश्चौरोऽथ गौरोऽहरत्।
चेतः स्वाभिमुखं हठा,त्स सरलाऽज्ञानी मनुष्यो यथा
संजातो मनसाऽस्य पादभृतकश्चैतन्यगौरप्रभोः ।।१३३९।।

आत्मीयः स यतः प्रभोर्निजजनो ह्यासी,न्मठं स्वं प्रका-
शानन्दश्चलिते प्रभौ सहृदये प्राप्तो, न किञ्चित्त्वपि।
तत्राऽरोचत तस्य शोभन,महो ! ग्रन्थो दधावाऽथ तं
वेदान्तस्य तु कृन्तितुं (हृदि मृदौ रूक्षं नहि प्रीयते)।।१३४०।।

तच्चेतो ह्यधुना सुखानुभवनं कुर्वद् बभूव प्रभु-
श्रीचैतन्यपदोस्तु चिन्तनकृतौ, मूर्तिर्मनोहारिणी।
विष्टेवाऽस्य हृदि, प्रभोरनुपमश्रीरूपमाधुर्ययोः
कुर्वन्नस्ति हृदैव सम्प्रति हृदा सोऽद्धा रसास्वादनम् ।।१३४१।।

संतापो भवति स्म पूर्वविहिते घोरोऽस्य कृत्ये निजे
'हैतावान्ननु सुन्दरश्च सरलश्चैवं विनम्रस्तु यः।
उक्तस्तं प्रति वै कथं कटु कथञ्छब्दो मया (मायिना
मायी ह्येव निबुध्यतेऽखिलजनोऽमायी तथाऽमायिना) ।।१३४२।।

तस्याऽऽनन्दमयः कियान् सुमनसः श्रीविग्रहोऽमायिनोऽ-
मायी स्पष्टमिव प्रकाशमय आस्तेजोमयो विद्यते।
विस्फुट्य प्रतिरोमतोऽस्य भवति प्रेमप्रवाहः सरन्,
सारल्यस्य हि विग्रहस्तु सुमनाः साकारकप्राणवान्' ।।१३४३।।

आसीदेवमथाऽधुना यतिवरः संचिन्तयंस्तु प्रका-
शानन्दः, समये तदैव स महाराष्ट्रीयकः सज्जनः।

तत्रागत्य विराजितः, प्रणमनं कृत्वाऽथ स श्रीप्रका-
शानन्दश्च तथाऽऽसितः, क्षणपरं पप्रच्छ स स्वामिनम्- ।।१३४४।।

'हे स्वामिन् ! भवता निमायितद्वङ्गस्वामिनिरीक्षणं कृतम्।
साक्षादेव (शरीरमेव तस्याऽस्ति प्रेममयं) तु लोकितम्' ।।१३४५।।

श्रुत्वैवेयदहो ! तदीयचरणौ जग्राह स श्रीप्रका-
शानन्दश्च रुदन् रुदन् कथयते 'भ्रातस्त्वया कारितः।
उद्धारो मम, चाऽभिमानवशतः स्थाने तथा पण्डितम्-
मन्योऽहं पतितो (न वेद्मि) कृतवान् वारं कियन्निन्दनम्-।।१३४६।।

तन्महात्मन,स्तु सोऽस्ति साक्षादीश्वरः शरीरचारिविष्णुः।
यद् वचो जगाद सोऽथ सत्यं सर्वमेव तन्निमायिनस्तत्'।।१३४७।।

आकर्षन् स्वपदे स शीघ्रमवदत्स्वामिप्रभुश्रीप्रका-
शानन्दं 'भगवन्ममोपरि भवान् पापं त्विदं कीदृशम्।
काश्यामर्पयतीह, वै मम कृते साक्षाच्छिवो विद्यते
हे स्वामिन्निह कौ भवानपि (भवे संन्यासिनः शङ्करः)।।१३४८।।

किं ज्ञानं भवतः कृते च किमहोऽज्ञानं, तु लोके भवान्
सर्वज्ञो, ननु लोकशिक्षणकृते भक्तेर्महत्तां तथा।
भूमौ ख्यापयितुं तु चेदृशमहो ! चक्रे निमायी भवान्
(तत्त्वख्यापनहेतवे सहृदयः किं किं विधत्तेऽत्र नो) ।।१३४९।।

प्रत्यक्षं निजजीवने ननु भवान् कृत्वा वचोऽदर्शयच्-
चेदं, यद् भुवने कियानपि महान् ज्ञानी किमत्राऽस्तु नो।
त्याज्यस्तेन कदापि नो भगवतस्तस्याश्रयः श्रीहरेः
पद्माक्षस्य, जहाति योऽच्युतगतिं ज्ञानाभिमानेऽत्र च- ।।१३५०।।

तस्याऽधःपतनं ध्रुवं तु भुवनेऽस्मिञ्जायते, वै भवान्
संसारे निजजीवनेन कृतवान् भक्तेर्महत्त्वं स्फुटम्।
अस्त्यद्धा मम कोटि-कोटि-नमनं स्वामिन् ! भवत्पादयो,-
र्बोधे श्रेष्ठमहं तु संसृतितलेऽत्यन्तं भवन्तं हि भोः !'।।१३५१ ।।

वार्तैवं चलिता बहुक्षणमहो!, स स्वामिनः सज्जनो
धृत्वाऽऽज्ञां स्वगृहं गतः, परदिने सम्वादमेतं प्रियम्।

आयाञ्छ्रावयितुं प्रभोः स निकटे चासीत्तथै,वाऽध्वनि
श्रीगङ्गास्नपनं विधाय मिलितोऽस्याऽऽयांस्तु गौरप्रभुः ।।१३५२।।

शीघ्रं स प्रणतिं विधाय कथयन्नस्ति 'प्रभो हे! महा-
श्चर्यस्यास्ति वचः प्रभो!, तु भवतोऽपाराऽस्ति माया, प्रभो !।
यो निन्दां विदधद् बभूव भवतोऽपारां, प्रकाशो यति-
श्रीर्वेदान्तशिरोमणिः स शिशुवद्रोदित्यहो! साम्प्रतम् ।।१३५३।।

शास्त्रस्य तस्य पठनं न च पाठनं तद्
वेदान्तचिन्तनमपि स्वदतेऽद्य किञ्चित्।
कुर्वन्निरन्तरमथाऽस्ति तु साम्प्रतं श्री-
चैतन्यपद्मपदयोर्ननु चिन्तनं सः' ।।१३५४।।

श्रुत्वैवोच्छलति स्म सौहृदभरात्संवादमेतं प्रभु-
श्चाह्लादं परमं तथा प्रकटयन् ब्रूते 'दयालुर्महान्।
अस्ति श्रीभगवां,श्चकार स कृपां स्वां पूज्यपादप्रका-
शानन्दोपरि (यच्छतीह भगवान् काले सतः सौहृदम्)।।१३५५।।

दत्वाऽङ्गीकृतवान्निमायिभगवान् स्वप्रेमदानं तु तं,
स्वे शीर्षेऽहह ! तन्महात्मपदयोर्धूलिं विधाया,ऽऽत्मनः-।
कर्ता जीवनमस्मि धन्य'मियदाः ! स्थाने ब्रुवाणः प्रभु-
र्गौरः सम्प्रति बिन्दुमाधवनिकेतं दर्शनार्थं गतः ।।१३५६।।

संदर्शनाद् भगवतस्तु मनोज्ञमूर्ते-
र्भावातुरस्थितिगतः स ननर्त गौरः।
सार्धं ननर्त च सनातनवैद्यमिश्रा
भक्तास्त्वपीह करयोः प्रभुणा रवेण-।।१३५७।।

५८. नमनं पुनः पुनः करणीयम्।
हरति निखिलविपदः शरणागतभक्तानां भुवि हरिरिह
यदुनन्दनकृष्णः संकर्षति मानसमात्मीयानाम्।
गोवेत्ता किल गोपालयिता गोविन्दो गोपालः
मधुसूदनतो रमयति रामः, प्रियनाम्नामेतेषाम्।।

गायन्ति स्म मधुस्वरेण च पदं नाम्नां हरेः, श्रीप्रभु-
र्बाह्यज्ञानपरो ननर्त, बहवो नृत्यं प्रभोर्दर्शकाः।
द्रष्टुं सम्प्रति पुञ्जिताः, सुमधुरं संकीर्तनस्य ध्वनिं
श्रुत्वा शिष्ययुतः स तत्र मिलितः स्वामी प्रकाशोऽपि च-।।१३५८।।

तत्स्वरे स्वस्वरम्। सोऽपि सम्मेल्य तु-।।१३५९।।

५९. गायति नमनं श्रीहरिनाम्नाम्।
हरये नम इति यादवाय नम इति हरिरात्मा कृष्णः
गोपालनतो गोवेदनतो गोपालो गोविन्दः।
स्वात्मनि वा परमात्मनि रमणं - रामादिव्यवहरणम्
नाऽऽचरणीयं प्रतिनायकवन् - मधुसूदनसङ्केतः।।

श्रीमन्नामपदं जगौ, सहृदयः किञ्चित्क्षणानन्तरं
श्रीसंकीर्तनकं प्रभुश्च रुरुधे, किञ्चित्तु तस्याधुना।
बाह्यज्ञानमभू,त्प्रकाशयतिकं दृष्ट्वा सशिष्यं पुर-
श्चैतन्यो ननु भक्तिभावसहितोऽनंसीच्च तत्पादयोः ।।१३६०।।

एतस्मिन् प्रभुपादयोः पतितवान् स्वामी प्रकाशः, पदे
स्वे कर्षन् बलतः प्रभुः कथयते दैन्येन भावेन तु।
'हेऽनर्थं भगवन् ! भवांस्तु कुरुतेऽमुं कीदृशं, किं भवान्
पापं ह्यर्पयते ममोपरि गुरुर्भूत्वा प्रकाशः स्वयम्।।१३६१।।

शिष्याणां भवतोऽस्मि नो तु भुवि वर्ते शिष्यपर्यन्तवद्,
दृष्टौ यद्यपि सर्वमस्ति भवतो ब्रह्मस्वरूपं यतेः।
मर्यादानुसृतेस्तथापि जगतः कर्तव्यमेवं न वै
संसारे भवता, भवांस्तु परमो मे वन्दनीयोऽस्ति भोः!' ।।१३६२।।

'प्रायश्चित्तमहं पुरा कृताऽघानां स्वेन करोमि तु प्रभो ! ।
लोकानां पुरतः कृता भवन्निन्दा भूरि मया' प्रकाशवाक्।।१३६३।।

हस्तौ त्वाह धरन् प्रभुः श्रवणयोः स 'श्रीहरे ! श्रीहरे !,
ब्रूते कीदृशमेतदत्र वचनं ?, शिष्यस्य भृत्यस्य च।
वक्तुं न प्रभवेत्तथा गुरुजनो दोषं कदाप्यात्मनः,
क्षेमस्यैव वचस्तु तिष्ठति सदा तेषामसौ चिन्तयन् ।।१३६४।।

कामं भवान्मम वदेत्तु कदापि दोषं ?'
चैवं महात्मपुरुषद्वयमध्यवार्ता।
जाता बहुक्षणमुभौ चलितौ निवासं
चान्ते निजं निजममायियतिप्रकाशौ।।१३६५।।

एकान्ते स्वयमागतः सुमनसो गौरस्य पार्श्वे प्रका-
शानन्दो रजनीमुखे सहृदयः, पादे प्रणामं प्रभोः।
चक्रे चागत एव, चाऽऽस्त विनतो ह्येकत्र भागे तथा
सामान्यैककशिष्यतुल्यमथ स (स्थाने नतिर्ह्युन्नतिः)।।१३६६।।

किन्तूच्चैः परिरम्भं चक्रे श्रीप्रभुरस्य।
आकृष्य स्वसमीपे गौरश्चासयति स्म।।१३६७।।

तर्ह्यूचे विनयेन सार्धमधिकं बद्धाञ्जलिः श्रीप्रका-
शानन्दः 'समयः प्रभो ! भुवि निजोऽमूल्यो मया यापितः।
यावत्सम्प्रति चाभिमाननिजकस्तुत्योस्तु, चाद्यावधिं
हि स्पष्टं परमार्थमार्गविषयादज्ञात एवाऽवसम् ।।१३६८।।

तस्मात्सम्प्रति किं मे कार्यं, किं मम मुख्यम्।
कर्तव्यं ?, कृपया तत्स्पष्टं संदिशतां मे'।।१३६९।।

तेनोक्तं - 'भगवन् ! भवान्न भुवने जीवोऽत्र साधारणो,
जीवन्मुक्तदशो भवांस्तु, यदपि क्षित्यां विधातुं भवान्।
किञ्चिद् वाञ्छति, यत्करिष्यति तथा, तस्यैकलक्ष्यं क्षितौ
लोकानामिह संग्रहश्च भविताऽद्धा शिक्षणं वास्तवम्।।१३७०।।

तद् बोधे त्विदमेव चास्मि भगवन् ! श्रीकृष्णरागार्जनं
ह्यस्त्यद्धा परमो निमायिपुरुषार्थः प्राणिमात्रस्य तु।
रागोऽस्तु प्रभुपादपद्मशरणेऽदः साधनस्यान्तिमं
सर्वस्यास्ति फलं, च कर्म निखिलं कार्यं निमाय्यात्मना-।।१३७१।।

अस्यैवोद्देश्यस्य । संपूर्त्यै ह्येकस्य'।।१३७२।।

'अस्तु रागः प्रभो ! । तत्पदाब्जे कथम् ?'।।१३७३।।

'आम्, वस्तुद्वयमस्ति काविह सजातीयं विजातीयकं,
जीवोंऽशोऽस्ति निमायिनो भगवत,श्चेत्तं सजातीयके।

शुद्धे स्थापयिता तथा भगवति स्थाने, तदाऽऽनन्दक-
प्राप्तिः संभविता (निमायिपदतः प्राप्तिर्निमाय्यात्मिका) ।।१३७४।।

श्लिष्टं धारयिता च मायिनि विजातीये स्थले लौकिके,
दुःखी त्वेव सदा तदैव भुवने स्थाता, ततोऽनन्यतः।
भावात्संगमने प्रभोऽस्तु शरणं तस्यैव, जीवात्मनः
कल्याणं, त्विदमेव रागलभनस्याद्धोत्तमं साधनम्' ।।१३७५।।

'सिद्धान्तोऽस्ति परं प्रभो! (भवति वै) शास्त्रे (द्वितीयाद् भयं),
भीतिर्वै परतो ह्युदेति, किमभिप्रायोऽस्य संवर्तते ?।
यावज्जीवति सेव्यसेवकदशा, तावद् द्विता विद्यते,
च द्वैतं भयकारणं (भुवि भयोच्छेदाय सर्वा कृतिः) ।।१३७६।।

भावेन शरणेऽहं केन च पुनः।
यायां ?' (शरणदो भूयादभयदः) ।।१३७७।।

'एतस्मिन् वचसि क्रियात्तु भगवन् ! ध्यानाद् विचारं भवान्,
वार्तेयं ह्युचिताऽस्ति वास्तविकतो, द्वैते सदा वै भयम्।
शान्तिर्नास्ति निमायिनी स्वमनसो ह्यद्वैतभावं विना,
स्वामिंश्चिन्तय किन्तु चांशिनि तथाप्यंशे कथं द्वैतता?- ।।१३७८।।

द्वैतं तिष्ठति किं निमायिमनसोः सेव्ये तथा सेवके ?,
किं सख्योः, पितरीह किञ्च तनुजे, पत्यौ च पत्न्यां तथा?।
द्वैतं यत्र पुनः क्व तत्र भविता प्रेमै,कतायां स्थिता-
वेव प्रेम तु जायते-(ऽमलहृदोः प्रेम ह्यभिन्नात्मनोः)।।१३७९।।

स्वीकारं ननु यं वयं चकृमहे तूक्त्वा निजं, न क्षम-
स्तु स्थातुं स परो भवे, व्यवहृतावप्यत्र वै लक्ष्यते-।
गोप्यं किञ्चन जायतेऽत्र वचनं वाच्यं यदा, वाचकः
पार्श्वस्थान्मनुजांस्तु शङ्कितदृशा तर्हीक्षते सर्वतः-।।१३८०।।

श्रोता जल्पति तद् "वद त्वमधुना निःशङ्कमत्राऽपरः
कश्चिन्न, स्वजनोऽखिलोऽस्ति ननु " तत्स्वत्वे सति स्थापिते।
भूयः किन्नु भयप्रयोजनमहो ! , संवर्धमानोऽयते
ह्यानन्दस्तु पुनर्दिनद्विगुणितः (स्वानन्दता हि स्वता)।।१३८१।।

सम्बन्धो ननु पञ्चधैव भवितुं शक्नोति - चांशांशिकः,
स्वस्वामी, ह्यथ सख्यवान्, जनकसून्वोः, स्वामिपत्न्योस्तथा।
एताञ्जल्पति शान्तदास्यसखितावात्सल्यकान्तात्वकान्
भावांस्तु क्रमतो (निमायिभगवान् भावप्रधानात्मनाम्)।।१३८२।।

एतेभ्यः सुहृदा समं भगवता कस्मिन्नपि स्थापिते
सम्बन्धे सति तिष्ठतीह न परो भूयः स भावप्रभुः।
आत्मीयो ननु जायते स्फुटतया, द्वैतो न भूत्वा तथाऽ-
द्वैतस्त्वत्र विधीयते (भगवतः सर्वैस्तथाऽद्वैतता) ।।१३८३।।

ऐश्वर्यात्मकभावनास्थितिवशाद् द्वैतस्य शान्तेंऽशकं
शेषं तिष्ठति किञ्चिदत्र, तु परं दास्ये हि भावेऽनिशम्।
स्थाने सेवकभावनान्यसनतः शान्तस्य चापेक्षया
द्वैतं किञ्चन जायतेऽल्पदशतां (किं सेवनं द्वैततः ?)।।१३८४।।

सख्ये किञ्चन जायतेऽल्पमथ वै दासस्य चापेक्षया,
तिष्ठत्येव परं पुनर्ननु मनाग् द्वैतं तु सख्येऽप्यहो ! ।
धत्ते त्वेव सखा स्पृहां परमिमां सख्यौ निजेऽसावपि
स्निह्येद्वै मयि (जीवजीवनमिव स्नेहक्षुधा ह्यात्मनः)।।१३८५।।

द्वैतं चाधिकमेव सख्यतुलया वात्सल्यभावेऽल्पतां
धत्ते, निष्कपटः पिता ननु यतः स्वस्मिंश्च पुत्रे तथा।
कञ्चिद् बोधति भेदभावमिह न, ह्यात्मैव पुत्रः पितु,-
र्नो भूयोऽपि समूलनष्टदशतां तु द्वैतभावोऽयते-।।१३८६।।

शेषो लालनपालनात्मविषयो द्वैतस्य सूक्ष्मो मना-
गंशस्तिष्ठति चैव, निश्चिततया कान्तात्वभावे तथाऽऽम्।
न द्वैतस्य तु नाम, मेलयति नो पत्युर्मनस्यात्मनः
सत्पत्नी मन एव, किन्तु हृदयं सा मेलयित्वा हृदा-।।१३८७।।

देहे मेलयति स्वदेहमपि वै पत्यु,स्तु चेष्टा क्रिया
सर्वाऽस्या निजपत्युरेव सुखहेतोर्जायते केवलम्।
स्वाऽस्तित्वं नहि तत्कृते तु वसति, स्वस्वामिभावो न वै,
नांशांशिस्थितिरस्ति तत्र तु परं ह्यद्वैतभावोऽस्त्यलम् ।।१३८८।।

पत्नी स्वात्मकृते न वाञ्छति सुखं, न स्वे सुखे जायते
तन्मोदो, मुदिता प्रियस्य मुदितायामस्ति तस्यास्त्वलम्।
हृष्टो ह्यस्ति निजः प्रियो, ननु ततो हृष्टा वसेत्सापि, यन्
नास्तित्वं तु पृथङ् निजप्रियतमात्तस्या निमाय्यात्मनः।।१३८९।।

तस्यास्तर्हि विरुद्धचेष्टितमहो ! किञ्चित्प्रियाच्छक्यतेऽ-
ब्धा कस्माद् भवितुं तु?, नाम मधुरो भावोऽस्ति चास्यैव भोः!।
भावस्त्वस्त्ययमेव भावजगतीश्रेष्ठो,ऽत्र सर्वाः क्रिया
रुध्यन्ते पुरुषस्य सुष्ठु मधुरे भावान्वितस्य ध्रुवम्।।१३९०।।

स्वत्वं तस्य विनश्यतीह सुहृदोऽब्धा पूर्णत,स्तद्वपु-
र्बह्वल्पं स्वयमेव तिष्ठति तथा कुर्वत्क्रियां यन्त्रवत्।
एवं भाग्यवतो नरस्य भुवने कस्यापि चैव क्षमो
भावोऽवाप्तुमिह (प्रमातृहृदयः कश्चिन्नरो भाग्यवान्)।।१३९१।।

किं लक्षेषु नरेषु कोटिषु तथाऽदोभाववान्मानवः
कोऽप्येको भवतीह कौ, ननु पुनः कस्यापि तद्दर्शनम्।
शक्यं लब्धुमहो ! नरस्य परमश्रीभाग्ययुक्तात्मनः,
श्रीकृष्णस्य भवांस्तु कौ निजजनो, भावोऽस्ति को दुर्लभः-।।१३९२।।

हे स्वामिन् ! भवतः कृते, हि भगवांस्तूक्त्वा भवन्तं निजं
चाऽवारी,त्कुरुते निगद्य स निजं स्वीकारमब्धाऽत्र यम्।
भावेऽस्मिन् भवितुं स एव भुवने शक्नोति वै दीक्षितः
(शिक्षा लौकिकहेतवे नृजगतां दीक्षा त्वलोकश्रिये)।।१३९३।।

कृत्वैव कोऽपि जपयोगतपोमखान् स्वं
भावेऽधिकारिणमिहाऽस्तु च दीक्षितायाः।
बुद्ध्वा, तु तस्य तदहोऽनधिकारचेष्टा
ह्येव क्षमा कथयितुं' (त्विह कोऽपि पात्रम्)।।१३९४।।

दैन्येनातिशयेन चैव वदति स्वामी प्रकाशः 'पुन-
र्जन्माऽभून्मम हे ! प्रभोऽद्य, परमं बोधे तथाह्यात्मनः।
सौभाग्यं, भगवांस्तु मां स्वशरणेऽगृह्णा,त्पुनर्जन्मनो
मन्नामाऽद्य करोतु, यच्छतु तथाऽऽदेशं निमायिंस्तु मे- ।।१३९५।।

क्व स्थातव्यम् ?। किं कर्तव्यम् ?'।।१३९६।।

गौरः प्रेमपुरस्सरं भणति 'सानन्द ! प्रबोध !' प्रभु-
'र्बोधः पूर्वत एव साधु भवतस्त्वासी,दिदानीं प्रभोः।
संजाता परमा कृपा भवति, तद्बोधः प्रकृष्टोऽभवत्,
तस्मादद्य भवान् प्रकाशपदतो जातः प्रबोधाख्यकः।।१३९७।।

"श्रीवृन्दावनधाम" वासविषये कावेकमेव स्थलं,
"वृन्दारण्यविहारिनामसततप्रह्लादसंकीर्तनम्"।
कार्यं कर्म तथैकमेव यतिकस्वामिप्रबोध ! प्रिय !
(क्षित्यां स्थानविशेषकाश्रयणतः श्रेयोरसास्वादनम्)।।१३९८।।

"कृष्ण-कृष्ण-" रटनं भुवि वृन्दा-
कानने च वसनं, शिवमस्मिन्।
एव चास्ति परमं मनुजानां
(मानवत्वफलमुत्तमयुक्तिः) ।।१३९९।।

प्राणिमात्रमुक्तियुक्तिरत्र कौ तथेयमेव।
उत्तमोत्तमाऽभितो' (हि भक्तिवासि-कृष्णनाम) ।।१४००।।

कृत्वाऽऽदेशमथ प्रभोर्निजशिरोधार्यं तदैव प्रका-
शानन्दः प्रभुपादधूलिमचलच्छीर्षे विधायाऽऽत्मनः।
सम्पत्तिं मठमन्दिरे स निखिलं हित्वा च शिष्यव्रजं
श्रीवृन्दावनलक्ष्यको- (ऽखिलरसव्रध्नो हि वृन्दारसः)।।१४०१।।

गत्वा कालियघाटपार्श्वमवसत्तत्रा,ऽन्तिमं जीवनं
सोऽत्यन्तं मधुरेण चाऽथ कृतवान् भावेन वै यापितम्।
मत्ताभः स ननर्त तूपरि करावुत्थाप्य चोत्थाप्य, च
स्वं श्रीकृष्णनिमायिनः सहचरीं गोपीं हृदाऽमन्यत।।१४०२।।

तन्मधुरप्रियभावे नाम बभूव तु गुप्तम्।
अस्य "सखी गुणचूडा" (नाम हृदो ह्यनुभावः) ।।१४०३।।

कुर्वन् कालियघाटपार्श्वकुटिकायां कृष्णसंकीर्तनं
ह्येकस्यां न्यवसद् दिवानिशमसौ, सन्नुत्तमः पण्डितः।
अद्धाऽऽसीदपि संस्कृतोत्तमकवि,र्वै भावपूर्णा प्रियाऽ-
स्याऽत्यन्तं कविताऽभवत्सुललिता (स्यात्पण्डितः सत्कविः)।।१४०४।।

वृन्दावनस्यैष च पावनावना-
वेव स्वदेहं ननु पाञ्चभौतिकम्
जहौ, समाधिर्निकटेऽस्य कालिय-
ह्रदस्य चाद्यावधिमस्ति निर्मितः ।।१४०५।।

"वृन्दारण्यरसामृतं" सुमनसा "चैतन्यचन्द्रामृतं"
"श्रीराधारसनिर्जरामृतनिधि"र्वृन्दावनश्रीशतम्"।
एषा ग्रन्थचतुष्टयी विरचिताऽनेनाऽऽप्यते स्वामिना,
श्लोकाः सन्ति सहस्रमत्र (कविता यत्र प्रियग्रन्थनम्)।।१४०६।।

त्वत्यन्तं बहु काव्यमस्ति मधुरं "चैतन्यचन्द्रामृतं",
तच्छन्दांसि बहूनि सन्ति ननु चेयद्भावपूर्णानि तु।
चेतो नृत्यति यत्तथाहि पठतो, व्यक्ता स्फुटं जायते
प्रत्येकात्पदतो महाप्रभुगता श्रद्धा प्रगाढाऽस्य च ।।१४०७।।

आसीद् भक्तिरहैतुकी त्वतिशया चाऽस्याद्भुता पादयोः
श्रीचैतन्यमहाप्रभोः, प्रियतमश्रीकृष्णचैतन्ययोः-।
चक्रेऽसौ गुणगान एव करणे स्वस्योपयोगं प्रबो-
धानन्दः कमनीयकाव्यकवितायाः स्वामिपादस्तु सत्।।१४०८।।

स्थानाभाववशाच्च चारुकविता ह्युद्धर्तुमस्याऽक्षमोऽ-
त्राऽहं श्रीचरितावलीरचयिता, "चैतन्यचन्द्रामृते"।
श्रीचैतन्यपदोः प्रगाढ़सुरतिं स्वां स्पष्टमादर्शयन्
ब्रूतेऽसावपरस्थले - (रचयिता स्वारस्यसङ्केतकः)।।१४०९।।

६०. गौरः सकलभवह्रीचौरः।
मुरशत्रोर्दधिजाऽऽहरणं ननु संग्रहवृत्तेर्हरणम्
अम्बरहरणं चिज्जडताद्यावरणादेरपनयनम्।
नरकरवाणीमतिसाफल्यं नामगानयज्ञान्ते
करोद्यमनपूर्वकहरिकीर्तनमिति रूपमननसहितम्
परमानन्दास्वादनमदिशन्न्यस्तव्रीडनिमायी।।

'त्वत्यन्तं बलवान्निमायिहृदयोऽद्धा गौरवर्णः पुन-
श्चौरः कोऽपि महानरः सहृदयः प्रेमावतारा कृतिः।
सर्वां लौकिकवैदिकव्यवहृतिश्रद्धां तथाऽऽगत्य नोऽ-
हार्षीत्ताञ्च बलात्त्रपां-(प्रियहरिश्रीकीर्तनस्य क्षणे-) ।।१४१०।।

गाने नृत्यमहोत्सवे प्रहसने संजायमानां तथा
देहप्राणनिदानभूतविषयान् धर्मांश्च तान् प्राकृतान्।
अर्थात् - सर्वपदार्थकात्तु रहितानस्मात्स गौरोऽत्र न-
श्चौरः संकृतवान्' (निमायिहृदयः कोऽप्यद्भुतो मानवः) ।।१४११।।

धन्यस्त्वहो ! ह्यपहृतः पथिकस्तथैवं
चौरस्तथाहरणकृ,च्चरणप्रणामम्।
भूयो महात्मपथिकस्य हृतस्य भूय-
श्चौरस्य सद्धरणकस्य वयञ्च कुर्मः।।१४१२।।

●●

श्रीसनातनो वृन्दावनकृते तथा महाप्रभुः पुरीकृते

६१. साम्प्रतिकी वृन्दावनवार्ता गौडस्वाम्यवदानम्।
वृन्दा-भक्तिस्तद्वनमध्ये भक्तभक्तिमान् विलसति
भक्ती रतिरिति मधुरावृत्तिः प्रेमादर्शप्रकृतिः।
वृन्दारण्यविलासिक्रीडावार्ता लुप्तप्राया
कालेन, ख्यापयितुं गौरस्ताः सकलाश्चैतन्यः
रूपसनातनयुगलं व्यसृज,ज्जनहितकृद् गौरात्मा।।

प्रायो द्वौ ननु मासकौ शिवपुरीकाश्यामुषित्वा प्रभु-
र्द्वे कार्ये प्रमुखे चकार सुमनाः शास्त्रीयशिक्षां ददौ।
(त्वेकं) श्रीलसनातनाय, परमाश्च स्वामिपादप्रका-
शानन्दाय निमायिभावमधुरश्रीप्रेमदानं तथ।।१४१३।।

विख्यातिः प्रसृता प्रभोः सुमनसः सम्पूर्णकाश्यां प्रका-
शानन्दाभविशिष्टपण्डितमनोभावव्यतीहारतः।
आयान्तो ह्यभवञ्जनास्तु बहवो यान्तः प्रभोर्दर्शने
(सद्वस्तु प्रभया तथाहि निजयाऽद्धा जायते दृश्यताम्) ।।१४१४।।

शास्त्रार्थाय तथाऽऽह्वयन्ति बहवो वेदान्तिनः पण्डिताः
श्रीचैतन्यमहाप्रभुं, कथयतेऽसौ नम्रतापूर्वकम्।
'किं शास्त्रार्थमहं निमायिहृदयो विद्यां ?, तु येषां भवेद्
बालक्षालविवासनात्मकरणं शास्त्रीयवाक्यस्य तु-।।१४१५।।

कुर्वन्तो ननु सन्तु ते भुवि तथा, सारस्तु बुद्धो मयाऽ-
सावेवाऽत्र समस्तशास्त्रजगतः - सर्वत्र सर्वक्षणे।
श्रीनारायण एव संततमहो ! ध्येयो, हि यो नाऽऽस्तिकः (ना+)
कुर्यात्खण्डनमत्र मेऽस्य वचस,स्त्वायातु मे सोऽग्रतः' ।।१४१६।।

सर्वो मौनमभूदिदं प्रभुवचः श्रुत्वा, निजाभं मुखं
धृत्वा चाऽथ निवर्तते स्म, विपुलात्प्रायोऽत्र सम्मर्दतः।
लोकानाञ्च गतागतेस्तु चिखिदे चेतो निमायिप्रभो,-
र्नो बह्वालपनं प्रभुप्रियमभूत् (सन्नाऽतिवार्ताप्रियः) ।।१४१७।।

नैकं श्रोतुमपि त्वियेष स पदं श्रीकृष्णवार्ताऽतिरि-
क्तं, संसारिजनस्य सम्मिलनतः संसारिवार्तोदयः।
प्रायो जायत एव, नेदमभवत्स्वादु प्रभोर्वै वच,-
स्तत्तेनैव विनिश्चितं प्रति पुरीं यातुं (शरण्यो हरिः)।।१४१८।।

दैन्येन भावेन सनातनश्रीः
पप्रच्छ बद्धाञ्जलिरस्य बुद्ध्वा।
तन्निश्चयं 'का भवतीह चाज्ञा
प्रभो ! कृते मे शरणागतस्य ?' ।।१४१९।।

'संसारेऽत्र कुरु त्वमप्यनुसृतिं स्वभ्रातुरेवाऽध्वन,-
स्तीर्थानां व्रजमण्डलस्य तु युवां स्थित्वा हि वृन्दावने।
लुप्तानां कुरुतं तथा पुनरुभावुद्धारमा ! भ्रातरौ
भक्तिग्रन्थदिशा प्रचारमपि च श्रयस्पष्टलीलाश्रियाम्।।१४२०।।

स्थो द्वावेव सहोदरौ सहृदयौ वैराग्यवन्तौ युवां,
मर्मज्ञौ च रसे कवित्वहृदयौ सत्प्रेमिणौ पण्डितौ।
ग्रन्थानां भुवि भावि तु प्रणयनं येषां युवाभ्यां, नृणां
कल्याणं भविताऽधिकं सुमनसां तेभ्यो निमाय्यात्मनाम् ।।१४२१।।

च व्रजमागतगौडक्षेत्रजनेक्षणकार्यम्।
वामहमेव ददामि' (प्रीतिधरा जनसेवा)।।१४२२।।

ऊचे श्रीलसनातनो विवशतायुक्तस्वरे साञ्जलिः
'कार्यस्यास्य तथेयतस्तु महतः कामं कथं हे प्रभो !।
योग्यौ नौ भवितुं क्षमावधमकौ ?, त्वेतेन किं नौ परं ?
(ह्यादेशो महतो निमायिसुहृदो मूर्ध्ना निधेयो नृणा)।।१४२३।।

आवां तु यन्त्रं, ननु घूर्णयिष्यति
यन्त्री यथा, काविह घूर्णिता तथा।
कर्ता तथा, यन्ननु कारयिष्यति
(कामं जगद् घूर्णति केवलात्मना) ।।१४२४।।

अस्मिन्नहि किञ्चित्कर्तैव तु कार्यम्।
स्वीयः पुरुषार्थस्त्वद्धा ह्यबुधोर्नौ' ।।१४२५।।

'कार्येऽस्मिंस्तु रतौ युवां हि भवतं, कर्ता हरिस्तु स्वतः
सञ्चारं हृदये बलस्य युवयोः, श्रीकृष्णलीलाश्रियाम्।
वृन्दायां स्फुरणा स्वतो हि हृदये वां स्याद् भवन्ती स्थले'
(स्थाने दीव्यति साधु वस्तु कृतिनः, पात्रे फलन्ति श्रियः) ।।१४२६।।

श्रीप्रभुकोऽकृत वृन्दारण्यकृते सहचित्तम्।
श्रीलसनातनमेवं स्नेहरसेन विबोध्य।।१४२७।।

गङ्गास्नानमसौ विधाय च पराह्नि प्रातरेव प्रभुः
प्रस्थानं कृतवान् प्रति प्रभुपुरीं, विप्रो महाराष्ट्रियः।
चन्द्रः श्रीतपनस्तथाहि परमानन्दादिभक्ता रघु-
र्नाथः श्रीलसनातनश्च चलिताः पृष्ठेऽन्तरङ्गाः प्रभोः ।।१४२८।।

संबोध्याऽलमसौ निवर्तयति तान् सर्वां,स्तथालिङ्गनं
कृत्वा प्रेमपुरस्सरं सहृदयो गौरोऽखिलानां प्रभुः।
चैतन्यो बलभद्रभट्टसहितोऽग्रे प्रस्थितो, मूर्च्छितः
पृथ्व्यां भक्तगणोऽपतद् विरहतो देहो यथाह्यात्मनः।।१४२९।।

दुःखं श्रीलसनातनस्य हृदयेऽपारं वियोगात्प्रभो-
र्जातं, तं ननु वैद्यचन्द्रशिखरश्चोत्थाप्य गेहं निजम्।
आनिन्येऽथ यथा तथा, परदिनेऽनुज्ञां गृहीत्वाऽचलत्
साधू राजपथेन सोऽपि सृहृदां वृन्दावनाशां प्रति ।।१४३०।।

श्रीरूपोऽत्र सुबुद्धिरायसहितो यात्रां वनानां तथा
सर्वेषां कृतवान्, व्रजे भ्रमणकं मासं स चैकं त्वभूत्।
कुर्वन् कृष्णविहारपूतविषये, भूयोऽस्य चिन्ताऽभवत्
स्वभ्रातुश्च सनातनस्य (भुवने भ्राताऽपरश्चिन्तकः) ।।१४३१।।

सोऽनूपेन तदागतः सह निजभ्रात्रा कनिष्ठेन तच्-
छोथे गाङ्गतटेन सौरविषयात्काशीं प्रयागाध्वना।
आगत्याऽस्य सनातनस्य निखिलं वृत्तं तथाऽऽप्तं प्रभोः
काश्यां (श्रीशिवसन्निधेः शिवसमाधानं, भवेऽत्र प्रमा) ।।१४३२।।

गत्वा श्रीलसनातनस्तु मथुरां भ्रात्रोर्द्वयोरात्मनः
कुर्वन्मार्गणमस्ति, तत्र सहसाऽमुष्याऽभवत्सङ्गमः।
स्थाने रायसुबुद्धिना (ह्यवगतं) रूपस्त्वनूप- (स्ततो)
यातौ मार्गणहेतवे तु भवतो गौडं च काशीभुवा।।१४३३।।

श्रीगङ्गापुलिनेन रूपसुमनाः प्राप्तोऽभव,च्चाध्वना
यातोऽभूत्तु सनातनः, पथि ततो नाऽभूद् द्वयोः सङ्गमः।
भ्रात्रोः, श्रीलसनातनोऽद्य परमं वैरागिसंन्यासिवत्
स्थाने त्यागमयं तु जीवनमसौ वृन्दावने यापयन्-।।१४३४।।

उद्धारे व्रजमण्डलस्य निरतोऽभूल्लुप्ततीर्थश्रियां,-
तेनाऽऽप्तं मथुरास्थलेऽत्र "मथुरामाहात्म्यकं" पुस्तकम्।
एकस्मात्सुजनाद्, वने च निखिले कुञ्जे भ्रमित्वा तथा
तस्यैवानुसृतेर्व्रजस्य कुरुतेऽसौ लुप्ततीर्थश्रियाम्-।।१४३५।।

संज्ञान,मेष गृहतो गृहतोऽथ खण्डं
संयाच्य खादति, तले निशि पादपस्य।
कस्यापि चास्ति पतितोऽभवदित्थमेव
स्वं जीवनं स गमयन् परमङ्गलात्मा।।१४३६।।

भक्तेभ्योऽत्र महाप्रभुः प्रति पुरीं गौरोऽचलत्प्रस्थितः
कण्टस्तम्बपथेन, पूर्ववदयं भिक्षाप्रबन्धं पथि।
भट्टाचार्यबलश्चकार, सुहृदः शाकैस्तु जातः क्वचि-
न्निर्वाहः करणीय एव च फलैः पक्वैर्वनस्याऽशृतैः।।१४३७।।

६२. रक्षणमिह कुरुतां श्रीरामः।
मर्यादारक्षणसंभारो ज्ञानवतां मनुजानाम्
तन्मर्यादापुरुषोत्तमता रामस्याऽवतु सततम्।
कृष्णो ललितललामो दयताम्।
नेत्रपिपासा चित्तविकलताऽस्माकं शमिता केशव !
भवदवलोकनतः केवलमिह, भाव्यव्यक्ती रसता।।

मार्गेऽयं महता स्वरेण सह तु श्रीरामकृष्णश्रियोः
कुर्वन् गानमभूत्प्रभुर्ननु सरन्, ह्यत्यन्तमस्योद्गता।
मार्गे तच्चलतस्तृषा च चलत,स्त्वायांस्तथा सम्मुखात्
तस्यैको ददृशेऽथ गोपशिशुको (गोपालनक्ष्मा व्रजः) ।।१४३८।।

तच्छीर्षे मणिकोऽभूदेकः, पृच्छति गौरः।
'किं भ्रातः!, किमिहास्ति ?' (प्रष्टव्यः स्वपुरस्थः)।।१४३९।।

नम्रतयाऽत्यन्तं स तु बालो जल्पति 'हे ! स्वामिन्निह घोलम्।
यामि तथा दातुं निजपित्रे' (संसृतिसेव्यः क्षेत्रतलस्थः) ।।१४४०।।

'तृषा ममोद्गताऽधिकाऽस्ति, किं क्षमोऽसि मेऽधुना।
अदःसुघोलपायने ?' (तृषा क्षुधाधिकाऽऽत्मनः) ।।१४४१।।

'अहं महानुभाव ! हे ! तु पाययेयमाः!, परम् ।
पिता प्रतीक्षणे भवेत्', (प्रतीक्षकस्तथाऽऽदिमः) ।।१४४२।।

'वार्ता शोभनमस्ति, तर्हि निकटे तस्यैव चैतन्नय
त्वं' ह्युक्त्वेयदसौ चलन् प्रभुरभूदग्रे, स बालः क्षणात्।
संचिन्त्याऽल्पमुवाच 'घोलमिदमाः ! स्वामिन्! पिबत्वार्यक !
प्रत्यागच्छतु' (गेहिधर्मविषये सेव्योऽतिथिः पूर्वतः)।।१४४३।।

'रुष्टस्तव पिता स्यात्तत्त्वमसि किम्।
वक्ता ?' (श्रमपरक्रोधः समुचितः)।।१४४४।।

'आनेतुं प्रभवामि तस्य तु कृतेऽप्यन्यन्महाराज ! हे !
स्वामिन्!, स्यादतिकालताऽथ भविता रुष्टोऽल्पमेवाऽऽत्मनि ?।
जाने किन्तु न मेलिता क्व भवतोऽग्रे वारि, सूर्यातप-
स्तीक्ष्णं संपतति- (प्रवासपथिकः स्थानीयलोकाऽतिथिः) ।।१४४५।।

गन्ता तु भवांस्तृषितो,ऽमुना चेतो मम पान्थक ! कम्पते।
कामं किमपीह किमस्तु न, त्यक्तुं तृषितं प्रभुरस्मि नो'।।१४४६।।

'स्याद् भ्रातर्न पिता ते रुष्टोऽथ त्वयि, नेदम्।
न्याय्यं, मेऽम्बु तु भावि क्वापि क्वापि न लब्धम्' ।।१४४७।।

श्रुत्वाऽदो वचनं प्रभोः स धृतवानागत्य बालः पदे,
चक्रे तस्य च घोलपानविषयामभ्यर्थनां वै रुदन्।
नो तस्याग्रहनिह्नवे प्रभुरभूच्छक्त,श्च तस्याग्रहात्
तन्मृद्विस्तृतभाजनस्य निखिलं घोलं निमायी पपौ ।।१४४८।।

पीत्वा घोलमथोच्चकैश्च कृतवांस्तद्बालकालिङ्गनं
गौरः, प्रेम्णि स वातुलो 'हरि-हरि''- प्रोक्त्या तथालिङ्गनम्।
प्राप्यैवास्य निमायिनः सुमनसः कुर्वन् बभौ नर्तनं
(लोको नृत्यति लौकिकस्पृशिबला,त्किं स्यादलोकस्पृशिः?)।।१४४९।।

तत्कालेऽधिकमेव तस्य च दशा जाता विचित्रा, तनौ
तस्याऽभूदुदितस्तु सत्त्वजनितो भावो, वित्तीर्य प्रभुः।
एवं प्रेम च बालकाय सुमनास्तस्मै चचालाऽग्रतः,
प्राप्तोऽसौ समयस्य चातिमहतः पश्चात्पुरीसन्निधौ।।१४५०।।

दूरादेव निमायिनोऽथ ददृशे श्रीमज्जगन्नाथजी-
केतुः, श्रीयुतमन्दिरस्य सुमना दृष्टे तु केतौ प्रभुः।
भूमौ सोऽथ विलुठ्य च प्रभुजगन्नाथस्य चक्रे नतिं
केतोर्विस्तृतकस्य तु प्रतिनिधेर्धोधूयमानस्य, च- ।।१४५१।।

प्राप्तो नालमसावठारहपदं, भक्तात्मनां सूचना-
याऽऽप्त्वा नालमठारहं सहृदयो भद्रं बलं प्राहिणोत्।
तत्रैव स्वयमासितः पथगताऽऽयासं निमायी भवान्
स्थाने सारयति स्म (हि क्षणदशास्थानानुसारी कृती)।।१४५२।।

●●

प्रभोः पुर्यां भक्तैः पुनर्मिलनम्

६३. मिलनात्सुहृदः पुनर्मिलनमिह मधुरादतिशयमधुरम्।
प्रथममिलनतो हार्दपरिचयस्तत्सौहार्दं यच्छति
अतुलप्रकृतिद्वाराऽऽनन्दं संलापादिक्रियया।
काविह तादृशसुहृद्वियोगः प्रेमिजनं मूर्च्छयति
तन्मिलनं यदि पुनरथ भवति, प्रियमिह नहि परमस्मात्।।

'श्रीवृन्दाविपिनान्निवृत्य सुमनाः संन्यासिचूडामणिः
श्रीचैतन्यमहाप्रभुः पुनरहो ! प्राप्तोऽस्ति नीलाचलम्'।
आनन्दः प्रभुगौरभक्तनिवहेऽपारोऽस्य मोदस्तुते-
र्वृत्तस्य श्रुतिमात्रतस्तु विततः (प्रेयःश्रुतिः प्रीतिदा)।।१४५३।।

अन्योन्यं निखिलो मुदं प्रकटयन्नेकः परालिङ्गनं
कुर्वन्नस्ति, तथा द्रुतं श्रवणयोर्ब्रूते परं कोऽपि च।
धावित्वाऽमृतसेचनं प्रियमिदं वृत्तं, तृतीयान्तिके
धावन् याति स (भूरिदो भुवि जनो, वृत्तं गृणाति प्रियम्) ।।१४५४।।

एतन्ननु वृत्तं चात्राऽखिलपुर्याम्।
आविस्तृतमेवं स्थाने क्षणतस्तु ।।१४५५।।

श्रीवृन्दाविपिनं यदा प्रभुरभूद् गच्छंस्तदैवाऽखिलै-
र्बुद्धं भक्तजनै'र्निमायिसुहृदोऽदोदर्शनं ह्यन्तिमम्।
यो नाम्नि श्रुत एव मूर्च्छितदशो वृन्दावनस्य प्रभु-
र्गौराङ्गो ननु जायते-(प्रियतमस्थानं हि जिज्ञास्यते)।।१४५६।।

श्रीवृन्दावनतस्तु नोत्तममहो ! किञ्चित्स्थलं चाखिल-
ब्रह्माण्डेऽस्ति तथाहि यस्य सुहृदो दृष्टौ, स वृन्दावनम्।
आप्त्वा किन्नु पुनस्ततः सहृदयः पुर्यां निवर्तेत ? (हि
स्थानान्वेषणकारणभ्रमणकं, स्थाने समाप्तिर्भ्रमेः) ।।१४५७।।

श्रीवृन्दावनवासमद्य तु तथा कुर्वन्निमायिप्रभु-
स्तच्छ्रीवङ्कविहारिणा सह सदाऽऽनन्दप्रमोदे रतः।
स्थाने स्थास्यति' किन्तु सम्प्रति यदा भक्तैः श्रुतं यत्प्रभुः
श्रीवृन्दाविपिनान्निवृत्य सुमनाः प्राप्तोऽस्ति नीलाचलम्।।१४५८।।

आनन्दस्य तदा तु भक्तसुहृदां तेषां न सीमाऽवसत्,
प्रेमोन्मत्तदशोऽखिलः सहृदयः कुर्वंश्च संकीर्तनम्।
एकस्मिन्ननु पुञ्जितोऽभवदथ स्थाने, चचाल प्रभुं
चानेतुं मिलितोऽखिलो (हि मिलितव्यापारशोभाऽपरा) ।।१४५९।।

भट्टाचार्यकसार्वभौमसुमती रायो रमानन्दजी
चास्तां तत्प्रियसर्वभक्तसुहृदामग्रेसरौ, दूरतः।
तैर्दृष्टं- धृतगैरिकाम्बरतनुर्गौरस्तथोच्चारयन्
प्रेयःश्रीहरिनाम सोऽथ मधुरं मत्तो गजेन्द्रो यथा-।।१४६०।।

आनन्दे विकलश्चलन् सहृदयः श्रीमन्दिरस्योन्मुखं
चायानस्ति, तदा तु भूमिपतिताः सर्वे प्रणामं तथा।
चक्रुः श्रीप्रभुपादपद्मयुगले, भक्तान् प्रभुश्चात्मनः
पादाधःपतितान् स्वयञ्च निखिलान् गौरो ह्युदस्थापयत् ।।१४६१।।

चैतन्यः स्वकरद्वयेन मृदुना, सर्वान् क्रमाच्चोरसा
प्रेम्णा लागयति स्म, सम्प्रति बहोः कालस्य पश्चात्प्रभोः।
प्रेमालिङ्गनमाप्य चाऽस्य परमानन्दः समेषामभूत्,
सौभाग्यस्य निजस्य शंसनममी कुर्वन्ति सर्वे तथा ।।१४६२।।

सङ्गे भक्तजनं विधाय सुमना यातः प्रभुः श्रीजग-
न्नाथाऽऽलोकनहेतवे, प्रभुमहो ! श्रीमन्दिरस्यार्चकः।
दृष्ट्वैव प्रणतिं चकार पदयोस्तस्य प्रसादं जग-
न्नाथस्य स्रजमास्तथार्पयति तत्कण्ठे, च गौरप्रभोः-।।१४६३।।

श्रीमच्चन्दनकप्रसादमलिपत्सम्पूर्णकाये पुनः,
कृत्वाऽसौ चिरकालतः प्रभुजगन्नाथस्य संदर्शनम्।
भूत्वा प्रेम्णि तु विह्वलः सहृदयोऽसौ भक्तचूडामणि-
र्गौराङ्गो बलतो रुरोद मिलितो मातुर्वियुक्तः शिशुः।।१४६४।।

श्रीमन्मन्दिरकाङ्गने च निखिलैरेवात्र संकीर्तनं
ह्यारब्धं, च नटाग्रणीः सहृदयश्चैतन्यदेवः करौ-।
उत्थायोपरि वै ननर्त सुमनाश्चोत्थाप्य, गौरप्रभो-
र्नृत्यं द्रष्टुमपारलोकनिवहस्त्वागत्य तत्राऽन्वितः ।।१४६५।।

उद्दण्डं प्रभुनृत्यं दृष्ट्वाऽऽत्मानममी ते।
सर्वे विस्मृतवन्तो, भावावेशगताश्च-।।१४६६।।

६४. गानं करणीयं प्रियनाम्नाम्।
हरये नम इति यादवाय नम इति हरिकृष्णाभ्यामपि
गोपालकगोविन्दाभ्यामपि सममृतरससमानाम्।
रामश्रीमधुसूदनयो,रिह कालक्षेपोद्देश्यात्
आधिव्याधिप्रशमहेतुरन्तरमलतार्थं भजनम्।।

नृत्यं कथयित्वा चक्रुः कथयित्वा।
(श्रीमद्रसधारा संकीर्तनगङ्गा) ।।१४६७।।

किञ्चित्कालपरं रुरोध सुमनाः संकीर्तनं च प्रभुः
कुर्वन्मन्दिरकप्रदक्षिणमसौ भक्तैः समं त्वागतः।
काशीमिश्रगृहं स्वपूर्ववसतिस्थानं, प्रणामं प्रभोः
श्रीमिश्रः कृतवान् पदाब्जयुगले (गेहिप्रणम्योऽतिथिः) ।।१४६८।।

श्रुत्वाऽऽप्यागमनं प्रभोश्च परमानन्दः पुरी निस्सृतोऽ-
न्तर्बाह्यं त्वियति क्षणे,ऽकृत पुरीपादे प्रणामं प्रभुः।
श्रद्धापूर्वक,माश्लिषां सुमनसश्चक्रे पुरीश्रीमहा-
राजोऽन्तश्च निनाय तं ननु करं धृत्वा निमायिप्रभुम्।।१४६९।।

सर्वेष्वत्र तथाऽऽसितेषु दिशते यात्राप्रसङ्गं प्रभु-
श्चात्मीयं, व्रजमण्डलस्य सुहृदो वार्तां प्रभोः कुर्वतः।
स्तब्धोऽमुष्य गलः, ससार च दृशोरश्रुप्रवाहस्तथा
(प्रेयःस्थाननिवासयोगविरहः क्लेशः प्रमातुः कृते) ।।१४७०।।

भिक्षां कर्तुमयाचत्तच्छ्रीसार्वकभौमः।
स्वे गेहे प्रभुगौरं (धर्मः सत्कृतिमात्रम्)।।१४७१।।

'भट्टाचार्यमहाशयाऽद्य तु चिरात्कालादभूत्सङ्गमः
स्वैर्भक्तैर्मम, चात्र भिक्षणमहो ! तत्रापि कुर्यामहम्।
एकाक्येव, न मे प्रतीतिमयतेऽदोऽच्छं, ममाऽस्ति स्पृहा
त्वत्रैवाद्य लभै समञ्च निखिलैर्भक्तैः प्रसादं प्रभोः'।।१४७२।।

भट्टाचार्यमहोदस्य वचसाऽनेन प्रमोदोऽधिको
जातः, सोऽथ महाप्रसादलभने श्रीकाशिमिश्रं तथा।
वाणीनाथमपीतरान् द्विचतुरो भक्तान् विधायाऽचलत्
सङ्गे (साधुसमाजसेवनकृते संरम्भताऽऽस्थावताम्) ।।१४७३।।

तत्राऽऽनीय बहु प्रसादमयकं द्रव्यं तथोपस्थितं
चक्रे सुन्दरसुन्दरं बुधगृही भोज्यं समेषां कृते।
भक्तानां, सुमनाश्च भक्तनिकरं सङ्गे विधाय प्रभुः
स्नेहेनातिशयेन वै भगवतो लेभे प्रसादं समम् ।।१४७४।।

सर्वेषां परमः प्रसादलभनात्पार्श्वे निमायिप्रभो-
र्मोदोऽभू,न्निजभाग्यशंसनममी चक्रुः प्रसादं प्रभुः।
लब्ध्वाऽयं कुरुते श्रमोपशमनं, भक्ताश्च चेलुर्निजं
गेहं तेऽथ निजं (स्वनीडमयते पक्षी जनोऽस्ते रवौ)।।१४७५।।

अत्र श्रीलनिमायिकागमनकोदन्तं नवद्वीपके
द्राग् दामोदरपण्डितेन सुखदं स्वामिस्वरूपस्तथा।
पार्श्वे प्रेषितवान्निमायिकशचीमातुश्च विष्णुप्रिया-
याश्चान्यान्यसमस्तभक्तनिकटे (सूच्या हि सम्बन्धिनः) ।।१४७६।।

श्रुत्वा गौरनिमायिकागमनकोदन्तं ननर्त प्रियं
सानन्दं प्रभुगौरभक्तनिवहः, सर्वे द्रुतं च दुतम्।
कुर्वन्तो ह्यभवन् प्रतीक्षणमहो ! गौरप्रियास्ते रथ-
श्रीयात्रासमयस्य (जीवनवयः सर्वं प्रतीक्षाक्षणः) ।।१४७७।।

यात्राया ननु सज्जतां स्म कुरुते श्रुत्वैव सेनः शिवा-
नन्दः, शान्तिपुरेश्वरः सहृदयोऽद्वैतः स्वभक्तैः समम्।
श्रीनीलाचलहेतवे समभवत्सज्ज,श्च नित्यप्रभुः
श्रीगौरेक्षणवाञ्छया परिकरेण स्वेन यातुं पुरीम्-।।१४७८।।

औत्सुक्यं ननु विद्यते प्रकटयं,श्चेलुर्नवद्वीप-शा-
न्ति-श्रीखण्ड-कुमारहट्ट-कुलिया-श्रीकाञ्चनाऽऽवासिनः।
गौराङ्गप्रभुदर्शनोत्सुकतया भक्ताः सहस्रं, शिवा-
नन्दस्त्वेव चकार पूर्वसदृशं यात्राप्रबन्धं तथा- ।।१४७९।।

सर्वेषां, प्रभुहेतवे च विविधं धृत्वा पदार्थं तथा
भक्ताः सम्प्रति तत्स्त्रियस्तु निखिला विष्णुप्रियां मातरम्।
याचित्वाऽनुमतिं शचीं सहृदयाः कृत्वोपलक्ष्यां रथ-
श्रीयात्रां प्रभुदर्शनार्थमचलन् पद्भ्यां पुरीं तु प्रति ।।१४८०।।

वारेऽस्मिञ्छुनकोऽपि तस्य चलितः सेनेन सार्धं शिवा-
नन्देनाऽथ, स वै रुरोध बहु तं, नो रुध्यते स स्म तु।
श्वा रीत्यापि कयापि, तर्हि तु सुहृत्स्वे सङ्ग एवाऽचलद्
धृत्वा सेनमहाशयो गृहिवरः कालेन तं भोजयन्।।१४८१।।

पारोत्तारणके शुनः पथि कति स्थाने च घाटाधिपोऽ-
प्यापत्तिं कृतवां,स्तु येन विधिना केनापि दत्वाऽधिकम्।
द्रव्यं सेनमहाशयोऽनयदहोऽसौ कारयित्वैव तं
पारं (ह्याश्रितरक्षणादधिकमाः! श्रेष्ठो न धर्मः परः)।।१४८२।।

एकस्मिन् दिवसेऽस्य सेनगृहिणो घाटाधिपैः कुर्वतोऽ-
भूदुत्तारणदेयवित्तगणनं स्थाने विलम्बो महान्।
तद्भृत्यः शुनकस्य भक्तददनं काले विसस्मार तु,
क्रुद्धोऽनेन विहाय स क्व शुनकः सङ्गं न जाने गतः ।।१४८३।।

यदा शुनोऽन्वेषणमेष सेनो
महाशयः कारितवान्निजस्य।
तत्प्रत्ययः क्वापि न तर्हि लब्धो,
ह्यनेन दुःखं बहु तस्य जातम् ।।१४८४।।

सर्वो भक्तजनः परत्र दिवसे पार्श्वे प्रभोरापयद्,
भक्तैर्दृष्ट,महो ! स एव शुनकः पार्श्वे स्थितोऽस्ति प्रभोः।
क्षीरं भोजयति प्रभुस्तममनाः स्थाने स्वहस्तेन च,
प्रेमी तञ्च हसन् हसन् कथयते-(ऽदः साधु हास्यं जगत्) ।।१४८५।।

६५. वातुल ! भज भज भज भगवन्तम्।
भौतिकभजनं कुर्वन्नेव प्राणी तिष्ठति सततम्
अपि तनुयात्रासिद्धिर्न स्याद् वस्तुभजनरहितानाम्।
परमिह तनुयात्राऽपरलक्ष्यं मधुरप्रियतमभजनम्
राम-कृष्ण-हरि-नामभजनमथ कुरु तन्मधुरं मधुरम्''।।

स श्रुत्वा शुनको मधु प्रभुवचः प्रेम्णा धुनानो निजं
पुच्छं सम्प्रति राम-कृष्ण-हरिक-श्रीनामसंकीर्तनम्।
भाषायामलमात्मनोऽस्ति विदध,त्पार्श्वे प्रभोरासितं
दृष्ट्वा तं शुनकं चकार परमाश्चर्यं शिवानन्दजी।।१४८६।।

नासीत्पूर्वमिहागतः स शुनकः स्थाने पुरीं कर्हिचिन्,
नाऽपश्यत्स महाप्रभोश्च वसतिस्थानं, कथं ह्यागतः।
एकाक्येव पुनस्त्वसाविह ?, शिवानन्दोऽथ सेनोऽबुधत्-
'सिद्धः कोऽप्ययमस्ति पूर्वजनितः-(सिद्धोऽप्यलं भ्राम्यति) ।।१४८७।।

अस्याप्ता शुनकस्य योनिरवनौ हेतोस्तु कस्मादपि,
स्निह्यत्यत्र तदेव चेयदधिकं गौरो' विचिन्त्य त्विदम्।
साष्टाङ्गं शुनकस्य सोऽकृत शिवानन्दः प्रणामं गृही,
क्वाप्यन्यत्र गतस्ततस्तु शुनकः पुच्छं धुनानो निजम्।।१४८८।।

अस्य च पश्चात्क्वापि तु भूयः।
तं शुनकं नो कोऽपि ददर्श ।।१४८९।।

तद्भक्तैर्निखिलैर्मिमेल सुमना गौर,स्तु भक्तस्त्रियो
दूरादेव नतिं प्रभोर्विदधिरे, स्त्रीणां दिशं कर्हिचित्।
नापश्यत्तु निमायिगौरयतिकः, स्पर्शं न तासां प्रभु-
श्चक्रे, स्त्रीविषयं वचस्तु न तथा शुश्राव रागापरः।।१४९०।।

आरब्ध एव प्रभुकः प्रसङ्गे
स्त्रीणामभूत्संकुचितोऽधिकन्तु।
शीघ्रं च शीघ्रं लषति प्रसङ्गं
द्रष्टुं समाप्तं स्म निमायिचेताः ।।१४९१।।

एकोऽभूत्परमेश्वराख्यसुजनो भक्तो गृहस्यान्तिके
द्वीपे चाऽथ नवे, स्वगेहजनतानिर्वाहमेषोऽकरोत्।
विक्रीय प्रियमोदकानि, स दधौ बाल्यक्षणादेव तु
स्नेहं चातिशयं प्रभुं प्रति (रसस्नेहो विशिष्टे शिशौ)।।१४९२।।

आसीच्छ्रीलमहाप्रभुस्त्वतिलघुर्गौरो यदा, तर्हि तु
स्वक्रोडे परमेश्वरस्तममलं संस्थाप्य गौरात्मना।

तेनाऽऽह्वाययति स्म वै "हरि-हरि-" ध्वानं, तथा मोदकं
भोक्तुं नित्यमदाद्, बहु प्रभुरपि स्नेहं चकाराऽमुना।।१४९३।।

जातः सम्प्रति सोऽथ वृद्धतनुको, वारेऽत्र सोऽप्यागतः
स्वस्त्रीपुत्रवधूभिरत्र सहितो गौरप्रभोर्दर्शने।
स्माऽन्तर्यान्ति नहि स्त्रियः प्रभुपुर,चक्रुः प्रभोर्दर्शनं
दूरादेव (यतेर्निमायिसुहृदोऽप्यस्ति स्त्रियः संयमः) ।।१४९४।।

आसीत्किं परमेश्वरस्य सुहृदो भक्तस्य चैतद्वचो-
बोधः, सोऽथ सकम्पपाणियुगलाद् भूमौ विलुठ्याऽकरोत्।
गौरस्य प्रणतिं प्रभोः, कथयति प्रेम्णा समं च 'प्रभो !
विस्मर्ता परमेश्वरं स्वममनस्त्वेव क्षितौ स्यात्त्विह ?।।१४९५।।

सम्प्रति मां प्रायः परिचेतुम् ।
शक्ष्यति नो हे गौर ! निमायिन् !'।।१४९६।।

तस्यालिङ्गनमाह चाऽथ विदधद् गौरोऽधिकेनैव तु
स्नेहेना': ! परमेश्वर ! प्रभुरहो ! त्वामस्म्यहं कर्हिचित्।
विस्मर्तुं भुवि काममत्र ?, ननु ते त्वद्यावधिं मोदकं
स्थाने मे गल एव संस्थित,महो! नाऽधोऽपि यातं तु तत्- ।।१४९७।।

पुत्रवत्त्वं तु माम् । लाडयामासिथ'।।१४९८।।

त्वत्यन्तं परमेश्वरः कथयते सोल्लास'माप्ता भव-
त्पुत्रः पुत्रवधूः प्रभो! च गृहतः सर्वे भवद्दर्शने।
सोत्कण्ठा ननु सन्ति ते च निखिलास्त्वद्दर्शनार्थं' तथो-
क्त्वेदं कारितवान्महाप्रभुपदस्पर्शन्तु भक्तोऽखिलैः।।१४९९।।

भक्तानां ननु वत्सलः प्रभुरहो ! संकोचहेतोः क्षमोऽ-
भूद्वक्तुं सुमनास्तु किञ्चिदपि नो, तस्थौ कृताधःशिराः।
मौनं लज्जितभावतः स, सुहृदो भक्तास्ततो ह्यूचिरे
निर्यातं परमेश्वरं (सहृदयः पात्रक्षणस्थानवित्) ।।१५००।।

'भक्तो गच्छति नो कुटुम्बसहितः पार्श्वे प्रभो'र्बोधतां
किं भक्तः सरलः प्रपञ्चरहितो वार्तामिमां, तन्मतौ।
नो किञ्चित्त्वपि चागतं, सहृदयैर्भक्तैः स तद्बोधितः
सम्यक् (साधुसमाजकव्यवहृतिर्बद्धाऽस्ति मर्यादया) ।।१५०१।।

स्थित्वैवं प्रभुसन्निधौ च निखिला भक्तास्तथा पूर्ववत्
तत्सत्सङ्गसुखानुभूतिलभनं चक्रु,श्च भक्तस्त्रियः।
नित्यं तु क्रमतो निमन्त्रणमदोगौरप्रभोश्चक्रिरे,
भिक्षां तस्य च कारयन्ति निजकं त्वाहूय वासस्थलम् ।।१५०२।।

श्रीरूपः स्वसहोदरेण सहितोऽनूपेन चात्र प्रभो-
र्वीक्षालालसया पुरीमभवदायान् गौडदेशाध्वना।
मार्गेऽनूपवपुर्ज्वरे तु पतितं, (दैवीगति-) र्नश्वरं
चाऽदोऽङ्गं परलोकमाप स परित्यज्य ज्वरे तु ज्वरे।।१५०३।।

श्रीरूपः स्वकनिष्ठसोदरवपुर्गङ्गाप्रवाहेऽमले
चक्रे पावनके प्रवाहितमथाऽत्यन्तेन दुःखेन तु।
लोकस्याऽलमनित्यतां स मतिमान् संचिन्तयन्नस्य स
श्रीपुर्यामिह चागतो - (ऽखिलसमाधानं निमायिस्थले)।।१५०४।।

श्रीवृन्दावन एव सोऽमलकविः श्रीकृष्णलीलात्मकं
त्वेकं नाटकमच्छलं रचयितुं चासीत्तथारब्धवान्।
मार्गे सम्प्रति नाटकस्य विषयं यं चिन्तयन्नस्ति स,
स्थाने तिष्ठति यत्र रात्रिसमये, तत्रैव तं चिन्तितम्-।।१५०५।।

श्रीरूपो विषयं लिलेख, हृदये तस्य स्पृहाऽऽसीत्कवेः,
कर्ता नाटकमेकमेव तदहं भागे विभक्तं द्वये।
श्रीकृष्णस्य निरूप्य सुन्दरतया पूर्वत्र वृन्दावन-
श्रीलीलां, परतोऽहमत्र विदधे द्वारावतीरूपणम् ।।१५०६।।

एतेनैव लिलेख संहतमयीं सर्वां विचारेण स
श्रीकृष्णस्य निमायिनो भगवतो लीलां तु, मार्गे चलन्।
स प्राप्तश्च चलन् यदोत्कलभुवि श्रीसत्यभामापुरं
ग्रामं, तर्हि दिदेश तत्र कविमाः ! श्रीसत्यभामा त्विमम्-।।१५०७।।

स्वप्ने तु प्रकटं सती 'कुरु कवे ! रूप ! त्वमस्मत्पुरी-
लीलानां पृथगेव वर्णन,महो ! सार्धं विधेहीति नो।
अस्माकं व्रजलीलया' सहृदयः श्रीसत्यभामाप्रियाऽऽ-
देशं चाप्य चकार निश्चयमसौ तत्कालमेवात्मनि-।।१५०८।।

लीलानां ननु वर्णनस्य च पृथक् श्रीद्वारिकाया,स्तथा
चक्रे वर्णनमेष तस्य ललितश्रीमाधवाख्ये कृती।
श्रीरूपो ननु नाटके,ऽथ "ललितश्रीमाधवं" तत्क्षणेऽ-
मू नाम्नी तु "विदग्धमाधव"मिति स्थाने तथाह्युद्गते ।।१५०९।।

नो यातः प्रभुसन्निधावयमहो ! संप्राप्य नीलाचलं,
द्वावेवाऽध्वनि सोदरौ प्रतिकृतिर्वै नम्रतायास्त्विमौ।
जीवन्ती तु बभूवतु,र्निवसनाद्यूनानिनां सङ्गता-
वात्मानं ननु सोदरौ ह्यबुधतामत्यन्तनीचं त्विमौ ।।१५१०।।

एतावन्ननु मन्दिरे त्वकुरुतां संविश्य नापीक्षणं,
दूरादेव निमायिनौ प्रभुजगन्नाथध्वजं नेमतुः।
तत्तस्थौ हरिदाससाधुवसतौ गत्वा पुरीं रूपजी
(साधुप्रेमहृदि प्रसीदति जगन्नाथो निमायी जने)।।१५११।।

आसीच्छ्रीहरिदासजी तु यवनो जात्या, चतुर्वेदिनः
सम्मानं कुरुतेऽधिकं द्विजपतेरप्यस्य गौरप्रियः।
भक्तस्तु, प्रविवेश सोऽपि न जगन्नाथप्रभोर्मन्दिरे
(प्रेयान् यस्य हृदि स्फुटं हि लसति स्थाने,ऽस्य हन्मन्दिरम्) ।।१५१२।।

एतावत्सरति स्म येन तु पथा श्रीमन्दिरस्यार्चको
भृत्यो वा, ननु निस्ससार स पथा तेनापि नो कर्हिचित्।
अम्भोधिस्नपनं विधाय हरिजीस्थानेऽत्र नित्यप्रति
ह्यायाति स्म महाप्रभु- (र्विवशतां यो वेत्य,मायी हि सः)।।१५१३।।

आप्तो नित्यसमानमेष सुमना गौरो द्वितीये दिने
यर्हि श्रीहरिदाससाधुवसतौ, श्रीरूपजी तर्हि तु।
साष्टाङ्गं प्रणतिं चकार पतितो भूमौ पदाब्जे प्रभो-
रासीद् दृष्टिरथोपरि प्रति, हरिर्दासो बभाषे शनैः-।।१५१४।।

'श्रीलरूपः प्रभो!। अस्ति कुर्वन्नतिम्'।।१५१५।।

रूपस्य श्रुत एव नाम्नि चकितो ब्रूते प्रभु'र्ही ! किमु-
क्तं ? रूपः किमिहाऽऽगतोऽस्ति ?' कथयन्नेतच्चकार प्रभुः।
तस्यालिङ्गनकं, दिदेश सुमनाः स्थातुञ्च तत्रैव तं
(स्थानं वासकृते तदेव सुहृदोऽच्छं, यत्स्वतो रोचते)।।१५१६।।

सर्वैः कारितवान् प्रभुः परिचयं रूपस्य चैतत्परं
(सङ्केतात्पदमर्थमिष्यति) पुरीगौडीयभक्तैः समम्।
रामानन्दकरायभौमसुधियौ द्वावेव चास्तां कवी,
रूपस्याऽऽप्य बभूवतुः परिचयं प्रीतौ परं तावुभौ।।१५१७।।

एतत्कवितां च श्रोतुं प्रभुगौरम्।
तु प्रार्थयतोऽमू काव्यात्मरसज्ञौ ।।१५१८।।

एकस्मिन् दिवसे प्रभुः सहृदयः सङ्गे विधायाऽऽत्मनो
रामानन्दकसार्वभौमसुधियौ दामोदरं चेतरान्।
भक्ताञ्छ्रोतुमथाऽऽगतः प्रियहरिस्थानं च ते नाटके
श्रीरूपस्य, तथाऽऽसिते च निखिले रूपं जगाद प्रभुः-।।१५१९।।

'एताञ्छ्रावय रूप ! त्वं स्वं नाटककाव्यम्।
मर्मज्ञाश्च रसज्ञाः सर्वेऽमी कवयश्च'।।१५२०।।

श्रुत्वैवेयदथ त्रपाभरवशात्पश्यन्नभूत्क्ष्मां प्रति
श्रीरूपो, नहि निस्ससार मुखतस्तस्यैकशब्दोऽपि, तत्।
स्नेहेनातिशयेन सार्धमवदद् गौरप्रभु'र्वाह ! जी !
जातं शोभनमेत,दत्र कवितां श्रोतुं तवाऽऽप्ता वयम्- ।।१५२१।।

किन्तु त्वं त्रपसे, त्रपाविषयिणी वार्ताऽस्ति केवा,ऽवना-
वेवेदं कवितापफलन्तु, रसिकाऽग्रे श्रावणीया हि सा।
आमाञ्छ्रावय, साम्प्रतं तु कुरु मा संकोच,माः ! पश्य, हेऽ-
सौ रायो रसमर्मविन्ननु महान् (काव्ये रसो मार्मिकः) ।।१५२२।।

तु प्रगृह्याऽऽगताः। भद्रमेतं वयम्'।।१५२३।।

'आम्, जी! श्रावय' साम्प्रतं कथयते रायो 'न कर्मैवमाः !
स्थाने तु त्रपणेन सेत्स्यति, पुरा तु ब्रूहि रूपाऽऽत्मनः।
श्रीमन्नाटकनाम, तर्हि विषयं, तत्तस्य गात्वा क्वचि-
त्क्वाचित्कस्थलकं निशामय' (रसः स्थालीपुलाकात्मना) ।।१५२४।।

एतस्मिन्नपि मौनमेव तु कवी रूपोऽवस,त्तत्स्वयं
गौरेणोक्त'मसौ विदग्धललितश्रीमाधवे नाटके।
द्वेऽलेखी,त्तु विदग्धमाधवपदे लीला व्रजस्याङ्कितै-
तेन द्वारवतीगता च ललितश्रीमाधवे गोपतेः ।।१५२५।।

अस्मादेव तथा शृणोतु, भवतां पद्यं मया श्रावितं-
यत्पद्यं कृतवान् रथस्य पुरतो नृत्यं तथा कुर्वतः।
बुद्ध्वा भावमयं तु मे, सुमनसः! शृण्वन्तु किञ्चित्त्वतः
किञ्चिन्नाटकतः' (सिनोति कविताभावः कविद्वारतः) ।।१५२६।।

रायः प्रेमपुरस्सरं कथयतेऽल्पं भर्त्सनायाः स्वरे
'किं जी! साम्प्रतमाः! शृणोषि न कथं?, पश्य, प्रभुश्चापि भोः !।
ब्रूते, शासनमाः ! प्रभोर्न मनुषे ?, ह्याम्, पूर्वतः श्रावय
श्लोकं त्वन्तु विदग्धमाधवगतं चेतःप्रियं मङ्गलम् ।।१५२७।।

नान्दीमुखेन प्रथमं यदुक्तं
पद्यं प्रसङ्गे भगवत्प्रणामे।
तदेव नः श्रावय साधु रूप !'
(प्रसन्नताश्रीः श्रवणेन साधोः) ।।१५२८।।

निशम्य चेयदेव तच्छनैः शनैः पपाठ सः।
विदग्धमाधवात्कृतं स्वकेन पद्यमङ्गलम् ।।१५२९।।

६६. तृष्णां हरतु प्रियतमलीलाऽनुपमरसश्रीखण्डम्।
श्रीखण्डं दधिमधुमिष्टैलाकेसरकर्पूरादेः
मिश्रणमिह जनयत्यास्वादं पानकमिव रसनायाः।
चञ्चलचेतोरसनातृष्णातृप्तिकृते श्रीखण्डम्
श्रीराधानुग्रहमिलितप्रियहरिलीलारतिरसनम्।।

कुर्वन्नस्ति तु 'वाह! वाह !' निखिलः श्रुत्वैव चैकस्वरा-
त्पद्यं, रूपमुखं त्रपाभरवशाद्रक्तं हि जातं महत्।
पश्यन्नस्ति स च त्वधः, कथयते रायोऽत्र 'भो ! रूपजी !
संकोचं ह्यधिकं भवांस्तु कुरुते (संकोचनं मार्दवात्)।।१५३०।।

तद्, गृह्णातु, करोमि नो तव कवे ! काव्यस्य संकोचिनः
शंसामेव, तु वन्दना भगवतो जातेयमच्छं, पुनः।
योऽस्ति श्रीभगवत्स्वरूपकगुरुर्यश्चैकमात्रं सता-
मिष्टः सेव्यतमस्तथाहि, भगवच्छ्रीवन्दनानन्तरम्-।।१५३१।।

तद्वन्दनकृतौ यत्किञ्चन भवान्।
ऊचे, तदपि वै भोः ! श्रावय कवे !' ।।१५३२।।

रूपः संकुचितोऽधिकोऽपि च ततः श्रुत्वेद,मग्रे प्रभोः
श्लोकस्याधिकमाकुलोऽस्ति पठने तस्यैव सम्बन्धिनः।
श्रीरूप,स्तु तथापि रायकमहाभागाग्रहात्संकुचन्
सोऽपाठीच्च शनैः शनैः-(सहृदयव्रीडा स्वभावात्सतः) ।।१५३३।।

६७. हृदये शुष्केऽनन्तरसः श्रीशचीनन्दनः स्फुरतु।
सुवर्णकुसमां पृथ्वीं चिनुते शूरः सूरिः श्रमिकः
बलतो मतितः श्रमतः, परमिह भावफलं किं सुहृदाम् ?।
कलिविकराले काले करुणाकारः श्रीहरिगौरः
सर्वेषां कृत्वा प्रकटितवान् हरिकीर्तनरसमपरम्।।

गौरोक्तिः श्रुत एव चात्र 'भगवाञ्जानीत, राजव्रजो
नैतान् दण्डयते कवीन् कथमहो ! कुर्वन् प्रशंसामसौ।
कस्याप्यध्वनि जायते, तु कुरुते ह्याकाशपातालमा-
श्चैकं, को भविता परोऽधिकमतोऽत्राऽसत्यभाषी क्षितौ ?।।१५३४।।

श्लोके त्विह मर्यादोल्लङ्घनमेव।
चक्रेऽतिशयोक्ते' - (रन्या कविसृष्टिः)।।१५३५।।

रायस्त्वाह 'महाप्रभो ! परमिदं बोद्धुं तथा शक्नुमो
लोकेऽस्मिन् वयमेव चानुभविनः, श्लोके यथार्थं पुनः।
अस्मिन्नेव सुवर्णनं तु विहितं, शक्नोति सर्वः कवि-
र्नैवं कृत्रिमताविमुक्तगुणवच्छ्लोकस्य निष्पादने' ।। १५३६ ।।

उक्त्वेयच्च विदग्धमाधवगतं शुश्राव रायः स्थलं
बह्वन्यत्त्वपि, भूरि भूरि कृतवांस्तत्काव्यशंसां हृदा।
श्रुत्वा चा,ऽथ विदग्धमाधवकृतौ रायः श्रुतायां जगौ-
(प्रेमी प्रेमपरप्रसङ्गविषयात्किं कर्हिचित्तृप्यति ?)।। १५३७ ।।

'च स्वस्यापरनाटकस्य ललितश्रीमाधवस्यात्मना-
मेषां स्वादयतु प्रियं मधुरताऽऽदर्शं समेषामपि।
भक्तानां समुपस्थितप्रभुहृदा,मामू, पूर्वतो मङ्गलं
तस्यापि प्रगृणातु पद्य'-(मभितः श्रव्यं सतां मङ्गलम्)।।१५३८।।

श्रुत्वेदं पठति स्म श्रीरूपः पुनरेषः।
तेनैव ध्वनिना च श्लोकं नाटककर्ता।। १५३९ ।।

६८. निदिशति राकापतिशशिकिरणो मुकुन्दकीर्तिप्रकृतिम्।
हरिरविविरहे तमसः प्रसरे तत्कृतिकीर्तिच्छाया
उदयति शिशिरामृतकरबिम्बः क्षणदः क्षणदासुभगः।
सुहृच्चकोरो नन्दति यस्मिन् कोककमलखलखेदः
कस्य मलं कमलं जलगरलं, जीवनमस्तु स्वच्छम्
रवितनयाजनजीवनशोधकयशःशशिनि ह्रदमताम्।।

धन्यं धन्यमहो ! निमायिनि तथाऽस्ते साधु-साधु-ध्वना-
वूचे रायमहाशयो 'भगवतः पश्चाच्छ्रियस्तु स्तुतेः।
इष्टश्रीगुरुदेवसंस्तुतिगतः श्लोकोऽस्तु य,स्तं त्वपि
ह्यस्माञ्छ्रावय (साधु साधु भगवद्बोधो गुरोरध्वना)।।१५४०।।

तस्य श्रुतेः सर्वसमस्थिताना-
मिह प्रमोदस्त्वधिकः प्रियाणाम्।
भविष्यति, ह्यान्तु निशामय त्वं'
(शृणोति साधु, श्रुतिरत्र धन्या)।। १५४१ ।।

रूपः कविरथाऽपश्यन् प्रभुमुखम्।
मन्दं पठति वै मन्दं सहृदयः- ।। १५४२ ।।

६९. रसनिधिरमृतांशुः श्रीगौरः।
उत्पत्तिं लभते लयमयते प्राणी सततं भूमौ
कश्चिन्मनुजो महानुभावोऽसामान्यस्थितिमिष्यति।
शचीनन्दनो निमायिगौरोऽमलसरलस्वाचरणैः
शशिकिरणैरिव लोकौषधिरसमपूपुरत्कीर्तनतः।।

ईषत्कृत्रिमकोपभावविरवे श्लोकेऽत्र चैव श्रुते
चैतन्यप्रभुराह 'रूपकविरन्यत्काव्यमेषोऽकरोत्।
सम्पूर्णं बहु सुन्दरन्तु, सुहृदोऽस्याऽमूल्यरत्नोपमाः
श्लोकाः सन्ति हि सर्व एव (कविता भावं व्यनक्त्यात्मनः)।। १५४३।।

परन्तु जाने न किमेष बुद्ध्वा
युयोज पद्येऽतिशयोक्तिपूर्णे।
द्वेऽथैकमेते मणिषु स्फुटं वै
काचांशतुल्ये' (कविराः! स्वतन्त्रः)।। १५४४ ।।

अस्मिन् भक्तजनो'ऽयमेव' गदति, 'श्लोकस्तु' चैकस्वरे
'सर्वश्रेष्ठतया प्रतीतिमगमत्त्वस्माक'मत्रैव तु।
ऊचे रायमहाशयः सहृदयः कर्तुं समाप्तं वचो'ऽ-
च्छं, भद्रा! जहतु प्रसङ्गमिममा! -(जग्धेऽखिले चर्वणम्)।।१५४५।।

कुर्वन्तु काव्यस्य तथाऽधुनाऽग्रे
माधुर्यपानं, कविरूप ! बाढम्।
अस्यापि भोः ! श्रावय नाटकस्य
स्थलं पठित्वा ननु भावपूर्णम्' ।। १५४६।।

श्रुत्वैवेयदथ स्वरेण महताऽन्यान्यस्थलं श्रावयन्
श्रीरूपोऽस्ति च नाटकस्य, सुहृदो भक्ता रसस्याखिलाः।
मर्मज्ञा ननु भूरि भूरि विनुतिं भावप्रियाश्चक्रिरे
तत्काव्यस्य तु भक्तिभावसरितो (भावाग्रहा भावुकाः)।।१५४७।।

आलिङ्ग्य प्रभुरन्ते प्रेम्णा च प्रियरूपम्।
धृत्वा भक्तजनं स्वं स्थानं सम्प्रति यातः।। १५४८ ।।

सर्वाणीह रथोत्सवस्य च चतुर्मासस्य भक्तैः सहै-
वं पर्वाणि च पूर्ववन्ननु महान् स्थाने समारोहतः।
सम्मान्याऽऽश्विनमासके दशहरापश्चात्स्वभक्तान् प्रभु-
र्गौराङ्गो विससर्ज गौडधरणीं (स्थायिस्थितिः स्वस्थले)।।१५४९ ।।

चक्रेऽसौ (प्रतिवर्षमत्र) सुमना नित्यप्रभोराग्रहं
(पुर्यां नाऽऽगमनस्य) सम्प्रति पुनर्नेदं प्रभुप्रेमतः।
स्वीचक्रे स परं, च गौडधरणीं भक्ता निवृत्तास्तथा
सर्वे, तु प्रभुसन्निधौ कतिपयं तस्थौ च रूपो दिनम्।।१५५०।।

गत्वाऽन्ते तु तथाऽल्पकालपरमा ! वासाय चाज्ञां ददौ
श्रीवृन्दावनमेव तस्य सुमना गौरो, निमायिप्रभोः-।

आदेशं सुहृदो विधाय स शिरोधार्यं च गौडाध्वना
सज्जोऽभूद् व्रजयान-(माप्तगुरुकादेशाक्षरं वेदवाक्)।।१५५१ ।।

अस्याऽऽसीत्प्रभुणैष एव सुहृदा तेनाऽन्तिमः सङ्गमो,
गत्वेतः कविरेष चान्तसमयं यावत्तु संकीर्तनम्।
श्रीकृष्णस्य निमायिनो हि विदधद् वृन्दावनस्यैव कौ
पूतायां न्यवसन्-(निमायिविषयप्राप्तिर्निमाय्यात्मनः)।।१५५२ ।।

त्यक्त्वाऽसौ परमां व्रजस्य धरणीं पूतां हि चैकक्षपा-
हेतोर्नापि बहिर्व्रजात्तु गतवान्, यानक्षणे श्रीप्रभुः।
प्रेम्णाऽऽलिङ्गनमस्य चाऽथ कृतवा,नाज्ञां तु भक्त्यर्थक-
ग्रन्थानां रचनस्य चादित (बुधो भावप्रसारं क्रियात्)।। १५५३।।

आज्ञामेष निमायिनो निजशिरोधार्यां विधाय प्रभोः
सम्पूर्णं गुणगान एव भगवत्कृष्णस्य कालं निजम्।
स्थाने यापितवां,श्च गौडविषये सम्पत्तिरासीद् धनं
किञ्चित्त्वस्य, कुटुम्बलोकनिवहे तद्वण्टनायोचितम्-।।१५५४।।

गौडेऽप्यमुष्य गमनं त्वनिवार्यमासीत्,
तत्प्रस्थितोऽयमगमत्प्रभुतस्तु गौडम्।
तस्थावयं च धनवण्टनकाय तत्र
प्रायो निमायिहृदयो ननु वर्षमेकम्।। १५५५ ।।

●●

नीलाचले श्रीसनातनः

६०. सुकृती लभते महदनुरागम्।
सम्बन्धिनि ममतास्नेहादिर्लोके लोकप्रकृतिः
सामान्येऽसामान्येऽप्ययुतेऽलोकस्नेहो महताम्।
भ्रात्रो रूपसनातनयोः प्रभुनिष्ठा तत्संस्कारः
लब्धः परमो गौरस्नेहः किन्तु सनातनकृतिना।।

श्रीरूपस्तु धनप्रबन्धनकृतेऽस्थाद् गौडदेशे, ऽधुना
भ्रातुः श्रीलसनातनस्य च समाचारोऽस्य तु ज्ञायताम्।
कृत्वा हस्तगतं तथाहि मथुरामाहात्म्यमेषोऽकरोत्
तद्द्वारा व्रजमण्डले भ्रमणकं तीर्थेऽखिले श्रीसना ।।१५५६।।

पश्चात्तु भ्रमणस्य सङ्गमकृते भ्रात्रा निजेनाऽभवत्
तस्येच्छा प्रभुदर्शनस्य, च निजभ्रात्रोः समाचारकम्।
ज्ञातुं स व्रजतश्चचाल सुमना नीलाचलं, साम्प्रतं
गन्तव्यं तु न तस्य गौडविषये- (ऽगम्या कदाचित्स्वभूः)।।१५५७।।

दत्वाऽप्तो वचनं यतोऽस्य वचसोऽद्धा जेलरं प्रत्यसा,-
वस्मादेष भवन् प्रयागविषयात्काशीं पुरीमेव तु।
मार्गेण प्रति दुर्गमेण चलितो झाटस्य, राजाध्वना
नो यात्राकरणं ह्यबोधि निखिलैर्गम्येन तेनोचितम्।। १५५८ ।।

अस्मादेष पथो वनस्य पथिको घोरस्य वै कण्टका-
कीर्णस्य त्वभव,त्तथाऽस्य निखिले कायेऽभवद् भीषणा।
खर्जुर्झारविषाक्तवायुलगनान्मार्गे वनस्या,पि सा
पक्वाऽभू,च्च ततस्तु पूयमसरत् (पाको व्रणस्य ध्रुवम्)।। १५५९।।

आप्तस्त्वेष यथा तथा प्रभुपुरीं, तिष्ठेत्क्व पुर्यामसा- ?,
वायातो न पुरा कदापि, सुहृदोऽस्यासीदियत्तु श्रुतम्-।
एव क्वापि तु मन्दिरस्य निकटे गौरप्रभुस्तिष्ठति
(स्थाने यत्नविशेषतः सुमनसो ह्यत्येति कालो यतेः)।।१५६०।।

आत्मानं यवनस्य न स्म मनुते संसर्गिताकारणा-
देवैष त्वधिकारिणं प्रगमने श्रीमन्दिरस्यान्तिके।
अस्मादेष महात्मदासहरिकस्थानं च पृच्छंस्तथा
पृच्छंस्तत्र जगाम (साधुमिलनं सङ्गच्छते साधुषु)।। १५६१ ।।

दृष्ट्वैवेममहो ! हरिर्विकसितो दासस्तथाऽभ्यर्चनं
चक्रेऽमुष्य यथोचितं, बहु भवन्नासीत्प्रभोर्दर्शने।
उत्कः श्रीलसनातन,स्तु विवशः श्रीमन्दिरस्यान्तिके
नो यानस्य कृते (सतो विवशता मर्यादया ह्यात्मनः)।।१५६२।।

अस्योचे हरिदासजी सुमनसो धैर्यं तदा बन्धयन्
'माऽभूत्साम्प्रतमाकुलो ननु भवान्, गौरप्रभुर्नित्यशः।
आयातीह, तथाऽधुना स भविताऽऽयानेव' तत्कालमा-
स्तं द्वावेव निमायिनं ददृशतुः- (साधोः सदर्थः क्षणात्)।। १५६३।।

आयान्तं हरिनामकीर्तनमहो ! कुर्वन्तमत्र प्रभुं
दूरात्सम्प्रति दृष्ट एव सुहृदि, स्थाने परत्र स्थितः।
भूमौ श्रीलसनातनश्च लुठितः कुर्वन् प्रणामं ह्यभू-
त्साष्टाङ्गं, हरिदासजी कथयते - (सङ्केतको मध्यमः)।।१५६४।।

'कुर्वन्नस्ति सनातनः सहृदयः साष्टाङ्गमत्र प्रभो !'
'स्थानेऽत्र क्व सनातन'श्च कथयन्नेतन्निमायी द्रुतम्।
धावन्नस्ति सनातनस्य सुमनाः कर्तुं तथालिङ्गनं,
दृष्ट्वा किन्तु सनातनो निजदिशं ह्यायान्तमेष प्रभुम्-।। १५६५।।

उत्थाय द्रुतमद्रवत्परदिशि स्थाने ब्रुवाणस्तथा
वाण्या कातरया 'प्रभो ! प्रथमतो नीचस्तथैवाधमः।
संसर्गी यवनस्य चास्मि, सुमनस्तत्रापि सम्पूर्णके
मत्काये ह्युदिताऽस्ति खर्जुरधुना, स्पर्शं न कुर्यान्मम'।। १५६६।।

आसीत्किन्तु कदा प्रभुः श्रवणकृ,च्छीघ्रं प्रधाव्यैष तं
जग्राहाऽथ सनातनं तु बलतः, कुर्वंस्तथालिङ्गनम्।
गाढं तस्य जगाद 'साम्प्रतमहो ! जातः कृतार्थस्त्वहं-
(संसारेऽत्र कृतार्थता नृवपुषां सद्व्यक्तिसंयोगतः)।।१५६७ ।।

सौगन्ध्यं सुषमं सनातनतनोर्घ्रात्वा च लोको ममाऽ-
न्यो लोकस्त्वधुना ह्युभौ शुशुधतु'श्चक्रेऽनुभूतिं प्रभुः।
एकस्याऽवितथं सनातनतनोः खर्जोस्तु दिव्यात्मनः
सौगन्ध्यस्य (सुगन्धभावमनसः सौगन्ध्यमेवाऽभितः)।।१५६८ ।।

किङ्कर्तव्यविमूढतां ननु गतः संकोचहेतोः प्रभु-
प्रेम्णि श्रीलसनातनः, सुमनसोऽपारानुकम्पाभरात्।
आक्रान्तोऽथ महाप्रभोः स विवशो भूत्वाऽवनीसम्मुखं
पश्यन्नस्ति (परत्वभावरहिताऽन्यप्रेमताऽऽत्मीयता)।।१५६९ ।।

आसीदहैतुककृपानुभवात्तदीयं
चित्तं द्रव,त्परिणमच्च तदम्बु दृग्भ्याम्।
निस्सृत्य चार्द्रमकरोत्प्रभुगौरसाधोः
काषायवस्त्र-(मिह कोऽपि रसः प्रभावः)।। १५७० ।।

तत्रैव प्रभुरासितः सहृदयश्चाल्पक्षणानन्तरं
ह्येकस्मिंस्तु तथासने, हरिरपि क्षित्यां, कृताधःशिराः।
संविष्टौ च सनातनो, ह्यथ शनैरूचे निमायी शनै-
रूपस्याऽऽगमनस्य तेन मिलनादेः पूर्णवृत्तं प्रभुः।। १५७१ ।।

अस्मिन्नेव महाप्रभुः कथयतेऽनूपस्य चापि क्रमे
वृत्तान्तं परलोकयानममना, वृत्तं निशम्यात्मनः।
भ्रातुः स्वर्गमनस्य, निस्पृहहृदः साधोरपि क्षोभते
स्थाने श्रीलसनातनस्य हृदयं-(साधुस्त्वतिस्नेहवान्)।।१५७२।।

स्वाश्रूणां प्रभुराः ! प्रवाहमभवद्रोद्धुं स न, श्रीप्रभो-
रास्येऽब्जेऽपि विषण्णतामयदशा ह्यल्पं प्रतीताऽभवत्।
ऊचे गद्गदकस्वरेण सुमना गौरः शनैर्वै शनै-
'स्त्वद्भ्राताऽधिगता सनातन! भवेऽस्मिन् साधुवत्सद्गतिः।। १५७३।।

लोके भागवतात्मनां स परमानन्दानुभूतिं परं
कुर्वाणो भविता,ऽत्र कावतिशयः सौभाग्यशाली ततः।
कः शक्तो भवितुं तु, यो ननु तनुत्यागस्य पूर्वं गृह-
द्वारं स्वं विजहौ (हि गेहममता लोकेषु देहाधिका)।। १५७४।।

तीर्थस्य व्रजमण्डलस्य कृतवान् सर्वस्य यात्रां यथा-
युक्तं, चान्तिमकक्षणे गुरुसमज्येष्ठस्वबन्धोस्तथा।
श्रीरूपस्य निमायिभागवत-नुः क्रोडे तु धृत्वा शिरो
देहं नश्वरमत्यजद् भगवतीगङ्गातटे पावने ।। १५७५ ।।

वैकुण्ठलोकवसतिञ्च तथाऽऽप, शोकः
कार्यस्त्वया न भुवि भाग्यवतोऽथ तस्य।
इन्द्रादिदेवनिवहोऽपि कृते तु मृत्यो-
रेवंविधस्य ननु तृष्यति' (मृत्युरन्तः)।। १५७६ ।।

ऊचे श्रीलसनातनो भृतगलो वाष्पं मृजन् 'हे प्रभो !
नाहं देहकृतेऽत्र रोदिमि महाभागस्य तस्याऽधुना।
नित्यः सोऽस्ति तु, शाश्वते ननु गतो धाम्नि स्वसेव्यर्षिसत्-
सीतारामपदाश्रितोऽथ विहितः स्थानेऽभविष्यत्क्षणात्-।।१५७७।।

शोचामि किन्तु वचसोऽस्य - तथान्तकाले
तद्दर्शनं प्रभुरभूवमहं न कर्तुम्।
चैतन्य ! तन्निधनकालिकदर्शनाद्धेऽ-
भाग्योऽभवं जगति वञ्चित एव गौर !'।। १५७८ ।।

गौराङ्गः करुणोक्तावूचे'ऽभाषत रूपः-
तन्निष्ठाऽद्भुतमासीत्काले सोऽन्तिमके तु।
सीतारामपदाब्जं ध्यायन् देहममुञ्चत्
त्वानन्देन समेतः कश्चिन्मुञ्चति देहम्'।। १५७९ ।।

पश्चात्तापरवे सनातनसुहृत्प्रोचे 'वदेयं प्रभो!
तन्निष्ठां पुरतस्तु किन्नु भवतो, भ्राता कनिष्ठः स नौ।
आसीत्कौ कथने तु, किन्त्वतिशयो ह्यासीद् द्वयोरावयो-
र्निष्ठाया- (मिह केवलं भगवती निष्ठा भुवस्तारणी)।।१५८०।।

निष्ठा तत्सदृशी न कुत्रचिदपि व्यक्तौ मयाऽद्यावधिं
दृष्टा, साम्प्रतमावयोस्तु भुवने निष्ठैव किं, तत्पुरः-।
नौ निष्ठा तु नतुल्यमेव, स सदा सङ्गेऽभवन्नौ द्वयोः,
श्रीमद्भागवतीं कथां स्म शृणुमः संमिल्य चैव त्रयः।। १५८१।।

आसीत्तस्येष्टः श्रीः। सीतारामो देवः।। १५८२ ।।

आवामेकदिने परीक्षणकृतेऽवोचाव "हेऽनूप!" तं
"मेधाविंस्त्वमसि स्वयं सहृदयः, श्रीरामचन्द्रस्य तु।
लीलानां तुलयाऽधिका मधुरता श्रीकृष्णचन्द्रस्य वै
लीलास्वस्ति (समस्तहृन्मधुरता वृन्दापतेर्लीलया) ।। १५८३ ।।

तत् त्वं श्रीप्रभुकृष्णमेव कुरुषे स्वोपास्यदेवं न किं ?,
स्येतेन त्रय एव चात्र सहजा भूत्वा तथोपासकाः।
श्रीकृष्णस्य विहारिणस्तु सहिता भक्तिं कथाकीर्तनं
कुर्वन्तो भविता स्म"-(आः! सहिताऽल्पा सोदराणां कलौ) ।।१५८४।।

सोऽनूपः कुरुते स्म चादरमथाऽत्यन्तं द्वयोरावयो,-
र्वक्रोक्त्या च कदापि न व्यपदिशद् वार्तां तु ना,वीदृशम्।
स्वीचक्रे कथनं स नौ, कथितवाँ"ल्लोके भवन्तावुभौ
स्तो माता च पिताऽत्र शिक्षकगुरुश्च भ्रातरावेव मे-।।१५८५।।

यादृङ् मे कथयिष्यतो ननु तथा कर्तैव, कृष्णप्रभो-
र्मन्त्रस्यैव विहारिणः परदिने दीक्षां, ददातां मम"।
उक्त्वेयच्छयनाय सोऽथ गतवान्, स्पष्टं ततो लक्षितं
चावाभ्यां-स समस्तरात्रिमभव"द्धा हेति" कुर्वन् हृदा-।।१५८६।।

रात्रौ नैकमपि क्षणं स शयितः, प्रातस्तथागत्य ना-
वूचे "किं करवाण्यहं, सुमनसौ ! श्रीरामचन्द्रप्रभोः।
पादाब्जेऽर्पितमस्ति मस्तकमिदन्तु भ्रातरौ ! हे ! मयाऽ-
नूपेना-(र्पितवस्तुनो भवति किं प्रत्यर्पणं तूचितम् ?)।।१५८७।।

रात्रौ यद्यपि चेष्टितं बहु मया, प्रत्याददान्यर्पितं
भूयस्तन्ननु मस्तकं, मम परं तत्साहसं नाऽभवत्।
हातुं देहमिमं क्षमोऽस्मि मुदितापूर्वं, न कौ शक्यते
हातुं किन्तु मया विदेहतनयाश्रीराघवोपासना" ।। १५८८ ।।

आश्चर्यं परमं बभूव सुमना ! निष्ठां तथैकान्तिकीं
दृष्ट्वा तस्य तथावयोर्निजगतां निष्ठामकार्ष्वाऽथ धिक्।
मद्भ्राता भुवि सत्यमेव सहजोऽनूपोऽभवत्तत्प्रभो-
(ऽलङ्कारोऽलमनन्वयस्त्वनुपमो,ऽनूपो जनैरुच्यते)।।१५८९ ।।

त्वस्य दातुं क्षमा । नोपमा केनचित्' ।। १५९० ।।

'नामाऽस्यैव' महाप्रभुः कथितवा'न्निष्ठा यथार्था त्व,हं
ह्येवंतुल्यमुवाद वाक्यमुचितं श्रीराघवोपासकम्।
एतत्त्वेव मुरारिगुप्तमपि, मे दत्तं निमाय्यात्मना
तेनाप्युत्तरमेतदेव (सुमनोनिष्ठाऽमरत्वार्थदा) ।। १५९१ ।।

एवं त्वध्वनि सेव्यसेवकदशा भव्या दृढैकान्तिकी
च, प्राप्तेऽत्र विलोभने विचलिता या स्यान्न कस्मिन्नपि।
संसारे भविता तदैव भगवत्प्रेमोपलब्धिः सती'
(प्रेम्णैव व्यवहारजात,मपरं प्रेम प्रभोरस्ति तु) ।। १५९२ ।।

एवं श्रीलसनातनेन विदधद् वार्तां बभूव प्रभु-
श्चैतन्यो बहुकाल,मन्तसमये तत्रैव दत्वाऽस्य च।
आदेशं हरिपार्श्वमेव वसतेर्यातो भवान् स्वं स्थलं,
गोविन्देन महाप्रसादमुभयोरेव प्रभोः प्राहिणोत् ।। १५९३ ।।

एवं श्रीहरिदाससन्निधौ पुर्यामेव सनातनोऽवसत्।
आयाति स्म महाप्रभुः परं नित्यं द्रष्टुमुभौ निमायिनौ।।१५९४ ।।

प्रायः श्रीलसनातनो ननु तथाऽऽप्तश्चैत्रमासे पुरीं,
दूरादेव स मन्दिरध्वजमहोऽनंसी,न्न गत्वा तथा।
अन्तर्मन्दिरमत्र दर्शनकृते, भोक्तव्य एवाऽयते
श्रेष्ठश्रेष्ठतमैर्महात्मभिरपि क्षेत्रस्य भोगः क्षितौ ।। १५९५ ।।

यातो न सम्प्रति निमायिसनातनस्य
त्रासप्रदो ननु खसो,ऽखिलविग्रहेऽस्य।
कण्डूयतेर्वरवरोऽभवदा ! व्रणो वै,
तेभ्यो निरन्तरमभूच्च सरंस्तु पूयः।। १५९६ ।।

ज्येष्ठः सम्प्रति मासकोऽस्ति, सुमना गौरः पुरीतश्चतुः-
पञ्चक्रोशपरं यमेश्वरपदे यातोऽस्ति टोटास्थले।
भिक्षार्थं सुमनाः सनातनमपि स्थाने स तत्रैव तं
मध्याह्ने परमाजुहाव (समये प्रेमी जहाति प्रियम्?)।। १५९७ ।।

गन्तुं तत्र यमेश्वरं समभवन्मार्गद्वयं - ह्यध्वना
सिंहद्वारदिशाऽध्वना प्रगमनं त्वेकोऽञ्जसा, चापरः।

मार्गस्तत्र – यमेश्वरोऽब्धिपुलिनेनापि प्रयातुं क्षमो
(गन्तव्यस्य कृते लघोरपि लघु द्वे पद्धती कौ सदा)।।१५९८ ।।

ज्येष्ठस्य प्रखरातपेन जलधेस्तीरस्य रेणुर्ज्वल-
न्नासी,त्तत्र चणोऽशृतो ननु यदि क्षिप्यात्तदाहि क्षणात्।
भृष्ट्वाऽसौ विकसे,त्तु मानवकथा का, तत्र रेणौ पुन-
र्मध्याह्ने सरणे क्षणे पशुरपि स्थाने हि दोलायते ।। १५९९ ।।

किन्तु श्रीलसनातनो ननु यदा शुश्राव- मामाह्वयद्
गौर,स्तर्हि स एव नग्नचरणः कुर्वन् स्वभाग्यस्तुतिम्।
तेनैव ज्वलबालुकामयपथेन श्रीप्रभोः सन्निधा-
वाप्तो, दुःखमहो! सुखं व्यवहृतौ देहन्तु शीतोष्मणोः-।।१६०० ।।

व्याप्नोति चैव, पदयोस्तु सनातनस्य
स्फोटा बभूवुरमिता ननु दीर्घदीर्घाः।
दृष्ट्वैव तं प्रभुरुवाद 'पथा तु केनाऽऽ-
यातोऽस्यरे ! त्वमियति प्रखरातपेऽस्मिन्?'।।१६०१।।

सारल्येन समं जगाद 'हेऽस्म्याप्तः' श्रीलसनातनः 'प्रभो!।
मार्गेणैव तटस्य चाम्बुधेः' (पृथ्वी ह्यम्बुधिमध्यनौमयी)।।१६०२ ।।

पश्यंस्तत्पदयोः प्रभुः कथयति स्फोटां'स्तु पश्याऽधुना
हे ! नग्नेन सनातनोष्णसिकतामध्ये पदाऽभ्यागतेः।
स्फोटास्तूत्पतितास्त्वदीयपदयो,राप्तो नहि त्वं कथं
सिंहद्वारपथेन ?' (मुख्यपथतोऽचौराः सरन्ति क्षितौ)।।१६०३।।

दैन्येनाऽऽह सनातनः सह 'जगन्नाथप्रभुश्रीपतेः
सिंहद्वारपथेन सेवकजनस्तद्दर्शनार्थिव्रजः।
आयान् यांश्च निरन्तरं भवति भोः!, स्पर्शः कदाचित्त्रुटे-
स्तैः स्यात्तर्ह्यहमेव गौर! भविता पापस्य भागी प्रभो!।। १६०४।।

त्वेतद्भीतेः सिंहद्वारात्। नायातोऽहं' (सद्भीः पापात्)।। १६०५।।

मर्यादां ननु दीनतां सरलतामस्यैवमालोक्य च
प्रीतोऽत्यन्तमभूत्प्रभुर्मनसि वै गौरो मनस्येव सः।
गाढालिङ्गनमस्य चाऽथ बलतः कुर्वन् बभाषे यति-
'स्त्वं धन्योऽसि सनातन! (स्वगुणतो धन्यायते मानवः)।।१६०६।।

सत्यं वैष्णवतारहस्यमबुधः स्थाने त्वमेव, स्वयं
कौचिद्यद्यपि कौ कृते तव तथा न स्तो निषेधो विधिः।
एवं त्वं व्यवहारमत्र कुरुषे भूयोऽपि लोकस्थितेः
(सर्वश्रेष्ठमिदं) कृते, (स्थितिभरः कौ केवलं मानवे)।।१६०७।।

कुर्यात्किं नहि मानवोऽत्र कियतीमप्युन्नतिं संसृतौ
कामं, तेन तथापि कार्यमथ न स्थित्यास्तथोल्लङ्घनम्।
यल्लोके स्थितिभञ्जनेन भवति द्राग् लोकनिन्दा, तथा
सल्लोकव्रजनिन्दया पतनभीः क्लृप्ता सदा तिष्ठति'।।१६०८।।

स्वर्णाभे ननु सुन्दरे सुमनसो देहे निमायिप्रभोः
पूयः संश्लिषया सनातनतनोर्लग्नस्त्वनेकस्थले।
दुःखं तेन सनातनस्य सुहृदोऽपारं बभूवाऽऽत्मनि-
(स्वेनाऽन्यापचये, विवेकिहृदये दुःखानुभूतिः, कृते)।।१६०९ ।।

'किं कुर्यां, सुमनाः प्रभुस्तु मम नो कृत्वा विनाऽऽलिङ्गनं
गौरो रुध्यत एव, सम्प्रति ततो ह्येतद् वपुर्भीषणम्।
रक्षित्वाऽत्र करिष्यते जगति किं, सञ्जातमेव प्रभोः
पुर्यामत्र तु दर्शनं' स्वमनसि स्थानेऽमुना चिन्तितम्-।।१६१०।।

'रथस्य यात्रादिवसे जगन्ना-
थस्येक्षणं चापि विधाय, पुर्याम्।
रथस्य तस्यैव तथाहि नीचैः
संपीड्य मर्ताऽस्मि सनातनोऽहम्'।। १६११ ।।

संबुद्धः प्रभुणा सनातनमनोभावस्तथा, चैकदा
सोऽत्राऽऽगत्य सनातनेन विदधद् वार्तां सभक्तोऽभवत्।
वार्तास्वेव महाप्रभुः कथयते वार्तासु 'लाभं परं
त्वं किं चिन्तितवान्? सनातन ! तनुत्यागेन रूपाग्रज!-।।१६१२ ।।

लोके मानवदेहिनोऽस्ति पुरुषस्यार्थोऽन्तिमस्तु प्रभु-
प्राप्ति,श्चेन्मिलति प्रभुर्ननु तनुत्यागेन, कौ तर्ह्यहम्।
सञ्जोऽस्यत्र सहस्रवारममना धृत्वा निमायी तनुं
तत्त्यागाय (भवेऽत्र तादृगसतस्त्यागेन भावस्य शम्)।।१६१३ ।।

एवं तु त्यजनं तनोर्नरकृते वृत्तिः परं तामसी,
खिन्नः सन्नरदेहवाञ्जगति यः संसारितापात्तथा।
उद्विज्याऽत्र च हेतुना व्यवहृतौ केनापि भूमौ तनोः,
प्राणत्यागमहो! करोति, भवति स्थाने न तत्सद्गतिः।।१६१४।।

भूयस्तस्य तथाऽऽसुरीप्रकृतिका धार्या तनुर्जायते
लोके कर्मनिमित्तमत्र, सुमनः ! श्रीकृष्णसंकीर्तने।
एवाऽऽभाति सनातन ! प्रिय ! तनोरद्धोपयागोऽत्र सत्
(श्रीकृष्णोऽखिलकर्षणप्रियतमः, संकीर्तनीयः प्रियः)।।१६१५ ।।

नाम्नोऽस्ति चिन्तनमथ स्मरणं भवे चेच्-
चित्ते स्थिरं भगवत,स्तु पुनर्दशायाम्।
कस्यामपीह तनुरस्तु, तनोस्तु चिन्ता
कार्या विवेकिपुरुषेण न किञ्चनाऽपि'।। १६१६ ।।

श्रुत्वा सोऽथ सनातनः प्रभुवचः प्रोचे कृताधःशिरा
'देहं व्यर्थमथोऽपवित्रमथ हेऽमुं रक्षयित्वा प्रभो !।
कर्तुं वाञ्छति भो ! भवान् किममुना ?, दुःखं परेषां विना
लाभः कोऽप्यमुनाऽधुना तु भुवने गौराङ्ग ! नात्राऽऽप्यते'।। १६१७ ।।

'साधो ! किं तव हानिलाभयुगलेन, त्वं तु देहं निजं
मह्यं ह्यर्पितवानसीह भुवने, दत्तं पदार्थं कथम्।
प्रत्यावर्त्य यथाभिलाषमुपयोगं कर्तुमस्य क्षमः
कश्चिद् ? (दत्तपदार्थकस्वमननं दातुर्हि दानं वृथा)।।१६१८ ।।

अस्योपयोगमहमत्र (तव प्रतीतौ)
कुर्यां कमप्यपि, न तेऽस्ति तथाऽधिकारः।
एतद्विनाशकरणस्य, तु कारणीयं
कर्माऽमुनाऽवनितलेऽत्र महन्महन्मे'।। १६१९ ।।

'आदेशकस्य भवतो ननु शक्तिरेव
ह्युल्लङ्घनस्य पुरुषे क्व महाप्रभोऽस्ति ?।
आदेशमध्वनि यथाऽत्र भवांस्तु कर्ता,
कर्ताऽस्मि सम्प्रति तदेव' सनातनोक्तिः।। १६२० ।।

सनातनं प्रबोध्य तं तथा प्रभुर्निजस्थलम्।
चचाल भक्तसंयुतो (निमायिकर्म बोधनम्)।। १६२१।।

आत्मोत्सर्गविचारमद्य तु सना-साधुः परित्यक्तवान्,
संकोचस्तु सदा महाप्रभुपरिष्वङ्गस्य हेतोः स्थिरः।
तस्थौ तस्य, विदूर एव सततं तस्थौ स गौरप्रभोः,
किन्त्वालिङ्गनमेष तं सहृदयो ह्यन्विष्य चक्रे प्रभुः।।१६२२ ।।

एतेन व्यथितो यथा ननु सदा तस्थौ स, तर्ह्येकदाऽ-
वोचत्स स्वमनोव्यथां च जगदानन्दं समीपे प्रभोः-।
पुर्यामेव वसन्तमत्र, जगदानन्दोऽगदत्पण्डितः
'पुर्यामेव भवत्स्थितिः समुचिता न-(क्वापि हेयं स्थलम्) ।।१६२३।।

आषाढे च रथोत्सवस्य रुचिरं कृत्वा त्वितो दर्शनं
श्रीवृन्दावनमञ्जसा सहृदयो यातु, प्रभुर्दत्तवान्।
देशं साधु कृते तमेव भवतो, व्यत्येतु कालं हरे-
र्गत्वा तं प्रभुदत्तदेशमवनौ कुर्वंस्तु नाम्नां जपम्'।। १६२४ ।।

ऊचे श्रीलसनातनः प्रकटयन्मोदं निमायी 'भवा-
नेतां पण्डितजी ! तु सम्मतिमदादत्यन्तमेवोत्तमाम्।
यातेतोऽहमवश्यमेव विषयादाषाढपश्चाच्चलि-
त्वै'वं निश्चयनं विधाय-(हि मनोमोदः समाधानतः)।।१६२५।।

कुर्वन्नस्ति रथोत्सवस्य सुमनाः पुर्यां प्रतीक्षामसौ,
वार्तास्वेव तथैकदा कथयते वार्तास्वसौ च प्रभुम्-।
'मह्यं सम्मतिमुत्तमां तु जगदानन्दः प्रभो ! पण्डितोऽ-
दादत्यन्त - (मिह क्षणे सहृदयः सत्सम्मतिद्योतकः)।।१६२६।।

कृत्वा रथयात्रां वृन्दावनमेता।
वत्स्यामि तथाऽहं तत्रैव निमायिन् !'।। १६२७ ।।

एवंभावमथ प्रबुध्य जगदानन्दस्य, तस्योपरि
प्रेमक्रोधमुवाच तु प्रकटयन् गौरो 'महान्तं निजम्।
प्राज्ञं सम्प्रति बोधतेऽत्र जगदानन्दोऽधिकं, यत्स्वतः
पुर्यां श्रीलसनातनं त्वपि तथाऽद्धा शिक्षयन् वर्तते।।१६२८ ।।

शिक्षां यच्छतु मे, तदोचितमपि स्थानेऽस्ति, सम्प्रत्यमुं
संसारेऽस्ति सनातनस्तु सुमना वर्षाणि यावच्छतम्।
शक्तः पाठयितुं, निमायिसुहृदां क्वाचित्कमूर्खो, यतो
भूत्वा ह्योमणवस्त्वियद्वरजनेऽचालीत्प्रदातुं मतिम्'।।१६२९ ।।

श्रुत्वेदं वचनं बभूव जगदानन्दस्तु शून्यो, नहि
त्वस्रं (कृन्ततु) तत्तनौ, प्रति धरां पश्यन् बभूवाऽथ सः
सास्रं, तर्हि सनातनः कथयति त्वत्यन्तनम्रात्मना
भावेनाऽऽत्तनिमायिगौरचरणौ-(नम्रो निमायिस्थितिः)।।१६३०।।

'वार्तामवोचत तु मे जगदाप्तनन्दो
ह्येव प्रभो ! हितकरीं, पतितं भवान्माम्।
आलिङ्गनात्स्पृशति, कस्य भवेन्न दुःखं,
त्वेतेन संकुचितहृत्स्वयमस्मि तिष्ठन्'।। १६३१ ।।

तस्मिन्नेव तथा स्वरे कथितवान् भूयो निमायी प्रभु-
'र्मद्देहस्य तथेयती कथमहो ! चिन्ताऽस्य ?, सर्वं त्वसौ।
लोके बोधति देहमेव, सुहृदां श्रीवैष्णवानां सतां
माहात्म्यस्य सदात्मनां मतिमतां न प्रत्ययोऽस्याऽऽत्मनि-।।१६३२।।

देहं श्रीलसनातनस्य सुहृदः साधारणानां नृणा-
मन्येषां तनुवत्तु बोधति जगद्, बोधोऽस्य नो- चिन्मयम्।
अस्ति श्रीलसनातनस्य वपुराः ! खर्जुश्च कुष्ठं तथा
तस्य क्व ? (प्रियमेव भद्रमखिलं ह्यात्मीयसम्बन्धिनि)।। १६३३ ।।

एतत्त्वेष सनातनो ननु मम प्रेम्णः परीक्षाकृते
ह्युत्पन्नं कृतवांस्तथा निजतनौ - स्पर्शं न कुर्यामहम्।
देहस्याऽस्य निमायिनस्तु घृणया, कश्चिन्नरो भाग्यवान्
देहं श्रीलसनातनस्य सुहृदो जिघ्रेद्यथार्थं परम्-।। १६३४ ।।

तन्निस्सरन् भवति संततदिव्यगन्धो,ऽ-
प्यल्पं कृपाकरणकाय सनातनस्य ?।
कुर्वे श्लिषां क्वचि,दहन्तु, तदीयदेह-
स्पर्शेन पावनमहो ! विदधे स्वदेहम्'।। १६३५ ।।

श्रुत्वैवं निजशंसनं महदियत्साधुः प्रभुश्रीमुखा-
दूचे श्रीलसनातनो ननु रुदन् 'घोरोऽपराधो मया।
एवं को विहितः प्रभो !, मम तथा केषां पुरा जन्मना-
मद्याऽनन्तमघं तथा प्रकटितं चागत्य, यस्माद् भवान्-।। १६३६।।

शंसारूपमिदं हलाहलविषं मां पायय,त्याः! स्फुटं
संजातोऽद्य निमायिसाधुजगदानन्दस्य भाग्योदयः।
अद्याऽस्मादधिको भविष्यति तु को लोकत्रये भाग्यवान्,
वात्सल्येन सुतोपमं हि कुरुते यस्य प्रभुर्भर्त्सनाम्।। १६३७ ।।

हैवं प्रेममयी तु यस्य लिखिता भाग्ये पुनर्भर्त्सना,
धन्यः सोऽस्ति महानुभावपुरुषो, ह्यालोचनां कुर्वते।
नित्यं यस्य गुरुव्रजाः, स परमः सौभाग्यशाली नरः,
स्थाने हे ! करुणाम्बुधेऽमुमधमं केनापराधेन माम्-।।१६३८।।

आत्मीयतातस्तु पृथग्विधाय
प्रशंसनात्मा ननु सर्पिणीयम्।
बलेन कण्ठेन विघूर्णिता मे,
सोढाऽधिकं सम्प्रति नाथ ! नाऽहम्'।। १६३९ ।।

एवं श्रीलसनातनस्य वचनं श्रुत्वा प्रभुः कातरं
जातोऽल्पं सुमनाश्च लज्जित इव, प्रेमस्वरेऽत्यन्तकम्।
पश्यञ्जल्पति सौहृदेन जगदानन्दोन्मुखं 'मत्तनौ
च स्नेहेन पुनः सनातन! सखे! ह्यद्धाऽऽग्रहेणैव ते-।। १६४० ।।

स्थानेऽदास्यत सम्मतिं तु जगदानन्दस्तथैतादृशी,-
मावेशेऽस्य कृते निमायिकनिजक्रोधस्य वार्तामथ।
एवं तूवद, हेतुरस्य सहजो हि स्नेह एव त्वयि
स्थाने मेऽस्ति (हि रागमूलजनितो भावप्रभावोऽखिलः)।। १६४१।।

वर्षेऽस्मिन्निकटे ममैव च वस त्वं, याहि वृन्दावनं
वर्षे भाविनि' च प्रभुः सहृदयश्चक्रे ह्युदित्वा त्वियत्।
भूयः श्रीलसनातनस्य बलतो गौरस्तथालिङ्गनं
(स्थाने स्वोरसि धीयते ममतया मात्रा शिशुः सत् सता)।।१६४२।।

आसीत्किं पुनरत्र !, खर्जुरथ सा याते च तद्वेदना
जाने न क्व !, सनातनस्य सुहृदः खर्जुस्तु नीरोगताम्।

याता तत्क्षणमेव, चाऽथ दिवसैर्द्वाभ्यां चतुर्भिर्व्रणा-
स्तासां शुद्धिमिताः, सुवर्णमभवद्वा कान्तिमत्तद्वपुः।।१६४३ ।।

अद्वैतश्च रथोत्सवस्य समये गौडीयभक्तास्तथा
स्वस्त्रीबालयुताः पुरीं हि निखिला नित्यादयस्त्वागताः।
प्रत्यब्दाभ,मथ प्रभुः परिचयं संकारयामास तैः
सर्वैः श्रीलसनातनस्य (सुहृदामाप्तिः कृपायाः प्रभोः)।।१६४४।।

एतेषाञ्च सनातनः परिचयं लब्ध्वाऽखिलानां कृपा-
पात्राणां परमं प्रभोः सुमनसां भक्तात्मनां प्रेमिणाम्।
संजातो मुदितः परं, चरणयोश्चक्रे तथा वन्दनं
सर्वेषां स (निमायिनां परिचयः पाथेयमच्छात्मनः)।। १६४५ ।।

सर्वः श्रीलसनातनस्य सुहृदः श्रद्धातितिक्षाश्रियः
सद्दैन्यस्य च भूरि भूरि कृतवाञ्छंसां निमाय्यात्मनः।
वर्षामासचतुष्टयं च निखिलाः स्थित्वा पुनः प्रस्थिताः
स्वं देशं, तु सनातनः प्रभुपरस्तत्रैव तस्थौ परम्।। १६४६ ।।

चैतन्यात्प्रगतः प्रभोः स सुमना वर्षे द्वितीये तथा
तस्याज्ञां शिरसि प्रधाय सरलं पुर्यास्तु काशीं भवन्।
श्रीवृन्दावनमाप, भट्टबलतो निन्ये लिखित्वा च स
श्रीपुर्याश्चलनक्षणेऽखिलधरानामानि तस्याऽध्वनः।। १६४७ ।।

चैतन्यस्तु यदध्वना सहृदयो यातोऽस्ति वृन्दावनं,
कुर्वंस्तन्निखिलस्थलेक्षणमसौ तेनैव मार्गेण च।
लीलानां स्मरणं प्रभोस्तु विदधद् वृन्दावनं ह्यापयत्
साधुश्रीलसनातनो (हि महता यातोऽत्र मार्गः सताम्)।।१६४८ ।।

तावद्रूपसहोदरोऽस्य सुहृदो नाप्तोऽस्ति वृन्दावनं,
तत्रैवाऽथ सनातनः स्वसमयं स्थाने तरूणामधः।
श्रीवृन्दाविपिनस्य यापयति, तत्किञ्चिद्दिनानन्तरं
श्रीरूपः सहजोऽपि गौडविषयादाप्तोऽस्य वृन्दावने।। १६४९ ।।

च श्रीकृष्णकथासुकीर्तनं कुर्वन्तौ सममेव सोदरौ।
चक्राते निजकालयापनं (स्वः कालः, प्रियकीर्तनं यतः)।। १६५०।।

●●

श्रीरघुनाथस्य गृहत्यागः

७१. पुरुषं मोहपाशपरतन्त्रं यो न मोचयेद् भुवने-।
अपि शिक्षयिता नहि वास्तविको गुरुः स विद्याऽदानात्
आत्मज्ञानाऽदानात्स्वजनः सन्नपि नहि स स्वजनः।
वीर्योत्पादयिता पालयिता पिताऽपि नहि स यथार्थम्
पार्थिवतनुजननी सत्यपि सा नहि वास्तविकी माता।
माननीयमपि दैवं तन्न स पतिरपि करग्रहीता,
सर्वः सोऽस्मिन् खल्वात्मीयो, यश्चेतयति स्वच्छम्।।

सप्तग्रामधरापतेः सुमनसः पुत्रं मजूमान्वित-
श्रीगोवर्धनदासकस्य भविता नो विस्मरन् पाठकः।
अद्धा श्रीरघुनाथदासमधुना, ऽद्वैतस्य गेहे स्थित-
श्रीगौरप्रभुदर्शनं स कृतवानासीत्तु शान्तिस्थले ।। १६५१ ।।

'त्यक्त्वा'ऽमुष्य ददौ च 'मर्कटविरक्तिं' सूपदेशं प्रभु-
'स्त्वात्मीयां कुरु गेह एव भगवद्भक्तिं वसन् साम्प्रतम्'।
अत्यन्तं सुमना जगाद च गृहत्यागे तदीयाग्रहे'ऽ-
च्छं द्रक्ष्यामि, तु याहि सम्प्रति गृहं-(त्याज्यं गृहं न द्रुतम्)।।१६५२।।

वृन्दावनं याम्यहमेव शीघ्रं,
निवृत्य चायानि ततो यदाऽहम्।
तदा यथा स्यादुचितं तथा त्वं
कुर्या' (निमायी ह्युचितोपदेष्टा)।। १६५३ ।।

अद्य श्रीरघुनाथजी ननु यदा शुश्राव- चाप्तः प्रभु-
र्यत्कृत्वा व्रजमण्डलस्य सुमना यात्रां निमायी, तु तत्।
श्रीचैतन्यपदेक्षणार्थमभवत्सोऽत्यन्तलालायितो
(लाला लालितकस्य हार्दिकरसो भावे प्रियातिप्रिये)।।१६५४ ।।

चैतन्यप्रभुपादपद्ममकरन्दाऽऽपानहेतोरभू-
दुन्मत्ताभमहो ! मनोऽस्य मधुपो, ऽसौ गौरसच्चिन्तनम्।
कुर्वन्नेव बभूव चात्मसमयं संयापयन् साम्प्रतं
(पूर्वं सम्मिलनात्प्रियस्य सुहृदस्तच्चिन्तनात्माऽऽश्रयः)।।१६५५।।

कुर्वन्नस्ति तु सर्वकर्म सुमनाः सांसारिकं बाह्यतः,
किन्त्वन्तर्हृदयेऽस्य गौरविरहोद्भूतानलः प्रज्वलन्।
आसी,त्सोऽथ तदैव वस्तु निखिलं त्यक्त्वाग्रहीष्यत्परं
श्रीचैतन्यपदाश्रयं- (सुमनसा ह्याप्यः सतामाश्रयः)।।१६५६ ।।

किन्तु विचित्राऽभूद् घटनैका। तत्परिवारे तत्क्षणमेव।।१६५७।।

सप्तग्रामपणः पुरैकयवनक्षोणीपतेस्तूपरि
ह्यासी,देव स चौधरी समभवत्तन्मण्डलस्या,ऽधुना।
भ्रात्रोस्तत्परमेव नूनमनयोरेतत्प्रदेशस्य तु
प्राप्ता भूम्यधिकारिता (वसुमतीस्वामी पणेनैव ना)।।१६५८ ।।

आयस्य प्रतिवर्षमात्मनिकटे धृत्वा चतुर्थांशकं
त्रीनंशान्न्यदधात्तथा स यवनो राज्ञः सभायामथ।
आयो विंशतिलक्षकं प्रतिसमं तन्मण्डलस्याऽभवत्
(सर्वप्राणिजगद्धरा वसुमती माताऽक्षयश्रीधरा) ।। १६५९ ।।

राज्ञश्चाऽथ मजूमदारसहजभ्रात्रोर्निधेयं तथा-
ह्यास्थाने दश पञ्च लक्षमनयोर्लेखेन, पार्श्वे निजे।
लक्षं पञ्च तथा, परं ननु निजात्कायस्थताकौशला-
देतौ द्वादश लक्षमेव सहजौ राज्ञो निधत्तः कुले ।। १६६० ।।

अष्टौ लक्षमथात्मनश्च निकटे स्थाने दधाते स्वयं,
पट्टोल्याश्चिरकालतः स्थितिवशाद्वै चैतयोरेव तत्।
स्थायी भूम्यधिकारिताविषयकः प्रायोऽधिकारोऽनयो-
र्जातो, द्वादशवर्षकैर्ननु यतः स्थायी पणो जायते।। १६६१ ।।

तत्प्राचीनचतुर्धुरीणयवनस्याऽभूदितस्तु स्थिते-
र्विद्वेषः, स निजाधिकारमधुना राज्ञः कुले दर्शयन्।
एतद्भ्रातृयुगेऽभियोगमपरं संचालयामास च
स्वे पक्षे कृतवांस्तु राजसचिवं (साचिव्यतो राजता)।।१६६२ ।।

एतौ धर्तुमथाऽऽगता नृपजनाः, श्रुत्वा हिरण्यो निजाऽऽ-
सेधोदन्तमुभौ तथाहि सहजौ गोवर्धनः स्वं गृहम्।

हित्वाऽन्यत्र पलायिता,वथ गृहे तस्थौ तथाप्येकलो
दासश्रीरघुनाथ एव (पुरुषो गच्छेत्पलाय्यात्मनः ?)।।१६६३ ।।

एतं त्वेव चतुर्धुरीणयवनो ह्यासाधयामास च
स्थाने प्रेषितवांस्तु बन्दिभवने, तत्रैष च त्रासितः।
एतस्मै ननु नित्यशो,ऽथ यदसौ तातस्य जल्पेत्पितुः
संकेतञ्च निजस्य, किं ननु तयोरासीदमुष्य प्रमा ?।।१६६४।।

अस्मादेष तथाहि किञ्चिदपि नो वक्तुं क्षमोऽभूत्तयो,-
स्तत्क्रुद्धश्च चतुर्धुरीणयवनो नानाविधां यातनाम्।
अस्याऽचेष्टत दातु,मेष रघुजी चक्रे तथा बुद्धिमान्
प्रत्युत्पन्नमतिश्च चिन्तन'महो! नैवं कृतिः सेत्स्यति-।।१६६५।।

एवाऽसौ तु चतुर्धुरीणयवनः केनापि केनापि नो
कर्तव्यः स्ववशे मयाऽत्र विधिना' कृत्वा तथा निश्चयम्।
चेतस्येव स चेतसीह सुमनाः संचिन्तयन् विद्यते
सूपायं (नियमेन सिद्धिमयते सूपायतः साधकः)।। १६६६ ।।

एतं यर्हि चतुर्धुरीणयवनोऽत्यन्तं ललाषैकदा
स्वेच्छं खेदयितुं, तदैष निदिशन् स्नेहं तु नैसर्गिकम्।
ऊचेऽत्यन्तमृदुस्वरेण सुमना 'हे ! चौधरीजी ! भवान्
किं मां खेदयति? (प्रियप्रियतमो बालः समेषां कृते)।।१६६७।।

मे तातश्च पिता तथा ननु भवांश्च भ्रातरो भ्रातरो
विद्यन्तेऽत्र, भवत्त्रयन्तु सहजं बोधाम्यहं साम्प्रतम्।
याव,च्चाऽथ परस्परं भुवि भवन्तस्तु त्रयो भ्रातरः
कामं त्वत्र विगृह्णतां सुमनसः प्रेम्णाऽथ तिष्ठन्तु वा।।१६६८।।

मध्ये पीडयतेऽथ मां ननु कथं ?, स्पष्टं भवन्तोऽधुना
संसारे तु विगृह्णते, पुनरहो ! तु श्वोऽखिला भ्रातरः।
एकेऽस्मिन् भवितार एव सुजना, बालो यथाऽहं तयो,-
र्बालस्तादृशमेव कौ तु भवतो (बालः समेषां समः)।।१६६९ ।।

बोधे भवन्तमपि कौ निजतातमेव
ज्येष्ठं त्वहं, त्वपठितोऽत्र भवान् हि कश्चित्।

नास्त्येव, वेत्ति निखिलं वचनं भवान् वै,
नो शोभते व्यवहृतिर्भवतो मयैवम्'।। १६७० ।।

भृङ्गेष्टाकुसुमाभफुल्लमुखतः स्नेहस्य शब्दं तथा
सारल्यस्य निशम्य चेदृश,मपि स्थाने कठोरं पुनः।
चक्षाराऽथ चतुर्धुरीणहृदयं, स स्वेन वै वक्षसि
स्थूलस्थूलभुजद्वयेन रघुनाथं लागयामास,च- ।। १६७१ ।।

ऊचे गद्गद्कण्ठतोऽश्रु तु दृशोः संभृत्य 'चक्रे महत्-
पापं सत्यमहं धनस्य सुत ! हे ! लोभेन, तु त्वं मम।
आत्मीयात्मजसन्निभोऽसि, भुवने त्वं पुत्रतुल्योऽथ मे
जातोऽद्यप्रभृते-(र्मनोग्रहणतः सम्बन्धतास्वीकृतिः)।।१६७२ ।।

सम्प्रत्येव तथाहि राजसचिवं निर्मोचयामि त्वहं
त्वामुक्त्वा, तव चाऽथ तातपितरौ यत्रापि तु स्तां, तयोः।
वार्तां देहि - न साम्प्रतं भयकृतेऽपेक्षाऽत्र काचि,च्च ते
तावागत्य तु तिष्ठतां निजगृहं हर्षेण तातः पिता'।। १६७३ ।।

उक्त्वेदं रघुनाथदासमथ सोऽमात्येन राज्ञस्तथा
मुक्तं कारितवान्, रघुर्निजगृहं चागत्य तिष्ठन्नभूत्।
एतल्लोकयथार्थरूपमधुना ज्ञातं तु तस्याऽभवत्
(प्रत्यक्षाद्यनुभूतिरेव सुहृदि स्थाने प्रमाणं परम्) ।। १६७४ ।।

यावत्सम्प्रति बोधते स्म स - भवेदल्पं महद्वा सुखं
संसारेऽत्र तथाऽपि सम्भवतया, किन्तु प्रतीतिर्ह्यभूत्।
स्पष्टं तस्य तथाऽनया घटनया-'दुःखस्य चाद्धा कलेः
संसारोऽस्ति गृहं (विवेकिमनसः सर्वं हि दुःखं जगत्)।। १६७५।।

क्वापि तु म्रियतेऽत्र लोकनिवहोऽद्धा दीनतादुःखितः,
कामार्तो भ्रमतीह कामिनिवहोऽद्धा कामिनीपृष्ठतः।
श्वानाभः, सहजेन युध्यति तथा कुत्रापि कश्चि,त्स्थले
कस्मिंश्चित्पितृपुत्रयोस्तु कलहो-(ऽशान्तिर्हि लोकस्थितिः)।।१६७६।।

ग्रामाणां दश विंशतिर्यदि तथाहि क्वापि कस्यापि कौ
भूस्वामित्वमवाप्तमत्र, यदि वा कस्यापि लब्धाऽथ वा।

सेवाऽच्छा नृपतेर्नु राजपदवी, तस्यैव मत्तो मदे
लोकान् बोधति तुच्छमत्र स तदा (मत्तस्य तुच्छं जगत्)।।१६७७।।

संसारे कविताप्रशंसनमहो ! चक्रुः कलाकोविदाः
कस्यापीह, स बोधते ह्युशनसं व्यासं स्वमेवाऽथ च।
कश्चिद् वित्तमदे च कोऽपि भुवने विद्यामदे, सम्पदो
मत्तः कोऽपि मदेऽधिकारबलयोः कश्चित्प्रतिष्ठामदे।।१६७८ ।।

मूर्खः कस्यचनाऽस्ति चेद् भुवि सुत,स्तस्यैव तद्दुःखित-
श्चिन्तायां सततं स तिष्ठति, तथाऽऽदोवैपरीत्ये भवे।
कस्याप्यस्ति सुतो युतोऽखिलगुणैः, रोगोऽल्पमप्यत्र कौ
जाते तस्य पितुः स्फुरत्तु हृदयं संजायते संततम्।। १६७९ ।।

चेत्स क्वापि ननु म्रियेत, तु पुनः प्राणान्ततुल्यं क्षितौ
दुःखं तस्य हि जायते, क्व नु सुखं, शान्तिः क्व चैवं भवे।
आनन्दः क्व निमायिनां क्व नु तथोल्लासो विवेकात्मना-
(मानन्दः परमात्मनीह सुहृदां शान्तिः प्रमोदः सुखम्)।।१६८०।।

लोके घोरविषण्णताऽतिभयदक्लेशामितव्यग्रता-
साम्राज्यं त्विह वर्तते हि परितः, सत्यं सुखं श्रीगुरोः।
एवाऽऽस्ते तनुधारिणस्तु पदयो,स्तस्यैव गत्वा पदोः
शान्तिर्लब्धुमथ क्षमाऽत्र परमा (शान्तिर्हि शान्ताश्रयात्)।।१६८१ ।।

ख्यातिं नेच्छति यो, न वाञ्छति तथा नेतृत्व,मत्र स्पृहा
नो यस्यास्ति तथा गुरुत्वयशसोः कौ मानसम्मानयोः।
संसारेऽत्र च येन नामिपुरुषस्थानार्जनस्य स्पृहा
पूर्णत्वेन निमायिना परिहृता, लोके ह्यमीषां कृते-।। १६८२।।

किञ्चिन्नास्ति परं विना गुरुपदे स्थानं च शीतत्वदं
शान्त्यानन्दसुखप्रदं, तदधुना संसारिभोगालये।
नो वत्स्यामि गृहेऽत्र, साम्प्रतमहं त्वेव ग्रहीताऽऽश्रयं
श्रीचैतन्यपदो - (र्निमायिशरणं चैतन्यकृष्णप्रभुः)।। १६८३ ।।

तस्यैवास्मि तु शान्तिदायिनि तथा क्रोडे यथाह्यर्भकः
क्रीडिष्यामि निमायिनः सुखमये, तस्यारुणे सुन्दरे।

लेढाऽहं निजजिह्वया पदतले, तृप्तिः सुधातुल्यया
माधुर्या भविता तयैव मम (सन्निष्ठा सुधास्वादनम्)।।१६८४।।

श्रीचैतन्यनिमायिपद्मपदयोः पूतं परागं विनाऽ-
न्यत्किञ्चित्सुखसाधनं त्वपि न कौ' भूयः स भूयस्त्विदम्।
संचिन्त्याऽपि पलायितः प्रति पुरीं, स्वैः कर्मचारिव्रजै-
र्भूयोऽमुं तु धनी पिता सुचतुरैः संग्राह्य गेहेऽकरोत्।।१६८५।।

एतस्याऽथ निरीक्षणाय सततं संरक्षकांश्चोपरि
स्थाने स्थापितवांस्तु पञ्च दश सो,ऽन्तो रक्षणस्याधुना।
एषोऽस्थान्ननु बन्दिव,ज्जनदृशौ संवञ्च्य गन्तुं क्षमो
नासीदेष रघुस्तथा क्षणमपि क्वाप्येकलः साम्प्रतम्।। १६८६ ।।

एतस्माद् विरहव्यथाऽस्य ववृधे भूयोऽप्यलं 'गौर ! हा!,
हा ! प्राणप्रिय !' चाऽथ रोदिति पुनश्चोक्त्वा तथोच्चैः पुनः।
क्वापि क्वापि रुदंस्तथाहि बलतो ब्रूते 'ह्यदोवेदना-
पूर्णाब्धेः क्व निमायिहृद्रमण हे! निस्तारयिष्यत्यहो!।। १६८७।।

दाता मे शरणं कदा स्वपदयोः ?, क्वाऽमुं प्रभो हेऽधमं
स्वीकर्ता ?, क्व निजान्तिके सहृदयाऽऽह्वाता ?, कदाहि क्षणे।
च ज्वालां मधुरामृताऽऽत्मवचनैः श्रीभक्तितत्त्वात्मकै-
श्चण्डामत्र हृदोऽस्य कौ शमयिता पीयूषसिक्तैस्तथा?।।१६८८।।

हे चैतन्य ! मयाऽद्य जीवनजगत्सर्वस्व ! हे ! गौर ! हे !
मेऽदण्डं तरिपात्रपाल ! मम हे ! कैवर्तक ! श्रीप्रभो !।
अम्भोधौ भुवि जीर्णशीर्णतरणे,र्मामन्धकूपादितो
धृत्वोत्तारय बाहु'- (मात्मपुरुषः संसारकैवर्तकः)।। १६८९ ।।

अस्यैवं ननु शीर्षपादरहितं श्रुत्वा प्रलापं कृतेऽ-
पारं दुःखमभूदमुष्य हि रघोः प्रेमात्ममातुर्हृदि।
ऊचे सा स्वपतिं तथाऽस्य पितरं श्रीदासगोवर्धनं
(पत्या संपुटितं सुतेन सुभगानारीजगज्जीवनम्) ।। १६९० ।।

'जातस्त्वेकसहायो वंशस्यैष रघुर्नः।
मत्तो, रक्षतु बद्धवा, स्यान्नैवं बहिरेतु'।। १६९१ ।।

ऊचेऽमुष्य पिता च मार्मिकरवे गृह्णंस्त्वथोच्छ्वासकं
'त्वस्त्यद्धा रघुमत्ततान्यविधिका, संसारिसम्बन्धनम्।
छिन्नं भिन्नमहो ! तथाहि लषते कर्तुं स, रज्ज्वा पुना
रुद्धः स्थास्यति बन्धनेन न स (कौ रागेण ना बध्यते)।।१६९२।।

सम्पत्तिस्त्वतुला कुबेरसदृशी, राज्ञः प्रमोदो यथाऽ-
पारः, स्त्री सुरसुन्दरीव सुभगा, ऽतुल्यं कदापि क्षितौ-।
ऐश्वर्यं ननु भाग्यहीनजनताऽप्राप्यं च बन्द्धुं गृहे
यर्ह्येवात्र नहि क्षमं-(प्रभुहृदोऽसाधारणं बन्धनम्)।। १६९३ ।।

तं बद्ध्वा ननु रक्षितुं भुवि भवेद्रज्जुर्वराकी क्षमाऽ-
स्यां यावद् दिवसांस्तथाहि कियतो ?' मातोत्तरादात्मनः।
पत्युश्चात्मजमत्ततास्थितिवशादत्यन्तमेवाऽभवद्
दुःखार्ता, रघुनाथकोपरि पिता दृष्टिं दधाराऽखिलम्।।१६९४।।

एतेष्वेव दिनेषु वङ्गविषये श्रीपादनित्यप्रभुः
श्रीसंकीर्तनविप्लवं सहृदयो ग्रामेषु विस्तारयन्।
भ्रामं भ्राममभू,न्निमायिसुहृदः स प्रेम्णि मत्तः प्रभो-
र्भूतः सङ्गधृतात्मभक्तशतको भ्राम्यन्नभूत्सर्वतः।। १६९५ ।।

आश्चर्येण भवन्ति तस्य चकिताश्चोद्दण्डनृत्यं जना
दृष्ट्वा, तस्य निमायिकीर्तियशसोः सद्विप्लवो विस्तृतः।
वङ्गेऽस्मिन् परितो, निमायिसुहृदो नित्यप्रभोर्दर्शने
चायान्ति स्म सहस्र-लक्ष-मनुजा (लोका निमायिप्रियाः)।। १६९६।।

आसीत्तेषु नितायिनामविसरोऽद्धा गौडेदेशे दिने,-
ष्वच्छाच्छा धनिनश्च भूमिपतयो ह्यागत्य कोटीश्वराः ।
लोटन्ति स्म पदोरमुष्य, धरते निःशङ्कमेष स्वकं
तेषां मूर्ध्नि पदं, कृतार्थदशया यान्ति स्म ते स्वस्थलम्।। १६९७।।

लक्षं प्राभृतकेऽथ रूप्यकमहो ! स्माऽऽयाति, नित्यप्रभु-
श्चौदार्येण तथाधिकेन कुरुते भक्तेषु तद्वण्टनम्।
सत्कार्येषु धनव्ययं, सुमनसः पानीकहाटीस्थलं
तत्संकीर्तनमुख्यकेन्द्रमभवत् (केन्द्रं प्रधानस्थलम्)।। १६९८ ।।

आसीद्राघवपण्डितः सहृदयश्चानन्यभक्तस्तथा
तत्रत्यस्तु महाप्रभोः सुमनसोर्गौरस्य नित्यप्रभोः।
तस्यैव स्थलकेऽधिकं स्म वसति स्थाने हि नित्यप्रभुः
(कौ विश्राम्यति हि स्थले परिचिते साधुर्विशिष्टे जनः)।।१६९९।।

वृत्तान्तं रघुनाथजी ननु यदा शुश्राव नित्यप्रभोः
संगृह्य स्वपितुः स तर्ह्यनुमतिं स्वैः सेवकैर्विंशतिः।
सार्धं दर्शनहेतवेऽस्य चलितः पानीकहाटीस्थलं
(श्रीमत्साधुनिरीक्षणाय सुमनोदृष्टिः सदैवाऽऽतुरा)।।१७०० ।।

दूरादेव ददर्श गाङ्गपुलिने देदीप्यमानासने
ह्युच्चे सम्प्रति चासितं परिवृतं भक्तैरनेकैस्तथा।
श्रीनित्यप्रभुमेष वासवसमं, साष्टाङ्गमेषोऽकरोत्
तं दृष्ट्वैव नतिं विलुठ्य धरणा-(वङ्गोपयोगोऽङ्गिनः)।।१७०१।।

'श्रीपादाऽऽगतवान् हिरण्यकमजूदारस्य' भक्तोऽभण-
त्कश्चि'द्धे ! युवराजनाथरघुजी, कुर्वन्नतिं विद्यते'।
'आः ! सत्यं रघुरागतः ?' कथयते ह्युच्चैः सशब्दं हस-
ञ्छ्रीनित्यः 'कथमद्य बन्दिगृहतश्चौरोऽयमत्राऽऽगतः?।। १७०२।।

अस्याज्ञा मिलिता कथं त्विह स्थाने चागमनस्य ?' भाषते।
दृष्ट्वाऽतो रघुसम्मुखं पुनर्नित्यानन्दमहाप्रभुप्रभुः।। १७०३ ।।

'आस्स्व पार्श्वे रघो!। मे,ऽत्र चागच्छ हे!'।। १७०४।।

त्वत्यन्तं विनयेन दासरघुजी संबद्धहस्तस्तथा
त्र्यस्यन् संकुचितो निषीदति पदत्राणान्तरे तत्सतः।
पृष्ठे भक्तजनस्य, सम्प्रति कृपां चक्रे स्वकीयां प्रभु-
श्रीनित्यो रघुनाथकोपरि (कृपाभावः सतां दुर्लभः)।। १७०५ ।।

किञ्चित्कर्मकृतेर्निदेशमवनौ दद्यान्महात्मा यदि
स्थानेऽस्यां धनिकेषु, साऽथ परमा तेषां कृपैव ध्रुवम्।
बोधव्या, धनमस्ति वास्तविकतोऽद्धा वस्त्वनित्यं यतो,
भूयः स्थाय्यपि तिष्ठतीह च सदा नैकस्य पार्श्वे त्विदम्।।१७०६।।

वस्त्वेवं क्षणिकं महात्मपुरुषः स्वाज्ञां ह्यमोघां स्थिरं
दत्वा कौ कुरुतेऽथ सार्थकमहो !, वित्तस्य सर्वोत्तमः।
एषोऽस्ति ह्युपयोग एव- सुहृदां तस्य व्ययोऽस्त्विच्छया
संसारेऽत्र महात्मनां (भुवि सता वस्तूपयोगो हृदा)।।१७०७ ।।

किन्त्वेवं निखिलस्य कौ भवति नो भाग्ये सुयोगः, क्षमोऽ-
वाप्तुं भाग्यवतस्तु कौ ह्यवसरोऽमूल्यस्तथा दुर्लभः।
एवं कस्यचिदत्र, दासरघुजी नित्यप्रभोर्देशनाद्
द्वे चत्वारि सहस्रमेव कृतवान् भूयात्तु रूप्यव्ययम्।। १७०८ ।।

तस्यैव त्वियता व्ययेन विषये वङ्गे बभूवाऽमरं
तत्कार्यं, ह्यपि साम्प्रतं प्रतिसमं पानीकहाटीस्थले।
तस्यादःकृतिकस्मृतिं सुमनसश्चूरोत्सवो दापयन्-
नास्ते (व्यक्तिविशिष्टता व्यवहृतौ तत्कर्मणा जायते)।।१७०९।।

लक्षं तेषु दिनेषु तत्र मनुजाश्चूरास्मृतिं तद्रघोः
कृत्वा तादृगुदारतां सुमनसः सत्त्यागवृत्तिं पुनः।
संस्मृत्याऽश्रु तथाहि गद्गदहृदः प्रेम्णि त्यजन्तो रताः
संनृत्यन्ति (भवे हि नौति जनता त्यागप्रधानं नरम्)।।१७१०।।

आसीच्छ्रीलरघुर्महामहिमकः सौभाग्यशाली, तदै-
व श्रीनित्ययतिप्रभुः कथितवां'स्तु त्वं रघोऽद्याऽऽगतः।
पाशे वै विकटे,ऽधुना सहजतो निर्यातुमद्य क्षमो
भूया न त्वमितो-(ह्युदारधनिकः क्वाप्यर्थिनां सम्मुखः)।। १७११।।

सर्वेषां मम भक्तसङ्गिनां मङ्गल्यं चिपटान्नसंयुतम्।
स्थानेऽस्मिंस्तव भोजनीयमा!' (भिक्षूणां विरलो हि पर्वकृत्)।। १७१२।।

बोधन्ते चिपटान्नभोजनमहो ! वङ्गे विहारे तथा
सर्वश्रेष्ठ,मपूर्वमेव लभते स्वादं तयोर्मेलने।
तत्रत्या जनता हि, धान्यमशृतं संकुट्य निर्मीयते
तत्रत्यैश्चिपटान्नकं दधनि तत्क्लिन्नं विधायाऽश्यते।।१७१३ ।।

तत्रत्याश्चिपटान्नकं तु बहवो दुग्धेऽपि वै भुज्यते,
तु श्रेष्ठं चिपटान्नकं दधियुते वै भोजनं सर्वतः।

द्वौ भेदौ च तथाऽस्य - तत्प्रथमतो मङ्गल्यचूरे तत-
श्चूराक्षीरजके, द्वयोर्विलसति ह्यभ्यर्हितं वार्तिकम्-।।१७१४ ।।

यस्मिन् वै चिपटान्नकैर्दधि यथाकामं सिता दीयते,
लोकास्तत्कथयन्ति तद्वसतयो मङ्गल्यचूरे, तथा।
संकोचोऽस्तु यदा पयस्यसितयो,श्चूराधिकत्वे सति
क्लिन्नीकृत्य जले पुनर्दधिसिते तस्मिंश्च चेन्मेलयेत्-।।१७१५।।

तच्चूरादधिनी वदन्ति जनतास्तत्स्था,स्तु चूरां पुराऽऽ-
द्रीकुर्वन्ति जनास्तथाहि बहवो दुग्धे, पुनर्भुञ्जते।
तद् दध्ना सितया समञ्च, भवति स्वादो ह्यपूर्वस्तथा,
भिन्नैर्वस्तुभरैर्हि भिन्नविषये स्वादोऽपि भिन्नायते।। १७१६ ।।

वार्तैकाऽपि च विद्यते, सुमनसां पृच्छा न चूराऽशने,
विप्रः खादति यो न तत्र रचितां कस्यापि हस्तेन वै।
पूर्लीं किं ननु यावदत्र तु फलाहारं हि मिष्टान्नकं,
भुङ्क्ते सोऽपि तथाप्रसन्नमनसा मङ्गल्यचूरेऽथवा-।।१७१७।।

चूराद्रप्से । सत्त्वास्वादः ।। १७१८ ।।

आदेशे सति लब्ध एव रघुजी शीघ्रन्तु नित्यप्रभो-
र्लोकान् प्रेषितवानितो ननु तत,श्चूरा मणाः शोभनाः।
आनीयन्त तु तैः प्रसेवकभरे संभृत्य, चेतस्ततः
प्राप्ताः शीर्षपयस्यदुग्धशतकुम्भाः सेवकास्तत्स्थले।। १७१९ ।।

शुश्रावाऽपि च यः, स एव तरसा द्रष्टुं तु चूरोत्सवं
ह्यायाति स्म निमायिपर्वविषये धावन्, क्षणेनैव तत्।
तत्रैको घटितो महाञ्जनभरः, संदृश्यते सर्वतो
लोकानां शिर एव सम्प्रति शिरो (देहे शिरोमुख्यता)।।१७२०।।

दुग्धं संभृतमस्ति तत्र पुरतः कुम्भेषु संरक्षितं
मङ्गल्यं शतसंख्यकेषु, करका दीर्घाश्च दीर्घा मृदः।
अत्तुं तत्र सहस्रशो ननु धृता मङ्गल्यचूरे, तत-
श्चूरा दुग्धपयस्ययोर्बहु पृथक् क्लिनीकृता वै पृथक्।।१७२१ ।।

द्रव्यं चन्द्रककेसरादि बहु तत्सम्मेलितं गन्धितं
स्थाने दध्नि, च नारिकेलकदलीसन्देशकादीनि तु।
आनीतान्यपि चाधिकं, सहृदयश्चक्रेऽथ नित्यप्रभु-
श्चाह्वानं स्वमहाप्रभोः (प्रभुपुरःस्मृत्या प्रसादोऽशने)।।७२२।।

एवं नित्ययतेः प्रतीतिरभवत्प्रत्यक्षमाप्तो ध्रुवं
चैतन्योऽस्ति निरीक्षितुं सहृदयश्चूरोत्सवं साम्प्रतम्।
भक्ष्यं स्थापितवान् कृते स च पृथक्पात्रेषु गौरप्रभोः,
सर्वाज्ञां प्रददौ समं हरि-हरि-ध्वानैः प्रसादाशने।। ७२३ ।।

पञ्चाशत्परिवेषणे ननु जनाश्चासं,स्तु योऽपि स्थित-
स्तत्रासी,न्निखिलस्य भक्ष्यकरकौ द्वौ द्वौ हि दत्तौ कृते।
स्थानं यत्र च यस्य तत्र मिलितं, स्थित्वाऽथ तत्रैव स
स्थाने सौहृदतः प्रसादमघसत् (स्थाने प्रसादः क्वचित्)।। ७२४।।

सर्वेषामनुभूतिरद्य मिलिता स्वादस्य दिव्यस्य तत्-
स्थानीये चिपटान्नके सुमनसामद्धा विशेषात्मनः।
सर्वेऽत्यन्तमथ प्रसादमघसन् संतृप्य, योऽप्यागत-
स्तस्यैवाऽथ च दीयते स्म परमासायं प्रसादः सतः।।७२५ ।।

नित्योच्छिष्टमधुप्रसादमशनं लेभेऽथ साधू रघु,-
र्गेहे राघवपण्डितस्य रचितं तस्मिन् दिने भोजनम्।
नित्यानन्दकृते, ह्यवाप मिलितः सर्वोऽथ भक्तश्च तत्-
सायं, तद्दिवसेऽथ राघवगृहे तत्रैव तस्थौ रघुः।। ७२६ ।।

नित्यानन्दपदोर्विधाय नमनं साधु द्वितीये दिने
चाज्ञां याचितवान् स दासरघुजी, तस्मै तु नित्यप्रभुः।
श्रीचैतन्यनिमायिपादकमलप्राप्तेर्ददावाशिषं,
लब्ध्वाऽदोऽस्य तथाशिषं च परमो जातः प्रमोदो रघोः।।७२७।।

आह्वद्राघवपण्डितं स च पुनः किञ्चित्तथोपायनं
भक्तानां निजकामनाप्रकटनं चक्रे प्रदातुं रघुः।
तस्मै राघवपण्डितः सह मुदा चादान्निजां सम्मतिं
(शुद्धं सात्त्विकमेव वस्तु निखिलं संकोचिनस्त्यागिनः)।।७२८ ।।

नित्यानन्दयतेस्तदा ननु रघुश्चाहूय भाण्डारिणं
नित्यानन्दकृतेऽथ रूप्यकशतं प्रादात्सुवर्णं तथा।
तोलं सप्त, तथाहि तं कथितवान् - वार्ता प्रभौ स्यात्स्फुटा
ह्येषे,तस्तु भवेम यर्हि चलिताः (संस्कारिणः श्रीत्रपा)।।१७२९ ।।

आहूयाऽथ च सर्वभक्तनिवहं तेभ्यो यथायोग्यमाः !
सर्वेभ्यो दश पञ्च विशतिमयं दत्वा हि दत्वाऽथवा।
पञ्चाशन्ननु रूप्यकाणि रघुजी तूपायनं चाकरो-
त्सर्वेषां पदवन्दनं (पदनतिं कुर्यान्न रिक्तं धनी)।। १७३० ।।

रूप्यं शतं स च रघुः कनकं द्वितोलं
दत्वा गतस्त्वपि च राघवपण्डितस्य।
यानक्षणे, निजगृहं रघुनाथदासः
कृत्वाऽखिलार्चनमथोचितमेवमाप्तः।। १७३१ ।।

देहेनैष परागतस्तु, परमा ! नीलाचले ह्यापयच्-
चेतोऽमुष्य, न दृश्यतेऽस्य तु विना नीलाचलं साम्प्रतम्।
किञ्चि,द्यर्थ्यमुना श्रुतं सुमनसा- गौडीयभक्ताः शतं
ह्युद्देश्येन रथोत्सवस्य सुहृदोऽद्धा यान्ति नीलाचलम्-।।१७३२ ।।

श्रीचैतन्यपदोस्तु पूर्वसदृशं पुर्यां निवासेच्छया
स्थाने मासचतुष्टयं, तु परिधेः पारं तदाऽस्योत्कता।
याता तर्हि, सहाऽखिलैः परमयं गन्तुं तु नीलाचलं
कस्मादस्ति तथा क्षमः स्फुटतया (बन्दी सरेत्किं स्फुटम्?)।।१७३३।।

दिने कदापि तत्त्वयं रहो निलीय गेहतो।
पलायनस्य चोद्यमं करोति (सिद्धिरुद्यमात्)।। १७३४।।

आनीय स्वयमेव चात्र समये प्राप्ते तथोपस्थितं
प्रारब्धं कुरुते सुयोगमखिलं, तत्सन्निधावेकदा।
आचार्यो यदुनन्दनो रघुगुरुः | सर्वा समस्या गुरोः |
संप्राप्तो ह्यरुणोदयस्य समये | द्वारा समाधीयते | ।।१७३५ ।।

तं दृष्ट्वैव स भक्तिभावमनसा चक्रे प्रणामं गुरो-
राचार्यस्य रघु,र्निधाय गुरुजी सस्नेहमूचे करम्।

स्कन्धे तस्य 'कथं न बोधयसि तं भ्राता ! रघो ! पूजकं,
नाप्तस्त्वेव स पूजनाय मम पञ्चभ्यो दिनेभ्यो गृहे-।।१७३६।।

यदि स न कर्तुं प्रभवति तर्हि।
कमपि नियुक्तं कुरु परमेव' ।। १३३७ ।।

मन्दं मन्दमुवाच चाऽथ रघुजी 'नो बोधयिष्याम्यहं
तं' चैतत्स निगद्य सम्प्रति चलन्नासीच्छनैर्वै शनैः।
आचार्येण समं, तथा बहिरभूत्सार्धं बृहद्द्वारतः
स्थानात्तेन स सार्धमेव गुरुणा (निस्तारकः सद्गुरुः)।। १७३८।।

प्रातःकालमथ प्रबुध्य शयिताः स्थाने निशाजागरा
रक्षाकारिजना, न कोऽपि च बहिर्यान्तं रघुं दृष्टवान्।
आलापं विदधद्यदाऽऽपयदथाऽऽचार्यस्य गेहान्तिके,
तर्ह्यूचे स शनै'स्तु साम्प्रतमहं यायां?' रघुः शीलवान्।।१७३९।।

'आमाम्, याहि तु' सम्भ्रमेण सहितं किञ्चिद् बभाषे तथाऽऽ-
चार्यः 'पश्य, न बोधनं त्वपि हि मे वार्तासु वार्तासु तु।
प्राप्तस्त्वं ननु यावदत्र, सुमनो ! गत्वाऽधुना यद् भवे-
त्कर्तव्यं तव कर्म, तानि कुरु हे!' (कर्तव्यमेवाऽऽत्मदम्)।।१७४०।।

अलं, ह्यदस्त्वेव गुरोर्निदेशं
बुद्ध्वा, निजाचार्यपदोः प्रणामम्।
कृत्वा पुनर्मुख्यपथं त्यजन् स
ह्यरण्यमेकं प्रति तून्मुखोऽभूत् ।। १७४१ ।।

आसीत्सम्प्रति, यत्तनौ परिहितं, त्वेकं तदेवाऽम्बरं,
नो पात्रं जलपानसाधनमथो नाध्वव्ययार्थं पणः।
एको,ऽलं ननु पावनं सुमनसश्चैतन्यपादाश्रयः
पाथेयं तु रघो-(र्निमायिपथिको लोके न माय्याग्रही)।।१७४२।।

बुद्ध्वा कल्पतरुं तमेव सुमना निश्चिन्तभावने स
प्रेमी चैकपदीपथेन चलितो, मार्गेऽत्र किञ्चित्त्वपि।
नो छायातपचिन्तनं हि विदधद्, भुक्तं च पीतं विना
तूक्त्वा याति स "गौर! गौर!" विरुदन् (रागो विरागेऽद्भुतः)।। १७४३।।

योऽभूद्यनू डयनेन चैव रघुनाथो वाटिकायामपि
स्वावासप्रसरस्थितौ, न चलितः क्रोशात्ममार्गोऽपि च।
पद्म्यां कर्ह्यपि कौ, स एव रघुजी गोवर्धनस्यैकलः
पुत्रस्तादृशलाडितोऽचलदहो ! सायन्तु यावत्तथा-।। १७४४ ।।

क्रोशान् पञ्च दशाऽद्य, कस्यचिदसौ गोपस्य गेहे तथा
सायं चाश्रयमाप, साम्प्रतमभून्नाऽस्य क्षुधातर्षयोः।
एव ध्यान,मथाल्पदुग्धमददादानीय गोपोऽस्य वै,
पीत्वाऽसौ च तदेव तत्र शयितो (रात्रिर्न यानक्षणः)।।१७४५।।

प्रातः सोऽत्यरुणोदये तु चलितो भूयश्च, तच्चिन्तनं-
दृष्टोऽहं यदि वैष्णवैरपि पुरीश्रीयात्रिभि,स्तद् धृतः।
भूयोऽहं भविता, ततो न रघुजी ग्रामेषु भूत्वा परं
यन्नासीत्पदवीथिशून्यपथतो (मार्गः सतोऽसंकुलः)।। १७४६ ।।

प्रत्यूषे त्विह जात एव च रघोरन्वेषणं साम्प्रतं
ह्यारब्धं, 'रघुनाथकोऽत्र, रघुजी तत्रै'ष एव स्वरः।
तत्स्थाने ननु शुश्रुवे तु परितः, किन्त्वत्र तत्र क्व वा
स्थानेऽस्मिन् रघुनाथजी? (सहृदयस्तादृक्समाजालयः)।।१७४७।।

तत्रैव प्रगतो निमायिभुवि यत्स्थानीयकः स त्वभूत्,
पश्चात्तापमथाऽस्तु चात्र विदध,न्माता बभूवाऽऽकुला।
पत्नी च स्वशिरः प्रहन्ति, विमृजन्नेत्रे पिता विद्यते,
तातः कौ ननु मूर्च्छितो निपतितः (स्नेहाश्रयस्तप्यते)।।१७४८।।

तद् गोवर्धनदासजी तुरगिणश्चाहूय पञ्च क्षणे
तस्मिन्नेव तदीयहस्तदिशया पत्रं शिवानन्दके।
सेने प्रेषितवान् 'पलाय्य रघुजी गेहात्तु सार्धं त्वया
गच्छन्नस्ति पुरीं, निवर्तय हि तं शीघ्रं त्वमीभिः समम्'।।१७४९।।

पत्रं चाऽथ विगृह्य ते तुरगिणः पार्श्वे पुरीयायिनां
प्रापुस्त्वध्वनि साधुवैष्णवनृणां, पत्रं पठित्वोत्तरम्।
स्पष्टं सेनमहाशयो लिखितवान् 'नः सन्निधौ नागतो
दासश्रीरघुनाथजी, न तु गता नस्तेन साक्षात्कृतिः।। १७५० ।।

चेत्पुर्यां मिलितो भविष्यति स नः, कर्ता भवन्तं वयं
क्षिप्रं सूचित'मुत्तरं च भृतका धृत्वा निवृत्तास्ततः।
संजाता हि कुटुम्बिनस्तु निखिलाः शोकाब्धिमग्ना रघो-
र्लब्ध्वा पत्रतथोत्तरं (हि भविनस्तिष्ठिन्ति कावाशया)।।१७५१।।

अत्र श्रीरघुनाथजी पथगतक्लेशस्य किञ्चित्त्वपि
ह्युद्वेगं सुमनास्तथा न विदधत् क्षुत्तर्षशीतोष्णतः-।
मध्यस्थश्च भवन् प्रभूपचरितां नीलाचलश्रीपुरीं
प्राप्तो द्वादश केवलन्तु दिवसैर्मासेन गम्यामहो !।। १७५२ ।।

तत्काले च महाप्रभुः सहृदयः श्रीमत्स्वरूपादिभि-
र्भक्तैः कृष्णकथां तथाहि विदधत्त्वासीन्निषण्णः समम्।
साष्टाङ्गं प्रभुपादयोः प्रणमनं भूमौ शयित्वाऽकरोद्
दूरादेव तदैव दासरघुजी (दूरात्प्रणम्यः प्रभुः) ।। १७५३ ।।

पश्यन्ति प्रति सम्भ्रमेण निखिला भक्ताः समं तं, तथा
कश्चिन्नो रघुनाथदासमधुना तु प्रत्यभिज्ञातवान्।
मार्गक्लान्तिवशात्तथा सुमनसः शीतोष्णताकारणा-
दास्यं तस्य तु पूर्णतः परिणतं (सर्वं वशे तु स्थितेः)।।१७५४।।

शीघ्रं दत्तमुकुन्दकः कथितवांस्तु प्रत्यभिज्ञाय तं
'हे ! गौराङ्गमहाप्रभोऽस्ति रघुजी' ह्यत्यन्तमुल्लासतः।
'आ'मूचे 'रघुरागतो,ऽस्ति महतो हर्षस्य वार्ता' प्रभु-
स्तूक्त्वेदं कृतवान् रघोः सहृदयो ह्युत्थाय चालिङ्गनम्।। १७५५।।

एव श्रीलमहाप्रभोः सुमनसो लब्धे तथालिङ्गने
ह्युच्छिन्नो रघुनाथकस्य निखिलो मार्गश्रमः पूर्णतः।
भूत्वा प्रेम्णि स विह्वलः सहृदयोऽरोदी,त्तदश्रु प्रभुः
प्रोञ्छन्नात्मकरद्वयेन मृदुना मन्दं च मन्दं तथा-।। १७५६ ।।

तन्मूर्ध्नि घूर्णयति हस्त,मथ प्रभोः स
स्पर्शेन दासरघुजी सुखदेन तुष्टः।
चक्रे प्रणाममखिलस्थितभक्तपादे
श्रद्धाभरेण, निखिलैर्ह्युपगूहितश्च।। १७५७ ।।

दृष्ट्वा म्लानमुखं रघोः सहृदयः प्रोचे स्वरूपं प्रभु-
र्गौरः 'पश्यसि न, स्वरूप ! कियता कष्टेन पुर्यामिह।
आयातो रघुकः, पदातिचलनाभ्यासोऽस्य नो विद्यते,
किं कर्माऽऽपतितं भवेदमनसो? (दीनोऽसहायोऽमनाः)।। १७५८ ।।

जानास्येव तु चाऽस्य तातपितरौ, तच्चक्रवर्तिश्रिया
(श्रीनीलाम्बरचक्रवर्तिसुजनः पूर्वाश्रमस्य प्रभोः।
आसीन्मातृपिता) द्वयोः सह तयोः सद्भ्रातृभावात्मको
ह्याचारस्त्वभवन्-(निमायिमनसा सर्वस्य सद्बन्धुता)।। १७५९।।

सम्बन्धेन तथाऽमुनैव ननु मां दौहित्रमेवात्मनो
मन्वातेऽलमिमावुभावपि पुनः कृत्वा,ऽथ संसारिणौ।
घोरौ स्तो, ननु साधुवैष्णवसतां सेवामपि श्रद्धया
कुर्वाते, तु कृते तयोर्भुवि धनं सम्पत्तिरेवोत्तमम्-।। १७६० ।।

वस्त्वस्ति सर्वविधितः, परमार्थतस्तौ
दूरं बहू,परि रघोः परमां कृपां कौ।
चक्रे दयालुभगवांस्तु, ततोऽन्धकूपा-
न्निःसार्य चैतमकरोदिह साधु पुर्याम्'।। १७६१ ।।
ऊचे शनैर्ननु शनै रघुनाथदासः
'श्रीपादयोस्त्विदमहन्तु कृपां निबोधे।
एतत्तु पादयुगलं भुवि वै कृते मे
सर्वस्वमस्ति' (सुमनःसुमनोऽलिसङ्गः)।। १७६२ ।।

चैतन्यः सुमनाः स्वरूपमवदत्स्नेहस्वरेऽथ प्रभु-
'स्त्वय्येवाऽद्य समर्पयामि रघुकं, चाऽस्य त्वमेवाऽधुना।
च भ्राता पितरौ सखा भुवि गुरुः सर्वं तथा विद्यसे,
भावी साम्प्रतमाः! "स्वरूपरघु"मेतं भाषमाणस्त्वहम्'।। १७६३।।
उक्त्वेदं रघुनाथहस्तममना धृत्वा स गोस्वामिनो
हस्तेऽदात्सुमनाः स्वरूपसुहृदो दामोदरस्य प्रभुः।
चक्रेऽथ प्रणतिं स्वरूपपदयोर्भूयो रघु,श्चाकरोत्
तस्यालिङ्गनकं रघोरपि ततो गोस्वामिदामोदरः।। १७६४ ।।
गोविन्दोऽथ शनैस्तदैव भणति त्वाहूय काले रघुं
'नो जाने, मिलितं भवेत्पथि कदा क्वाऽत्तुं, प्रसादं मनाक्।

तस्मादद्धि' रघुर्जगाद 'जलधिस्नान-प्रभुश्रीजग-
न्नाथालोकनयोः प्रसादलभनं कर्ता तथाऽनन्तरम्'।। १७६५ ।।

इदं निगद्यैष गतः समुद्र-
स्नानाय, कुर्वंस्तत एव चाऽऽप।
पुनर्जगन्नाथनिरीक्षणं तं
प्रभोर्निवासं (सुहृदेकवासः) ।। १७६६ ।।

तद्भिक्षाग्रहणे प्रभोर्ननु गते ह्युच्छिष्टमेतद्रघो-
र्गोविन्दोऽथ महाप्रसादमददा,ल्लब्ध्वा प्रसादं प्रभोः।
चैतन्यस्य महाप्रसादमभवत्तत्रैव वासं रघुः
कुर्वन् (व्यक्तिविशेषतोऽत्र फलति स्थानं विशिष्टं सतः)।।१७६७।।
गोविन्दोऽस्य महाप्रसादकं दत्ते नित्य,मसौ च भक्तितः।
तं लेभे,ऽथ विरक्तजीवनं त्यक्त्वैवं गृहमस्ति यापयन्।। १७६८।।

●●

श्रीरघुनाथदासस्योत्कटवैराग्यम्

७२. विरतिर्मानवतासम्पत्तिः।
दाता केवलमिह परमात्मा खिलजीवात्मा भिक्षुः।
वर्गत्रयसाधकगृहविरतः कौ धृतभिक्षावृत्तिः
पुनरात्माऽसक्तस्तत्सेवी, कथमेतत्संन्यासः?।
इह सच्चिज्ज्ञानाशयशून्यस्वात्मानन्दस्पृहिणः
एतन्नश्वरतनुपोषणमिति लम्पटता विषयाणाम्।।

येषां भूषणमस्ति संसृतितले वैराग्यमेवे,दृशः
पुर्यां श्रीरघुनाथदाससुजनो ह्यागत्य पादान्तिके।
गौरस्य न्यवसत्प्रभो,स्तु दिवसान् वै पञ्च धृत्वा रघु-
र्गोविन्देन महाप्रसादमघस,त्पृष्ठेऽमुना चिन्तितम्-।। १७६९ ।।

'एवं नास्ति महाप्रसादलभनं नित्यं त्वितश्चोचितं,
सन्त्यत्र प्रभुसन्निधौ हि विरतास्त्वन्येऽपि सद्वैष्णवाः।
भिक्षां ते निखिला निजां ननु निजां गृह्णन्ति साधु स्वयं,
चानेयाऽपि मया स्वयं त्विह निजा भिक्षा पुरीवासिना।। १७७०।।

भिक्षाया यदि याचने भवति मे भूत्वाऽत्र वैरागिणः
संकोचो, मम तर्हि गौरमनसो वैराग्यमेवं तु धिक्'।
रुन्धे स स्म महाप्रसादलभनं संचिन्त्य चैतत्प्रभो-
रावासात् (सुमनोऽन्तरे प्रभवति स्थाने मनीषा स्वयम्)।।१७७१ ।।

रात्रौ भृत्यगणाः परं हरिजगन्नाथस्य पुष्पाञ्जलेः
श्रीपुर्यां शयनं प्रभोर्भगवतस्ते कारयित्वा तथा।
यान्ति स्वस्वगृहं, भवन्ति बहवो निःस्वास्तथान्नार्थिनः
सिंहद्वारि तु तानितस्ववसनान्तास्तत्स्थिता भिक्षुकाः।।१७७२ ।।

बह्वल्पं विभजन्ति तेषु भृतका निस्सृत्य तन्मन्दिरात्
किञ्चिच्छेषमथ प्रसाद,मपि चाल्पाल्पं तथायात्रिणः।
तेष्वाऽऽनाय्य हि वण्टयन्ति बहवो मूल्यात्प्रसादं, पणं
कश्चित्त्वर्धपणं ददात्यपि (धनी दानी त्ववश्यं भवेत्)।।१७७३।।

दृश्यं तत्समयस्य चातिकरुणाभावप्रदं जायते
तत्स्थानीयमहो !, लषन्ति निखिलास्ते भिक्षुका'स्त्वेव मे-।
सर्वादौ भवतु प्रसादलभनं' यस्मात्प्रसादे च्युते
लब्धं यस्य न, तस्य वण्टनकरो भूयः किमेव ध्रुवम्-।।१७७४।।

दातुं चाऽऽनयते कृते, तु परितस्ते वेष्टयन्ति ह्यतो
भृत्यं भिक्षुगणाश्च वण्टनकरं, यस्याऽत्र लब्धं तथा।
लब्धं तस्य, पुनः क्रमेऽत्र ननु योऽसौ वञ्चितो वञ्चितः,
प्रायोऽल्पं बहु किन्तु तत्र भवति प्राप्तं तु सर्वात्मनाम्।।१७७५।।

तेष्वेवैष च भिक्षुकेषु दलितां ह्यावृत्य कन्थां निजां
दासश्रीरघुनाथकोऽपि भवति स्थाने स्म तिष्ठन्, समम्।
सर्वैः कोऽपि विनाऽर्थनं यदि ददौ, जग्राह तद् वा च्युतं
कस्मिंश्चिद् दिवसे, तदा सहृदयोऽसौ रिक्तमेवाऽऽगतः।।१७७६।।

अन्यभिक्षूपमम्। नाऽऽक्रमीद् वण्टके।। १७७७ ।।

चैतन्योऽथ महाप्रसादलभने नो दृष्टवान् यर्हि तु
द्वावेकं दिवसौ रघुं, सहृदयस्तत्तु प्रभुः पृष्टवान्।
गोविन्दं 'लभते प्रसादमिह नो गोविन्द ! दासो रघुः,
स त्वश्नाति कुतो'-(ऽशनं भुवि विना मर्त्यस्थितिः सम्भवा?)।। १७७८।।

'स्थित्वाऽद्य स सिंहद्वारीतरभिक्षुः।
वा याचति भिक्षां स्थाने प्रभुगौर!'।। १७७९ ।।

श्रुत्वेदं वचनं बभूव सुमनास्त्वत्यन्तमेव प्रभुः
सन्तुष्ट,श्च हृदो मुदं प्रकटयन् गोविन्दमाहाऽथ सः।
गोविन्दाऽस्ति तु वस्तुतो ननु रघू रत्नं, हि वैराग्यमा-
स्तस्मिन् सत्यमथास्ति (मानवरतिर्भावानुचेष्टाकृतिः)।। १७८०।।

वैराग्ये सति तिष्ठतीह न सतां मानप्रतिष्ठेन्द्रिय-
स्वादादेर्ननु चिन्तनं सुमनसां लोकत्रपायास्तथा।
त्यागी सन्नपि यो भवे परमुखापेक्षी च बोभूयते,
श्वानाभोऽस्ति स तु (स्वतन्त्रहृदये व्यक्ती रसः स्थायिनः)।। १७८१ ।।

स्वां वृत्तिं सततं निमायिहृदयो रक्षेत्स्वतन्त्रां तथा
त्यागी, भूषणमस्ति तस्य परमं भिक्षार्थनेनाऽशनम्।
एवा, ऽन्यान्नभराभिलाषधरणं वै भारिकं दूषणं
(भूषा निस्स्पृहता, स्पृहाऽनियमता दोषः सतां त्यागिनाम्)।। १७८२ ।।

यस्त्यागी स्वरसावशीकरणके भूत्वा न शक्त,स्तथा
संकोचो ननु भिक्षणस्य च गृहे त्यक्तेऽत्र यस्यात्मनि।
सोऽस्ति त्विन्द्रियकिङ्करो, ननु ततो दूरं भृशं विद्यते
कौ मार्गः परमार्थगो -(ऽत्र परमो ह्यर्थो नृणां स्वस्थितिः)।। १७८३ ।।

वैरागी सततं तु नामजपनं कुर्वन् भवे,द्यत्त्वपि
स्याल्लब्धं समयेऽत्र भिक्षणदिशा रूक्षं च शुष्कं तथा।
तस्मिन्नेव विधाय सौहृदयुतं निर्वाह,मेतद् वपुः
श्रीमत्कृष्णकथासुकीर्तनकृते भूयाद् धरन् केवलम्।। १७८४ ।।

सुन्दरमेतत्कर्म तु भूरि । सोऽकृत दासश्रीरघुनाथः'।।१७८५।।

किञ्चिच्छ्रीरघुनाथशान्त्यनुभवस्त्यागेन चैतावता
किञ्चिच्चाऽथ भवन्नभूद्, बुभुजिरे गेहे सहस्रं जनाः।
यस्य ह्याश्रयतोऽद्यपक्षदिवसप्राग् यः सहस्रं नृणां
स्वाम्यासीद् विहितः, सदैव भृतकास्तिष्ठन्त एवाऽभवन्-।।१७८६।।

पार्श्वे यस्य निबद्धहस्तयुगलाः, स्थाने स एवाऽधुना
सिंहद्वारि मजूमदारतनयः कान्तस्तु तिष्ठन् रघुः।
कुर्वन् वण्टनकृत्प्रतीक्षणमहो ! मुष्ट्येकसिद्धान्नहे-
तोर्होरा ननु यावदत्र भवति, क्वाप्येष तु क्वापि च-।।१७८७।।

तद्वद्याति हि रिक्तमेव, च जलं पीत्वैव किञ्चिद् विना
भुक्त्वैवाऽथ निजासने सहृदयो गत्वा शयानोऽयते।
अप्राप्ते सुमना दयालुपुरुषो भक्ते चणं कर्हिचित्
कश्चिद् दापयते पणाऽर्धपणकै,स्तानेव दासो रघुः-।।१७८८।।

चर्वित्वा शयनेऽयते,ऽस्य च पुरश्चारूत्तमव्यञ्जन-
स्थालं भृत्यगणोऽद्यपक्षदिवसप्राक्कम्पमानस्तथा।
एतत्त्रासवशाच्चकार, यदहो ! कस्मिन्नपि क्वापि नाऽ-
त्यन्तं स्यात्पतितं पुनस्तु लवणं, कश्चित्पदार्थोऽधिकम्-।। १७८९ ।।

न क्लिन्नस्तु भवेत्स्थित,स्त्विह रघुः पुर्यां स एवाद्य च
स्थाने शुष्कचणान् जलेन कुरुते सार्धं गलाधस्तले।
धन्यं तेऽस्ति बलं तु, वाह ! ननु रे ! वैराग्य ! निर्माति यत्
संसारेऽत्र महाविलासिनमपि त्वद्धा तितिक्षुं परम्।। १७९० ।।

एकस्मिन् दिवसे चकार रघुजी गोस्वामिनोऽभ्यर्थनां
श्रद्धेयस्य विनम्रभावसहितं 'केन प्रभुर्हेतुना?।
आह्वन्मामिह संविसर्ज्य तु गृहद्वारं, ममास्ति स्पृहै-
तज्ज्ञातुं महती- (हि बोधलभनं जिज्ञासुतापृष्ठतः)।। १७९१ ।।

किं कार्यं तु मया, लषामि हि निजं कर्तव्यमस्मि प्रभो-
र्ज्ञातुं' सोऽधिकमेव दासरघुजी ह्यासीत्तु संकोचवान्।
वार्तां कामपि वै रघुः स्वमुखतो निस्सारयामास न
श्रीगौरस्य पुरस्तु कर्हिचिदपि (ह्रीमान्नरो नैष्ठिकः)।।१७९२ ।।

उत्थात्य प्रति तं कदापि नयने नो दृष्टवान्, यत्त्वभूद्
गौरे तत्र निदेशनं, सहृदयो गोस्वामिना वा,ऽथवा
गोविन्देन रघुर्निदेशयति तं गौरं, स्वयं सम्मुखो
भूत्वा पृच्छति नो स किञ्चन वचो (नम्रो ह्यसाधरणः)।। १७९३।।

एकस्मिन् दिवसे महाप्रभुरभूत्सार्धं च गोस्वामिना
संलापं विदध,त्तदैव रघुजी त्वागत्य चक्रे नतिम्।
श्रीचैतन्यपदोः, स्वरूपसुहृदो भूयश्च गोस्वामिनः
कृत्वा वन्दनमासितः समुचिते मौनं तु पृष्ठे स्थले।। १७९४ ।।

ब्रूते गौरहरिर्हसं'स्तव रघुस्त्वेषोऽतिसंकोचवान्
गोस्वामिन्ननु वर्तते, त्विह मया सार्धं वदत्येव नो।
न ज्ञातं मम चापि-किन्नु विदधत्स्थानेऽत्र तिष्ठत्ययं,
त्वां सर्वं कथयन् भवेन्ननु वचो, ब्रूहि त्वमेवाऽस्य हे!'।। १७९५।।

उत्थाप्याऽथ तथैकजानु रघुजी तेन स्वकं दक्षिणं
संसज्याऽस्ति कपोलमेष विहिताधोदृष्टिरत्राऽऽसितः।
मौनं, संकुचितो यथा प्रकरणे स्वेनैव सम्बन्धिते
चारब्धेऽप्यधिकं बभूव स रघुः (संकोचिता सत्त्वतः)।।१७९६।।

स स्वाङ्गेष्वलषत्प्रवेशयितुमाः ! संकोचहेतोः, शनै-
र्गोस्वामी तु शनैर्जगाद 'कुरुते पुर्यां महान्तं रघुः।
एतस्यां पुरुषार्थमेष, भवता वार्ताविधौ जायते
संकोचोऽस्य, निमायिना कथितवान् भावेन मां ह्यो रघुः-।।१७९७।।

(दृष्ट्वा पुना रघुमुखं स तमेव चाऽऽहा-) ऽऽम्,
भ्रातः ! प्रभौ कथयितुं त्वमवोचथा ह्यः।
यन्मां, त्वमेव तदमुं त्विह पृच्छ साक्षा'-
(ज्जिज्ञासुतां सहृदयः स्वयमेव जल्पेत्)।। १७९८ ।।

चैतन्यः पुचकारं कुर्वञ्जल्पति गौरः।
'आम्, भ्रात,र्वद वार्तां किं मां प्रष्टुमिहैच्छः?'।।१७९९ ।।

कृत्वाऽधश्च शिरो मनाग्, विवशताभावेन किञ्चिद्रघु-
स्तस्थौ सम्प्रति मौनमेव, नहि स त्वब्रूत किञ्चित्त्वपि।
ऊचे तर्हि महाप्रभुः सहृदयो'ऽच्छं ब्रूहि' गोस्वामिनं
'किं प्रष्टुं लषति, त्वमेव' (रसनास्थानं सुहृन्मौनिनः)।।१८००।।

ऊचे विरम्य च विरम्य ततः स्वरूपः
"किं मोचितं मम गृहं?" कथयन्नथाऽऽसीत्।
"कर्तव्यमस्ति मम किं?, मम किन्नु कार्यं?,
ह्येतानि पृच्छतु वचांसि निमायिगौरम्"।। १८०१ ।।

श्रुत्वेदं हसति प्रभुः सहृदयो, लक्ष्यं च कृत्वा रघुं
ब्रूते 'त्वद्गुरुरेष एव तु रघो ! गोस्वामिदामोदरः।
एतस्यैव समर्पितस्त्वमसि मे, मत्तोऽप्यसौ चाधिकं
जानात्यध्वनि साध्यसाधनरहस्तत्त्वं तु दामोदरः ।। १८०२ ।।

प्रष्टव्यं भवतीह मेऽपि किमपि स्थाने वचस्तर्ह्यहं
पृच्छामि त्वमुमेव' मौनमभवच्चोक्त्वा निमायी त्वियत्।
भूयो जल्पति तु स्वयं स्वयमयं 'चेत्त्वत्स्पृहैतादृशी
चैवास्ति, त्वहमेव किञ्चन रघो! स्थाने ब्रवै त्वां तदा-।। १८०३।।

शास्त्राणाममुमेव सारमबुधं त्वद्धा समेषामहं-
संसारे सुखसाधनं वरवरं श्रीकृष्णसंकीर्तनम्।

तन्नामस्मरणं तथैव सुहृदामस्त्यत्र, नामस्मृते-
रेव प्रेमतथोपलब्धिरवनौ शक्या नृणां वर्तितुम् ।। १८०४ ।।

नाम्नोऽद्य स्मरणं कौ किं भूत्वा करणीयम्।
एतत्त्वेव वचोऽलं बोधव्यं मनुजानाम्।। १८०५ ।।

प्राप्यं प्रेम भवेऽत्र यस्य, सुहृदाऽद्धा साधुसङ्गोऽमुना
सर्वादौ करणीय एव, भजनं श्रीमत्प्रभोः कीर्तनम्।
सत्सङ्गः स्मरणं निमायिभगवल्लीलाश्रिया,मेष वै
धर्मोऽस्ति प्रमुखो,ऽत्र पालनमहो ! कर्तव्यमेषां सता।।१८०६।।

सम्बन्धस्य विशेषतोऽत्र धरणं लोकैश्च संसारिभि,-
स्तैर्वार्ताकरणं तथा बहु पुनर्लोकप्रवादस्य च।
अन्येषां स्तवनं च निन्दन,मदो वै लोकधर्मस्तथा
निर्दिष्टो मुनिभि,र्ह्यदोविषयतो रक्ष्यो निजात्मा सदा।।१८०७ ।।

पूर्णत्वेन परस्य दोषगुणयोर्वार्ताविधानं परि-
त्याज्यं, चेत्कथनीयमेव किमपि स्यात्तत्परेषां भवे।
वक्तव्यो गुण एव, किन्त्ववगुणे न ध्यानमेवार्पये-
दन्येषां (भुवि केवलं सुमनसां ध्यानं भवेदात्मनि)।। १८०८ ।।

कामं कोऽपि भवे कियानपि महान् ज्ञानी च मानी तथा
ध्यानी किं नहि पण्डितोऽस्तु, स यदाह्यन्यस्य निन्दावचः।
आस्यात्सारितवांस्तदैव पतितो भूतः स बोध्यः सता
(स्याल्लोभः परसंस्तुतौ भुवि, गुणाख्यानं हितं लोभनम्)।।१८०९।।

यत्रान्यस्य तथायथार्थगुणसंस्तुत्याः परं निस्सृतं
स्थाने वाक्यमिदं 'त्वजी ! ह्यवितथं सर्वं परं, किन्त्विदम्।
तस्मिन् दूषणमेकमस्ति' वदितुस्तत्रैव तद्दूषणं
चित्ते तन्मनुजस्य वै निविशते (दोषप्रवेशोऽसति)।। १८१० ।।

दोषाणां परमाणुरस्ति यदहो ! सूक्ष्मोऽधिको, मानसे
यावत्ते न विशन्ति, नैव भवितुं निन्दा परेषां क्षमा।
ताव,न्निन्दनकर्मणीह भवितुं तर्ह्येव शक्ता वयं,
दोषाणां परमाणवो ननु यदाऽऽयास्यन्ति नो मानसे।।१८११ ।।

कर्ता निन्दनमा ! यथा ननु यथाह्यन्यस्य, वृद्धिं तु ते
गन्तारः परमाणवो ननु तथा चित्ते त्वदीये तथा।
त्वच्चित्तस्य पवित्रतां सरलतां ज्ञानार्जनस्य स्पृहां
ते त्वत्साधुचरित्रताप्रभृतिकाः संकोच्य वृत्तीः सतीः-।। १८१२।।

तत्राऽज्ञानविमोहयोः स्फुटतया साम्राज्यकस्थापनां
कर्तारस्तददोषदर्शिभवनं सद्वैष्णवानामिदम्।
मुख्यं कर्म निमायिनां प्रथमतः, सेवा विधेया सदा-
साधुर्भागवतश्च योऽस्ति भगवद्भक्तो महात्मा पुमान्।।१८१३।।

भोगानां विषयात्मनामभिरतिर्मानप्रतिष्ठे तथा
चैतत्सर्वमिहोच्यते बुधजनैः कौ कामतृष्णाऽखिलैः।
एतेभ्यः सततं विरक्तपुरुषस्तिष्ठेत्तथारक्षितः
(सौभाग्येन विरक्तिमेति पुरुषो, निर्वेदभावोऽन्तिमः)।।१८१४।।

एवं भौतिकसर्ववस्तुनिवहाल्लोके विरक्तात्मनां-
लीलानां श्रवणं सदा भगवतो नाम्नां गुणानां तथा।
जापः कीर्तन,मेतदेव निखिलं कर्तव्यकर्माऽस्ति कौ
सर्वेषां परमार्थपान्थसुहृदां (कर्म, स्मृतिर्यत्प्रभोः)।। १८१५ ।।

संसारमोहो न कदापि चैतत्-
कर्मक्रियाणां भवतीह लोके।
संक्षेपतो वैष्णवमुख्यमुख्य-
क्रिया दिशामीह निमायिनस्ते- ।। १८१६ ।।

न ग्राम्यवार्ताश्रवणं तु कार्यं
कदापि, यद्ग्राम्यकथाश्रुतेर्हि।
चित्ते तदेव स्मृतिमेति वाक्यं,
संयुज्यते यद्भजने न चित्तम् ।। १८१७ ।।

ग्राम्यकथा वाच्याऽपि न, वार्तातो विषयव्यासक्तजनानाम्।
तद्विषयासक्तं ननु चित्तं जायत एवाऽस्यां वसुमत्याम्।।१८१८ ।।

अच्छाच्छं नहि खाद्यं वस्तु स्वादु, यतोहि।
तादृग्वस्तुभिरेत्युत्कर्षं लोलुपताऽद्धा।। १८१९ ।।

अच्छं च भासुरमथाधिकनिर्मलं वै
नो धार्यमम्बर,मदोधरणाद्यतोहि।
आयाति हि व्यवहृतौ लघु कृत्रिमत्वं,
वृत्तिस्तथा भवति तेन बहिर्मुखी च।। १८२० ।।

विनाऽभिमानेन च वर्तितव्यं
सदा,ऽभिमाने हृदि चागते तु।
नश्यन्ति सर्वाणि हि साधनानि
(क्षेत्रेऽङ्कुरोत्पत्तिरिह त्वतप्ते) ।। १८२१ ।।

स्थातव्यं सततं भवेऽत्र ददता मानं परेषां कृते,
सम्मानः परमानदानकृतितः सञ्जायते ह्यात्मनः।
सम्मानो निखिलोत्तमोऽत्र भुवने सम्मान एवात्मनः,
सम्मानो भवतीह चाऽस्य पुरतस्तुच्छातितुच्छोऽखिलः।।१८२२।।

सर्वत्र सर्वासु दशासु संततं
कुर्वन् भवेत्स्वप्रभुनामसज्जपम्।
नाम्नो जपेन प्रभुपादपद्मयो-
रुदेति रागः पुरुषार्थपञ्चमः ।। १८२३ ।।

शुद्धश्रेष्ठाहृदा भवेत्सदा कुर्वञ्छ्रीभगवत्समर्चनम्।
अद्धा मानसिकं तु पूजनं वै सर्वोत्तमपूजनं प्रभोः।। १८२४ ।।

एतद्धर्मविधातुः साधोरेव तथैवम्।
शक्या श्रीप्रभुपूर्णप्रेमाप्तिर्भवितुं कौ'।। १८२५ ।।

श्रीचैतन्यमहाप्रभोः सुमनसः पीत्वोपदेशामृतं
जिज्ञासामयसाध्यसाधनरहोयाथार्थ्यतृष्णा रघोः।
पूर्णत्वेन तथा समाप्तिमगम,त्सोऽहर्निशं तद्दिनात्
कुर्वन्नामसुकीर्तनं ननु बभौ (सत्कीर्तनं जीवनम्)।। १८२६ ।।

यामेभ्योऽष्ट स रात्रिवारयोर्यामे सम्प्रति सार्धसप्तके।
कुर्वन्नामजपं तथार्धकं सुप्तौ यापयतीह भोजने ।। १८२७ ।।

तस्मिन्नेव निमायिनस्तु समये गौडीयभक्ता अपि
श्रीपुर्यां मिलिता निमायिसुहृदः पृष्ठे तथाऽऽयायिनः।

स्थित्वा मासचतुष्टयं सुमनसो देशं निवृत्ताः पुन-
र्गौडं पूर्वसमानमेव (गृहिणो लोके स्वनीडाश्रयाः)।। १८२८ ।।

पुर्या यर्हि मजूमदारधनिकः शुश्राव गोवर्धनो
भक्तानां सुहृदां निवर्तनसमाचारं, तदैव क्षणे।
संप्रेष्य स्वजनं पिता स च शिवानन्दान्तिके प्रत्ययं
स्नेही कारितवान्निजात्मजरघो- (रात्मा पितुर्ह्यात्मजः)।।१८२९।।

गत्वा सेनमहाशयस्य निकटेऽपृच्छत्स नत्वाऽथ तं
'स्वामी प्रच्छितवान् भवन्तमिह मे- पुत्रो मदीयो रघुः।
अस्मादस्ति पलायितो ननु पुरीं, स्थानेऽमिलन्न त्वसौ
तत्पुर्यां भवतो?' (निमायिवसतिस्थानं निमायिस्थलम्)।।१८३०।।

ऊचे सेनमहाशयो'ऽधिकमहो ! पुर्यां तितिक्षू रघुः
सर्वस्मात्तु विरक्तवैष्णवभरा,त्तन्नाम जानन्ति च।
सर्वे तत्र, तदेव चाऽऽप्य रघुजी, यल्लभ्यते भिक्षणे
सिंहद्वारि, दिवानिशं स कुरुते श्रीकृष्णसंकीर्तनम्-।।१८३१ ।।

गौरप्रभुपदोः पार्श्वे सकुशलम्।
स्थाने हि निवसन् सोऽस्ति प्रियरघुः'।। १८३२ ।।

सप्तग्राममथ प्रगम्य स जनो ह्यूचे निजं स्वामिनं
वृत्तान्तं निखिलं 'मदीयसुतकः स्थानेऽद्वितीयो रघुः।
द्वारे मन्दिरकस्य तिष्ठति तथा मुष्ट्येकभक्तार्थ'मे-
तद्वृत्ते श्रुत एव केवलधनज्ञाता पिताऽयं रघोः-।। १८३३ ।।

शोकेनास्ति तु 'हाय ! हाय !' विदध,त्कुं क्लेदयन्ती तथा
माता चाश्रुभिरस्ति, चात्मजकृते ह्यन्तेऽथ दत्वा पिता।
स्नेही रूप्यचतुःशतं च भृतकं त्वेकं तथा पाचकं
स्थाने सेनमहाशयस्य निकटे संप्रेषयामास सः ।। १८३४ ।।

ऊचे सेनमहाशयः सहृदयः 'शीतस्य कालोऽधुना,
यूयं यास्यथ कुत्र?, पञ्च चतुरो मासांस्तथा तिष्ठत।
यास्यामस्तु वयं यदा प्रभुपुरीं, तर्ह्येव यूयं समं
पार्श्वे स्वामिरघोश्चलिष्यथ (सतो लब्धिर्मवेत्स्वामिना)।।१८३५ ।।

आयातश्च निवृत्य तूत्तरमिदं श्रुत्वाऽथ भृत्यो, यदा
सज्जः सेनमहाशयो हि चलितुं चाभूद् द्वितीये क्रमे।
वर्षादौ, सह रूप्यकैरपि तदा चेलुश्च ते सेवकाः
सार्धं तेन (महाशयेन सरलं लक्ष्याप्तिरत्रात्मनाम्)।। १८३६ ।।

तेऽथ प्राप्य पुरीं गदन्ति निखिलं वृत्तं रघुं तत्पितु-
र्भृत्या, द्रव्यमथ स्वसङ्गविधृतं ह्यानीतवन्तश्च यत्।
ऐच्छंस्तान्यपि दातुमस्य, तु परं द्रव्यस्य साधू रघुः
स्वीचक्रे ग्रहणं न (साधु सुहृदां द्रव्यं निमायी प्रभुः)।।१८३७।।

जाते श्रीरघुनाथास्वीकारेऽपि हि भृत्याः।
तत्रैवाऽस्थुरमी च द्रव्येणाऽथ च सार्धम्।। १८३८ ।।

'द्रव्यं ह्यागतमेव यर्हि, न कथं द्वारा तदस्य प्रभोः
संसेवैव तथा क्रियेत' रघुणा साध्वात्मना चिन्तितम्।
एतत्त्वेव विचिन्त्य मासि स रघुर्वारद्वयं चाऽकृत
श्रीचैतन्यनिमन्त्रणं, प्रभुजगन्नाथस्य चानीय तु-।। १८३६ ।।

गौरं चारु च चारु भोजयति तं वस्तु प्रसादस्य, च
श्रीगौरोऽस्य निमन्त्रणेन सुमना गत्वाऽस्य मोदाय च।
कृत्वाऽऽयाति स भिक्षणं सहृदयो, ह्येवञ्च वर्षद्वयं
कुर्वन् गौरनिमन्त्रणं रघुरभूद् (द्रव्यं हि साधुव्ययम्)।। १८४०।।

तस्मिन् किं व्यय एवाऽऽसी,त्प्रायो ननु मासे।
आणाः केवलमष्टौ यान्ति स्म व्ययतां हि।। १८४१ ।।

एकस्मिन् दिवसे निमायिरघुणा वै चिन्तितं 'यर्ह्यहं
गेहद्वारकुटुम्बवर्गमखिलं तत्याज, चक्रे तथा।
सर्वस्मात्पितृमातृबन्धुजगतः सम्बन्धविच्छेदमाः !,
किं श्रीगौरनिमन्त्रणं त्वपि पुनः कुर्यां पितू रूप्यकैः?।।१८४२।।

तुष्टोऽल्पमेव विभवेत्तु निमन्त्रणेनाऽ-
नेन प्रभु,र्मम मुदे कुरुतेऽत्र भिक्षाम्।
आगत्य सोऽथ' सुहृदः प्रभुगौरधाम्नो
रुन्धे निमन्त्रणकृतिं स विचिन्त्य चैतत्।। १८४३ ।।

गोस्वामिनं पृच्छति चैकदाऽसौ
गौरो ' न जानेऽत्र वचः किमस्ति?।
निमन्त्रणं मे न रघुर्विधत्तेऽ-
धुना स्वरूप ! (प्रियचिन्तनं सत्)।। १८४४ ।।

क्वापि यातस्तु नो । रुष्टतां ते रघुः?'।। १८४५ ।।

गोस्वामी गदति 'प्रभो ! ननु रघुः स्थाने भवेच्चिन्तयन्-
"को लाभः सुहृदो निमन्त्रणविधानेन प्रभोर्मायिनाम्।
द्रव्येणाऽस्य निमायिनो विषयिणां स्थाने जनाना,मतः
सन्तुष्टो न भवन् भवेत्प्रभुरपि स्थाने ममाप्यात्मनि-।।१८४६।।

संकल्पश्च विकल्पस्तिष्ठन्नस्ति" विचार्य।
त्वेतद्, भिक्षणकार्यं ते गौराङ्ग ! जहौ सः' ।। १८४७ ।।

'ब्रूषे तूचितमाः ! स्वरूप !' सुमना ब्रूते 'जनानां रजो-
भावोऽत्राध्वनि वर्धते विषयिणामन्नाशनेन' प्रभुः।
'वर्तन्ते परमाणवो विषयिणामन्ने जनानां तथाऽऽ-
काङ्क्षाणां (भुवि काङ्क्षतीह जनता प्रायः सुखं दैहिकम्)।।१८४८।।

लोको भोजयति स्पृहाविरहितः सांसारिकः स्वात्मजा-
भर्तारं त्वपि नो, सकामपरमाणोर्जायते धीरपि।
दुष्टा, दुष्टधिया क्षमं न भवितुं श्रीकृष्णसंकीर्तनं
(ध्येयः कीर्तनतो वरेण्यभगवान्, यो नः प्रचोद्याद्धियम्)।।१८४९ ।।

यावत्सम्भवमस्तु तद्, विषयिणां तु श्रीमतामन्नतो
लोकानामिह कार्यमेव भुवने स्थाने निजस्यावनम्।
यन्नद्यावधि चाऽभवं प्रियरघोस्तु प्रेमसंकोचतो,
यद्भिक्षार्थनिमन्त्रणं स रुरुधे, चक्रे महच्छोभनम्'।।१८५० ।।

उक्त्वेयत्प्रभुगौरः शंसां त्यागविरक्त्योः।
कुर्वन्नस्ति रघोश्च स्वे गोस्वामिनि बन्धौ।। १८५१ ।।

सम्प्रत्यत्र रघोः प्रतीतिरयते दुष्टा यथा याचने
सिंहद्वारि मनाङ् निमायिमनसः प्रस्थाय, लोका गताः।
बाहुल्येन तथाऽमुना परिचिता,स्तत्सुन्दरं सुन्दरं
बह्वस्मै ददते पदार्थ- (मधिकं प्रीणात्यभिज्ञातता)।। १८५२ ।।

चारुस्वादुपदार्थभक्षणविधौ चक्रे निषेधं प्रभुः,
सिंहद्वारकभिक्षणं त्वपि ततः सोऽरुन्ध साधू रघुः।
सार्धं भिक्षुभिरद्य स प्रभुहरिक्षेत्रं तु गत्वा ततो
नीत्वाऽऽयाति हरिप्रसादमशनं (साधोः प्रसादोऽशनम्)।। १८५३ ।।

सायं नित्यमथ प्रभुः सहृदयो याति स्म दृष्ट्वा रघुं
सिंहद्वारि तथास्थितं, द्विचतुरो वारान् यदा तं प्रभुः।
नाऽपश्यद्रघुनाथदासममनास्तत्र स्थितं, पृष्टवान्
गोविन्दं स तदैकदा-(ऽतिसरले पात्रे ममत्वं सतः)।। १८५४।।

'गोविन्दाऽद्य रघुं नो सिंहद्वारि लभेऽहम्।
भिक्षां सम्प्रति जाने नो कस्मात्कुरुते सः?'।।१८५५ ।।

'सिंहद्वारकभिक्षां सम्प्रत्येष रुरोध।
क्षेत्राद् गौर! तु वारे गत्वाऽऽयाति विभिक्ष्य'।।१८५६।।

तत्सन्तुष्टिरवे प्रभुः कथयते'ऽदः कर्म सर्वोत्तमं
चक्रे साधु रघु,स्तथाऽस्ति गणिकावृत्तिस्तु भिक्षेच्छया।
सिंहद्वारि पुनः स्थिति,र्भगवतः कुर्वंश्च नाम्नो जपं
ह्यास्येनाऽस्तु तु काममेव, सततं चित्ते त्वदस्तिष्ठति-।।१८५७।।

कश्चित्सम्प्रति दायकः सहृदयस्त्वायातु, पार्श्वे यदाऽ-
सावायास्यति तर्हि दास्यति परं किञ्चिन्न किञ्चिद् ध्रुवम्।
अच्छं, नैष ददौ, त्वयन्तु नियतं ह्येव प्रदाता मना,-
गुद्गच्छन्त्यलमेत एव हृदये भावाः प्रतीक्षात्मनाम्।। १८५८ ।।

क्षेत्रे शोभनमस्ति, तत्र समये गत्वा गृहीत्वाऽऽगतः
श्रीकृष्णस्य च कीर्तनं तु विदधद् भूया'दथैतत्क्षणे।
गोस्वामी समुपागतः, प्रभुरहो ! दृष्ट्वैव तं भाषते
ह्युल्लासस्वरके- (मुदोऽतिशयिता बन्धौ क्षणे ह्यागते)।। १८५९।।

'आमामसि त्वमधुना ननु साधु चाप्तः
कस्मात्क्षणे समुचिते, ह्यधुना प्रसङ्गः।
आसीच्चलंस्तव रघोस्तु, कथं स सिंह-
द्वारस्य सम्प्रति रुरोध निमायिभिक्षाम्?'।। १८६० ।।

दामोदरः कथयते शनकै'र्विचित्रोऽ-
द्धा सोऽस्ति, यत्र विरतौ ननु दृश्यतेऽस्य।
न्यूनत्वमल्पमपि, तां कृतिमेष रुन्धे
तत्रैव-(साधुहृदये निजदोषदृष्टिः)।। १८६१ ।।

सिंहद्वारकभिक्षावृत्तावल्पकदोषः।
तेन स्यान्ननु दृष्टः' (सूक्ष्मं द्रष्टरि भाति)।।१८६२ ।।

'सन्तुष्टोऽस्म्यधिकोऽहं तस्यैतैस्तु वचोभिः।
तं त्वाकारय सत्यं, क्वास्ति स्नेहसुपात्रम्?'।।१८६३ ।।

गोविन्दो रघुनाथदासमथुनैवाहूय गत्वाऽऽगतो,
गौरश्रीलमहाप्रभुं सहृदयं नत्वा च गोस्वामिनम्।
कुर्वन् सोऽथ शनैः शनैर्भगवतो नाम्नस्तथोच्चारणं
चैकस्मिन् सुमनाः स्वरूपदिशि तु स्थाने न्यसीदद्रघुः।।१८६४।।

शीघ्रं प्रभुरन्तश्चोत्थाय तु किञ्चित्।
उत्थाप्य स वस्त्वायातोऽत्र गृहीत्वा।। १८६५ ।।

आगत्य प्रभुरासितः प्रियरघोरेवान्तिके, कारणा-
त्संकोचस्य रघुस्तथाधिकमपि स्थानेऽभवत्कुञ्चितः।
तत्केशे रुचिरे शनैर्ननु शनैर्हस्तं प्रभुर्घूर्णयन्
'सन्तुष्टोऽस्मि रघोऽधिकं त्वयि बहु त्वेव प्रिया'ऽवोचत।।१८६६।।

'किञ्चिद् दातुमहं लषामि ननु ते भूत्वा प्रसन्नः, परं
दातुं त्वस्ति किमेव चान्यदिह मे निष्किञ्चनस्यान्तिके।
सम्पत्तिर्मम सर्वतोऽधिकमहो ! या विद्यते वल्लभा,
सन्तुष्टो भविता निमायिहृदयस्तामेव दत्वाऽद्य ते-।।१८६७ ।।

यातोऽभूच्च सरस्वतीपदयुतश्रीशङ्करारण्यजी
श्रीवृन्दाविपिनं, निवृत्य सुमना वृन्दावनान्मे ददौ।
चैतन्यस्य कृते प्रसादसदृशीमेताञ्च गुञ्जास्रजं
श्रीगोवर्धनपर्वतस्य च शिलामेतां निमाय्यात्मनः ।। १८६८ ।।

जानन्नेव भवेस्तु कौ गिरिवरो गोवर्धनः पर्वत-
स्तु श्रीकृष्णशरीरमेव सुहृदां साक्षान्मतं विद्यते।
श्रीकृष्णे ननु चान्तरं किमपि नो गोवर्धने वर्तते
(गोपालत्वगुणे तथाहि समता गोवर्धनत्वस्थितौ) ।। १८६९ ।।

एतच्चारुशिलामतः स्वनयनाम्भोभिस्तु वर्षत्रया-
दद्याऽस्मि स्नपयं,स्तु मद्विकलतावस्थासु चेयं शिला।
कुर्वाणा मम शीतलं हि हृदयं चाभू,च्च मल्लोचनेऽ-
दःस्पर्शेन तु पावने समभवतां, धन्यं ललाटं ह्यभूत्।। १८७०।।

मम बहुवारं हृदि परमं तु।
इयमिह शैत्यं ह्यदित वियोगे ।। १८७१ ।।

गुञ्जास्रग् बहु वल्लभा भगवतश्चासी,त्स गोवर्धना-
दुत्पाट्य द्रुमसार्धमेव भगवानुत्पाट्य गुञ्जा गिरेः।
कृत्वा तत्स्रजमाः ! स्वयं परिदधौ, तद्गोपगोपालका-
नामप्यात्मसुसङ्गिनां सहृदयोऽद्धा थापयामास च।। १८७२ ।।

तच्चैतां भजनक्षणे परिधरन्नस्म्यत्र, वस्तुद्वयं
मेऽत्यन्तं प्रियमेतदस्ति तु, रघोऽमू चार्पयामि त्वयि।
कुर्वंस्त्वं भव साधु सात्त्विकमदोगोवर्धनश्रीशिला-
पूजां साम्प्रतिकक्षणा- (च्छुभकृते सर्वं मुहूर्तञ्छुभम्)।। १८७३।।

साधोः सात्त्विकपूजने भगवतोऽद्धा चैककुण्डीजलं
(पर्याप्तं) तुलसीदलं, भवति चाऽपेक्षा त्वियद्वस्तुनः।
स्नानं कारितमम्बुना च तुलसीपत्रं तथाऽर्पितं,
चक्रे साधु च दण्डवत्प्रणमनं (सेवाकृतिः सन्नतिः)।।१८७४ ।।

साधोर्विधानमिह सात्त्विकसेवनस्य
त्वेतत्तथास्ति, तुलसीजलयोरभावे।
श्रद्धायुतप्रणमनादपि केवलं सत्
शक्नोति कर्म चलितुं (रस एव भावः)।। १८७५ ।।

हे रघो ! संधर। आत्मनो वस्तुनी'।। १८७६ ।।

लब्ध्वा तत्प्रभुदत्तवस्तुयुगलं मोदावधिर्नो रघो-
रासी,त्सोऽलमदोबहुप्रभुकृपाभारेण नम्रो यथा।
जातः, स प्रभुपादयोः पुलकितैरङ्गैस्तथैवाऽमितं,
साष्टाङ्गं प्रणतिं चकार, च तथा सद्भक्तिभावात्मना-।।१८७७।।

तद्वस्तुद्वयमर्चनीयमपरं हस्तौ प्रसार्याऽऽत्मनः
स्वीचक्रे ननु दीनभिक्षुसदृश,स्तस्माद् दिनात्पूजयन्।
सोऽभूत्तां रघुजी शिला,मथ ददौ दामोदरोऽर्चाकृते
तस्यैकैकवितस्तिवस्तुयुगलं काष्ठस्य चैकासनम्-।। १८७८ ।।

एकं मृज्जलपात्रकं त्वपि ददावानीय चास्मै, तथाऽ-
दोद्वारा कुरुते रघुर्भगवतोऽर्च्चा सात्त्विकं पूजनम्।
बह्वासीद्रघुनाथदाससुहृदो वैराग्यमस्योत्कटं
(वैराग्यं परमं तथाऽऽत्मजगतः कस्यापि पुण्यात्मनः)।।१८७९।।

श्रुत्वाऽस्य विरतेर्वार्तां न भविता।
साधारणनृणाञ्छ्रद्धैव भुवि तु ।। १८८० ।।

कन्थामेव दधावयन्तु दलितामेकां हि वस्त्रेष्वलं,
चान्यद् वस्त्रमसौ तु किञ्चिदपि नो कन्थातिरिक्तं दधौ।
होरां केवलमस्वपीन्निशि रघुर्वा सार्धहोरां, न चेत्,
कुर्वन्नस्ति निरन्तरं भगवतो नामस्मृतिं केवलम्।। १८८१ ।।

जिह्वास्वादमसौ रघुर्ननु गृहे त्यक्ते कदाचित्पुन-
र्जग्राहैव न, भिक्षणेऽस्य मिलितं रूक्षं च शुष्कं तथा।
मिष्टं वा कटु वस्तु किञ्चिदपि य,त्कृत्वाऽखिलं मिश्रितं
भुङ्क्ते (मिश्रणतोऽखिला सदसतोः संसारलीला प्रभोः)।।१८८२।।

अस्याऽद्य घोरविरतेश्च कथां शृणोतु
त्वेकाद्भुतां, परिचयो भविता यतोऽस्य।
निष्किञ्चनत्व-सहनव्रतता-तितिक्षा-
जिह्वानियन्त्रणदृढव्रततादिकस्य।। १८८३ ।।

क्षेत्रादानयति ह्ययं भगवतो मध्याह्नकाले रघुः
स्वां भिक्षां, परतन्त्रतेव ददृशे किञ्चित्तु तस्मिन्नपि।
भाण्डारी सुहृदोऽस्य चाधिकमहो ! भिक्षां ददानोऽभवत्,
तस्मिन् संग्रहभावमन्यमपि चाऽपश्यत्तथाऽसौ रघुः।।१८८४ ।।

तस्मादेष रुरोध साम्प्रतं क्षेत्रादन्नकयाचनं रघुः।
एतज्जाठरगर्तपूरणं चान्यस्माद् विधितः करोत्ययम्।।१८८५ ।।

ज्ञातं पूर्वत एव चास्ति सुहृदां-पुर्यां प्रसादौदनं
पण्यागारभरे जगत्प्रभुहरेर्विक्रीयते, चापणे।
यर्हि द्वित्रिदिनं तथाहि वणिजां भक्तं न विक्रीयते,
तर्ह्येतत्तु विशीर्यते (नियमितो लोकेऽवधिर्वस्तुनः)।। १८८६ ।।

तच्छीर्णं ननु तण्डुलं च वणिजो मार्गे क्षिपन्ते गवां
हेतो,रस्ति तु पार्श्वमेव विषयात्तैलङ्गदेशस्ततः।
तैलङ्गीयसुदीर्घसुरभिस्तोमास्तु पुर्यामितो
भ्राम्यन्तो नितरां भवन्ति च ततोऽद्धा कामेवाऽमिताः।।१८८७।।

एतासां भरते तथाहि जठरं चैवंविधेनौदने-
नैवाऽस्यां पुरि, सन्ति तत्र बहवः पुर्यां तथाह्यापणाः।
सिंहद्वारसमीप,मोदनभरस्तत्रैव विक्रीयते,
तत्रैवौदनकं क्षिपन्ति वणिजः शीर्णं च तेऽनादरात्।।१८८८ ।।

तच्छीर्णं जठरे भृते सुरभयोऽप्याऽऽदन्ति न ह्योदनं,
सायं भक्तमसौ तदेव रघुजी चोत्थाप्य नीत्वाऽयते।
तस्मिन् वारि बहु प्रदाय च पुनर्धावत्यसौ, तद्बहि-
श्चक्रेऽयं बहुशीर्णशीर्णकणिकाश्चित्वाऽथ चित्वा रघुः-।।१८८९ ।।

ये केचिच्च भवन्ति तण्डुलकणाः शेषास्तथाच्छाः, समं
तानेवा ! लवणेन सोऽथ कतिचिद् भुक्त्वाऽपिबद् वारि च।
पर्याप्तं, समयं त्वनेन विधिनाऽसौ यापयन् विद्यते
(को जानाति?, कथं कथं सहृदयैः सद्भिः क्षणः क्षीयते)।।१८९० ।।

एतत्कर्म तु सर्वं रात्रावेव स चक्रे।
यत्कोऽपि प्रभवेन्न द्रष्टुं (साधु, निमायी)।। १८९१ ।।

एतं भक्तमिदं तथैकदिवसेऽदन्तं रघुं दृष्टवान्
गोस्वामी, स विहस्य जल्पति 'रघो ! किं ह्येकलस्त्वेकलः।
एवं स्वादुपदार्थमत्ति, दिवसेऽप्येकत्र दत्ते न मे'
किञ्चिल्लज्जितभावतोऽभवदसौ मौनं निमायी रघुः।।१८९२ ।।

गौरस्तु स्वकभक्तवृन्दजगतामेकैकवार्ताऽनुसं-
धानं धारयति स्म, पृच्छति दिने गोविन्दमेकत्र सः।

'हे गोविन्द ! मम प्रतीतिरयते- गृह्णाति भिक्षां रघु-
र्न क्षेत्रादपि साम्प्रतं, स कुरुते भिक्षां क्व पुर्यामिह?'।। १८९३।।

गोविन्दो रघुनाथदासनिखिलोदन्तं प्रभुं चोक्तवान्,
श्रुत्वाऽऽनन्दतथावधिः सुमनसस्तस्थौ न गौरप्रभोः।
तस्मिन्नेव दिने जगाम सुमनाः सायं निवासे रघो-
स्तत्स्वाद्वन्नमदन्नभून्ननु तदा मन्दं स मन्दं रघुः।। १८९४ ।।

मन्दं मन्दमथ प्रगम्य सुमनाः पृष्ठेऽस्य तस्थौ प्रभुः,
किं ज्ञातं रघुनाथदाससुहृदः–पृष्ठे स्थितो मेऽस्ति कः?।
यर्ह्येवैष रघुर्ददौ निजमुखे ग्रासं, तदैव प्रभु-
गौंरो जल्पति 'किं स्वरूपरघुक ! - (स्यात्स्वादु सम्बोधनम्)।।१८९५ ।।

रुद्धं मे सुमनो ! निमन्त्रणमपि, प्रच्छन्नमेवं तथा
स्थाने सुन्दरसुन्दरं स्वयमहो ! वस्त्वत्सि चापि स्वयम्।
निःशब्दं, न ददासि किञ्चिदपि मेऽतो'ऽदो निगद्य प्रभु-
स्तत्पात्रात्तरसैकमुष्टिममना भक्तं निजास्येऽकरोत्।। १८९६।।

त्वत्यन्तं करुणस्वरे ननु रुदन् ('हाहे'ति कुर्वन्) रुदन्
ब्रूते चाऽथ रघुः करद्वयधृतस्वात्मीयतत्पात्रकः।
'एतत्किं कुरुते प्रभो ! ननु भवान्, हे नाथ ! योग्यं तु ते
नेदं- (साधकसाधनं हि विविधं तत्तद्दशाभेदतः)।। १८९७ ।।

उच्छिष्टं गलितं प्रभोऽन्नमिदमाः ! पापस्य मां भागिनं
भुक्त्वा कारय मा' द्रुतं द्रुतमथ ग्रासं मुखे संभृतम्।
खादन् गौरमहाप्रभुर्ननु परं ग्रासं ग्रहीतुं पुन-
र्दुद्राव प्रति तं (महापुरुषताव्यक्तिस्तथाकर्मभिः)।। १८९८ ।।

गोस्वामी त्वियति क्षणे कलकलं श्रुत्वाऽप्यथोपस्थित-
स्तत्राऽऽगत्य, विलोक्य दासरघुतो भक्तं हरन्तं प्रभुम्।
जग्राहाऽस्य करं स तत्कथयते 'योग्यं निमायिप्रभो !
नह्येतद् भवतो'-(ऽत्र साधनसमाधानं ह्यसिद्धात्मनाम्)।।१८९९।।

(तद्भक्तमेष निगिरन्निगिरंस्तु शुष्कं)
ब्रूते प्रभुः (कठिनतासहितं) 'स्वरूप !।

सत्यं तवाऽपि कथयामि-तथाऽस्ति यावान्
स्वादस्त्वमीषु ननु साम्प्रततण्डुलेषु-।। १६०० ।।

तावान्न मिलितः कस्मिंश्चिदपि मे।
आजीवनमिहाऽद्धा वस्तुनि भुवि'।। १६०१ ।।

एवं वत्सलताऽस्त्यहो ! प्रकृतितो भक्तेषु धन्या, प्रभो !
स्वादोऽयं भवतो निमायिसुहृदो वैराग्यकस्यैव हे !।
हे गौराङ्ग ! तथा त्वमेव सुमनः ! प्रेमप्रदानं जग-
ज्जीवानां कुरुषे-(निमायिहृदयोऽद्धा प्रेमदाता भवे)।।१६०२ ।।

तन्मग्नो भवसि त्वमेव च पुनः कृत्वा रसास्वादनं,
हे चैतन्य ! निमायिभावसुमनो ! लीला विचित्राऽस्ति ते।
त्वन्मायाऽस्त्यमिता, वयं तनुभृतः पापात्मके कर्मणि
ह्याबद्धा, विषयं परं वरवरं कौ मानयन्तः सुखम्-।।१६०३ ।।

लीलारहस्यमिहं किं तव बोद्धुमेव
क्षुद्राः क्षमा भुवि भवेम तथाहि जीवाः।
यस्योपरीह कुरुषे स्वकृपां, स पारं
संसारतो जलधितो झटिति प्रयाति।। १६०४ ।।

एवं महात्मसुमना रघुनाथदास-
श्चैतन्यपद्मपदयोः परमानुकम्पाम्।
वर्षाणि षोडश तथाऽनुभवन् स पुर्यां
तस्थौ - (पुरी जगति कृष्णनिमायिवासः)।। १६०५ ।।

त्यागविरक्तियुतञ्च प्रेममयं निरवद्यम्।
एव तथा विधमेवं जीवनकं क्षपयंस्तु।। १६०३ ।।

'गीतानन्तरसं' निमायिचरितं सौहार्दसारात्मकं
काव्यालङ्कृतिरीतिवस्तुविगुणं सद्भावसम्मेलनम्।
श्रीचैतन्यमहाप्रभुप्रियमनःसंसारिपाथेयकं
भाषायां पथिकेन साधुघटितं गीतं परं संस्कृते ।। १६०७ ।।

गौरप्रीतिहृदा निमायिमनसा चैतन्यभावात्मना
दत्तब्रह्मचरस्य गौरचरितं चास्वाद्य मुग्धाऽऽस्थया।

गौरोऽनन्तरसोऽत्र धीरललितः सद्विप्रलम्भाश्रयो
गीतोऽनन्तरसैर्निरन्तरतयाऽनन्तो 'निमायी' रसः।। १६०८ ।।

एतत्पूर्णमगात्तुरीयघटनं षड्भिर्दिनैः संयुतै-
र्गीतानन्तरसस्य चाऽस्य नवभिर्मासैरिदानीं तथा।
सर्वश्रीलहरिप्रबोधनतिथौ मासे सिते कार्तिके (२००३ ई.)
श्रीस्वप्नेश्वरसन्निधिस्थमिहिरागारस्थले पूर्णतः ।। १६०६ ।।

तल्लोकोत्तरवर्णनापटुकवेः कर्माऽस्ति काव्यं, भवेन्-
निर्दोषं ध्रुवमेव साम्प्रतगुणालङ्कारशोभाञ्चितम्।
दोषं, काव्यगुणं, बुधो न सहते, साहित्यिकोऽवेक्षते,
सद्भावस्फुरणं तु काव्यमपरं भावप्रमातृप्रियम् ।। १६१० ।।

श्रीमन्महाप्रभुपवित्रचरित्रधारा
भागीरथीह विततता प्रभुदत्तसद्भिः।
संसारसागरतरङ्गविमूर्च्छितान्त-
श्चैतन्यदा सहृदयस्य बुधो न कस्य।। १६११ ।।

जयतु निमायिककृष्णचेतनो
जयतु सदा प्रभुदत्तसत्तमः।
जयतु रसोऽमितगीतदीपितो
जयतु कृती प्रकृतिप्रमातृकः ।। १६१२ ।।

हरिप्रबोधिनी
४/११/२००३ ई०